Impartible property :—Whatever else is acquired without detriment to paternal estate, viz. gifts from friends and on marriage, that does not belong to the co-sharers (p. 448). He who recovers property descending hereditarily but snatched away from the family, should not give it to his co-sharers, as also the gains of his learning. But if one co-sharer recovers *land* descending hereditarily that was at one time lost, the other co-sharers get it according to their respective shares after giving to the recoverer a fourth part. Wealth acquired by valour and that acquired on marriage, and the favour bestowed by the father are all impartible. The priestly fees, a field, a vehicle, cooked food, water and women—these are not to be divided among kinsmen.

Exclusion from inheritance :—The impotent, the outcast, the born blind, the born deaf, the lunatic, the idiot, the dumb and persons destitute of a limb are excluded from inheritance but are entitled to lifelong maintenance. But the legitimate sons of these are entitled to a share and the daughters to maintenance till they are married.

The author then deals with seventeen other titles of law, civil and criminal, but we do not propose to deal with them here inasmuch as all of them except the topic of inheritance described above have become obsolete in modern times, being superseded by the territorial Acts of British India.

## ACKNOWLEDGMENTS.

My acknowledgments are due in the first place to Dr. Benoytosh Bhattacharyya, M.A., Ph.D., the learned Director of the Oriental Institute, Baroda, for full co-operation, helpful suggestions and many acts of kindness; to Mr. Johan van Manen, C.I.E., General Secretary to the Asiatic Society of Bengal, for lending me the MS. of Rājadharmakaustubha of the Govt.

' brother born of same father and mother '. But curiously enough Dr. Amareswar Thakur in his ' Hindu Law of Evidence ' (p. 67, l. 12) and MM. Dr. Ganganath Jha in his ' Hindu Law in its sources ' (Vol. I, p. 107, l. 19) translate the above Sanskrit words by the English word ' uterine ', which, according to the Concise Oxford Dictionary, means ' born of same mother but not same father '.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Collection and for allowing me to consult printed books deposited in the Society's Library ; to Mr. P. V. Kane, M.A., Ll.M., Advocate, High Court, Bombay, for many helpful suggestions ; and to Mr. Chintaharan Chakravarti, M.A., Lecturer in Sanskrit, Bethune College, Calcutta, for his occasional reading of proofsheets and for making valuable suggestions.

BHATPARA, BHABATOSH BHATTACHARYA.
*February*, *1935*.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# BIBLIOGRAPHY AND ABBREVIATIONS.


| | |
|---|---|
| Dandaviveka .. | of Vardhamāna (edited by MM. Kamalakrṣṇa Smṛtitīrtha in the Gaekwad's Oriental Series, No. LII, 1931). |
| Dattakacandrikā .. | of Kuvera (Calcutta edition). |
| Divyatattva .. | of Raghunandana (Calcutta edition of MM. Candīcaraṇa Smṛtibhūṣaṇa). |
| K. .. .. | Katyāyana-smṛti-sāroddhara by P. V. Kane, Bombay, 1933. |
| Manu .. .. | Manusmṛti. |
| Mit. .. .. | Mitākṣarā of Vijñāneśvara, a commentary on Yajñavalkyasmṛti. |
| Nāradasmṛti .. | edited by Dr. Jolly, Bibliotheca Indica Series, 1885. |
| O.R. .. .. | rotograph of the MS. Wilson, 221 of the Prajāpālanadīdhiti of the Rājadharmakaustubha, belonging to the Bodleian Library, Oxford. |
| V.M. .. .. | Vyāvahāramayūkha of Nīlakaṇṭha (edited by P. V. Kane, Poona, 1926). |
| V.R. .. .. | Vivādaratnākara of Caṇḍeśvara (edited by MM. Kamalakrṣṇa Smṛtitīrtha, Bibliotheca Indica Series, 1931). |
| Yaj. .. .. | Yājñavalkyasmṛti. |

---

| | |
|---|---|
| क .. .. | MS. No. 5463 of the Govt. Collection of the Asiatic Society of Bengal. |
| ख .. .. | MSS. Nos. 1868 and 1869 of the Oriental Institute, Baroda. |
| ग .. .. | MSS. Nos. 372 and 1867 of the Oriental Institute, Baroda. |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

घ .. .. Copy of the Tanjore MS. for the first two dīdhitis and of the Bikaner MS. for the third dīdhiti.

ङ .. .. Copy of the Kashmir MS. for the third dīdhiti only.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

CONTENTS.


| | पत्राङ्क |
|---|---|
| अग्निविधिः ... ... | ४१८ |
| अन्यान्यगृहलक्षणम् ... | ११८ |
| अभिषेककालः ... ... | २३७ |
| अभिषेकप्रयोगपुराणानि ... | ३१८ |
| अभिषेकप्रयोगः ... | ३४० |
| अभिषेकात् पूर्व्वं कर्त्तव्यम् ... | २३९ |
| अभिषेकोत्तरकृत्यानि ... | ३७१ |
| अस्वामिविक्रयप्रकरणम् ... | ४६८ |
| आरामप्रतिष्ठाप्रयोगः ... | २२५ |
| आश्वलायनोक्तशान्तिः ... | १६५ |
| ऐन्द्रीशान्तिः ... ... | २९९ |
| ऐशानयागः ... ... | २७० |
| कात्यायनोक्तशालाकर्म्म ... | १६८ |
| कार्य्यदर्शनम् ... ... | ३८२ |
| कीर्त्तनादौ फलविशेषः ... | ३६४ |
| केशवादिमूर्त्तिलक्षणम् ... | ४२ |
| कोशविधिः ... ... | ४३२ |
| क्रीत्वानुशयः ... ... | ४७२ |
| गृहे भद्रासनम् ... ... | १२६ |
| ग्रहयागः ... ... | २७१ |
| ग्रामादिप्रतिष्ठाविधिः ... | १०२ |
| चलार्चास्थापनविधिः ... | २२९ |
| जन्मनक्षत्रे अभिषेकः ... | ३७८ |
| जलविधिः ... ... | ४२४ |
| जलाशयाद्युत्सर्गप्रयोगः ... | १८४ |
| जलाशयोपघाता शुद्धिः ... | २२४ |
| ज्योतिर्व्विल्लक्षणम् ... | २५८ |
| तडागादिप्रतिष्ठा ... ... | १७१ |

| | पत्राङ्क |
|---|---|
| तण्डुलविधिः ... ... | ४३५ |
| तप्तमाषविधिः ... ... | ४३६ |
| तुलादिव्यप्रयोगः ... ... | ४१४ |
| दण्डपारुष्यम् ... ... | ४९० |
| दत्ताप्रदानिकम् ... ... | ४७० |
| दायविभागव्यवहारपदम् ... | ४४२ |
| दिव्यमातृका ... ... | ४०६ |
| दुर्गपरिमाणम् ... ... | ११७ |
| दुर्गभेदाः ... ... | ११४ |
| दुर्गलक्षणम् ... ... | ११३ |
| द्यूतसमाह्वयः ... ... | ४८६ |
| धर्म्मविधिः ... ... | ४३९ |
| नक्षत्रयागः ... ... | २९३ |
| नक्षत्रावाहनमन्त्राः ... | २७७ |
| निर्ऋतियागः ... ... | २९७ |
| पट्टमहिषीलक्षणम् ... | २४९ |
| पुरोहितलक्षणम् ... | २५५ |
| पुष्याभिषेकः ... ... | ३७५ |
| प्रकीर्णकम् ... ... | ४९४ |
| प्रतिज्ञास्वरूपम् ... ... | ३८७ |
| प्रतिमालक्षणम् ... | ३५, ५४ |
| प्रत्यधिदेवतावाहनम् ... | २७५ |
| प्रत्यधिदेवतास्थापनम् ... | २८० |
| प्रासादलक्षणम् ... | ४९ |
| प्रासादादिलक्षणम् ... | १७ |
| फालविधिः ... ... | ४३८ |
| भाषानिर्णयः ... ... | ३९० |
| मण्डपादिलक्षणम् ... | ३० |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

| | पत्राङ्क |
|---|---|
| मन्दिरलक्षणम् ... ... | २५१ |
| मूर्त्तिप्रतिष्ठाविधिः ... | ७६ |
| रजकदण्डः ... ... | ४६२ |
| राजगृहविन्यासः ... | १२४ |
| राजलक्षणम् ... ... | २४३ |
| राज्ञः श्रीस्तवपाठः ... | ३६६ |
| राज्याधिकारिनिर्णयः ... | २३४ |
| लिङ्गलक्षणम् ... ... | ४५ |
| लेख्यस्वरूपनिरूपणम् ... | ४०५ |
| वज्रलेपः ... ... | ५३ |
| बलिप्रदानमन्त्राः ... ... | १५६ |
| वाक्पारुष्यम् ... ... | ४८८ |
| वापीकूपोत्सर्गविशेषः ... | २२२ |
| वाप्यारामादिप्रतिष्ठाविधिः ... | ६१ |
| वास्तुप्रकरणम् ... ... | १ |
| वास्तुयागप्रयोगः ... ... | १४८ |
| विक्रीयासम्प्रदानम् ... | ४८० |
| विशेषविधिः ... ... | १८० |
| विषविधिः ... ... | ४२६ |
| वेतनादानप्रकरणम् ... | ४७६ |
| व्यवहारमातृका ... ... | ३६३ |
| शान्तिप्रयोगः ... | २६४ |
| शुश्रूषाख्यव्यवहारपदम् ... | ४७४ |
| संवत्सराभिषेकः ... ... | ३७६ |
| सम्भूयसमुत्थानम् ... | ४८१ |
| संविद्व्यतिक्रमप्रकरणम् ... | ४७७ |
| साक्षिस्वरूपनिरूपणम् ... | ४०१ |
| सामान्यनिवासस्थानम् ... | १११ |
| सीमाविवादनिर्णयः ... | ४६१ |
| स्तेयम् ... ... ... | ४८२ |
| स्त्रीसंग्रहणम् ... ... | ४८४ |
| स्वामिपालविवादप्रकरणम् ... | ४६६ |
| होमप्रयोगः ... ... | १५४ |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ॐ नमो गणेशाय ।

# राजधर्म्मकौस्तुभः ।

प्रतिष्ठादीधितिः ॥ १ ॥

## वास्तुप्रकरणम् ॥ १ ॥

दिवाकर-निशाकरावनल[1]विद्युतस्तारका
यदीयपरतेजसा जगति सत्प्रकाशक्षमाः ।
यदात्म[2]सुखलेशतः सुखिन आह वेदोऽपरान्
धनञ्जयजयप्रदं जयति सूतवेशं महः ॥ १ ॥

यदीयमुखचन्द्रतः स्रवति साधुशब्दामृते
सभास्थितबुधाः सदा दधति चित्तबुद्धिं मुदा ।
सपाणिनिपतञ्जलिप्रभृति सूरि[3] पुण्यात्मनां
कदाचिदपि यद्धृदाऽखिलकृतिर्न सन्त्यज्यते ॥ २ ॥

मनुमुखमुनिवरवचसामनु-
सारतः[4] सदा सदाचरणैः ।
कुर्व्वन्नवनिगतानामहतां
महतां धियं वशमातनुते[5] ॥ ३ ॥

---

१ घ पुस्तके —निशाकरौ पवन— । २ घ पुस्तके यदात्म— ।
३ घ भूरि । ४ ग सरणं । ५ ख वशे तनुते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

युद्धाय दुन्दुभिर्यस्य क्षण आद्ये समाहतः[१] ।
द्वितीये परकन्याधिलाभा[२]मोदेन हन्यते ॥ ४ ॥

प्रयुक्तिशक्तिर्न किलाऽस्ति शास्त्र-
प्रसङ्गिणामित्युदितं हि भाट्टैः ।
तदन्यथाकारि नृपस्य यस्य
स्थित्या सभायामपि तादृशेषु ॥ ५ ॥

स्वविषयगतसर्व्वाकाङ्क्षितार्थार्पकः सन्
न भजति परवाक्याधीनतां स्वार्थसिद्धौ ।
सततमपि हृतो[३] यो न्यायपादैश्चतुर्भिः
सदसि भुवि सदोदाह्रौ(?)यतेऽतो य एकः ॥ ६ ॥

या धीर्वेदशिखोद्भवा परपदप्राप्त्यै[४] प्रसिद्धा नृणां
भित्वा सा बल[५]पञ्चकोषनिचयं तस्यैव चेत्कस्यचित् ।
मन्ये धन्यतमन्तु यस्य नृपतेः खड्गो विनिःसारितः
कोशाद्वैरिदृशां गतो विषयतां धत्ते ह्यसूंस्तत्पदे ॥ ७ ॥

गन्तुं नार्हन्ति यत्र क्षणमपि मनुजास्तत्र देशे स्थितान् यो[६]
दूरीकृत्याखिलारीन् निजभुजविलसच्चण्डकोदण्डबाणैः ।
[७]श्रीमद्रामेशतीर्थप्रभृतिसुरजनस्थानसद्दृक्षशक्तीः[८]
स्पष्टीकर्त्तुं पुराणं परनगरगतः स्कान्दखण्डं जगाद[९] ॥८॥

---

१ क समाह्वितः । २ ख लाभे । ३ क हृतः ।
४ ख प्राप्तौ । ५ ख बत ।
६ ख यान् । ७ घ श्रीमद्भीमेशतीर्थ— ।
८ क ग पुस्तकद्वये सुरजलस्थानसद्दृक्षशङ्कां । ९ ख जद्दार ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नैवातिदेशगतिरस्ति यदीयमन्त्रे
स्यादन्यथात्वमतिरच[1] कथं परेषाम् ।
ऊहेन वाधविषयान्तु तदीयवार्त्तां
विद्वज्जनाः श्रुतिगतामपि नो सहन्ते[2] ॥ ९ ॥

वाजवाहदुरचन्द्र-भूपते-
स्तस्य भूरियशसे प्रतन्यते ।
राजधर्म्मविषयोऽच कौस्तुभो-
ऽनेकदीधितियुतः सुधीसुखः ॥ १० ॥

पुराणतन्त्रस्मृतिशिल्पिशास्त्र-
पयोऽम्बुधेर्म्मन्थनतोऽनवद्यः[3] ।
दधत्[4] सतां लब्धतदर्थयोगः
सञ्चिन्तितः संस्त्रतुरः पुमर्थान् ॥ ११ ॥

यैरर्थैः सम्मतानीह[5] यानि कार्य्याणि भूपतेः ।
अनन्तेनाऽच कथ्यन्ते तानि तल्लक्षणैः सह ॥ १२ ॥
दीधितिः कौस्तुभस्यास्य भविष्यति चतुर्व्विधा ।
प्रतिष्ठाविषयाऽचाद्या तत्प्रयोगपराऽपरा ॥ १३ ॥
राज्याभिषेकविषया तृतीया दीधितिस्ततः ।
प्रजापालनयुद्धादिशिष्टार्था[6] च ततः परा ॥ १४ ॥
तचाद्यदीधितावाद्यं वास्तुप्रकरणं मतम् ।
प्रासाद-प्रतिमा-लिङ्ग-लक्षणार्थं[7] ततः परम् ॥ १५ ॥

---

१ क स्यादन्यथा त्वभवदच । २ ख इसन्ते ।
३ ख अभवद्यः । ४ क दद्यात् ।
५ ख सङ्गतानीह । ६ क ग इष्टार्था ।
७ क्वचित्—लिङ्गलक्षणाख्यं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रासादादिप्रतिष्ठायाः कथनार्थं तृतीयकम् ।
मूर्त्ति-लिङ्गप्रतिष्ठार्थं[1] चतुर्थञ्च ततः परम् ॥ १६ ॥
पञ्चमे ग्राम-खेटादिप्रतिष्ठा च सलक्षणा ।
दुर्गराजगृहादेश्च षष्ठे लक्षणमीरितम् ॥ १७ ॥
षड्भिः प्रकरणैरेवं युता दीधितिरादिमा ।
सतां हृदि समस्तार्थप्रकाशाय प्रजायताम् ॥ १८ ॥

तत्र पूर्व्वदीधित्यग्रे कलिकृत्यनिरूपणप्रस्तावे विष्णुधर्म्मोत्तरवचनमुदाहृतम् ।

देवतावेश्मपूराणि नगराणि कलौ युगे ।
कर्त्तव्यानि महीपालैः स्वर्गलोकमभीप्सुभिः ॥ १९ ॥

तत्र नगरलक्षणं पञ्चमे प्रकरणे वक्ष्यते ।

तत्करणञ्च यथाऽभिनवरूपेण सम्पादनं, तथा स्वस्वामिकत्वेनापि, तत्रापि स्वीकरणमिति करोतेः प्रयोगात् करोति-पर्य्यायस्य भावयतेः[2] कर्म्मत्वेनोत्पाद्यस्येवाप्यविकार्य्यसंस्कारस्यापि शास्त्रकृद्भिर्निरूपणाच्च ।

देवतावेश्मप्रासादा इहैव वक्ष्यमाणलक्षणाः, तद्ग्रहणेन तन्निर्म्माणप्रभृति तत्तद्देवताप्रतिष्ठान्तं कर्म्मोच्यते ।

अतएव श्रीभागवते प्रतिष्ठाफलत्वेनैव सर्व्वप्रकारकभूस्वाम्यमुक्तम् ।

प्रतिष्ठया[3] सार्व्वभौम्यं सद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं त्रिभिर्म्मत्साम्यतामियात् ॥२०॥

इति ।

---

१ ख प्रतिष्ठाख्यं । २ क भावापत्तेः ।
३ ग प्रतिष्ठायां ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अतएव नगरग्रहणमपि खेटखर्व्वटाद्युपलक्षणं तत-श्चापि नगरादिनिर्म्माणसिद्धेः । तत्र तत्र स्वस्वामिकत्वं वा चिकीर्षुं राजानं प्रति कलौ निमित्तदेवतावेश्म-पूर्व्वकत्वं विधीयते । स्वर्गतिफलसङ्कीर्त्तनन्तु शास्त्रान्तर-प्राप्तविशेषेण विशिष्टफलानां तत्तत्प्रकरणे वक्ष्यमाणाना-मनुवाद इति ।

अभिषेकेण भुवः स्वाम्यमिच्छताऽप्यवश्यं तत्पूर्व्वं प्रासादादिनिर्म्माणं कर्त्तव्यम् । अतस्तदुपक्रमा एव राज-धर्म्माः प्रदर्श्यन्ते ।

नन्वत्र [1]राजपदेनावेष्टिपूर्व्वपक्षन्यायेन राज्ये प्रवृत्त उच्यते । उत सिद्धान्तन्यायेन जातिमात्रम् ।

नाद्यः, अभिषेकस्यानिरूपणीयत्वापत्तेः । न ह्यसौ राज्यप्रवृत्तस्य धर्म्मः, तदधीनत्वात्तत्र प्रवृत्तेः ।

न द्वितीयः, तथाहि क्षत्त्रियत्वजात्यवच्छिन्नाधिकारिकत्वं राजधर्म्मपदेन विवक्षितमिति वाच्यम् । न चैतत् सम्भवति ।

सर्व्ववर्णाधिकारिकप्रासादादेरतथात्वेनानिरूपणीय-त्वापत्तेरितिचेन्न; विशिष्टमात्रस्य तादृशजात्यवच्छिन्नाधि-कारिकत्वाभावेऽपि राजसूयाङ्ग[2]प्रयोगस्य तथात्वे च नगरादिनिर्म्माणपूर्व्वभाविप्रासादप्रयोगविशेषस्य तथा-त्वोपपत्तेः ।

वस्तुतस्तु— अभिषेकप्रकरणे राजलक्षणान्तर्गतत्वेन वक्ष्यमाणैः शौर्य्यधैर्य्यादिभी राजगुणैः प्रजापरिपालनाधि-

---

१ क पुस्तके राजधर्म्मपदेन । २ क —राजसूयान्तर्गतसंयोगस्य ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कारितावच्छेदकैः सम्पन्नो राजपदार्थः, प्रजापरिपालनं साक्षात्परम्परया तदुपयोगि च धर्म्मपदार्थः ।

अस्ति च परम्परया तदुपयोगित्वं प्रासादादावपीति तन्निरूपणमारभ्यते । तत्र तत्तन्निर्म्माणं तत्तत् प्रतिष्ठा-[1]कालञ्च तत्तदवसरे दर्शयिष्यामः । सर्व्वं तदुपयोगित्वेन भूपरीक्षा-दिक्साधन-वास्तुपूजनविषयास्तत्र प्रदर्श्यन्ते ।

अथ भूपरीक्षाविधि[2]र्नारदसंहितायाम्—

निर्म्माणे पत्तनग्राम[3]गृहादीनां समासतः ।
क्षेत्रमादौ परीक्षेत गन्ध-वर्ण-रस-प्लवैः ॥२१॥ इति

आदिपदेन प्रासादादयोऽपि गृह्यन्ते, प्लवो निम्नता । विवृतञ्चैतत् वर्णरसगन्धत्रयमपि परीक्षान्तरोपन्यासेन सह—

महाकपिलपञ्चरात्रे—

स्फुटिता च सशल्या च वल्मीका रोहिणी तथा ।
दूरतः परिवर्ज्ज्या भूः कर्त्तुरायुर्धनापहा ॥२२॥
स्फुटिता मरणं कुर्य्यात् दुःखदा धनहारिणी ।
सशल्या क्लेशदा नित्यं वल्मीका शत्रुतो भयम् ॥२३॥
ब्राह्मणी घृतगन्धा स्यात् क्षत्त्रिया मांसगन्धिनी ।
क्षारगन्धा तु वैश्या स्यात् शूद्रा विट्गन्धिनी क्षितिः ॥२४
मधुरा ब्राह्मणी भूमिः कषाया क्षत्त्रिया तथा[4] ।
वैश्या तिक्ताऽथ विज्ञेया शूद्रा स्यात्कटुका मही ॥२५॥
ईशकोणप्लवा सा च कर्त्तुः श्रीदा सुनिश्चितम् ।

---

१ क ख वचनं ।
२ ख क्षेत्रपरिशुद्धिविधिः ।
३ ग पुरादीनाम् ।
४ ख स्मृता ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्व्वप्लवा वृद्धिकरी वरदा तूत्तरप्लवा।
विद्वेषं मारणं व्याधिं कुर्य्यादग्निप्लवा सती ॥२६॥

इत्यादिना दिगन्तरप्लवाया निन्दा कृता।

केशवपद्धतौ—

कुशकाशवती ब्राह्मी क्षात्त्री दूर्व्वावनावृता।
फलपुष्पावृता वैश्या शूद्रा बहुतृणा मही ॥२७॥

तथा—

श्वेता रक्ता तथा पीता कृष्णवर्णा भुवः क्रमात्।
वर्णानां स्वस्वजातीया यदीच्छेच्छुभमात्मनः ॥२८॥ इति

नारदः—

वने दुर्गे तथा ग्रामे नगरे क्षेत्र-पर्व्वते।
कर्त्तुर्म्मनोरमा भूमिः परीक्षा प्रथमा स्मृता ॥२९॥ इति

मात्स्ये—

घृतमाम-शरावस्थं कृत्वा वर्त्तिचतुष्टयम्।
ज्वालयेद्भूपरीक्षार्थं तत्पूर्णं सर्व्वदिङ्मुखम्।
दीप्या पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ॥३०॥ इति।

पूर्व्ववर्त्तिदीप्तौ सर्व्वाधिककालस्थायिन्यां ब्राह्मणस्य योग्या भूः, दक्षिणावर्त्तिदीप्तौ क्षत्त्रियस्येति क्रमेणेत्यर्थः।

तथा नारदपञ्चरात्रे—

जानुमात्रं खनेद्गर्त्तं मृद्भिस्ताभिश्च पूरयेत्।
अधिके चोत्तमां विद्यात् समं चेन्मध्यमा भवेत्।
न्यूनेऽधमां विजानीयात्तां भूमिं परिवर्ज्जयेत् ॥३१॥

इत्येवं परीक्षया परिगृहीतभूमेः शुद्धिः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

संग्रहे—

चतुरस्रां समां भूमिं कृत्वा बीजं वपेन्नरः ।
तस्यां जाते तु तस्यैव गावस्तत्र प्रचारयेत् ॥
तासां मूत्र-शकृत्पातैः पुण्यं भवति तच्छुभम् ॥३२॥

इति तत्क्षेत्रं । प्रासादग्रामादिसाधारणशुद्धिरुक्ता ।

अथ प्रासादार्थविशिष्टशुद्धिर्नारदपञ्चरात्रे—

पूर्व्वोक्तां भुवमासाद्य प्रविश्य बलिपूर्व्वकम् ।

( बलिर्यक्षादिदेवतोद्देश्यकः )

भूमिं प्रदक्षिणां कृत्वा मन्त्रमेतदुदीरयेत् ॥३३॥
यक्षाः पिशाचा नागाश्च येऽत्र तिष्ठन्ति सर्व्वदा ।
सर्व्वे प्रयान्तु तेऽन्यत्र विष्णोः स्थानं करोम्यहम् ॥३४॥

देवतान्तरप्रासादे रौद्रमित्याद्यूहः ।

ततोऽस्त्रमन्त्रसंसिद्धान् सिद्धार्थान् मन्त्रतः क्षिपेत् ।

अस्त्रमन्त्रः— प्रतिष्ठाप्यदेवताषडङ्गान्तर्गतः, तेन संसिद्धानभिमन्त्रितान् ।

ततो भागवताचार्य्यो हलेन विलिखेद्भुवम् ॥३५॥
ब्राह्मणो यजमानश्चेदनड्वान् गौरवर्णकः ।
क्षत्रियो लोहितो वैश्यः पीतः शूद्रस्तु मेचकः ॥३६॥

क्षत्रियश्चेल्लोहित इत्येवं योज्यम् ।

यथोक्तवर्णाभावे तु कपिलो गौर एव च ।
वृषभावेकवर्णौ तौ महान्तौ सबलौ स्मृतौ ॥३७॥
क्षालयेत् क्षुरशृङ्गादीन् भूषयेत् कनकादिभिः ।
हलयुग्मञ्च पालाशं ब्राह्मणस्य विधीयते ॥३८॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

न्यग्रोधः क्षत्त्रियस्य स्यात् प्लक्षो विट्-शूद्रयोस्तथा ।
न्यग्रोध-पिप्पलौ स्यातामलाभे सर्व्ववर्णिनाम् ॥३९॥
सर्व्वेषामेव वर्णानां सौवर्णाङ्कुशको भवेत् ।
राजतं ताम्रमथवा योक्त्रं तेषां यथाक्रमम् ।
कुशा धनुर्ज्या वारण्यकाशा रज्जुश्च तन्मयी ॥४०॥

क्रमेण रजतकुशादिमयी रज्जुर्वर्णानां योक्त्रमित्यर्थः ।

युगञ्च हलमेधीञ्च[१] कारयेदेकयोनिकाम् ।
स्नातो नवाम्बरधरः सोष्णीषः शुचिरात्मवान् ॥४१॥
माल्यानुलेपनयुतः सोत्तरीयपरिच्छदः ।
भूषितः स्वयमाचार्य्यः पादौ प्रक्षालयेत्ततः ॥४२॥
आचम्यायम्य च प्राणान् न्यासं कृत्वा यथाविधि ।
पुण्याहं वाचयित्वा तु वैष्णवैर्म्मन्त्रवित्तमैः ॥४३॥
योजयेद्वृषभस्कन्धे युगं वै मूलविद्यया ।
लाङ्गलञ्च युगेनैवं योजयेद्विद्यया तया[२] ॥४४॥
सुमुहूर्त्तेषु लग्नेषु कारयेत् प्राङ्मुखः स्थितः ।
भेरीपटहशङ्खादीन् घोषयेत् सर्व्वदिक्षु च ।
सूक्तं शाकुनिकं विप्राः पठेयुः सर्व्वशान्तिदम् ॥४५॥

कनिक्रदज्जनुषमित्यादि शाकुनिकं सूक्तम्[३] ।

हृत्सरोजे च मां ध्यायेत् विद्यारूपेण चक्षुषा ।
आदाय नोदनं (?) पश्चात् पीडयेत् हूं फडादिना ॥४६॥
प्राङ्मुखः प्रथमं ब्रह्मन् कर्षयेन्मूलविद्यया ।
सूक्तेन पौरुषेणैव द्वितीयं भूमिकर्षणम् ॥४७॥

---

१ ख हलमस्थि च ।    २ ख ततः ।

३ ऋक्संहितायाः २य मण्डलाष्टमाध्याये द्वाचत्वारिंशत् मन्त्रः ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

तृतीयं विष्णुसूक्तेन गायत्र्या च तुरीयकम् ।
नारायणाऽनुवाकेन कर्षणं पञ्चमं स्मृतम् ।
पञ्चोपनिषदैर्मन्त्रैः षष्ठं स्याद्भूमिकर्षणम् ॥४८॥

पञ्चोपनिषदा मन्त्राः सद्योजातादिपञ्चानुवाकाः ।

सप्तमं भूमिसूक्तेन कर्षयेद्देशिकोत्तमः ।
प्रदक्षिणक्रमेणैव सीता स्यात् कमलासना ॥४९॥
दक्षिणोत्तरतस्तद्वत् कर्षयेत् पञ्चरात्रवित् ।
निमित्तानि परीक्षेत तत्काले देशिकोत्तमः ।
देशिकस्य मनस्तुष्टिस्तत्काले शर्म्मणे भवेत् ॥५०॥

एवं शोधितभूमौ प्राचीसाधनं कुर्य्यात् ।
तदुक्तं हयशीर्षपञ्चरात्रे,—

द्वादशाङ्गुलमानेन तत्र वृत्तं तु भ्रामयेत् ।
मध्ये सुनिश्चलं शङ्कुं स्थाप्य च्छायां निरीक्षयेत् ॥५१॥
प्रवेशे निर्गमे तस्यां शङ्कुच्छायां निरूपयेत् ।
शङ्कुच्छायाऽग्रचिह्नाभ्यां प्राक्-प्रतीच्यौ प्रसाधयेत् ।
प्राक्-प्रतीचीगते सूत्रे उदग्यामे प्रसाधयेत् ॥५२॥

इति तृतीयान्तस्य भ्रामण-स्थापनयोरुभयत्राऽन्वयः ।
त्रिकाण्डमण्डनः,—

श्रवणस्योदये प्राची कृत्तिकायास्तथोदये ।
चित्रास्वात्यन्तरे प्राची न प्राची चन्द्र-सूर्य्ययोः ॥
५३॥ इति

अयञ्च प्रकारो माघकृत्ये निरूपित इति, नेह निरूप्यते । अथ प्रासादादिवक्ष्यमाणसकलकार्य्योपयोगित्वेन वास्तु-पूजोच्यते ।

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

तन्नित्यत्वमुक्तं पदार्थादर्शे महाकपिलपञ्चरात्रे,—

ब्रह्माद्यदितिपर्य्यन्ताः पञ्चाशत्तच संयुताः।
सर्व्वेषां किल वास्तूनां नायकाः परिकीर्त्तिताः ॥५४॥
असम्पूज्य हि तान् सर्व्वान् प्रासादादीन्न कारयेत्।
अनिष्पत्तिर्व्विनाशः स्यादुभयोर्धर्म्म-धर्म्मिणोः ॥५५॥ इति

धर्म्मस्यानिष्पत्तिः, धर्म्मिणः कर्त्तुर्नाशः स्यादित्यर्थः।

विश्वकर्म्मोक्ते वास्तुशास्त्रे—

प्रासादे भवने[१] तड़ागखनने कूपे च वापीवने
जीर्णोद्धारपुरे च यागभवने प्रारम्भनिर्वर्त्तने।
वास्तोः पूजनकं सुखाय कथितं पूजां विना हानये
पादौ रक्षसि कं शिवे च करयोः सन्धौ च कोणद्वये॥
५६॥ इति।

प्रासादे देवतास्थानविशेषे राजगृहे च, भवनं सामान्य-गृहं, वने पुरे निर्वर्त्तने चेत्यन्तसप्तम्यन्तचये[२] द्वन्द्वैकवद्भावः।
पुरं गृहाणां खेटखर्व्वटादीनाञ्चोपलक्षणार्थं। याग-मण्डपनिर्म्माणस्यारम्भे निर्वर्त्तने तत्समाप्तौ कथितं मुनिभिः, पूजां वास्तुपूजां विना प्रासादादि सर्व्वं हानये हानिकारि भवतीत्यर्थः।

वक्ष्यमाण[३][ब्रह्मादिदेवतावयविनो वास्तुपुरुषस्य ध्याने प्रकारमाह] पादौ रक्षसि नैर्ऋत्यां[४] दिशि, कं शिरः शिवे

---

१ क प्रासादोद्भवने। २ ख ग पुस्तकद्वये सप्तम्यन्तप्रयोगे।
३ क पुस्तके [ ] चिह्नितांशः पतितः। ४ ग याम्यां।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऐशान्याम्, करयोः सन्धी कूर्परौ—कोणद्वये आग्नेय-वायव्ययोः। इति।

मात्स्ये तु—

सूत्रपाते तथा कार्य्यमेवं स्तम्भोच्छ्रये पुनः।
द्वारवन्धोच्छ्रये तद्वत् प्रवेशसमये तथा॥
वास्तूपशमने तद्वत् वास्तुयज्ञस्तु पञ्चधा॥५७॥ इति

प्रवेशानन्तरं अनिष्टसूचकोत्पातादौ तदुपशमनार्थं वास्तुयज्ञानुष्ठानमन्ते च उक्तम्। कस्मिन् कर्म्मणि कीदृशो वास्तुरित्यपेक्षायामुक्तम्—

हयशीर्षपञ्चरात्रे—

एकाशीतिपदं वास्तु गृहकर्म्मणि शस्यते।
चतुःषष्टिपदं वास्तु प्रासादेषु प्रशस्यते॥५८॥

सोमशम्भुः—

कुर्य्यात् कोष्ठं चतुःषष्टि प्रासादे वास्तुमण्डलम्।
गृहे निवर्त्तयेद्वास्तुं किं त्वेकादशकोष्ठकैः॥५९॥ इति

वास्तुशास्त्रे—

क्षेत्राकृतिर्व्वास्तुरिहार्च्चनीय
एकांशतो भागसहस्रयुक्तः।
साधारणः षष्टिपदोऽपि तेषु
चैकाधिकाशीतिपदस्तथैव॥६०॥ इति

प्रासादाद्यर्थं स्वीकृतभूः क्षेत्रं, यत्र यादृशाकृतिको वास्तुर्विहितस्तत्र तादृशः पूज्यः। एकपदमारभ्य सहस्रपदपर्य्यन्तः। चतुःषष्टिपदः, एकाशीतिपदश्च सर्व्वसाधारण इत्यर्थः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथा तत्रैव—

ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुःषष्टिकै-
रेकाशीतिपदैः समस्तभवने जीर्णे नवाङ्कांशकैः ।
प्रासादे च शतांशकैस्तु सकले पूज्यस्तथा मण्डपे
कूपे षण्णव-चन्द्रभागसहितो वापीतडागे वने[1] ॥६१॥

ग्रामादौ वक्ष्यमाणलक्षणो चतुःषष्टिपदात्मको वास्तुः पूज्यः । अन्यगृहमात्रे एकाशीतिपदात्मकः पूज्यः । जीर्णे तथा भग्ने सर्व्वस्मिन् प्रासादे शतपदैर्युक्तः पूज्यः । वापीकूपतड़ागप्रासादादीनां पुनः सम्यक् करणे नवाङ्कि-संख्यैरेकोनपञ्चाशत्पदैर्युक्तः पूज्यः । मण्डपादिनिर्म्माणे (१९६) षण्णव-चन्द्रपदैर्युक्तः पूज्य इत्यर्थः ।

तथा चतुश्चत्वारिंशदधिकशतपदात्मकं वास्तुपुरुषं प्रकृत्य तत्रैवोक्तम् ।

[2]ब्रह्माजिनांश उदितः शिवतो यमाद्याः
कोणेषु सार्द्धपदतोऽपि तथैव चाष्टौ ।
शेषाद्विभागसमको रविभागकोऽयं
पूज्यो रथाश्वगजवाहनकेऽम्बुयन्त्रे ॥६२॥

इत्यत्र प्रकरणानुरोधाद्रविभाग इति पदे रविसंख्या भागा यस्मिन् इत्येकमर्थमङ्गीकृत्य पुनः—रविगुणितभागो यस्मिन्निति द्वितीयमप्यर्थं स्वीकृत्य चतुश्चत्वारिंशदधिकशतेन पदैर्युक्तः पूज्य इति लभ्यते ।

न च सकृदुच्चारितस्य पदस्यार्थद्वयबोधकानुपपत्तिः ।

---

१ ख नवे ।        २ ख ग पुस्तकद्वये श्लोकोऽयं पतितः ।

P. P. Ac. Gunratnasuri M.S.        Jin Gun Aaradhak Trust

भद्रात्मनो दुरधिरोहतनोर्व्विशाल-
वंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।
अस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् ॥६३॥

इत्यत्र तात्पर्य्यविषयस्य राज्ञि गजसादृश्यस्य प्रतीति-निर्व्वाहाय राज्ञः शक्त्या गजस्य शक्तिमूलव्यञ्जनया-ऽलङ्कारिकाभ्युपगतप्रतीतिवदिहापि तात्पर्य्यविषयमहा-संख्याप्रतीतिनिर्व्वाहाय शक्त्या शक्तिमूलव्यञ्जनया चार्थ-द्वयबोधकत्वोपपत्तेः ।

कुत्र कीदृशः पूज्य इत्युक्तं रथ इति—रथशब्दः शकटा-द्युपलक्षणार्थः, वाहनं शिविका, अम्बुयन्त्रं जलयन्त्रं, एतेषामभ्युदयकारित्वलाभायैतत् शालाद्युक्तविधेर्वास्तुपूजा कार्य्येत्यर्थः ।

तथैकोनसप्तत्यधिकशतपदैरपि (१६९) वास्तुपूजा तत्रैव सविषयाऽभ्यधायि, यन्त्रे त्रयोदशपदैरपि पूजनीय इत्यस्मि-न्नर्थे अम्बुयन्त्रे प्रहारयन्त्रे चेत्यर्थः। त्रयोदशसंख्यैः त्रयोदश-गुणितैरिति पूर्व्ववदर्थद्वयाभ्युपगमे [१]महासंख्या उन्नेया । तथा सहस्रपदैर्व्वास्तुपूजा सविशेषोक्ता ।

तत्रैव

दुर्गप्रतिष्ठाविषये निवेशे
तथा महार्चासु च कोटिहोमे ।
मेरौ च राष्ट्रेऽक्षयज्येष्ठलिङ्गे
वास्तुः सहस्रेण पदैः प्रपूज्यः ॥६४॥ इति।

---

१ घ महासंख्यालाभ उन्नेयः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दुर्गं वक्ष्यमाणलक्षणं, तत्प्रतिष्ठा तन्निर्म्माणं, तद्विषयो देशः निवेशः, तस्मिन् युद्धेन प्राप्ते प्रवेशः।

तथा महार्चा हेमाद्रिलिखिता महापूजा। कोटिहोमः प्रसिद्धः। मेरुर्वक्ष्यमाणलक्षणः प्रासादविशेषः। राष्ट्रं देशो युद्धलब्धः, तेन तत्प्रवेशो लक्ष्यते। अक्षयो ज्योतीरूपं ज्येष्ठं पौराणं पुराणप्रसिद्धं लिङ्गं ज्योतिर्लिङ्गमिति यावत्, तेनोपघातनिमित्तात्तत्प्रतिष्ठा लक्ष्यते।

एतेषु विषयेषु सहस्रैः पदैर्व्वास्तुपूजा कार्य्येत्यर्थः। एवमुक्तान् वास्तुभेदान् प्रयोगे सौकर्य्याय प्रकटीकरिष्यामः।

नन्वेवमुक्तवचसां परस्परविरोधो दृश्यते, तथाहि, पञ्चरात्र-सोमशम्भुवाक्याभ्यां प्रासादे चतुःषष्टिपदको वास्तुगृहे त्वेकाशीतिपदक इति व्यवस्था प्रतीयते।

वास्तुशास्त्रवचनात्तु[1] सर्व्वसाधारण्यमनयोः प्रतीयते, पुनश्च राजगृहे चतुःषष्टिपदकः, प्रासादे शतपदक इत्युक्तं तत्रत्यवचनान्तरे। तत्र यदि व्यवस्था तात्त्विकी, तदा सर्व्वसाधारण्यं कथं सङ्गच्छते ?

साधारण्ये वा राजगृहे चतुःषष्टिकस्य किमर्थं विशिष्य विधानं। कथं वा तदवरुद्धे[2] प्रासादे शतपदकवास्तुविधिः ? कथं वा च तत्र जीर्णोद्धारादौ चैकोनपञ्चाशत्पदकादि-वास्त्वविरुद्धोदाहरिष्यमाणमत्स्यपुराणागतैकाशीतिपदकवास्तुविधिर्घटतामिति चेत्। शृणु,

---

१ ख वचनन्तु। २ ग तदविरुद्धे।

यस्तावद्राजगृहे चतुःषष्टिपदकविधिः, स विशेषविधित्वात् सामान्यप्राप्तस्यापवादः, एवं मात्स्ये य एकाशीतिपदकविधिः सोऽपि राजप्रभृतिकर्त्तृकप्रासादादिनिर्म्माणारम्भविषयः ।

एवं वास्तुबलिं कृत्वा भजेत् षोड़शभागिकम् ॥६५॥

इत्यग्रेतनग्रन्थात् ।

पूज्यश्चतुःषष्टिपदेषु विप्रै-
रेकोत्तराशीतिपदे नृपाद्यैः ॥६६॥

इतीशानशिवोक्तेश्च ।

एकमूलश्रुतिकल्पनालाघवाच्च शतपदकविधिस्त्वनेकमण्डपकप्रासादविषयः, सकलपदस्य तात्पर्य्यग्राहकत्वेन साफल्यात् । मेरौ सहस्रपदविधानाद्बाधः, परिशेषात् सिद्धैकमण्डपप्रासादप्रतिष्ठायां चतुःषष्टिपदको राजगृहान्यगृहेषु चैकाशीतिपदको जीर्णोद्धारे सिद्धे च प्रासादादावेकोनपञ्चाशत्पदक इति सिद्धम् ।

सत्यामपि व्यवस्थायां तत्तद्विशेषविहितवास्तुपूजनाशक्तं प्रत्यनुकल्पत्वेन सर्व्वकार्य्येषु चतुःषष्ट्येकाशीत्युत्तरसंख्यापरवास्तुप्रापणाय द्वयोः सर्व्वसाधारण्यविधिरिति न किञ्चिदनुपपन्नम् ।

इति राजधर्म्मकौस्तुभे वास्तुप्रकरणम् ॥१॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ प्रासादादिलक्षणम् ॥ २ ॥

तत्र वास्तुपूजनपूर्व्वकं प्रासादलक्षणमुक्तम् ।

मत्स्यपुराणे—

ऋषय ऊचुः ।

प्रासादाः कीदृशाः सूत कर्त्तव्या भूतिमिच्छता ।
प्रमाणलक्षणं तद्वद्द विस्तरतोऽधुना ॥१॥

सूत उवाच ।

अथातः सम्प्रवक्ष्यामि प्रासादविधिनिर्णयम् ।
वास्तौ परीक्षिते सम्यक् वास्तुदेवविचक्षणः ॥२॥
वास्तूपशमनं कुर्य्यात् समिद्भिर्बलिकर्म्मणा ।
[1][जीर्णोद्वारे तथोद्याने तथाऽन्यगृहवेशने ॥३॥
नवप्रासादभवने प्रासादपरिवर्त्तने ।
द्वाराभिवर्त्तने तद्वत् प्रासादेषु गृहेषु च] ॥४॥
वास्तूपशमनं कुर्य्यात् पूर्व्वमेव विचक्षणः ।
एकाशीतिपदं लिख्य वास्तुमध्ये तु पिष्टकैः ॥५॥
होमस्त्रिमेखले कार्य्यः कुण्डे हस्तप्रमाणके ।
यवैः कृष्णतिलैस्तद्वत् समिद्भिः क्षीरवृक्षकैः ॥६॥
पालाशैर्वारणैर्वापि कुशैर्दूर्व्वामयैरपि ।
धान्यैर्वापि नवैः शुद्धैर्मधुसर्पिःसमन्वितैः ॥७॥
कुर्य्यात्तु पञ्चभिर्व्विल्वैर्व्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैस्तु वास्तुदेशे बलिं हरेत् ॥८॥

---

१ क पुस्तके [ ] चिह्नितांशः पतितः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तद्वद्विशेषनैवेद्यमिदं दद्यात्क्रमेण तु ।
ईशकोणे घृतान्नन्तु शिखिने विनिवेदयेत् ॥९॥
ओदनं सोत्पलं दद्यात् पर्ज्जन्याय घृतान्वितम् ।
ओदनमित्यस्य मध्यमणिन्यायेनाऽन्वयः ।
जयाय च ध्वजान् पीतान् पैष्टं कूर्म्मञ्च संन्यसेत् ॥१०॥
इन्द्राय पञ्चरत्नानि पैष्टञ्च कुलिशं तथा ।
वितानकञ्च सूर्य्याय धूम्रं रक्तं तथैव च ॥११॥
सत्याय घृतगोधूमं मत्स्यं दद्याद्भृशाय च ।
शष्कुलीश्चान्तरीक्षाय दद्यात् शक्तूंश्च वासवे ॥१२॥
लाजाः पुष्णे तु दातव्या वितथे चणकौदनम् ।
गृहक्षताय मध्वन्नं यमस्य पिशितोदनम् ॥१३॥
गन्धोदकञ्च गन्धर्व्वे भृङ्गे मेषस्य जिह्विकाम् ।
मृगाय यावकं दद्यात् [1][पितृभ्यः कृसरं तथा ॥१४॥
दौवारिके दन्तकाष्ठं पैष्टं कृष्णबलिं तथा ।
सुग्रीवे पूरिकां दद्यात्] पुष्पदन्ताय पायसम् ॥१५॥
[2]कुशस्तम्बेन संयुक्तं तथा पद्मञ्च वारुणे ।
पैष्टं हिरण्मयं दद्यादसुराय सुरा मता ॥१६॥
घृतोदनन्तु सोमाय यवान्नं पापयक्ष्मणे ।
घृतलड्डुकांश्च रोगाय नागे पुष्पं फलान्वितम् ॥१७॥
क्षीरं मुख्याय दातव्यं मुद्गोदनमतःपरम् ।
भल्लाटं स्थाणवे दद्यात् सोमाय मधुपायसम् ॥१८॥

---

१ ख पुस्तके [ ] चिह्नितांशः पतितः ।

२ क ख पुस्तकद्वये कुसुम्भन्तेन ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भगाय शालिकं पिष्टमदित्यै पोलिकांस्तथा।
[1]दित्यै तु पूरिकां दद्यादित्येवं बाह्यतो बलिः॥१९॥
क्षीरं जृम्भाय[2] दातव्यमापवत्साय वै दधि।
सावित्रे लड्डुकां दद्यात् समरीचं कुशोदकम्॥२०॥
सवितुर्घृतपूपांश्च जयाय घृतचन्दनम्।
विवस्वते पुनर्दद्याद्रक्तचन्दनपायसम्॥२१॥
हरितालोदनं दद्यादिन्द्राय घृतसंयुतम्।
घृतोदनन्तु मित्राय रुद्राय गुड़पायसम्॥२२॥
आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे।
पृथ्वीधराय मांसानि कुष्माण्डाय च दापयेत्॥२३॥
शर्करापायसं दद्यादर्य्यम्णे पुनरेव तु।
पञ्चगव्यं यवांश्चैव तिलघृताक्षतं दधि॥२४॥
भक्ष्यं भोज्यञ्च विविधं ब्रह्मणे विनिवेदयेत्।
एवं सम्पूजिता देवाः शान्तिं कुर्व्वन्ति ते सदा॥२५॥
सर्व्वेषां काञ्चनं दद्यात् ब्रह्मणे गां पयस्विनीम्।
राक्षसीनां बलिं दद्यादपि यादृक् तथा शृणु॥२६॥
मांसोदनं घृतं पद्मं कृसरं रुधिरान्वितम्।
ईशानभागमाश्रित्य चरक्यै विनिवेदयेत्॥२७॥
मांसोदनं सरुधिरं हारिद्रोदनमेव च।
आग्नेयं दिशमाश्रित्य विदार्य्यै विनिवेदयेत्॥२८॥
दध्योदनं सरुधिरं अस्थिखण्डैश्च संयुतम्।
पूतनायै च राक्षस्यै पीतरक्तबलिं हरेत्॥२९॥

---

१ क ख पुस्तकद्वये दितेस्तु पूरिकाम्। २ ख ग पुस्तकद्वये जम्भाय।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वायव्ये पापराक्षस्यै मत्स्यमांससुरासवम् ।
पायसं वापि दातव्यं स्वनाम्ना सर्व्वतः क्रमात् ॥३०॥
नमस्कारान्तयुक्तेन प्रणवाद्येन सर्व्वतः ।
ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत् ॥३१॥
द्विजांस्तु पूजयेत् भक्त्या ये चान्ये गृहमागताः ।
एतद्वास्तूपशमनं कृत्वा कर्म्म समाचरेत् ॥३२॥
प्रासाद-भवनोद्यान-प्रारम्भे परिवर्त्तने ।
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये ॥३३॥
इति वास्तूपशमनं कृत्वा सूत्रेण वेष्टयेत् ।
रक्षोघ्न[1] पावमानेन सूक्तेन भवनादिकम् ॥३४॥
नृत्यं मङ्गलवाद्येन कुर्य्याद्ब्राह्मणवाचनम् ।
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः ॥३५॥
गृहे वायतने कुर्य्यान्न स दुःखमवाप्नुयात् ।
न च व्याधिभयं तस्य न च बन्धुधनक्षयः ।
जीवेद्वर्षशतं स्वर्गे कल्पमेकञ्च तिष्ठति ॥३६॥

इति मात्स्ये सर्व्ववास्तूपशमनम् ।

सूत उवाच ।

एवं वास्तुबलिं कृत्वा भजेत् षोडशभागिकम् ।

प्राक्सूत्रमिति शेषः ।

तस्य मध्ये चतुर्भिस्तु भागं गर्भं तु कारयेत् ॥३७॥
भागद्वादशकं सार्द्धं ततश्च परिकल्पयेत् ।

सार्द्धभागं परितो गर्भगृहमिति विस्तारे विनियोजयेदित्यर्थः । ततश्च गर्भगृहभूमेर्व्वहिरेव भित्तय इत्याशयः ।

---

१ क राक्षोऽथ ।

चतुर्भागेण भित्तीनामुच्छ्रायः स्यात्प्रमाणतः ॥३८॥

तस्मिस्तृतीयार्थे चतुर्थभागपरिमितेन प्रमाणेनोच्यते इत्यर्थः। अथञ्चाविशेषाद्गर्भभित्तीनां [1][बाह्यभित्तीनां] चोच्चताविधिः।

द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायस्य मानतः[2] ।
शिखरार्द्धस्य चार्द्धेन विधेया तु प्रदक्षिणा ॥३९॥

प्रदक्षिणा अर्थात् गर्भगृहाद्बहिर्भागद्वयमिता भूस्त्याज्येत्यर्थः।

चतुर्दिक्षु तथा ज्ञेयं निर्गमन्तु ततो बुधैः ।
निर्गमं द्वारन्तत ऊर्द्धं [3]बाह्यभित्तिक्षिति यावत् ।
गर्भसूत्रद्वयं चाग्रे विस्तारो मण्डपस्य तु[4] ।
आयतं स्यात् त्रिभिर्भागैर्भद्रैर्युक्तं[5] सुशोभनम् ॥४०॥

जगमोहनेति भाषया प्रसिद्धस्योक्तगर्भान्मण्डपान्तरेण व्यवहितमण्डपस्यैतल्लक्षणं, विस्तारो दक्षिणोत्तररूपेण, आयतं प्राक्पश्चिमरूपेण, प्राच्यादिचतुर्द्दिक्षु ईदृशभद्रचतुष्टययुक्तं सुशोभनं उपर्य्युपरिमालायामपि स्वीकृततादृशाकारम् ।

पञ्चभागेन संभज्य गर्भमानं विचक्षणः ।
भागमेकं गृहीत्वा तु प्राग्ग्रीवम्, कल्पयेद्बुधः ॥४१॥

प्राची ग्रीवा यस्य वेदिस्थानस्य तत्प्राग्ग्रीवम्, गर्भगृहानन्तरपूर्व्वदेशे गर्भमानं पञ्चभागमितं विधीयते ।

---

१ ख पुस्तके [ ] चिह्नितांशः पतितः ।

२ मूले भित्त्युच्छ्रायप्रमाणतः ।  ३ ख बाह्यभितिवत् ।

४ क ग पुस्तकद्वये मण्डपस्तथा ।  ५ घ भद्रमुक्तं ।

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

गर्भसूत्रसमं[1] भागादग्रतो मुखमण्डपः ।
एतत्सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम् ॥४२॥

भागात् पूर्व्वोक्तप्राग्ग्रीवभागादनन्तरं गर्भसूत्रसमं तदर्द्धमितं महापातकसमेषु षडब्दाङ्गीकरणवत् कल्पये-दित्यनुषङ्गः । एवञ्च गर्भे ४ पूर्व्वपश्चिमयोर्भित्तिदेशयोः ३ तद्भागगतयोरेव प्रदक्षिणदेशयोः ४ मुखमण्डपे २ तद-ग्रिममण्डपे ३ । एवं[2] षोडशभागक्लृप्तिः । प्राग्ग्रीवं तु प्रदक्षिणं भुव्येवेति मन्तव्यम् । एतत् सामान्यं वक्ष्यमाण-मेर्व्वा[3]दिसाधारणमित्यर्थः ।

लिङ्गालये विशेषः ।

तथाऽन्यन्तु प्रवक्ष्यामि प्रासादं लिङ्गमानतः ।
लिङ्गपूजाप्रमाणेन कर्त्तव्या पीठिका बुधैः ॥४३॥
पीठिकार्द्धेन भागः स्यात्तन्मानेन तु भित्तयः ।
बाह्यभित्तिप्रमाणेन उत्सेधस्तु भवेत्ततः[4] ॥४४॥
भित्त्युच्छ्रायात्तु द्विगुणः शिखरस्य समुच्छ्रयः ।
शिखरस्य चतुर्भागात् कर्त्तव्या स्यात्प्रदक्षिणा ॥४५॥
प्रदक्षिणायास्तु समस्त्वग्रतो मण्डपो भवेत् ।
तस्य चार्द्धेन कर्त्तव्यो ह्यग्रतो मुखमण्डपः ॥४६॥
प्रासादनिर्गतौ कार्य्यौ कपोलौ गर्भमानतः ।
ऊर्द्ध्वं भित्त्युच्छ्रयात्तस्य मञ्जरीं तु प्रकल्पयेत् ॥४७॥
मञ्जर्य्याश्चार्द्धभागेन शुकनासं(सां) प्रकल्पयेत् ।

---

१ क —सूत्रैः समं...मण्डपम् । मूले सूत्रसमात् ।
२ ख एतत् । ३ ग देवादि— । ४ मूले भवेत् पुनः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऊर्द्धं तथाऽर्द्धभागेन वेदीबन्धो भवेदिह।
वेद्याश्चोपरि यच्छेषं[1] कण्ठमामलकाकारम्[2] ॥४८॥

पीठिकाया अर्द्धं स्थानं तदीयो य इनभागो द्वादशो भागस्तावद्विस्तारा भित्तयो गर्भगृहस्य।

बाह्यभित्तिषु यावदुच्चत्वं चिकीर्षितं तावदिमास्वपि। प्रदक्षिणक्षेत्रस्य प्रागुदक्सूत्रे तृतीयमण्डपस्यापि ज्ञेयम्, प्राग्द्वारपार्श्वोपरिभागादारभ्य उपरि मौलिताग्रौ त्रिकोणाकारकौ कपोलौ कार्य्यौ।

भित्तिशिखरसन्धौ च भाषया सञ्ज्ञा इति प्रसिद्धा मञ्जरी कार्य्या, मञ्जरीपाषाणार्द्धं यद्बहिर्निर्गतं तदधोभागेषु च शुकनासाकाराः पाषाणा देयाः। अन्तर्गतार्द्धभागोपरि वेद्याः शिखरदार्व्याय बन्धो[3] भवेदित्याह।

आमलकस्याकारा अवयवाः, तदीयाकारा अवयवा यस्मिन्नित्यर्थः।

एवं विभज्य प्रासादं शोभनं कारयेद्बुधः।
अथान्यच्च प्रवक्ष्यामि प्रासादस्येह लक्षणम् ॥४९॥
गर्भमानप्रमाणेन प्रासादं शृणुत द्विजाः।
विभज्य नवधा गर्भं मध्ये स्याल्लिङ्गपीठिका ॥५०॥
पादाष्टकन्तु रुचिरं[4] पार्श्वतः परिकल्पयेत्।
मानेनाऽनेन[5] विस्तारो भित्तीनान्तु विधीयते ॥५१॥

---

१ क पुस्तके प्रच्छोभाम्। २ ग आमलसारकम्।
३ ख दार्व्योपबन्धः। ४ क ख ग पुस्तकत्रये शिखरम्।
५ ख ग पुस्तकद्वये मूले च मानेन तेन।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पादं पञ्चगुणं कृत्वा भित्तीनामुच्छ्रयो भवेत् ।
स एव शिखरस्यापि द्विगुणः स्यात्समुच्छ्रयः ॥५२॥
चतुर्द्धा शिखरं भज्य अर्द्धभागद्वयस्य तु ।
शुकनासं प्रकर्त्तव्यं[1] तृतीये वेदिका मता ॥५३॥
कण्ठमामलकाकारं[2] चतुर्थे परिकल्पयेत् ।
कपोलयोस्तु विस्तारो द्विगुणोऽस्य विधीयते ॥५४॥
शोभनैः पञ्चवल्लीभिर्मण्डपैश्च विभूषितम् ।
प्रासादोऽयं तृतीयस्तु मया तुभ्यं निवेदितः ॥५५॥

गर्भगृहस्तृचयोः प्रत्येकं नवभागे कृते प्रागादिदिक्षु प्रत्येकं चतुरश्चतुरो भागान् परित्यज्य मध्यभागे लिङ्गं स्थाप्यम् । तादृशभागाष्टकमितपार्श्वयोः शिखरे कार्य्ये । पूर्व्वोक्तेन द्वादशतमभागेन भित्तिविस्तारः, पञ्चभागपरिमिता भित्तीनामुच्चता, दशहस्तपरिमितं तदूर्द्धं मध्यशिखरं, भित्तिसहितशिखरं चतुर्द्धा विभज्य भागद्वयोपरि शुकनाससहिता वेदिः, पूर्व्ववद्वेदिकाया उपरिदेशः कण्ठः, तत्रामलकस्याकारा इव पाषाणा देयाः ।

भवति हि चक्रवदामलकस्य वर्त्तुलता अतस्तदवयवेषु चक्रगताकारत्वमुपचर्य्य तदाकारत्वं प्रासादावयवेषु विधीयते । आमलसारकमिति पाठे तु आमलमामलकं तदीयाः सारा उपरितनावयवा यस्मिन्निति विग्रहेण स एवार्थो लभ्यते । द्विगुणः प्राग्द्वारादस्य प्रासादस्य पल्यङ्काकृतित्वं शिखरविदिक्षु विधेयं, पञ्चेतिपाठे प्राग्भागेऽप्यधिकैका विधीयते ।

---

१ ग पुस्तके प्रकुर्व्वीत । २ मूले कण्ठमामलसारन्तु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सामान्यमपरं तद्वत् प्रासादं शृणुत द्विजाः।
त्रिभेदं कारयेत् क्षेत्रं यत्र तिष्ठन्ति देवताः ॥५६॥
तथाकृतेन मानेन वाह्यभागविनिर्गता।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥५७॥
[१]भित्तिश्चतुर्गुणा कार्य्या तस्या मानं भवेदिह।
स एव भित्तेरुत्सेधो द्विगुणः शिखरो मतः ॥५८॥
प्राग्ग्रीवः पञ्चभागेन निष्क्रामस्तस्य चोच्यते।
कारयेत् सुषिरं तद्वत् प्राकारस्य त्रिभागतः ॥५९॥
प्राग्ग्रीवं तस्य मानेन निष्क्रामेण विशेषितम्।
कुर्य्याद्वा पञ्चभागेन प्राग्ग्रीवं कर्षमूलतः[२] ॥६०॥

भागत्रयमितायाः प्रासादभुव एकभागेन प्रासादस्य परितो वेद्याकारा नेमिः कार्य्या। भागद्वयमितो गर्भस्तावदुच्चा तद्भित्तिः। पाठान्तरे च गर्भात्त्रिगुणोच्चा भित्तिः। यश्च निष्क्रामः प्राग्द्वारं तदीयपञ्चमांशेन प्राग्ग्रीवं कार्य्यमित्यर्थः।

प्राग्ग्रीवस्य प्रकारावन्यौ कारयेदित्युक्तेः सुषिरं द्वारत्रिभागतः तृतीयभागमितविस्तारं, तन्मानेन निष्क्रामपर्य्यायद्वारसहितं प्राग्ग्रीवं कुर्य्यादित्यर्थः।

तृतीयपक्षे तु पञ्चभागपरिमितः प्राक्पश्चिमायामो दक्षिणोत्तरविस्तारस्तु प्रासादस्याग्नेयेशानकोणादारभ्य प्रवृत्तमूलको बोध्यः।

स्थापयेत् कनकं तत्र गर्भान्नैहारमूलतः।

नैहारो गर्भगृहं, तन्मूलं मध्यदेशः।

---

१ मूले गर्भन्तु द्विगुणं कुर्य्यात् तस्य—। २ मूले कर्णमूलतः।

एवं तु त्रिविधं कुर्य्याद् ज्येष्ठ-मध्य-कनिष्ठकम्[१] ॥६१॥
[२]लिङ्गमानानुभेदेन रूपभेदेन वा पुनः ।
एते समासतः प्रोक्ता नामतः शृणुताऽधुना ॥६२॥
मेरु-मन्दर[३]-कैलास-कुम्भ-सिंह-मृगास्तथा ।
विमानच्छन्दकश्चैव चतुरस्रस्तथैव च ॥६३॥
अष्टास्रः षोडशास्रश्च वर्त्तुलः सर्व्वभद्रकः ।
सिंहश्च नन्दनश्चैव नन्दिवर्द्धनकस्तथा ॥६४॥
हंसो वृषः[४] सुपर्णश्च पद्मकोऽथ समुद्गकः ।
प्रासादा नामतः प्रोक्ता विभागाञ्छृणुत द्विजाः ॥६५॥

सिंहस्य द्विरुक्तिर्गुणप्रधानभेदेन ।

शतशृङ्गश्चतुर्द्वारो भूमिकाषोडशोच्छ्रितः ।
नानाविचित्रशिखरो मेरुः प्रासाद उच्यते ॥६६॥
मन्दरो द्वादश प्रोक्तः कैलासो नवभूमिकः ।

द्वादशो द्वादशभूमिक इत्यर्थः ।

विमानच्छन्दकस्तद्वदनेकशिखरोत्तमः ॥६७॥
[५]स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धनः[६] ।
विंशतिकसमायुक्तो नानारूपसमन्वितः ॥६८॥

विंशतिकानि शिखराणि ।

अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते ।
[७]चित्रशालैः समोपेतो विज्ञेयः पञ्चभूमिकः ॥६९॥

---

१ ख—कनीयसम् । २ क ख पुस्तकद्वये लिङ्गानुसारभेदेन ।
३ घ—मन्दार । ४ घ वर्षः ।
५ क ख पुस्तकद्वये स वाह्यभूमिकः ।
६ क समभित्तिविवर्द्धनः । घ समभूर्नन्दिवर्द्धनः ।
७ मूले चित्रशालसमोपेतः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बलभीच्छन्दकस्तद्वच्छुकनासचयान्वितः ॥७०॥
[सद्देवभूमिस्तद्वत् स सप्तभिर्नन्दिवर्द्धनः][१] ।
विंशाण्डकसमायुक्तो नन्दनः स उदाहृतः ॥७१॥
षोडशाण्डकसंयुक्तो नानाभूतसमन्वितः ।
वृषस्योच्छ्रायतः कल्प्यो मण्डपश्चासवर्ज्जितः ॥७२॥
सिंहः सिंहसमो[२] ज्ञेयो गजो गजसमस्तथा ।
कुम्भः कुम्भाकृतिस्तद्वत् भूमिकानवकोच्छ्रयः ॥७३॥
अञ्जलीपुटसंस्थानः पञ्चाण्डकविभूषितः ।
षोडशास्रः समन्ताच्च विज्ञेयः स समुद्गकः[३] ॥७४॥
पार्श्वयोश्चन्द्रशालेऽस्य उच्छ्रायो भूमिकाद्वयम्[४] ।

चन्द्रो वितानं चतुरस्रं तद्बन्धनयोग्या शाला चन्द्रशाला ।

तथैव पद्मकः प्रोक्त उच्छ्रायो भूमिकाचयम् ॥७५॥
षोडशास्रः स विज्ञेयो विचित्रशिखरः शुभः ।
भृङ्गराजस्तु विख्यातश्चन्द्रशालाविभूषितः ॥७६॥
प्राग्ग्रीवेण विशालेन भूमिकासु षडुन्नतः ।
अनेकभद्रशालस्तु गजप्रासाद इष्यते ॥७७॥

अनेकभद्रशालैर्युक्ता शाला यस्य ।

पर्य्यस्तगृहराजा वै गरुड़ो नाम नामतः ।
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालाचयान्वितः ॥७८॥

---

१ ख ग पुस्तकद्वये पङ्क्तिरियमधिका ।

२ मूले सिंहाकृतिः । ३ क समुद्गकः ।

४ ख —त्रयं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भूमिका षडशीतिस्तु बाह्यतः सर्व्वतो भवेत् ।
पद्मकः षोडशास्रस्तु भूमिद्वयमथादिमम्[1] ॥
पद्मतुल्यप्रमाणेन श्रीवृक्षक इति स्मृतः ॥७९॥

परि समन्तादस्तानां गृहाणां राजा उच्छ्रायेणाधिकः । एतदेव प्रकटीकर्त्तुमुक्तं भूमिकेति । एकभूमिकस्त्रिभूमिकस्यैव तुल्यम् ।

पञ्चाण्डको द्विभूमिश्च गर्भहस्तचतुष्टयम् ।
वृषो भवति नाम्नाऽयं प्रासादः सार्व्वकामिकः ॥८०॥
सप्तकाः पञ्चकाश्चैव प्रासादा ये मयोदिताः ।
सिंहस्य नेमयो ज्ञेया ये चान्ये तत्प्रमाणकाः ॥८१॥

सिंहसंज्ञप्रासादस्य परितो नेमिवत्कार्य्याः सप्तभूमिकाः, पञ्चभूमिकाश्च एवं नवभूमिका इत्यर्थः ।

चन्द्रशालैः समोपेताः सर्व्वे प्राग्ग्रीवसंयुताः ।
ऐष्टका दारवाश्चैव शैला वा स्युः सतोरणाः ॥८२॥

अथ प्रासादोच्चतायां हस्तसंख्यानियममाह ।

मेरुः पञ्चसहस्रः स्यान्मन्दरः पादहीनकः ।

पञ्चाधिकसहस्रकरमितोच्च इति यावत् ।

चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्विमानकः ॥८३॥
नन्दिवर्द्धनकस्तद्वत् द्वात्रिंशत् समुदाहृतः ।
त्रिंशद्भिर्नन्दनः प्रोक्तः सर्व्वतोभद्रकस्तथा ॥८४॥
वर्त्तुलः पद्मकश्चैव त्रिंशद्धस्त उदाहृतः ।
गजः सिंहश्च कुम्भश्च [2]बलभीच्छन्दकस्तथा ॥८५॥
एते षोडशहस्ताः स्युश्चत्वारो देववल्लभाः ।

---

१ क—अथाधिकम् । २ ख बलभिद् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कैलासो भृङ्गराजस्तु विमानच्छन्दको गजः[1] ॥८६॥
एते द्वादशहस्ताः स्युरेतेषां सिंहनन्दनः ।
गरुडोऽष्टकरो ज्ञेयः सिंहो दश उदाहृतः ॥८७॥

सिंहादयो द्विविधाः परोपसर्ज्जनीभूताः स्वतन्त्राश्च । तत्र परोपसर्ज्जनीभूता षोड़शहस्ताः, स्वतन्त्रा दशहस्ता इत्यर्थः । सिंहग्रहणमुपलक्षणार्थम् ।

एवमेते प्रमाणेन कर्त्तव्याः शुभलक्षणाः ।
यक्ष-राक्षस-नागानां मातृहस्तः प्रशस्यते ॥८८॥

माता स्थपतिः कर्म्मकराणाम् ।

तथा मेर्व्वादयः सप्त ज्येष्ठलिङ्गे शुभावहाः ।
श्रीवृक्षकादयश्चाष्टौ मध्यमस्य प्रकीर्त्तिताः ॥८९॥
तथा हंसादयस्तद्वत् कनिष्ठे शुभदाः स्मृताः ।
वलभीच्छन्दके गौरी जटामुकुटधारिणी ॥९०॥
वरदाऽभयदा तद्वत् साक्षसूत्रकमण्डलुः ।
गृहे तु रत्नमुकुटा उत्पलाऽङ्कुशधारिणी ॥९१॥
वरदाऽभयदा वापि पूजनीया सभर्त्तृका ।
तपोवनस्थोऽपि सदा तान्तु संपूजयेत् पुनः ॥
देव्या विनायकस्तद्वद्वलभीच्छन्दके शुभः ॥९२॥

वलभीच्छन्दप्रासादोपरिभागे एका गौरी जटाधारिणी कार्य्या अपरा च गर्भगृहे मुकुटादिधारिणी शिवविनायकयुता कार्य्येत्यर्थः ।

इति मत्स्यपुराणे प्रासादानुकीर्त्तनम् ॥२॥

---

१ क्वचित्पाठ मतः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ मण्डपादिलक्षणम् ॥३॥

तथाच तत्रैव ।

सूत उवाच ।

अथातः सम्प्रवक्ष्यामि मण्डपानान्तु लक्षणम् ।
मण्डपप्रवरान्वक्ष्ये प्रासादस्यानुरूपतः ॥१॥
त्रिविधा मण्डपाः कार्य्या ज्येष्ठ-मध्य-कनीयसः ।
नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः[१] ॥२॥
पुष्पकः पुष्पभद्रश्च सुव्रतो ऽमृतमन्दरः[२] ।
कौशल्यो बुद्धिसङ्कीर्णो गजभद्रो जयावहः ॥३॥
[३]श्रीभद्रो विजयश्चैव वास्तुकीर्त्तिः श्रुतिञ्जयः[४] ।
यज्ञभद्रो विशालश्च सुश्लिष्टः शत्रुमर्द्दनः ॥४॥
भागपञ्चो नन्दनश्च मानवो मानभद्रकः ।
सुग्रीवो हरितश्चैव कर्णिकारः परार्द्धिकः ॥५॥
सिंहश्च कामभद्रश्च सुभद्रश्च तथैव च ।
सप्तविंशं समाख्यातं लक्षणं शृणुत द्विजाः ॥६॥
स्तम्भा यत्र चतुःषष्टिः पुष्पकः स उदाहृतः ।
द्वाषष्टिः पुष्पभद्रस्तु षष्टिः सुव्रत उच्यते ॥७॥
अष्टपञ्चाशकस्तद्वत् कथ्यते ऽमृतमन्दरः[५] ।
कौशल्यः षट्च-पञ्चाशत् चतुःपञ्चाशता पुनः ॥८॥

---

१ क्वचित् ऋषिसत्तमाः ।

२ ख अमृतमन्दिरः । ग पुस्तके अमृतनन्दनः ।

३ मूले श्रीवत्सः ।　　४ घ श्रुतिधरः ।

५ मूले अष्टपञ्चाशकस्तम्भः कथ्यते ऽमृतनन्दनः ।

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

नाम्ना च बुद्धिसङ्कीर्णो द्विहीनो गजभद्रकः।
जयावहस्तु पञ्चाशच्छ्रीवत्सस्तद्विहीनकः ॥९॥
विजयस्तद्विहीनः स्याद्वास्तुकीर्त्तिस्तथैव च।
द्वाभ्यामेव प्रहीयेत ततः श्रुतिधरोऽपरः ॥१०॥
चत्वारिंशद्यज्ञभद्रस्तद्विहीनो विशालकः।
षड्विंशश्चैव सुश्लिष्टो द्विहीनः शत्रुमर्द्दनः ॥११॥
द्वात्रिंशद्भागपञ्चस्तु त्रिंशद्भिर्नन्दनः स्मृतः।
अष्टाविंशन्मानवस्तु मानभद्रो द्विहीनकः ॥१२॥
चतुर्व्विंशस्तु सुग्रीवो द्वाविंशो हरितो[1] मतः।
विंशतिः कर्णिकारः स्यादष्टादश पर्द्धिकः[2] ॥१३॥
सिंहो भवेद्विहीनः स्यात् कामभद्रो द्विहीनकः।
सुभद्रस्तु तथा प्रोक्तो द्वादशस्तम्भसंयुतः ॥१४॥
मण्डपाः कथितास्तुभ्यं यथावत् लक्षणान्विताः।
त्रिकोणं वृत्तमर्द्धन्तु ह्यष्टकोणं द्विषट्करम् ॥१५॥
चतुष्कोणन्तु कर्त्तव्यं संस्थानं मण्डपस्य तु।
राज्यञ्च विजयश्चैव शत्रूच्चाटनमेव तु ॥१६॥
पुत्रलाभः श्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत्।
त्रिकोणादिसाधनप्रकारा माघकृत्ये कुण्डेषूक्तरीत्योन्नेयाः।
एवं तु शुभदा प्रोक्तास्त्वन्यथा त्वशुभावहाः ॥१७॥
चतुःषष्टिपदं कृत्वा मध्ये द्वारं प्रकल्पयेत्।
कृत्वेत्यन्तेन द्वारबन्धाङ्गत्वेन प्राप्तवास्तुपूजानुवादः।
विस्तारद्विगुणोच्छ्रायं तत्त्रिभागात् कटिर्भवेत् ॥१८॥
तृतीयभागोपरिकटिर्मञ्जरी पूर्व्वोक्ता।

---

१ ग घ द्वाविंशद्धरितो मतः। २ मूले प्रतर्द्धिकः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विस्तारार्द्धो भवेद्गर्भो भित्तयोऽन्याः समन्ततः ।
गर्भपादेन विस्तीर्णं द्वारं त्रिगुणमायतम् ॥१९॥
उच्छ्रायपादविस्तीर्णशाखस्तद्वदुदुम्बरः ।

द्वारस्योभयत ऊर्द्धावयवौ शाखे, अथ उपरि च तिर्य्यगवयवावुदुम्बरौ ।

विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् ॥२०॥

द्वारगतविस्तारचतुर्थांशसमाः शाखासमूहा इत्यर्थः ।

त्रि-पञ्च-सप्त-नवभिः शाखाभिर्द्वारमिष्यते ।
कनिष्ठं मध्यमं ज्येष्ठं यथायोगं प्रकल्पयेत् ॥२१॥

त्रि-सप्त-पञ्चादिभिः प्रत्येकं सम्बन्धः । ततश्चाष्टादशद्वादशसंख्यानां यथासंख्यमन्वयः ।

विस्तारद्विगुणोच्छ्रायं चत्वारिंशद्भिरङ्गुलैः ।
अङ्गुलानां शतं सार्द्धं चत्वारिंशद्भिरल्पकम्[1] ॥२२॥

विस्तारद्विगुणोच्छ्रायस्य चत्वारिंशत्तमं भागमङ्गुलं कल्पयित्वा क्रमेण सार्द्धशतमुत्तमस्योच्चता, एवमग्रेऽपि द्विचत्वारिंशदधिकशतं मध्यमस्य, चत्वारिंशदधिकशतं कनिष्ठस्य ।

त्रिंशद्विंशोत्तरञ्चान्यद्वन्यमुत्तममेव च ।
शतं वाऽशीतिसहितं वातनिर्गमनं भवेत् ॥२३॥
अधिकं दशभिस्तद्वत्तथा षोडशभिः शतम् ॥
शतमानं तृतीयन्तु नवत्याऽशीतिभिस्तथा ॥२४॥
दशद्वाराणि चैतानि क्रमेणोक्तानि सर्व्वदा ।

---

१ ख चत्वारिंशद्विकल्पकं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वातनिर्गमनद्वाराणां प्रथमसंख्योत्तमा, ततः संख्याचयं मध्यमं, ततः संख्याचयमधमम् ।

अन्यानि वर्ज्जनीयानि मरणोद्वेगदानि तु ॥ २५ ॥

अन्यानि अन्यसंख्यानि ।

द्वारवेधन्तु यत्नेन सर्व्ववास्तुषु वर्ज्जयेत् ।
वृक्ष-कोण-प्रपा-द्वारस्तम्भ-कूप-ध्वजादिभिः[1] ॥ २६ ॥
कुल्या श्वभ्रेण वा विद्धं न द्वारं शुभदं भवेत् ।
क्षयश्च दुर्गतिश्चैव प्रवासः क्षुद्भयं तथा ॥ २७ ॥
दौर्भाग्यं बन्धनं रोगो दारिद्र्यं कलहस्तथा ।
विरोधश्चार्थनाशश्च सर्व्ववेधाद्भवेत् क्रमात् ॥ २८ ॥
पूर्व्वेण फलिनो[2] वृक्षाः क्षीरवृक्षास्तु दक्षिणे ।
पश्चिमे तु जलं श्रेष्ठं पद्मोत्पलविभूषितम् ॥ २९ ॥
उत्तरे सरलैस्तालैः शुभा स्यात् पुष्पवाटिका ।
याम्ये तपोवनस्थानमुत्तरे मातृकागृहम् ॥ ३० ॥
उत्तरे यज्ञशाला तु निर्म्माल्यस्थानमुत्तरे ।
[3]महानसं तथाग्नेये नैर्ऋत्येऽथ विनायकम् ॥ ३१ ॥
[4]वारुणे श्रीनिवासन्तु वायव्ये गृहमालिका ।
वारुणे सोमदैवत्ये बलिनिर्व्वपणं स्मृतम् ॥ ३२ ॥
पुरतो वृषभस्थानं शेषे स्यात् कुसुमायुधः ।
जलवापी तथैशाने विष्णुश्च जलशाय्यपि ।
एवमायतनं कुर्य्यात् कुण्डमण्डपसंयुतम् ॥ ३३ ॥

---

१ क ख—ध्वजादपि । २ ग फलिताः ।
३ क ख पुस्तके महानसमित्यादि श्लोकार्द्धं पतितम् ।
४ क ख पुस्तके श्लोकांशः पतितः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

घण्टावितानकसतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितेन जनेन सार्द्धम् ।
यः कारयेत् सुरगृहं विविधध्वजाङ्कं
श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥ ३४ ॥
एवं गृहार्च्चनविधावपि शक्तितः स्यात्
संस्थापनं कलस[1]मन्त्रविधानयुक्तम् ।
गो-वस्त्र-काञ्चन-हिरण्य-धराप्रदानं
देयं गुरुद्विजवरेषु तथाऽन्नदानम् ॥ ३५ ॥
कुर्य्यादित्यादिग्रन्थेन प्रतिष्ठायाः फलसम्बन्धः ।

मत्स्यपुराणे प्रासादाद्यनुकीर्त्तनं समाप्तम् ॥ २ ॥

---

१ मूले सकलमन्त्र ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ तत्रैव प्रतिमालक्षणम् ॥४॥

सौवर्णी राजती वापि ताम्री रत्नमयी तथा ।
[1]शैली-दारुमयी वापि लौह-सीसमयी तथा ॥ १ ॥
रीतिकाधातुयुक्ता वा ताम्र-कांस्यमयी तथा ।
शुभदारुमयी वापि देवताऽर्चा प्रशस्यते ॥ २ ॥
अङ्गुष्ठपर्व्वादारभ्य वितस्तिं यावदेव हि ।
गृहेषु प्रतिमा कार्य्या नाऽधिका शस्यते बुधैः ।
आषोडशा तु प्रासादे कर्त्तव्या नाधिका ततः ॥ ३ ॥

स्वल्पतरप्रासादविषयमेतत् ।

अन्यत्र त्वाह ।

मध्योत्तमकनिष्ठा तु कार्य्या वित्तानुसारतः ।
द्वारोच्छ्रायस्य यन्मानमष्टांशेन तु कारयेत्[2] ॥ ४ ॥
भागद्वयेन प्रतिमा त्रिभागीकृत्य तत्पुनः ।
पीठिका भागतः कार्य्या नाऽतिनीचा न चोच्छ्रिता ॥ ५ ॥

इति ।

अथाकृतयस्तत्रैव—

विष्णोस्तावत्प्रवक्ष्यामि यादृग्रूपं प्रशस्यते ।
छत्राकारं शिरस्तस्य कम्बुग्रीवं शुभेक्षणम् ॥ ६ ॥
तुङ्गनासं शुक्तिकर्णं प्रसन्नोरुभुजक्रमम् ।
क्वचिदष्टभुजं कुर्य्याच्चतुर्भुजमथाऽपि वा ॥ ७ ॥

---

१ क ख पुस्तकद्वये शैल— ।  २ मूले अष्टधा तत्तु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्विभुजं वापि कर्त्तव्यं भवनेषु पुरोधसा ।
खड्गो गदा वरः[1] पद्मं देयं दक्षिणतो हरेः ।
धनुश्च खेटकं चैव शङ्खं चक्रञ्च[2] वामतः ॥ ८ ॥

एवमष्टभुजत्वे ।

दक्षिणेन गदापद्मं वासुदेवस्य कारयेत् ।
वामतः शङ्ख-चक्रे तु कर्त्तव्ये भूतिमिच्छता ॥ ९ ॥

एवं चतुर्भुजत्वम् ।

कृष्णावतारे तु गदा वामहस्ते प्रशस्यते ।
यथेच्छया शङ्ख-चक्रे चोपरिष्टात् प्रकल्पयेत् ॥ १० ॥

कृष्णावतारस्य द्विभुजत्वेन[3] दक्षिणे शङ्ख-चक्रयोर्विकल्प इत्यर्थः ।

[4][अधस्तात् पृथिवी तस्य पादमध्ये तु कल्पयेत् ।]
दक्षिणे प्रणतं तद्वद्गरुत्मन्तं निवेशयेत् ॥ ११ ॥
वामतस्तु भवेल्लक्ष्मीः पद्महस्ता सुशोभना ।
गरुत्मानग्रतो वाऽपि संस्थाप्यो भूतिमिच्छता ॥ १२ ॥
श्रीश्च पृथ्वी च कर्त्तव्ये पार्श्वयोः पद्मसंयुते ।
तोरणं चोपरिष्टात्तु विद्याधरसमन्वितम् ॥ १३ ॥ इति ।

तथा—

दशतालः स्मृतो रामो बलिर्वैरोचनिस्तथा ।
वराहो नारसिंहश्च सप्ततालश्च वामनः ।
मत्स्य-कूर्म्मौ च निर्द्दिष्टौ यथाशोभं स्वयम्भुवा ॥ १४ ॥

---

१ ख पुस्तके शरः । २ ग पुस्तके शङ्ख-चक्रे च ।
३ ख द्विभुजत्वात् । ४ [ ] चिह्नितांशः क्वचिदधिकः पाठः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथा रुद्रस्य—

शुक्लोऽतिरश्मि[1] सङ्घातश्चन्द्राङ्कितजटो विभुः ।
जटामुकुटधारी च द्विरष्टवत्सराकृतिः[2] ॥ १५ ॥
बाहू वारणहस्ताभौ [3]वृषजङ्घोरुमण्डलः ।
ऊर्द्धकेशस्तु कर्त्तव्यो दीर्घायतविलोचनः ॥ १६ ॥
व्याघ्रचर्म्मपरीधानः कटिसूत्रत्रयान्वितः ।
हारकेयूरसम्पन्नो भुजगाभरणस्तथा ॥ १७ ॥
खेटकं वामहस्ते तु खड्गञ्चैव तु दक्षिणे ।
शक्तिं दण्डं त्रिशूलञ्च दक्षिणे तु निवेशयेत् ॥ १८ ॥
कपालं वामपार्श्वे तु नागं खट्वाङ्गमेव च ।
एकश्च वरदो हस्तस्तथाऽक्षवलयोऽपरः ॥ १९ ॥
नृत्यन्दशभुजः कार्य्यो गजचर्म्माम्बरस्तथा ।
तथा त्रिपुरदाहे च बाहवः षोडशैव तु ॥ २० ॥
शङ्ख-चक्र-गदा-[4]शङ्कुर्घण्टा तत्राधिका भवेत् ।
तथा धनुः पिनाकश्च शरो विष्णुमयस्तथा ॥ २१ ॥ इति ।

शङ्कु-घण्टयोरायुधान्तरेण सहैकहस्तवृत्तित्वमेवाधिक्यम् ।

तीक्ष्णनासाग्रदशनः करालवदनो महान् ।
भैरवः शस्यते लोके प्रत्यायतनसंस्थितः ।
न मूलायतने[5] कार्य्यो भैरवस्तु भयङ्करः ॥ २२ ॥ इति ।

तथा तत्रैव—

अधुना सम्प्रवक्ष्यामि अर्द्धनारीश्वरं परम् ।
अर्द्धेन देवदेवस्य नारीरूपं सुशोभनम् ॥ २३ ॥

---

१ ख रक्तः ।   २ मूले ह्यष्टवर्षाकृतिस्त सः ।
३ ख वृत्त— ।   ४ शार्ङ्गमिति क्वचित् पाठः ।   ४ ख मूर्त्यायतने ।

P. P. Ac. Gunratnasuri M.S.   Jin Gun Aaradhak Trust

ईशार्द्धे तु जटाभारो बालेन्दुकलया युतः।
उमार्द्धे चापि दातव्यौ सीमन्त-तिलकावुभौ ॥ २४ ॥
वासुकिर्दक्षिणे कर्णे वामे कुण्डलमादिशेत्।
बालिका चोपरिष्टात्तु कपालं दक्षिणे करे ॥ २५ ॥

बालिकेति कर्णोपरिभागस्थ-बालीति महाराष्ट्रभाषया प्रसिद्धं भूषणम्।

त्रिशूलं वाऽपि कर्त्तव्यं देवदेवस्य शूलिनः।
[1][वामतो दर्पणं दद्यादुत्पलं वा विशेषतः ॥ २६ ॥
वामबाहुश्च कर्त्तव्यः केयूरवलयान्वितः।
उपवीतञ्च कर्त्तव्यं मनिमुक्तामयं सदा] ॥ २७ ॥
स्तनभारमथार्द्धे तु वामे पीनं प्रकल्पयेत्।
हारार्द्धमुज्ज्वलं कुर्य्यात् श्रोण्यर्द्धस्थं तथैव च ॥ २८ ॥
लिङ्गार्द्धमूर्द्धगं कुर्य्याद्व्याघ्राजिन[2]कृताम्बरम्।
वामे लम्बं परीधानं कटिसूत्रचयान्वितम् ॥ २९ ॥
नानारत्नमयोपेतं दक्षिणं भुजगान्वितम्।
देवस्य दक्षिणं पादं पद्मोपरि तु संस्थितम् ॥ ३० ॥
किञ्चिदूर्द्ध्वं तथा वामं भूषितं नूपुरेण तु।
रत्नैर्विभूषितं कुर्य्यादङ्गुलीष्वङ्गुलीयकम् ॥ ३१ ॥
सालक्तकं तथा पादं पार्व्वत्या दर्शयेत् सदा।
अर्द्धनारीश्वरस्येदं रूपमस्मिन्नुदाहृतम् ॥ ३२ ॥ इति।

---

१ क पुस्तके [ ] चिह्नितांशः पतितः।

२ क पुस्तके द्वीप्यजिन—। मूले व्यालाजिन—।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्रैव—

उमामहेश्वरस्यापि लक्षणं शृणुत द्विजाः ।
चतुर्ब्बाहुं द्विबाहुं वा जटाभारेन्दुभूषितम् ॥ ३३ ॥
लोचनत्रयसंयुक्तमुमैकस्कन्धपाणिकम् ।
दक्षिणे चोत्पलं हस्ते वामं कुचभरे करम् ॥ ३४ ॥
द्वीपिचर्म्मपरीधानं नानारत्नोपशोभितम् ।
सुप्रतिष्ठं सुवेषञ्च तथार्द्धेन्दु[1]-हुताशनम् ॥ ३५ ॥
वामे सुसंस्थिता देवी तस्योरौ बाहुगूहिता ।
शिरोभूषणसंयुक्तैरलकैर्ललितानना ॥ ३६ ॥
सवालिकाकर्णवती ललाटे तिलकोज्ज्वला ।
मणिकुण्डलसंयुक्ता कर्णिकाभरणा क्वचित् ॥ ३७ ॥
तप्तकेयूरबहुला हरवक्त्रावलोकिनी ।
वामांसं देवदेवस्य स्पृशती लीलया तथा ॥ ३८ ॥
दक्षिणं तु बहिः कृत्वा बाहुं दक्षिणतस्तथा ।
स्कन्धे वा दक्षिणे कुक्षौ स्पृशत्यङ्गुलिजैः क्वचित् ॥ ३९ ॥
वामे च दर्पणं दद्यादुत्पलं वा सुशोभनम् ।
कटिसूत्रद्वयञ्चैव नितम्बे स्यात् सुशोभनम् ॥ ४० ॥
जया च विजया चैव कार्त्तिकेय-विनायकौ ।
पार्श्वे च दर्शयेत्तत्र तोरणासनबाह्यत[2] ॥ ४१ ॥ इति ।

एवं ब्रह्मादिप्रतिमा अपि संवत्सरदीधितौ नवरात्र-व्रतादि-प्रकरणोक्तध्यानविधया उन्नेयाः ।

इति मत्स्यपुराणोक्तं प्रासादप्रतिमालक्षणम् ॥

---

१ क पुस्तके तथार्द्धे च हुताशनम् ।

२ क्वचित्पाठः तोरणे गणगुह्यकानाम् ।

अथान्यथोक्तं प्रतिमालक्षणं कपिञ्जलसंहितायाम्[१]।

अङ्गुलैरेकविंशत्या प्रतिमा वसुधापतेः।
द्वादशाङ्गुलमाना तु लोहजा पूर्व्वजन्मनः॥ ४२॥

लौहैर्धातुभिर्ज्ञाता।

सुवर्णं रजतं ताम्रं त्रिविधं लोहमिष्यते॥ ४३॥

इति तत्रैवोक्तेः।

नवाऽङ्गुला क्षत्त्रियस्य विशः सप्ताङ्गुला मता।
पञ्चाऽङ्गुला चतुर्थस्य प्रतिमा भवने भवेत्॥ ४४॥ इति

अत्र लोहजा भवने भवेदिति प्रतिवाक्यमन्वयः। तेन लोहजायामेव गृहगतायामेवं परिमाणनियमो न शिलादिमय्याम्। नवाङ्गुला क्षत्त्रियस्येति वसुधापति-भिन्नविषयम्।

एवं च यद्देवीपुराणे,—

अङ्गुष्ठपर्व्वादारभ्य वितस्तिर्यावदेव हि।
गृहेषु प्रतिमा पूज्या नाधिका शस्यते बुधैः॥४५॥ इति

यच्च—

सप्ताङ्गुलं समारभ्य यावत्स्याद्द्वादशाङ्गुलम्।
गृहेष्वधः समाख्याता प्रासादे चाधिकं स्मृतम्॥४६॥ इति

यच्च शौनकोक्तम्,—

द्वादशाङ्गुलमानं वा षडङ्गुलमथापि वा।
अथवाऽष्टाङ्गुलं कुर्य्याद्बिम्बं नातोऽधिकं स्मृतम्॥ ४७॥

इति, तदप्युक्तविषय एव व्यवस्थापनीयम्।

प्रासादप्रतिमामानं तूक्तं तन्त्रसारे,—

प्रतिष्ठां कारयेद्विष्णोः कुर्य्यात् सुप्रतिमां बुधः।

---

१ ग पुस्तके कपिलसंहितायाम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लोहैर्व्वा शिलया दार्व्वा मृदा वाऽपि यथाक्रमम् ।
[1]षणवत्यङ्गुलां योग आसीनामथवा स्थिताम् ॥ ४८ ॥

इति धातुविशेषे फलविशेषः पाद्मसंहितायाम्,—

हिरण्मयी प्रतिकृतिः सर्व्वसम्पत्करी भवेत् ।
वित्तं यशश्च विज्ञानं विज्ञेयं राजतीफलम् ॥ ॥ ४९ ॥
पिशाचादिवशीकारे प्रतिमा त्वायसी मता ।
उच्चाटनकरी ताम्रप्रतिमा कमलासना ॥ ५० ॥

इति उक्तसंख्याव्यवस्थापि तन्त्रसार एवोक्ता ।

मुखादूर्द्धं द्व्यङ्गुलोच्चां नवाङ्गुल-लसन्मुखाम् ।
सुवृत्तत्र्यङ्गुलग्रीवामास्तनाच्च षडङ्गुलाम् ।
पञ्चदशाङ्गुलां नाभेरासार्द्धदशकाङ्गुलाम् ॥ ५१ ॥
वृषणादामूलतश्च चार्द्धद्व्यङ्गुलमायताम् ।
तावदाङ्गुलतो दीर्घां चैत्यादष्टादशाङ्गुलाम् ॥ ५२ ॥

चैत्यं जानु ।

तथा—

द्व्यङ्गुलात् स चैत्या द्वाविंशज्जङ्घया युताम् ।
आरभ्य गुल्फमध्यं चेत् सहार्द्धचतुरङ्गुलाम् ॥ ५३ ॥

इति ऊर्द्धमिति केशभार-किरीटयोः प्रत्येकमेव अङ्गुलमिति द्व्यङ्गुलत्वमत एव किरीटं विहाय शरीरपरिमाणे षणव-त्यङ्गुलित्वमपास्तम्[2]। निर्द्दिष्टसंख्यावयवश्चोत्तरसंख्यावधित्वेन ग्राह्यः। तथा ग्रीवाधः स्तनपर्य्यन्तं[1] षडङ्गुलामिति। वृषणादामूलतश्चेत्यच चकारद्वयं पूर्व्वोत्तरान्वितं बोध्यम् ।

---

१ क ख पुस्तकद्वये षणवत्यङ्गुलाभोगमासीनाम् ।
२ ख घ पुस्तकद्वये अव्याहृतं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ केशवादिमूर्त्तिलक्षणम् ॥ ५ ॥

केशवो मधुसूदनः, सङ्कर्षण-दामोदरौ ।
स वासुदेवः प्रद्युम्नो दक्षेऽच करशङ्खिनः ॥ १ ॥
विष्णुमाधवावनिरुद्धपुरुषोत्तमाऽधोक्षजाः ।
जनार्द्दनश्च वामोच्च-करस्थितदरा मताः ॥ २ ॥

दरं चक्रम् ।

स श्रीधरो हृषीकेशो गोविन्दश्च त्रिविक्रमः ।
नृसिंहश्चाच्युतश्चैव वामाधः करशङ्खितः ।
वामनो नारायणश्च पद्मनाभ उपेन्द्रकः ॥ ३ ॥
हरिः कृष्णश्च दक्षाधःकरे शङ्खधरा मताः ।
शङ्खचक्रगदापद्मधराश्चैता हि सर्व्वशः ॥ ४ ॥ इति ।

एताश्चतुर्व्विंशतिमूर्त्तयः शङ्खचक्रगदापद्मधरा इति सर्व्वासां चतुर्हस्तत्वमवसीयते । शेषं स्पष्टम् ।

क्रम-व्युत्क्रम-पद्मादि-गदादिषूत्क्रमस्तथा ।
अर्द्धक्रमः सान्तरश्च षट्सु षट्स्वथ पूर्व्विणाम्[२] ॥ ५ ॥

अस्यायमर्थः ।

शङ्ख-चक्र-गदा-पद्मानीति क्रमः, पद्म-गदा-चक्र-शङ्खा इति व्युत्क्रमः, शङ्खानन्तरं पद्ममाद्यं कृत्वाऽन्वय उत्क्रमः । तदनन्तरं गदामादिं कृत्वेतरयोः व्युत्क्रमः । शङ्खचक्रमित्यर्द्ध-क्रमः । शङ्खचक्रयोर्मध्ये गदापद्मे निवेश्ये, इत्यन्तरक्रमः ।

---

१ ग ग्रीवाननस्तनपर्य्यन्तम् । २ ख अरिपूर्व्विणाम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततश्च दक्षिणोर्द्धकरमारभ्य प्रादक्षिण्येन शङ्खचक्रगदापद्मधारी केशवः, पद्मगदाचक्रशङ्खधारी मधुसूदनः, शङ्खपद्मचक्रगदाधारी सङ्कर्षणः, गदापद्मशङ्खचक्रधारी दामोदरः, शङ्खचक्रपद्मगदाधारी वासुदेवः, शङ्खगदापद्मचक्रधारी प्रद्युम्नः।

एवं शिष्टव्यूहचये दक्षोर्द्धकरे चक्रादीनामेकैकनियममङ्गीकृत्य शिष्टानां निवेशक्रम ऊह्यः। इति तन्त्राद्युक्तं प्रतिमालक्षणम्।

शिल्पशास्त्रे विश्वकर्म्मा च,—

अण्डकै[१]र्व्विविधाकारैः शिखरैः पर्व्वतोपमैः।
यानि नामान्यमीषान्तु तानि तुभ्यं वदाम्यहम् ॥६॥

अण्डकशब्देन कुम्भाकाराः पाषाणा मञ्जर्य्या उपरिदेशे निधेया उच्यन्ते।

केशरी सर्व्वतोभद्रो नन्दनो नन्दशालकः।
नन्दिवर्द्धो[२] मन्दरश्च श्रीवृक्षश्च विमानकः ॥ ७ ॥
हिमवान् हेमकूटश्च कैलासः पृथिवीजयः।
इन्द्रनीलो महानीलो भूधरोऽथ त्रिकूटकः ॥ ८ ॥
वैदूर्य्य-पद्मरागश्च सुशस्तो मुकुटोज्ज्वलः।
ऐरावतो राजहंसो गरुड़ो वृषभस्तथा ॥ ९ ॥
मेरुः प्रासादराजो[३] वै सर्व्वदेवालयो हि सः।
आदौ पञ्चाण्डको यस्तु केशरी नाम कीर्त्तितः ॥१०॥

---

१ ख अखण्डैः। २ ख नन्दीवर्द्धो। ३ ग—राजा वै।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नवाण्डको भवेद्यस्तु सर्व्वतोभद्र उच्यते ।
त्रयोदशाण्डको यस्तु प्रासादो नन्दनः स्मृतः ॥ ११ ॥

इत्यारभ्योद्देशक्रमेण चतुर्णां चतुर्णामण्डकानां वृद्धिकथनपूर्व्वकमुपसंहृतम् ।

अण्डकाः शतमेकश्च प्रासादो मेरुरुच्यते ॥१२॥ इति ।

यत्र च यन्नामानः प्रासादा मत्स्यपुराणादावुक्ता इह प्रत्यभिज्ञायन्ते, तत्पुरस्कारेण तत्र विहितगुणैः सहाऽत्रविहितगुणस्य तेषु समुच्चयेनोपसंहारो बोध्यः ।

ज्योतिष्टोमादिकर्म्मसु[1] सर्व्वशाखाप्रत्ययवत् प्राणविद्याधिवासनासु सर्व्ववेदान्तप्रत्ययवत् प्रासादप्रतिमास्वपि सर्व्वस्मृतिप्रत्ययत्वेन तत्र तत्र विहितगुणानामुपसंहारस्य न्यायसिद्धत्वात् ।

न च शिल्पशास्त्रस्य चतुर्द्दशविद्यास्थानबहिर्भूतत्वेनाप्रामाण्यात् तत्रत्यगुणानामनुपसंहार्य्यत्वम् ।

प्रासादाद्यंशे तेषामपि धर्म्मशास्त्रत्वात् वास्तुदेवतापूजाद्यंशे तेषामपि प्रामाण्यं स्पष्टं भाट्टैरुक्तत्वाच्च । पौराणगुणैरत्रत्यगुणानां विरोधे विकल्पो बोध्यः ।

---

१ क पुस्तके ज्योतिष्टोमादिकेषु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ लिङ्गलक्षणम् ॥ ६ ॥

तत्र तावन्महिमोच्यते, स्कान्दे शिवोक्तिः,—

न तुष्याम्यर्च्चितोऽर्च्चायां पुष्प-धूप-निवेदनैः ।
लिङ्गेऽर्च्चिते यथाऽत्यर्थं परं तुष्यामि पार्व्वति ॥१॥
एष देवि पुरा कल्पे लीनोऽहं सर्व्वदैवतैः ।
लीनत्वाल्लिङ्गमित्युक्तं सदेवासुरमानुषैः ॥२॥ इति ।

शिवनारदसंवादे,—

विना लिङ्गाऽर्च्चनं यस्य कालो गच्छति नित्यशः ।
महाहानिर्भवेत्तस्य दुर्व्वृत्तस्य दुरात्मनः ॥ ३ ॥
कलौ लिङ्गार्च्चनं श्रेष्ठं यथा लोकेषु दृश्यते ।
तथा नास्तीति नास्तीति नास्तीत्येव सुनिश्चयः ॥४॥
इति ।

लैङ्गे,—

बहुनाऽत्र किमुक्तेन चराचरमिदं जगत् ।
शिवलिङ्गं प्रतिष्ठाप्य स्थापितं तत्र न संशयः[१] ॥ ५ ॥
लिङ्गवेदिर्म्महादेवी लिङ्गं साक्षान्महेश्वरः ।
तयोः सम्पूजनान्नूनं देवी देवश्च पूजितौ ॥ ६ ॥
तस्य पुण्यं मया वक्तुं सम्यग्युगशतैरपि ।
शक्यते नैव विप्रेन्द्र तस्मात्संस्थापयेच्छिवम् ॥७॥ इति ।

तथा,—

ते वाञ्छन्ति महाभोगान् राज्यं वा त्रिदशालये ।
येऽर्च्चयन्ति सदा काले लिङ्गरूपं महेश्वरम् ॥८॥ इति ।

---

१ ख घ पुस्तकद्वये स्थापितं तत्र संशयः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्र लिङ्गं द्विविधम्,—

अकृत्रिमं स्वायम्भुवं वाणलिङ्गादि। कृत्रिमं प्रासादादौ गृहे वा निर्म्माणपूर्व्वकं स्थापितं पाषाणधात्वादिमयम्।

तत्र स्वायम्भुवलक्षणम्।

आचार्य्यमनपेक्ष्यैव स्वयम्भूतो महेश्वरः।
यत्र चैव स्वयं व्यक्तं लिङ्गमुक्तं स्वयम्भुवम्॥ ९॥

शैवसिद्धान्तशेखरे,—

शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम्।
पद्माभमस्तकं ब्राह्मं चक्राभं शाक्रमुच्यते॥ १०॥
शिरोयुग्मन्तथाग्नेयं त्रिपदं याम्यमीरितम्।
खड्गाभं निर्ऋतेर्लिङ्गं वारुणं कलसाकृतिम्॥ ११॥
वायव्यां ध्वजवल्लिङ्गं कौवेरन्तु गदानिभम्।
ईशानन्तु त्रिशूलाभं लोकपालमिति श्रुतम्॥ १२॥

श्रुतं स्वयम्भूलिङ्गमाख्यातमिति।

## अथ वाणलिङ्गम्।

कालोत्तरे,—

उत्पत्तिं वाणलिङ्गानां लक्षणं लेशतः शृणु।
नर्म्मदा-देविकयोश्च गङ्गा-यमुनयोस्तथा॥ १३॥
सन्ति पुण्यनदीनाञ्च वाणलिङ्गान्यनेकशः।
अपि तानि षडस्राणि चक्राङ्कानि विशेषतः॥ १४॥
इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि च।
अस्त्रशूलाङ्कितं रौद्रं हिमकुन्देन्दुवर्च्चसम्।
चतुर्व्वर्णमयं वापि वैष्णवं जायतेऽग्रतः॥ १५॥ इति

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथा,—

वैष्णवं चक्रशङ्खाढ्यं गदाऽब्जादिविभूषितम् ।
श्रीवत्सकौस्तुभाङ्कञ्च [1]शेषं सिंहासनाङ्कितम् ॥ १६ ॥
वैनतेयसमाङ्कञ्च तथा विष्णुपदाङ्कितम् ।
वैष्णवं नामतः प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ॥ १७ ॥ इति

नामनिर्व्वचनञ्च—

[2][वाणः सदाशिवो देवो वाणो वाणासुरोऽपि च ।]
तेन तस्मै कृतं यस्माद्वाणलिङ्गमुदाहृतम् ।
कृतप्रतिष्ठं तल्लिङ्गं वाणाख्येन शिवेन च ॥ १८ ॥ इति

## अथ रौद्रं सिद्धान्तशेखरे,—

नदीसमुद्भवं रौद्रमन्योन्यस्य विघर्षणात् ।
नदीवेगात् समं स्निग्धं सञ्जातं रौद्रमुच्यते ॥ १९ ॥ इति

नद्यश्च नर्म्मदा ।

नर्म्मदासम्भवं रौद्रं वाणलिङ्गवदीरितम् ॥ २० ॥ इति
कालोत्तरात् ।

## अथ शिवनाभिलिङ्गं शिवनारदसंवादे,—

शिवनाभिमयं लिङ्गं नित्यं पूज्यं महर्षिभिः ।

इति प्रक्रम्योक्तम्—

[3][अष्टाङ्गुलसमुच्छ्रायं कामदं सर्व्वदा भवेत् ॥ २१ ॥

---

१ ख ग पुस्तकद्वये ग्रीव— ।

२ ख घ पुस्तकद्वये [ ] चिह्नितांशः पतितः ।

३ ख घ पुस्तकद्वये [ ] चिह्नितांशः पतितः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

षडङ्गुलसमुच्छ्रायं मुक्तिदं प्राणदं तथा ।
त्र्यङ्गुलं द्व्यङ्गुलं पूज्यं भक्तियुक्तैर्नरैः सदा ] ॥ २२ ॥
चतुरङ्गुलमुच्छ्रायं रम्यवेदिकया युतम् ।
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः ।
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धञ्चाधमं स्मृतम् ॥ २३ ॥ इति

अथ कृत्रिमं सिद्धान्तशेखरे,—

मानुषं बहुधा प्रोक्तं रत्नजं लोहजन्तथा ।
धातुजं मृन्मयं वार्क्षं शैलं पिष्टादिनिर्म्मितम् ॥ २४ ॥

लौहं चतुर्व्विधमित्युक्तं विष्णुधर्म्मोत्तरे चापलक्षणे,—

लौहानि राम चत्वारि शस्यन्ते चापकर्म्मणि ।
सौवर्णं राजतं ताम्रन्तथा कृष्णायसं द्विज ॥ २५ ॥ इति ।

कालोत्तरे—

लिङ्गमस्तकविस्तारो लिङ्गोच्छ्रायसमो भवेत् ।
त्रिगुणः परिणाहश्च तथा पिण्डी प्रतिष्ठिता ॥ २६ ॥
लिङ्गतुल्यं प्रणालं स्यात् पञ्चसूत्रस्य लक्षणम् ।
पञ्चसूत्रसमायुक्तं शिवलिङ्गं समर्च्चयेत् ॥ २७ ॥
भुक्तिदं मुक्तिदं देवि धनारोग्यसुतप्रदम् ।

इदं पाषाणलिङ्गे आवश्यकं, न रत्नलिङ्गादौ ।

न कुर्य्याल्लक्षणोद्धारं रत्नजानां चलात्मनाम् ॥ २८ ॥

इत्युक्तेः ।

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# ( २ य ) प्रासादलक्षणम्[१] ॥ ७ ॥

अथ बृहत्संहितोक्तम्—

[२]कृत्वा प्रभूतसलिलमारामान्विनिवेश्य च ।
देवतायतनं कुर्य्याद्यशोधर्म्माभिवृद्धये ॥ १ ॥
इष्टापूर्त्तेन लभ्यन्ते ये लोकास्तान् बुभूषता[३] ।
देवानामालयः कार्य्यो द्वयमप्यत्र दृश्यते ॥ २ ॥
सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च ।
स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः ॥ ३ ॥
सरःसु नलिनीछत्रनिरस्तरविरश्मिषु ।
हंसाद्यास्लिष्टकह्लारवीचीविमलवारिषु ॥ ४ ॥
हंस-कारण्डव-क्रौञ्च-चक्रवाकविराविषु ।
पर्य्यन्तनिचुलच्छायाविश्रान्तजलचारिषु ॥ ५ ॥
क्रौञ्चकाञ्चीकलापाश्च कलहंसकलस्वनाः ।
नद्यस्तोयांशुका यत्र शफरीकृतमेखलाः[४] ॥ ६ ॥
[५]पुण्यतीरद्रुमोत्तंसाः सङ्गमश्रोणिमण्डलाः ।
पुलिनाभ्युन्नता रम्या हंसहासाश्च निम्नगाः ॥ ७ ॥
वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु ।
रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च ॥ ८ ॥

---

१ ख पुस्तके प्रतिमानिर्म्माणलक्षणम् ।

२ क ग पुस्तकद्वये कृत्वा भूतसमं लिङ्गम् ।

३ क ख पुस्तकद्वये विभूषताम् ।    ४ क शफरीकृतयः स्थलाः ।

५ क फुल्ल— ।



P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्म्मणि ।
ता एव तेषां शस्यन्ते देवतायतनेष्वपि ॥ ९ ॥
चतुःषष्टिपदं कार्य्यं देवतायतनं तदा ।

एतत्पूर्व्ववत् ।

द्वारञ्च मध्यमं तस्मिन् समदिक्स्थं[1] प्रशस्यते ॥ १० ॥
यो विस्तारो भवेत्तस्य[2] द्विगुणा तु समुन्नतिः ।
उच्छ्रायाद्यस्तृतीयोऽंशस्तेन तुल्या कटिर्भवेत् ॥ ११ ॥
विस्तारार्द्धं भवेद्गर्भो भित्तयोऽन्याः समन्ततः ।
गर्भपादेन विस्तीर्णं द्वारं द्विगुणमुच्छ्रितम् ॥ १२ ॥
उच्छ्रायात् पादविस्तीर्णा शाखा तत्र [3]उदुम्बरः ।
विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् ॥ १३ ॥
त्रि-पञ्च-सप्त-नवभिः शाखाभिस्तत् प्रशस्यते ।
अधःशाखा चतुर्म्मार्गे प्रतीहारौ निवेशयेत् ॥ १४ ॥
शेषं मङ्गल्यविहगश्रीवृक्षस्वस्तिकैर्घटैः ।
मिथुनैः पत्रवल्लीभिः [4]प्रमथैश्चापि शोभयेत् ॥ १५ ॥
द्वारमानाष्टभागोना प्रतिमा स्यात् सपिण्डिका ।
द्वौ भागौ प्रतिमा तत्र तृतीयोऽंशश्च पिण्डिका[5] ॥ १६ ॥
मेरु-मन्दर-कैलास-विमानच्छन्द-नन्दनाः ।
[6]समुद्ग-पद्म-गरुडा नन्दिवर्द्धन-कुञ्जराः ॥ १७ ॥
गुहराजो वृषो हंसः सर्व्वतोभद्रको घटः[7] ।
सिंहो वृत्तश्चतुष्कोणः षोडशाऽष्टाश्रयस्तथा ॥ १८ ॥

---

१ क ख पुस्तकद्वये समन्दिरम् ।
२ क भवेद् यस्य ।
३ मूले तद्वदुदुम्बरः ।
४ क ख पुस्तकद्वये प्रथमैः ।
५ ग तृतीयश्चापि पिण्डिका ।
६ क ख पुस्तकद्वये समुद्र— ।
७ ख घ पुस्तकद्वये—भद्रकोटयः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इत्येते विंशतिः प्रोक्ताः प्रासादाः संज्ञया मया ।
यथोक्तानि क्रमेणैव लक्षणानि वदाम्यतः ॥ १९ ॥
तत्र षडस्रिर्मेरुर्द्वादशभौमो विचित्रकुहरश्च ।
द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्धस्तविस्तीर्णः ॥ २० ॥
त्रिंशद्धस्तायामो दशभौमो मन्दरः शिखरयुतः ।
कैलासोऽपि शिखरवान् अष्टाविंशोऽष्टभौमश्च ॥ २१ ॥
जालगवाक्षयुक्तो विमानसंज्ञस्त्रिसप्तकायामः ।
नन्दन इति षड्भौमो द्वात्रिंशः षोडशाण्डयुतः ॥ २२ ॥
वृत्तः [१]समुद्गनामा पद्मः पद्माकृतिः शयानष्टौ ।
शृङ्गेणैकेन भवेदेकैव च भूमिका तस्य ॥ २३ ॥
गरुडाकृतिश्च गरुडो नन्दीति च षट्चतुष्कविस्तीर्णः ।
कार्य्यश्च सप्तभौमो विभूषितोऽण्डैश्च विंशत्या ॥ २४ ॥
कुञ्जर इति गजपृष्ठः षोडशहस्तः समन्ततो मूलात् ।
गुहराजः षोडशकस्त्रिचन्द्रशाला भवेद्वलभी ॥ २५ ॥
वृष एकभूमिशृङ्गो द्वादशहस्तः समन्ततो वृत्तः ।
हंसो हंसाकारो [२]घटोऽष्टहस्तः कलशरूपः ॥ २६ ॥
द्वारैर्युतश्चतुर्भि र्बहुशिखरो भवति सर्व्वतोभद्रः ।
बहुरुचिरचन्द्रशालः षड्विंशः पञ्चभौमश्च ॥ २७ ॥
सिंहो सिंहाक्रान्तो द्वादशकोणोऽष्टहस्तविस्तीर्णः ।
चत्वारोऽञ्जनरूपाः पञ्चाण्डयुताश्च चतुरस्राः ॥ २८ ॥

---

१ क ख समुद्गनामा ।
२ क ख पुस्तकद्वये घटो वृत्तहस्तः ।

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

चत्वारो वृषभाः तेषामेव भूमिमानम्—

भूमिकाऽङ्गुलिमानेन मयस्याष्टोत्तरं शतम् ।
सार्द्धं हस्तत्रयञ्चैव कथितं विश्वकर्म्मणा ॥ २९ ॥

प्राहुः स्थपतयश्चात्र मतमेकं विपश्चितः ।
कपोतपालिसंयुक्ता न्यूना गच्छन्ति तुल्यताम् ॥ ३० ॥

प्रासादलक्षणमिदं कथितं समासा-
द्गर्गेण यद्विरचितं तदिहास्ति सर्व्वम् ।
मन्वादिभिर्व्विरचितानि पृथूनि यानि
तत् संस्मृतिं प्रति मयाऽत्र कृतोऽधिकारः ॥३१॥

इति बृहत्संहितायां (२ य) प्रासादलक्षणं षट्पञ्चाशत्तमोऽध्यायः ॥ ७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ वज्रलेपः ॥ ८ ॥

आमं तिन्दुकमामं कपित्थकं पुष्पमपि च शाल्मल्याः ।
बीजानि शल्लकीनां धन्वनवल्को वचा चेति ॥ १ ॥
एतैः सलिलद्रोणः क्वाथयितव्योऽष्टभागशेषश्च ।
अवतार्य्योऽस्य च कल्को द्रव्यैरेतैः समनुयोज्यः ॥ २ ॥
श्रीवासकरसगुग्गुलुभल्लातक[1]कुन्दुरूक सर्ज्जरसैः ।
अतसीविल्वैश्च युतः कल्कोऽयं वज्रलेपाख्यः ॥ ३ ॥
प्रासादहर्म्यवलभीलिङ्गप्रतिमासु कुड्यकूपेषु ।
सन्तप्तो दातव्यो वर्षसहस्रायुत[2]स्थायी ॥ ४ ॥
लाक्षा[3]कुन्दुरुगुग्गुलु गृहधूमकपित्थविल्वमध्यानि ।
नागवलाफलतिन्दुकमदनफलमधूकमञ्जिष्ठाः ॥ ५ ॥
सर्ज्जरस रसामलकानि[4] चेति कल्कः कृतो द्वितीयोऽयम् ।
वज्राख्यः प्रथमगुणैरयमपि तेष्वेव कार्य्येषु ॥ ६ ॥
गोमहिषाजविषाणैः खररोम्णा महिषचर्म्मगव्यैश्च ।
निम्बकपित्थकरसैः सह वज्रतरो नाम कल्कोऽन्यः[5] ॥७॥
अष्टौ सीसकभागाः कांसस्य द्वौ तु रीतिकाभागः ।
मयकथितो योगोऽयं विज्ञेयो वज्रसङ्घातः ॥ ८ ॥

इति वृहत्संहितायां वज्रलेपो नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ८ ॥

---

१ क पुस्तके गुग्गलूत्तम ।
२ क पुस्तके—स्थायि ।
३ ख कुष्ठ ।
४ ग पुस्तके सर्ज्जरसामलकानि ।
५ क्वचित् कल्कोऽयम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ (२य) प्रतिमालक्षणम् ॥ ६ ॥

तत्रैव—

[1]जालान्तरगे भानौ यदणुतरं दर्शनं रजो याति ।
तद्विन्द्यात्परमाणुं प्रथमं तद्धि प्रमाणानाम् ॥ १ ॥
परमाणुरजो वालाग्रलिक्षा-यूका-यवोऽङ्गुलं चेति ।
अष्टगुणानि यथोत्तरमङ्गुलमेकं भवति मात्रा ॥ २ ॥
देवागारद्वारस्याष्टांशोनस्य यस्तृतीयोऽंशः ।
तत् पिण्डिकाप्रमाणं प्रतिमा तद्द्विगुणपरिमाणा ॥ ३ ॥
स्वैरङ्गुलप्रमाणैर्द्वादशविस्तीर्णमायतं च मुखम् ।
नग्नजिता तु चतुर्दशदैर्घ्येण द्राविडं कथितम् ॥ ४ ॥

द्राविडं द्रविडसम्प्रदायकथितम्[2] ।

नासाललाटचिबुकग्रीवाश्चतुरङ्गुलास्तथा कर्णौ ।
द्वेऽङ्गुले च हनुके चिबुकं तु द्व्यङ्गुलं विस्तृतम् ॥ ५ ॥
अष्टाङ्गुलं ललाटं विस्तारात् द्व्यङ्गुलात्परे शङ्खौ ।
चतुरङ्गुलौ तु शङ्खौ कर्णौ तु द्व्यङ्गुलं पृथुलौ ॥ ६ ॥
कर्णोपान्तः कार्य्यो ऽर्द्धपञ्चमे भ्रूसमेन सूत्रेण ।
कर्णस्रोतः सुकुमारं च नयनप्रबन्धसमम् ॥ ७ ॥
चतुरङ्गुलं वसिष्ठः कथयति नेत्रान्त-कर्णयोर्विवरम् ।
अधरोऽङ्गुलप्रमाणस्तस्यार्द्धेनोत्तरोष्ठश्च ॥ ८ ॥
[3]अर्द्धाङ्गुलं तुङ्गोच्चं वक्त्रं चतुरङ्गुलायतं कार्य्यम् ।
विपुलं तु सार्द्धमङ्गुलं मध्यात्तत्त्र्यङ्गुलं व्यात्तम् ॥ ९ ॥

---

१ क ख पुस्तकद्वये जालान्तरगते । २ ख द्रविडसम्प्रदायागतम् ।
३ क पुस्तके मूले च अर्द्धाङ्गुला तु गोच्छा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्यङ्गुलतुल्यौ नासापुटौ च नासा पुटाग्रतो ज्ञेया ।
स्यात् द्यङ्गुलमुच्छ्रायश्चतुरङ्गुलमन्तरं चाक्ष्णोः ॥ १० ॥
द्यङ्गुलमितोऽक्षिकोशो द्वे नेत्रे तत्त्रिभागिका तारा ।
दृक् तारापञ्चांशो[१] नेत्रविकाशोऽङ्गुलं भवति ॥ ११ ॥
पर्य्यन्तात् पर्य्यन्तं दश भ्रुवोऽर्द्धाङ्गुलं भ्रुवोर्लेखा ।
भ्रूमध्यं द्यङ्गुलकं भ्रूर्दैर्घ्येणाङ्गुलचतुष्कम् ॥ १२ ॥
कार्य्या तु केशरेखा भ्रूबन्धसमाऽङ्गुलार्द्धविस्तीर्णा ।
नेत्रान्ते करवीरकमुपन्यसेदङ्गुलप्रमितम् ॥ १३ ॥
द्वात्रिंशत् परिणाहाच्चतुर्द्दशायामतोऽङ्गुलानि शिरः ।
द्वादश तु चित्रकर्म्मणि दृश्यन्ते विंशतिरदृश्याः ॥ १४ ॥
आस्यं सकेशनिचयं षोडश दैर्घ्येण नग्नजित्प्रोक्तम् ।
ग्रीवा दश विस्तीर्णा परिणाहाद्विंशतिः सैका ॥ १५ ॥
कण्ठाद्द्वादश हृदयं हृदयान्नाभिश्च तत्प्रमाणेन ।
नाभीमध्यान्मेढ्रान्तरं च तत् तुल्यमेवोक्तम् ॥ १६ ॥
ऊरू चाङ्गुलिमानैश्चतुर्युता विंशतिस्तथा जङ्घे ।
जानुकपिच्छे चतुरङ्गुले च पादौ च तत्तुल्यौ ॥ १७ ॥
द्वादशदीर्घौ षट्पृथुतया च पादौ त्रिकायताङ्गुष्ठौ ।
पञ्चाङ्गुलपरिणाहौ प्रदेशिनी त्र्यङ्गुलं दीर्घा ॥ १८ ॥
अष्टांशाऽष्टांशोनाः शेषाङ्गुलयः क्रमेण कर्त्तव्याः ।
स चतुर्थभागमङ्गुलमुत्सेधोऽङ्गुष्ठकस्योक्तः ॥ १९ ॥
अङ्गुष्ठनखः कथितश्चतुर्थभागोनमङ्गुलं तज्ज्ञैः ।
शेषनखानामर्द्धाङ्गुलं क्रमात् किञ्चिदूनं वा ॥ २० ॥

---

१ क्वचित् पञ्चमांशः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जङ्घाग्रे परिणाहश्चतुर्दशोक्तस्तु विस्तरः पञ्च ।
मध्ये तु सप्त विपुलाः परिणाहास्त्रिगुणिताः सप्त ॥ २१ ॥
अष्टौ तु जानुमध्ये वैपुल्यं त्र्यष्टकं तु परिणाहः ।
विपुलौ चतुर्द्दशोरू मध्ये द्विगुणश्च तत्परिधिः ॥ २२ ॥
कटिरष्टादश विपुला चत्वारिंशच्चतुर्युता परिधौ ।
अङ्गुलमेकं नाभिर्वेधेन तथा प्रमाणेन ॥ २३ ॥
चत्वारिंशत् द्वियुता नाभीमध्येन मध्यपरिणाहः ।
स्तनयोः षोडश चान्तरमूर्द्धं कक्षे षडङ्गुलिके ॥ २४ ॥
कार्य्यावष्टावंसौ द्वादश बाहू तथा प्रबाहू च ।
बाहू षड्विस्तीर्णौ प्रतिबाहू त्वङ्गुलचतुष्कम् ॥ २५ ॥
षोडश बाहू मूले परिणाहो[1] द्वादशाग्रहस्ते च ।
विस्तारेण करतलं तु षडङ्गुलं सप्त दैर्घ्येण ॥ २६ ॥
पञ्चाङ्गुलानि मध्या प्रदेशिनी मध्यपर्व्वदलहीना[2] ।
अनया तुल्या चानामिका कनिष्ठिका तू पर्व्वोना ॥२७॥
पर्व्वद्वयमङ्गुष्ठः शेषाङ्गुल्यस्त्रि[3]पर्व्वका ज्ञेयाः ।
नखपरिमाणं कार्य्यं सर्व्वासां पर्व्वणोऽर्द्धेन ॥ २८ ॥
देशानुरूपभूषणवेशालङ्कारा [4]मूर्त्तयः कार्य्याः ।
प्रतिमा प्रमाणयुक्ता सन्निहिता वृद्धिदा भवति ॥ २९ ॥
दशरथतनयो रामो वलिश्च वैरोचनिः शतं विंशम् ।(१२०)
द्वादशहान्या शेषाः प्रवरसमन्यूनपरिमाणाः ॥ ३० ॥
कार्य्योऽष्टभुजो भगवांश्चतुर्भुजो द्विभुज एव वा विष्णुः ।
श्रीवत्साङ्कितवक्षाः कौस्तुभमणिभूषितोरस्कः ॥ ३१ ॥

---

१ मूले परिणाहात् ।
२ ख—रहिता ।
३ मूले त्रिभिः त्रिभिः कार्य्याः ।
४ मूले मूर्त्तिभिः कार्य्याः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अतसीकुसुमश्यामः पीताम्बरनिवसनः प्रसन्नमुखः ।
कुण्डलकिरीटधारी पीनगलोरःस्थलांसभुजः ॥ ३२ ॥
खड्ग-गदा-शर-पाणिर्दक्षिणतः शान्तिदश्चतुर्थकरः ।
वामकरेषु च कार्म्मुकखेटकचक्राणि शङ्खश्च ॥ ३३ ॥
अथ च चतुर्भुजमिच्छति शान्तिद एको गदाधरश्चान्यः ।
दक्षिणपाणौ एवं वामे शङ्खश्च चक्रञ्च ॥ ३४ ॥
द्विभुजस्य तु शान्तिकरो दक्षिणहस्तोऽपरश्च शङ्खधरः ।
एवं विष्णोः प्रतिमा कर्त्तव्या भूतिमिच्छद्भिः ॥ ३५ ॥
बलदेवो हलपाणिर्मदविभ्रमलोचनश्च कर्त्तव्यः ।
बिभ्रत् कुण्डलमेकं शङ्खेन्दुमृणालगौरतनुः[१] ॥ ३६ ॥
एकानंशा कार्य्या देवी बलदेव-कृष्णयोर्मध्ये ।
कटिसंस्थितवामकरा सरोजमितरेण चोद्वहती ॥ ३७ ॥
साम्बश्च गदाहस्तः [२]प्रद्युम्नश्चापभृत् सुरूपश्च ।
अनयोः स्त्रियौ च कार्य्यौ खेटकनिस्त्रिंशधारिण्यौ ॥३८॥
ब्रह्मा कमण्डलुकरः चतुर्म्मुखः पङ्कजासनश्च ।
स्कन्दः कुमाररूपः शक्तिधरो वर्हिकेतुश्च ॥ ३९ ॥
शुक्लश्चतुर्व्विषाणो द्विपो महेन्द्रस्य वज्रपाणिश्च ।
तिर्य्यक्ललाटसंस्थं तृतीयलोचने[३] चिह्नं ॥ ४० ॥
शम्भोः शिरसीन्दुकला वृषध्वजोऽक्षि [४]तृतीयमपि बोध्यम्।
शूलं धनुः पिणाकं वामार्द्धे वा गिरिसुतार्द्धम् ॥ ४१ ॥

---

१ मूले—वपुः ।　　२ क्वचित् प्रलम्बश्च ।
३ मूले तृतीयमपि लोचनम् ।　　४ ग तृतीयमप्यूर्द्धम् ।

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

पद्माङ्कितचरणः प्रसन्नमूर्त्तिः सुमिश्रकेशश्च ।
पद्मासनोपविष्टः पितेव जगतो भवति बुद्धः[1] ॥ ४२ ॥
आजानुलम्बबाहुः श्रीवत्साङ्कः प्रसन्नमूर्त्तिश्च ।
दिग्वासास्तरुणो रूपवांश्च कार्य्योऽर्हतां देवः ॥ ४३ ॥
नासाललाटजङ्घोरुगण्डवक्षांसि चोन्नतानि रवेः[2] ।
कुर्य्यादुदीच्यवेषं [3]गुल्फे पादौ च जानुनो-र्यावत् ॥४४॥
बिभ्राणः स्वकररुहे पाणिभ्यां पङ्कजे मुकुटधारी ।
कुण्डलभूषितवदनः प्रलम्बहारस्तरङ्गवृत्तः[4] ॥ ४५ ॥
कमलोदरद्युतिनिभः कञ्चुकगुप्तः स्मितप्रसन्नमुखः ।
रत्नोज्ज्वलप्रभामण्डलः कर्त्तुः शुभकरोऽर्कश्च ॥ ४६ ॥
सौम्या तु हस्तमात्रा वसुदा हस्तद्वयोच्छ्रिता प्रतिमा ।
क्षेमसुभिक्षाय भवेत्त्रिचतुर्हस्तप्रमाणा या ॥ ४७ ॥
नृपभयमतिकृशाङ्गायां[5] हीनाङ्गायामकल्यता कर्त्तुः ।
शातोदर्य्यां क्षुद्भयमर्थविनाशः कृशायाञ्च ॥ ४८ ॥
मरणन्तु सक्षतायां शस्त्रनिपातेन निर्द्दिशेत् कर्त्तुः ।
वामावनता पत्नीं दक्षिणावनता हिनस्त्यायुः ॥ ४९ ॥
अन्धत्वमूर्द्धदृष्ट्या[6] करोति चिन्तामधोमुखी दृष्टिः ।
सर्व्वप्रतिमास्वेवं शुभाशुभं भास्करोक्तसमम् ॥ ५० ॥
लिङ्गस्य वृत्तपरिधिं दैर्घ्येण सूचितं त्रिधा विभजेत् ।
मूले तच्चतुरस्रं मध्ये त्वष्टाश्रि वृत्तमतः ॥ ५१ ॥

---

१ मूले भवेद्बुद्धः । २ क चोन्नतानि खे ।
३ मूले गूढं पादादुरो यावत् । ४ मूले पाठः प्रलम्बहारो वियद्वृत्तः ।
५ क्वचित् अत्यङ्गायां पाठः । ६ क ऊर्द्धमद्दाम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतुरस्रमवनिखाते मध्ये कार्य्यन्तु पिण्डिकागर्भे[1] ।
[2]हस्त्योच्छ्रायेण समा समन्ततः पिण्डका-श्वभ्रात् ॥५२॥
कृशदीर्घं देशघ्नं पार्श्वविहीनं पुरस्य नाशाय ।
यस्य क्षतं भवति मस्तके देशविनाशाय तल्लिङ्गम् ॥५३॥
मातृगणः कर्त्तव्यः स्वदेशनामानुरूपकृतचिह्नः ।
रेवन्तोऽश्वारूढो मृगया-क्रीडादिपरिवारः ॥ ५४ ॥
दण्डी यमो महिषगो हंसारूढश्च पाशभृद्वरुणः ।
नरवाहनः कुवेरो वामकिरीटी बृहत्कुक्षिः ॥ ५५ ॥
इति बृहत्संहितायां प्रतिमालक्षणम् ॥

अथाङ्गुलं यद्यपि धर्म्मशास्त्रे बहुप्रकारमुक्तं—
तथाहि पद्मसंहितायाम्,—

पञ्चधाऽङ्गुलिराख्याता उच्यन्ते ता विधाः क्रमात् ।
मानं मानान्तरं मात्रा मुष्टिर्हस्तथैव च ॥ ५६ ॥
वातायनपथं प्राप्य ये भान्ति रविरश्मयः ।
तेषु सूक्ष्मा विसर्पन्ते रेणवः परमाणवः ॥ ५७ ॥
तेऽष्टौ केशाह्वयास्तेऽष्टौ लीक्षा यूकास्तदष्टकम् ।
तदष्टकं यवस्तेऽष्टावङ्गुलिः समुदाहृता ॥ ५८ ॥
तदुत्तमाङ्गुलं सप्त यवाश्चैव तु मध्यमम् ।
यवाः षडधमं प्रोक्तं मानाङ्गुलमिदं भवेत् ॥ ५९ ॥
विन्यस्तैस्तिर्य्यगष्टाभिर्यवैर्मानान्तराङ्गुलम् ।
शालिभिर्व्वा ऋजुन्यस्तैस्त्रिभिर्मानान्तरं भवेत् ॥ ६० ॥

---

१ क्वचित् पाठान्तरं पिण्डिकाश्वभ्रे ।
२ क ख पुस्तकद्वये पाठः दिशो ग्राह्यं वृत्त ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आचार्य्यदक्षिणकरमध्यमाङ्गुलिमध्ययोः ।
पर्व्वणोरन्तरं दीर्घं मात्राङ्गुलमुदाहृतम् ॥ ६१ ॥
विनाऽङ्गुष्ठेन शेषाभिर्मुष्टिमङ्गुलिभिः कृताम् ।
चतुर्द्धा विभजेदेको भागो मुष्ट्यङ्गुलिः स्मृतः ॥६२॥
यं कञ्चित् पुरुषायामं विभज्य दशधा पुनः ।
एकं द्वादशधा भागं कृत्वा तेष्वेकमङ्गुलम् ॥६३॥ इति ।

तथापि प्रासाद-प्रतिमानिर्म्माणेऽन्त्यप्रकार एव ग्राह्यः ।

उच्छ्राये प्रतिमा या स्याद्देहलब्धाङ्गुलं त्विदम् ।
प्रासादादींश्च तेनैव कुर्य्यान्मानान्तरेण वा ॥ ६४ ॥

इति तत्रैवोक्तेः । वा शब्दोऽन्वाचयार्थः । देहलब्धाङ्गुलस्याशक्यत्वस्वीकारेऽङ्गुलेर्मानान्[न्तरा]ङ्गुलं स्वीकुर्य्यादित्याशयः ।

उच्छ्राये इति ग्रहणेन प्रतिमावयवेषु मुखादिषु नैतदङ्गुलिनियमः । किन्तु षन्नवत्यङ्गुलप्रतिमायां "नवाङ्गुलं तन्मुखम्" इत्युक्तेर्या गृहे वा प्रासादे वा यावती प्रतिमा तावत्परिमाणं षण्णवतिधा विभज्य षण्णवत्यंशमङ्गुलत्वेन परिकल्प्य तादृशनवाङ्गुलत्वादि मुखादौ कल्प्यम् ।

एवं सति द्वादशाङ्गुलप्रतिमायां षण्णवत्यंशो यव एवेति नवयवपरिमाणं मुखं कल्प्यम् । एवं नवाङ्गुलादिपरिमाणप्रतिमास्वपि तत्तत्परिमाणे षण्णवतितममंशमङ्गुलत्वेन परिकल्प्य तादृशनवाङ्गुलत्वादि मुखादौ कल्प्यम् ।

इति प्रासादप्रतिमोपयोगिपरिमाणनिरूपणम् ॥ ८ ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ वाप्यारामादि-प्रतिष्ठाविधिः ॥१०॥

प्रासादनिर्म्माणे वाप्यारामादेरावश्यकत्वं तत्तावन्मत्स्य-पुराणोदाहरणेन दर्शितम्। दर्शितश्च प्रासादनिर्म्माणे तत्पूर्व्वकविधिर्बृहत्संहितायाम्।

तत्रादौ शौनकः,—

[1]अथाऽतोऽपां प्रतिष्ठायाः कल्पं वक्ष्यामि शौनक!।
नवे तड़ागे खाते वा वापी-कूप-सरित्सु च ॥ १ ॥
कुर्य्यु-र्द्विजातयो होमं शुद्धये तत्फलाप्तये।
अयने चोत्तरे वापि पूर्व्वपक्षे शुभेऽहनि ॥ २ ॥
कल्याणवारे होतव्यमात्मनो हितमिच्छता।
मण्डूक-मत्स्य-कूर्म्माणामन्येषां जलजन्मनाम् ॥ ३ ॥
हिरण्यजानि रूपाणि राजतानि च कारयेत्।
वासो नवं घटं सक्तूंल्लाजान् दधि पयो घृतम् ॥ ४ ॥
द्रव्याणीमानि पूर्व्वेद्युरुपकल्प्य समाहितः।
उपोष्य वस्त्राभरणैर्गन्धमाल्यैरलङ्कृतः ॥ ५ ॥
तडागपश्चिमे तीरे होमशालामलङ्कृताम्।
कृत्वा तन्मध्यतो होमं कुर्य्यात्स्वजनसंवृतः ॥ ६ ॥
उपलेपादि यत्तच्च प्रणीतास्थापनादिकम्।
अविस्मृत्य च तत्सर्व्वं कृत्वा पूर्व्वोत्तरे कुशान् ॥ ७ ॥

---

१ ख पुस्तके अथातोऽस्याः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सलिलेन च सम्पूर्णं वाससा वेष्टितं घटम् ।
अर्चितं गन्धपुष्पाभ्यां स्थापयेत् पिहिताननम् ॥ ८ ॥
मण्डूकादीनि रूपाणि अन्तः प्रक्षिप्य तद्घटे ।
ततश्चरुं श्रपयित्वा वारुणं पायसं पुनः ॥ ९ ॥
पयो-दधिभ्यामालोड्य[१] सक्तूँल्लाजांश्च सर्पिषा ।
तत्पूर्व्वमाज्यभागान्तं यज्ञतन्त्रं प्रकल्पितम् ॥ १० ॥
आज्यसंस्कारमारभ्य कुर्य्यात् सर्व्वं विमत्सरम् ।
अब्दैवत्याभिरेताभिर्ऋग्भिराज्याहुतीरथ ॥ ११ ॥
आपोहिष्ठा मय इति नवभिर्जुहुयाद्घृतम् ।
आपो अस्मान्मातरश्च शुन्धयन्त्विति पञ्चभिः ॥ १२ ॥
समुद्रादूर्म्मिरिति च सूक्तेन जुहुयाद्घृतम् ।
अथ शक्तुञ्च[२] जुहुयाद्वदानस्य सम्पदा[३] ॥ १३ ॥
प्रस्रव आप इत्यपां सूक्तेन नवकेन च ।
अम्बयोयं ति सूक्तेन लाजहोमो विधीयते ॥ १४ ॥
प्रतिदिक् प्रत्यृचं हुत्वा प्रागारभ्य प्रदक्षिणम् ।
न हि ते क्षत्रमित्याद्या हुत्वा विंशद्घृताहुतीः ॥ १५ ॥
प्रसम्राजे बृहदिति सूक्तेन जुहुयाच्चरुम् ।
[४]ततः स्विष्टकृदारभ्य होमशेषं समापयेत् ॥ १६ ॥
प्रदक्षिणा तडागस्य यजमानस्य बान्धवैः ।
अर्चितैराज्यधाराभिरग्नेश्च परितो भवेत् ॥ १७ ॥

---

१ क संलोड्य । २ क सूक्तञ्च ।
३ क घ पुस्तकद्वये/ब्रन्नदानस्य संपदा । ४ ख पुस्तके अथ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तडागमध्येऽपां कुम्भं निधाय स्वस्ति वाचयेत्।
ब्राह्मणान् भोजयेत् पश्चादपां तीरेष्वतन्द्रितः ॥१८॥
दक्षिणाञ्च यथाशक्ति ब्राह्मणेभ्यः प्रदापयेत्।
सौवर्णादीनि रूपाणि विप्राग्र्याय प्रदापयेत् ॥१९॥
इमां धियं शिक्षमाणेत्यपां प्रणयनन्ततः।
एवं तडागहोमादि कुर्य्याच्चेदुत्तमां गतिम् ॥ २० ॥
प्राप्नोति वारुणं लोकमिष्टकाम्यं न संशयः।
कर्त्ता कारयिता पश्चादनुमन्ता च सूचकः ॥ २१ ॥
प्रतीक्षकश्च शुश्रूषुः सर्व्वे धर्म्मफलाशिनः।
[1]एवं कृतं चेत् खातेषु तडागफलमश्नुते ॥ २२ ॥
एवं कृतं न चेत्तर्हि क्षीणायुर्नाच संशयः।
तस्मात्खाते तडागादौ होमं कुर्य्यादयं[2] विधिः ॥२३॥
एवं तडागसंयोगे भागे तीरस्य भेदने।
अनेन विधिना कार्य्यमात्मनो भूतिमिच्छता ॥२४॥
एवं वाप्याश्च कूपस्य सरितश्च वनस्य च।
इदं धन्यं यशस्यञ्च शान्तिपुष्टिकरं तथा ॥ २५ ॥
आयुष्यं पुण्यं धर्म्यञ्च महापातकनाशनम्।
सर्व्वान् कामानवाप्नोति विष्णुलोकञ्च गच्छति ॥
२६ ॥ इति

शुद्धये इति प्रतिष्ठातः पूर्व्वं ह्यसंस्कृतं जलमपवित्रमिति स्मरन्ति।

कुशाग्रेणापि राजेन्द्र न स्पृष्टव्यमसंस्कृतम्।
तस्मात् सर्व्वप्रयत्नेन कुर्य्यात्संस्कारमुत्तमम्॥२७॥ इति॥

---

१ क पुस्तके एवं कृते चेत् खातेषु। २ ख ह्यतन्द्रितः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथा,—

वापीकूपतडागेषु यज्जलं स्यादसंस्कृतम् ।
अपेयं तद्भवेत् सर्व्वं पीत्वा चान्द्रायणञ्चरेत् ॥२८॥

फलं वक्ष्यमाणमुत्तमगति-शान्तिपुष्ट्यादिकम् ।

अथ कालान्याह ।

स चोदगयने माघादि-षट्सु कार्त्तिके च, श्रावणवर्ज्जं सर्व्वमासेषु वा, शुक्लपक्षे, द्वितीया-पञ्चमी-सप्तमी-दशमी-त्रयोदशी-पूर्णमासीषु बुध-गुरु-शुक्रवारेषु, तदभावे रवि-सोमयोरपि क्रूरग्रहानाक्रान्ते भरणीकृत्तिकाऽऽर्द्रापुनर्व्वसु-श्लेषामघापूर्व्वफल्गुनीविशाखाऽन्यनक्षत्रे, व्यतीपातादि-निषिद्धयोगाऽन्ययोगे, विष्टिभिन्नकरणे, सौम्यग्रहनिरीक्षिते, मेषसिंहधनुर्वृश्चिकाऽन्यलग्ने, कर्त्तुश्चन्द्रताराऽनुकूल्ये, गुरु-शुक्रयोरस्त-बाल्यवार्द्धक्याभावे, सिंहमकरभिन्न[१]राशिगते गुरौ मलमासाभावे चेत्यर्थः ।

पुनर्व्वारग्रहणं केषाञ्चित्कालविशेषणानामगत्याऽनादरेऽपि न विहितवासराणामनादर उचित इत्येवमर्थम् । मण्डूकेति चकारोक्तानुक्तानां शास्त्रान्तरोक्तानां सप्रतिक-रूपाणां संग्रहार्थम् ।

यथोक्तं मात्स्ये,—

सौवर्णौ कूर्म्म-मकरौ राजतौ मत्स्य-डुण्डुभौ ।
ताम्रौ कुलीर-मण्डूकौ आयसः शिशुमारकः ॥२९॥

इति ।

---

१ ग पुस्तके सिंहमकरान्यराशि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्व्वेद्युरित्यस्योपोष्येत्यनेनान्वयः । परदिनकृत्यमाह वस्त्रेत्यादिना—स्वस्तिवाचनाऽङ्गभूतालङ्करणोपन्यासेन च स्वस्तिवाचनादि-कार्य्यता सूच्यते । होमशालां होमभूमिमलङ्कृतां शक्तौ माघकृत्योक्तरीत्या मण्डपादिविशिष्टामशक्तौ प्राक्प्रवणत्वोपलेपनादिना संस्कृताम् ।

मध्यत इति मध्यभागे कृतकुण्डस्थण्डिले वा, अविस्मृत्येत्यनेन पुराणतन्त्राद्युक्ताङ्गोपसंहारव्याकुलचित्तैः स्वगृह्योक्तविस्मरणमनुचितम् ।

बह्वल्पं वा स्वगृह्योक्तं यस्य यत् कर्म्म चोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतो भवेत् ॥३०॥
इति शास्त्रात् ।

मत्स्यपुराणोक्ते जलाशयोत्सर्गे भविष्योत्तरोक्ताङ्गानामनावश्यकत्वसिद्धौ भट्टचरणोक्तन्यायस्य शौनकादिगृह्योक्ते तस्मिन् पुराणाङ्गानामावश्यकत्वसाधनतायाः कैमुतिकन्यायेन सिद्धत्वात् ।

पूर्व्वोत्तर इति आग्नेयैशानदेशे कुशास्तरणं कलसस्थापनार्थं प्रक्षिप्य स्थापयेदित्यन्वयः । पायसमिति चरोर्व्विशेषणम्, सक्तवो भर्जितयवपिष्टानि, लाजा भर्जितव्रीहयः, सर्पिषाऽऽलोड्येत्यनुषङ्गः ।

तत्पूर्व्वमिति आलोडनपूर्व्वकमाज्येन सह पर्य्यग्निकरणादिसंस्कारलाभार्थम् । अब्दैवत्याभिरिति समुद्रोर्म्मिरिति घृतहोमस्याब्दैवत्यसिद्ध्यर्थमन्यथा वैयर्थ्यात् । प्रतिदिक् संस्कार्य्यतडागादेः प्रतिदिशमित्यर्थः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अर्च्चितैरभिषेकतिलकादिसंस्कृतैर्बान्धवैः कार्य्येत्यन्वयः। धाराभिरिति सहयोगे तृतीया। अग्नेः परितः आज्य-धारां कुर्व्वद्भिरेव तत्[1]प्रदक्षिणा कार्य्येत्यर्थः। कुम्भात् कूर्म्मादिरूपाण्युद्धृत्य तडागादिमध्ये कुम्भनिधानम्। अत एव विप्राग्राय प्रतिमादानमुच्यते।

प्रणयनं प्रकृष्टस्यासम्भवमूल्यस्य गोर्नयनम्। गोस्तु मात्रा न विद्यते इति श्रुतेर्दानधर्म्मगतच्यवनेतिहासाच्च। तच्च संस्कार्य्य-जलाशयादिसम्बन्धित्वेन कार्य्यमिति दर्श-यितुमपामिति षष्ठीप्रयोगः, लभ्यते चैवं वक्ष्यमाणपरि-शिष्टसंवादः।

अस्ति च तत्र संमन्त्रे यां तरयन्तीतिवदिहापि मन्त्र-लिङ्गम्—यथाऽतिविश्वा दुरिता स्तरेमे[2]त्यादि। इष्टकाम्य-मिति काम्यमानसर्व्वफलार्थत्वं ज्ञाप्यते। तडागसंयोगे जलाशयसंयोगे विहितप्रासादे इत्यर्थः। तथाच वक्ष्यमाण-कातीयपरिशिष्टसंवादलाभः। भाग इति भागपदेन तडागनाशोत्तरं पुनस्तत्सम्पादनेऽप्येवं कार्य्यमित्यर्थः।

तथाच बह्वृचगृह्यपरिशिष्टे,—

अथातो वारुणविधिः, वापीकूपतडागयज्ञं व्याख्या-स्यामः। पुण्ये तिथिकरणे, शुभे नक्षत्रे, प्राचीं दिश-मास्थाय प्राक्प्रवणे उदक्प्रवणे वाऽग्निमुपसमाधाय वारुणं चरुं श्रपयित्वाज्यभागान्तं कृत्वाज्याहुतीर्जुहुयात्। समुद्र-ज्येष्ठेति प्रत्यृचं ततो हविषाऽष्टाहुतीर्जुहुयात्। तत्त्वा-

---

१ क ततः। २ ख तरेम।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यामि, ब्रह्मणा वन्द्यमान इति पञ्च। त्वं नोऽग्ने वरुणस्य विद्वानिति द्वे। इमम्मे वरुणं शुधी हवमिति च स्विष्टकृतं नवमम्। नव वै प्राणाः, प्राणा वा आपस्तस्मादपो नवभिर्जुहोति। मार्ज्जनान्ते धेनुं तारयेत्।

अवतीर्य्यमाणामनुमन्त्रयते,—

इदं सलिलं पवित्रं कुरुष्व
शुद्धाः पूता अमृताः सन्तु नित्याः।
मां तारयन्ती कुरु तीर्थाभिषेकं
लोकाल्लोकं तरते तीर्य्यते च ॥ ३१ ॥

इति पुच्छाग्रे स्वयं लग्नो तीरे च उत्तीर्य्यापोऽस्मान्मातरः शुन्धयन्त्विति। अथापरायां दिशि स्थापयेत्। सूयवसाद्भगवती हि भूयादिति।

हिं कृतं चेत्-हिं कृण्वती वसुमती वसूनामिति। [1]रक्तवस्त्रां गां काञ्चनशृङ्गीं वृषप्रजां रौप्यखुरां ताम्रपृष्ठां [2]कांस्यदोहां विप्राय दद्यादितरेभ्यो रौप्यदक्षिणाम्। तत उत्सर्गं कुर्य्यात्। देवपितृमनुष्याः प्रीयन्तामिति चोत्सृजते इत्याह शौनकः।

ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयति। आचार्य्यो यजमानश्चोभावपि देवेत्यादि उत्सर्गवाक्यं ब्रूयातामित्यर्थः। अनयोश्च शौनकस्मृतिपरिशिष्टयोराश्वलायनगृह्यशेषत्वाविशेषात् उभयप्रोक्तानामविरुद्धाङ्गानां समुच्चयः। विरुद्धानां विकल्पः। एतच्च प्रयोगे स्पष्टीकरिष्यामः।

---

१ क पुस्तके रक्तवस्त्रामित्यधिकः पाठः।  २ ख पुस्तके कांस्योपदोहाम्।

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

तथाच कात्यायनपरिशिष्टे,—

अथातो वापीकूपतडागारामदेवतायतनानां प्रतिष्ठापनं व्याख्यास्यामः ।

तत्रोदगयने आपूर्य्यमाणपक्षे पुण्याहे तिथिवार[१]नक्षत्रकरणे च गुणान्विते वारुणं यवमयं चरुं श्रपयित्वा[२]ऽज्यभागानिष्ट्वाज्याहुतीर्जुहोति । त्वन्नोऽग्ने, सत्वन्नोऽग्ने, इमं मे वरुण, तत्त्वायामि, ये ते शतं, अयाश्चाग्ने, उदुत्तमं, ऊरुं हि राजा, वरुणस्योत्तम्भनमसि, अग्नेरनीकमिति दशर्चं हुत्वा स्थालीपाकस्य[३] जुहोति ।

अग्नये स्वाहा, सोमाय स्वाहा, वरुणाय स्वाहा, यज्ञाय स्वाहा, भीमाय स्वाहा, उग्राय स्वाहा, शतक्रतवे स्वाहा, व्युष्ट्यै स्वाहा, स्वर्गाय स्वाहेति, यथोक्तं स्विष्टकृत्प्राशनान्ते जलचराणि क्षिप्त्वाऽलङ्कृत्य गां तारयित्वा पुरुषसूक्तं जपन् वासोयुग्मं धेनुर्द्दक्षिणा च ततो ब्राह्मणभोजनमिति ।

पुण्याहे इति अयनविषुवादिना पुण्यदिन इत्यर्थः, गुणान्वित इति ज्योतिःशास्त्रोक्त इति यावत् ।

वारुणमिति तद्धितेन वरुणस्यैव, वरुणदेवतात्वावगमेऽपि वक्ष्यमाणाहुतिषु यथामन्त्रलिङ्गमग्न्यादिशब्दैर्वरुणं ध्यात्वेदमग्नये इत्येव त्यागो[४] बोध्यः ।

---

१ ग पुस्तके करणे नक्षत्रे च ।

२ मूले अधिक पाठः, नवग्रहान् दिक्देवान् वरुणञ्च स्थापयित्वा ।

३ घ स्थालीपाकेन । ४ ख इत्येवाग्रे बोध्यः । घ त्यागे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अग्नये इति आग्नेया स्थितिरिति नैरुक्त[१]विधिवशेन प्रयाजेषु समिदादिशब्दैरग्निध्यानपूर्व्वकमिदं समिद्धाः इत्यादि त्यागवत्। यथोक्तमिति गृह्योक्तरीत्या इत्यर्थः। जलेति पूर्व्वोक्तरीत्या जलनिर्मितजलचररूपाण्यस्मिन् काले जलाशये क्षेप्याणीत्यर्थः। अलङ्कृत्य सुवर्णशृङ्गादिना पुरुषसूक्तं जपं कारयित्वा इत्यन्वयः। गां[२] दद्यादिति शेषः। चकारो भिन्नक्रमे धेनुश्चेति। एवं स्वस्वगृह्योक्त-रीत्या जलाशयाद्युत्सर्गो बोध्यः। स्वगृह्योक्ताभावे पौराण-विधिना कार्य्यः।

तथाच मत्स्यपुराणे,—

मत्स्य उवाच।

शृणु राजन् महाबाहो तडागादिषु यो विधिः।
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ॥ ३२ ॥
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम्।
प्रागुदक्प्रवणे देशे तडागस्य समीपतः ॥ ३३ ॥
चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्म्मुखीम्।
तथा षोडशहस्तः स्यान्मण्डपश्च चतुर्म्मुखः ॥ ३४ ॥
[३][वेद्याश्च परितो गर्त्ता रत्निमात्रास्त्रिमेखलाः।
नव सप्ताऽथवा पञ्च योनिवक्त्रा[४]नृपात्मज ॥ ३५ ॥
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुलविस्तृता।]
गर्त्ताश्च तत्र सप्त स्युस्त्रिपर्व्वोच्छ्रितमेखलाः ॥ ३६ ॥

---

१ ख पुस्तके स्थितिनैरुक्त-।
२ ख गां युग्मम्।
३ ख पुस्तके [ ] चिह्नितांशो नास्ति।
४ मूले नातिरिक्ताः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सर्व्वतः सर्व्ववर्णाः स्युः पताका ध्वजसंयुताः ।
अश्वत्थोदुम्बर-प्लक्ष-वटशाखाकृतानि तु ॥ ३७ ॥
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ।
शुभास्तत्राऽष्टहोतारो द्वारपालास्तथाष्ट वै ॥ ३८ ॥
अष्टौ च जापकाः कार्य्या ब्राह्मणा वेदपारगाः ।
सर्व्वलक्षणसम्पूर्णो मन्त्रविद्विजितेन्द्रियः ॥ ३९ ॥
कुलशीलसमायुक्तः स्थापकः स्यात् द्विजोत्तमः[१] ।
प्रतिगर्त्तेषु कलसा यज्ञोपकरणानि च ॥ ४० ॥
व्यजनञ्चासने शुभ्रे ताम्रपात्रे सविष्टरे[२] ।
ततस्त्वनेकवर्णाः स्युर्बलयः[३] प्रतिदैवतम् ॥ ४१ ॥
आचार्य्यः प्रक्षिपेद्भूमौ[४] बलिं मन्त्रविचक्षणः ।
अरत्निमात्रो यूपः स्यात् क्षीरवृक्षविनिर्म्मितः ॥ ४२ ॥
यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ।
हैमालङ्कारिणः कार्य्याः पञ्चविंशति ऋत्विजः ॥ ४३ ॥
कुण्डलानि च हैमानि केयूरकटकानि च ।
[५]तथाऽङ्गुल्याः पवित्राणि वासांसि विविधानि च ॥४४॥
दक्षयेच्च[६] समं सर्व्वमाचार्य्ये द्विगुणं पुनः ।
दद्याच्छयनसंयुक्तमात्मनश्चापि यत्प्रियम् ॥ ४५ ॥
सौवर्णौ कूर्म्म-मकरौ राजतौ मत्स्य-डुण्डुभौ ।

---

१ मूले पुरोधाः स्याद्द्विजोत्तमः । घ स्थापकस्य द्विजातयः ।
२ ग सुविस्तृते । ३ मूले चरवः ।
४ ख भूमीमनुमन्त्र विचक्षणः ।
५ घ ततोऽङ्गुलि पवित्राणि । क्वचित् तत्राङ्गुलीय चित्राणि ।
६ मूले पूजयेच्च । घ दक्षिणाश्च । क प्रक्षिपेच्च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ताम्रौ कुलीर-मण्डूकावायसः शिशुमारकः ॥ ४६ ॥
एवमासाद्य तान् सर्व्वानादावेव[1] विशाम्पते ।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥ ४७ ॥
सर्व्वौषध्युदकस्नान[2]-स्नापितो वेदपुङ्गवैः ।
यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः ॥ ४८ ॥
पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमण्डपम् ।
ततो मङ्गलशब्देन भेरीणां निःस्वनेन च ॥ ४९ ॥
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् ।
षोडशारं ततश्चक्रं पद्मगर्भं चतुर्म्मुखम् ॥ ५० ॥
चतुरस्रञ्च परितो वृत्तं मध्ये सुशोभनम् ।
वेद्याश्चोपरि तत् कृत्वा ग्रहाँल्लोकपतींस्ततः ॥ ५१ ॥
विन्यसेन्मन्त्रतः सर्व्वान् प्रतिदिक्षु विचक्षणः ।
शेषादीन्[3] स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितः ॥ ५२ ॥
ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः ।
विनायकञ्च विन्यस्य कमलामम्बिकां तथा ॥ ५३ ॥
शान्त्यर्थं सर्व्वलोकानां भूतग्रामं न्यसेत्ततः ।
पुष्प-भक्ष्यफलैर्युक्तमेवं कृत्वाऽधिवासयेत् ॥ ५४ ॥
कुम्भांश्च रत्नगर्भांस्तान् वासोभिरभिवेष्ट्य च ।
पुष्पगन्धैरलङ्कृत्य द्वारपालान् समन्ततः ॥ ५५ ॥
पठध्वमिति तान् ब्रूयादाचार्य्यस्त्वभिपूज्य च ।
बह्वृचौ पूर्व्वतः स्थाप्यौ दक्षिणेन यजुर्व्विदौ ॥ ५६ ॥
सामगौ पश्चिमे स्थाप्यावुत्तरेण त्वथर्व्वणौ ।

---

१ ख ग पुस्तकद्वये आदौ चैव । २ क ख उदकैस्तत्र ।
३ क्वचित् कूर्म्मादीन् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उदङ्मुखो दक्षिणतो यजमानमुपाविशेत् ॥ ५७ ॥
यजध्वमिति तान् ब्रूयाद्धोतृकान् पुनरेव तु ।
उत्कृष्टमन्त्रजप्येन तिष्ठध्वमिति जापकान् ॥ ५८ ॥
एवमादिश्य तान् सर्व्वान् पर्य्युक्ष्याग्निं स मन्त्रवित् ।
जुहुयाद्दारुणैर्म्मन्त्रैराज्यञ्च समिधस्तथा ॥ ५९ ॥
ऋत्विग्भिश्चैव होतव्यं वारुणैरेव सर्व्वशः ।
ग्रहेभ्यो विधिवद्धुत्वा तथेन्द्रायेश्वराय च ॥ ६० ॥
मरुद्भ्यो[1] लोकपालेभ्यो विधिवद्विश्वकर्म्मणे ।
रात्रिसूक्तं जपेयुस्ते[2] दक्षिणेन यजुर्व्विदः ॥ ६१ ॥
वैराजं पौरुषं सूक्तं सौपर्णं रुद्रसंहिताम् ।
शैशवं पञ्चनिधनं गायत्र्यं ज्येष्ठसाम च ॥ ६२ ॥
वामदेव्यं बृहत्सौम्यं रौरवं सरथन्तरम् ।
[3]गवां व्रतं विकीर्णञ्च रक्षोघ्नञ्चमसन्तथा ॥ ६३ ॥
गायेयुः सामगा राजन् पश्चिमद्वारमाश्रिताः ।
अथर्व्वाणश्चोत्तरतः शान्तिकं पौष्टिकन्तथा ॥ ६४ ॥
जपेरन्मनसा देवमाश्रितं वरुणं प्रभुम् ।
पूर्व्वेद्युरभितो रात्रावेवं कृत्वाऽधिवासनम् ॥ ६५ ॥
गजाऽश्व-रथ्या-वल्मीकसङ्गम-ह्रद-गोकुलात् ।
मृदमानीय कुम्भेषु प्रक्षिपेच्चत्वरात्तथा ॥ ६६ ॥
रोचनाञ्चैव सिद्धार्थं धान्यं गुग्गुलमेव च ।
स्नपनन्तस्य कर्त्तव्यं पञ्चभङ्गसमन्वितैः[4] ॥ ६७ ॥

---

१ ख घ मेरुभ्यः । २ मूले जपेन्मन्त्रम् ।
३ मूले गवां व्रतञ्च काण्वञ्च । ४ घ पुस्तके पञ्चभङ्गसमन्वितम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]प्रत्येकन्तु महामन्त्रैरेवं कृत्वा विधानतः ।
एवं क्षपामतिवाह्य[2] विधियुक्तेन कर्म्मणा ॥ ६८ ॥
ततः प्रभाते विमले सञ्जातेऽथ शतङ्गवाम् ।
ब्राह्मणेभ्यः प्रदातव्यमष्टषष्टि च वा पुनः ॥ ६९ ॥
पञ्चाशद्वा च षट्त्रिंशत्पञ्चविंशति वा पुनः ।
ततः सांवत्सरैः प्रोक्ते शुद्धलग्ने सुशोभने ॥ ७० ॥
वेदशब्दैः सगान्धर्व्वैर्वाद्यैश्च विविधैः शुभैः ।
कनकालङ्कृतां कृत्वा जले गामवतारयेत् ॥ ७१ ॥
सामगाय च सा देया ब्राह्मणाय विशाम्पते ।
[3][जलाशयञ्च चिहृता सूत्रेण परिवेष्टयेत्] ॥ ७२ ॥
पात्रीमादाय सौवर्णी पञ्चरत्नसमन्विताम् ।
ततो निक्षिप्य मकरं मत्स्यादींस्तांश्च सर्व्वशः ॥ ७३ ॥
धृतां चतुर्भिर्विप्रैस्तु वेदवेदाङ्गपारगैः ।
महानदीजलोपेतां दध्यक्षतविभूषिताम् ॥ ७४ ॥
उत्तराभिमुखीं न्युब्जां[4] जलमध्ये तु कारयेत् ।
आथर्व्वणेन [5]संस्नातां पुनर्मामित्यृचापि वा ॥ ७५ ॥
आपोहिष्ठेति मन्त्रेण क्षिप्त्वागत्य च मण्डपम् ।
पूजयित्वा सदस्यांस्तु बलिं दद्यात् समन्ततः ॥ ७६ ॥
पुनर्द्दिनानि होतव्यं चत्वारि मुनिसत्तमाः ।
चतुर्थीकर्म्म कर्त्तव्यं देया तत्राऽपि शक्तितः ॥ ७७ ॥

---

१ क्वचित् पूर्त्तकर्त्तुः । २ घ त्त्वपामपानीय ।
३ [ ] चिह्नितपङ्क्तिः ख पुस्तके न दृश्यते ।
४ क्वचित् धेनुमिति पाठः । ५ क ख पुस्तकद्वये साम्ना तु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दक्षिणा[1] राजशार्दूल! वरुणस्नापनं ततः[2] ।
कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च ॥ ७८ ॥
ऋत्विग्भ्यस्तु समं दत्त्वा मण्डपं विभजेत् पुनः ।
हेमपात्रञ्च शय्याञ्च स्थापकाय निवेदयेत् ॥ ७९ ॥
ततः सहस्रं विप्राणामथवाऽष्टशतं तथा ।
भोजयेच्च यथाशक्त्या पञ्चाशद्वाऽथ विंशतिम् ॥ ८० ॥
एवमेव पुराणेषु तडागविधिरुच्यते ।
कूपवापीषु सर्व्वासु तथा पुष्करिणीषु च ॥ ८१ ॥
एष एव विधिर्दृष्टः प्रतिष्ठासु तथैव च ।
मन्त्रतस्तु विशेषः स्यात् प्रासादोद्यानभूमिषु ॥ ८२ ॥
अयं तु शक्त्या वर्त्तेत विधिर्दृष्टः स्वयम्भुवा ।
ल्पेस्वऽप्येकाग्निवत्कार्य्यं वित्तशाठ्यादृते नृभिः ॥ ८३ ॥
एतान्महाराज विशेषधर्म्मान्
करोति योऽर्थामथ शुद्धबुद्धिः ।
सहैव विष्णोः परमं पदं यत्
प्राप्नोति तद्योगबलेन भूयः ॥ इति ॥ ८४ ॥

उत्तरायणं मकरसंक्रान्तिकालः । यस्य जलाशयस्योत्तरायणादि-विहितकालप्रतीक्षायां शोषः सम्भाव्यते, तस्योत्सर्गे नैष कालनियमः—

मुनयः केचिदिच्छन्ति अतीते चोत्तरायणे ।
न कालनियमस्तत्र सलिलं यत्र कारणम् ॥ ८५ ॥
इति भविष्योक्तेः ।

---

१ क ग पुस्तकद्वये तत्तस्मै । २ ख ग पुस्तकद्वये वरुणं संस्मरंस्ततः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विप्रकर्षितेथते ज्योतिर्व्वित्कथनेनौचितत्वेन निर्णीतेऽह्नि उत्सर्गं कुर्य्यादिति शेषः ।

अनेन ज्योतिःशास्त्रोक्तानां मलमासादिनिषेधानां तिथिनक्षत्रादिविशेषविधीनाञ्च संग्रहः । ब्राह्मणवाचनं, पुण्याहवाचनं, तच्च विनायकग्रहपूजन-प्रधानसंकल्प-मातृकापूजन-वसोर्धारा-शान्तिसूक्तपाठ-नान्दीश्राद्धानि कृत्वा कार्य्यम् । शास्त्रान्तरात् तत्र विशेषो नियमः ।

सोङ्कारं ब्राह्मणे कुर्य्यान्निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये स्वस्ति शूद्रे प्रकीर्त्तयेत् ॥८६॥

शूद्रजातीये यजमाने स्वस्तिमात्रं ब्रूयादिति मदनरत्नात् परिसंख्यातो निर्णीयते ।

स्वस्तिवाचनानन्तरं वास्तुपूजनम्, मण्डपनिर्म्माणानन्तरञ्चेति भट्टचरणाः । प्रागुदगिति अपराजिताया दिशोऽभिधानं न तु दिग्द्वयस्य द्वन्द्वात् कर्म्मधारयस्य न्याय्यत्वात् तस्मादेतस्यां दिशि पातयेति[१] श्रुत्या—यथा वै दक्षिणः पाणिरेव देवयजनमिति कल्पेन च संवाद-लाभाच्च ।

समीप इति सामीप्यं यद्यपि मदनरत्ने—छन्दोगपरि-शिष्टादिशास्त्रान्तरायुक्तैशानी-प्राच्यन्यतरदिश्याहृतमित्यु-क्तम् । तथापि जलाशय-पश्चिम एव शिष्टाचारात् मण्डपः कार्य्य इति ।

---

१ च यजेतेति श्रुत्या ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भट्टचरणाः—

प्रकरणाद्विहितेन वेद्याश्चतुर्हस्तत्वेन मण्डपतृतीयांश-परिमितत्वं बाध्यते[१]। चतुर्म्मुखत्वं वेद्या अन्यथाऽदृष्टमपि विधीयते, मण्डपषोडशहस्तत्वे च नियम इत्याहुः।

मण्डपद्वारचतुष्टयाभिप्रायमेव चतुर्म्मुखमित्यनुवाद इत्युक्तं मदनरत्ने।

गर्त्ताः कुण्डानि, योनिश्च वक्त्रं कण्ठश्च येषु ते च वेदितो द्वादश-त्रयोदश-त्रिंशदन्यतरसंख्यान्यङ्गुलानि परित्यज्य कण्ठमेखलायोग्यं देशञ्च परित्यज्य कार्य्याः। रत्निरेक-विंशत्यङ्गुलः, तन्नियमनात् परिमाणान्तरं, त्रिमेखलत्व-नियमाच्च मेखलासंख्यान्तरं निवर्त्तते। कुण्डगतनवत्वा-दीनां व्यवस्था तु प्रयोगे स्फुटीभविष्यति।

योनावपि वितस्तिनियमादिना मेखलागतसंख्या-नियमेन परिमाणान्तरसंख्यान्तरनिवृत्तिरूह्या। सर्व्वदिक्षु ध्वजाः पताकाश्च लोकपालसवर्णा विधीयन्ते। प्रतिगर्त्तं तन्त्रात् कलशानिति केचित्। प्रतिगर्त्तमेक इति हेमाद्रिः। युक्तञ्चैतत् "पृष्ठशर्म्मणी येन[२] यजेरन्" इति बहु-वचनस्यानुवादत्वात्।

व्यजनमग्नेरिन्धनं, विष्टरं कुशासनम्, तद्युक्ते आसने होमकर्त्तुरुपवेशनार्थं, ताम्रपात्रं हविःस्थापनार्थं, बलयो ग्रहाद्यर्था गुडोदनादयः। तेषामभिमन्त्रणं तन्मन्त्रैः। द्वौ प्रादेशावरत्निरिति भूतानुसारित्र्यरत्निपरिमितो यूपः कार्य्यः, यजमानपरिमितपक्षस्तु काम्यः।

१ क बोध्यते। २ ख प्रमनी येन।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्र भविष्योक्तान् वर्णभेदेन प्रकृतिद्रव्यभेदान्नारदीयायुक्तान् स्नानभेदांश्च प्रयोगे दर्शयिष्यामः ।

यूपत्वविधिबलाच्चाष्टास्रमायश्चषालञ्च कार्य्यमित्याहुर्भट्टचरणाः । वासांसीति बहुत्वाविवक्षा पूर्व्ववत् । दक्षयेदानतान् कुर्य्यात् । यद्वा दक्षयेदित्यनेन मधुपर्ककालदेयेभ्यः कुण्डलादिभ्योऽन्येषां दक्षिणात्वेन दानमिति ज्ञाप्यते । अथवा द्विगुणदानासम्भवे दक्षिणात्वेनैव देयम्, प्रधानाङ्गस्य बलत्वात् ।

द्विगुणमिति कुण्डलादीनां द्वैगुण्यं, न तत्संख्यया, किन्तु तत्प्रकृति-सुवर्णगतमाषादिपरिमाणद्वैगुण्येन । वाससो द्विगुणमूल्यकत्वेन दक्षिणाभूत-गवां तु तत्संख्याद्वैगुण्यम् । डुण्डुभो राजीलो निर्विषः सर्पः । उदकमेव स्नानं करणे ल्युट् । मङ्गलशब्देन शान्तिसूक्तपाठेन षोडशारचक्रनिर्म्माणादिः प्रयोगे स्फुटीभविष्यति ।

यजध्वं तिष्ठध्वमित्यादौ आचार्य्योऽभिपूजयन्नित्यनुषञ्जनीयमिति मदनरत्ने । पूर्त्तकर्त्तुः स्नपनं कर्त्तव्यमिति सम्बन्धः । चतुर्भिर्होतृभिरुत्तराभिमुख आचार्य्यः । जलचरप्रक्षेपानन्तरं विशेषो भविष्ये,—

सामान्यं सर्व्वभूतानां मया दत्तमिदं जलम् ।
रमन्तु सर्व्वभूतानि स्नान-पानाऽवगाहनैः ॥ ८७ ॥
एवं जलं जले क्षिप्त्वा पूजयेज्जलमातरः ।

यजमान इति शेषः, मातरः—मातॄरित्यर्थः ।

तोष्याः कर्म्मकराः सर्व्वे कुद्दालानि[1] च पूजयेत् ॥ ८८ ॥
इत्यर्थः ॥

---

[1] ग अथान्यानि च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बलिं लोकपालादिभ्यो माषभक्तम्। पुनरिति वरुणादि-वैश्वकरणान्तो होमः प्रत्यहं कार्य्य इत्यर्थः। हुत्वा समं विभज्य, शिष्टं स्पष्टम्, क्वाचित्कसन्देहनिवृत्तिः प्रयोगाद्भविष्यतीत्यलमिति।

इति तडागारामप्रासादप्रतिष्ठाविधिः॥१०॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ मूर्त्तिप्रतिष्ठाविधिः ॥ ११ ॥

बौधायनः—

अथातो विष्णुप्रतिष्ठाविधिं व्याख्यास्यामः। द्वादश्यां श्रवणायां (वा) यानि चान्यानि नक्षत्राणि तेषु पूर्व्वेद्युरेव युग्मान् ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्ति ऋद्धिञ्च वाचयित्वा समागतायां निशायां कपिलापञ्चगव्येन सहिरण्ययवदूर्व्वाङ्कुराश्वत्थपलाशपर्णेन सुवर्णोपधानां प्रतिकृतिं कृत्वाऽभिषिञ्चति।

आपोहिष्ठा मयोभुव इति तिसृभिः, हिरण्यवर्णाः शुचयः पावका इति चतसृभिः, पवमानः सुवर्ज्जन[1] इत्येतेनाऽनुवाकेन व्याहृतिभिश्च।

पुष्पफलाक्षतमिश्रयवदूर्व्वाङ्कुरं पादयोर्निक्षिपति इदं विष्णुर्व्विचक्रम इति। प्रतिसरमावध्नाति रक्षोहनं वाजिनमिति।

अथैनं नदीतडागह्रदनिर्झरसरस्तीर्थानामन्यतरेषु-हतेन वाससा कुशगन्धमाल्यमाच्छाद्याधिश्रयति "अवते हेल[2] उदुत्तमम्" इति। अथ श्वो भूते स्नात्वाऽहतवाससश्चत्वारो ब्राह्मणाः प्रतिमामुत्थापयेयुरुत्तिष्ठ ब्रह्मणस्पत इति।

अथ शुचौ देशे समवस्थाप्य—

गायत्र्या गृह्य गोमूत्रं गन्धद्वारेति गोमयम्।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि।
शुक्रमसि ज्योतिरसीत्याज्यं देवस्य त्वा कुशोदकम् ॥१॥

---

१ घ पुस्तके सुवर्द्धन इति। २ मूले हेडः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इत्येतत् पञ्चगव्यमाहुः[१]।

कपिलायाः वरं क्षीरं श्वेतायाश्च वरं दधि।
रक्तायाः स्नेहसंयुक्तं[२] शेषौ शवल-कृष्णयोः॥२॥ इति

एतेन आवो राजानमिति स्नापयति।

शमीपलाशखादिर-विल्वाऽश्वत्थ-विकङ्कत-न्यग्रोध-पन-साऽऽम्रशिरीषोदुम्बराणां सर्व्वयज्ञिय[३]वृक्षाणाञ्च चर्म्म-कषायकलशेनाभिषिञ्चति, अश्वत्थे वो निषदनम् इत्येतेनानुवाकेन।

मणि-मुक्ता-प्रवाल-रजत-ताम्राणामम्बु[४]निमग्नानां पूर्णकलशेनाभिषिञ्चति—हिरण्यवर्णामिति नवर्च्चेन। हिरण्येन सतेजसा चक्षुर्विमोचयेत्—तेजोऽसीति।

अथ देवयजनोल्लेखनप्रभृत्यग्निमुखान् कृत्वा पुरुषसूक्तेनाज्याहुतीर्जुहुयात्, इदं विष्णुर्विचक्रम इति पादयोः स्पृशेत्।

पुनस्तेनैवाज्याहुतीर्ज्जुहुयाद्विष्णोर्नुकं वीर्य्याणि इति नाभिदेशे स्पृशेत्।

पुनस्तेनैवाज्याहुतीर्ज्जुहुयादतो देवा अवन्तु न इति जानुनी[५] स्पृशेत्।

पुनस्तेनैवाज्याहुतीर्जुहुयादथ पौरुषेण सूक्तेन सर्व्वाङ्गमुपस्पृशेत्।

होमान्ते उदुत्यं जातवेदसमित्युत्थाप्य[६] शाकुनेन सूक्तेन देवं स्वालयं प्रवेश्य मणि-मुक्ता-प्रवाल-सुवर्ण-

---

१ मूले पञ्चगव्यं नाम। २ मूले रक्तायास्तु घृतं श्रेष्ठम्।
३ मूले याज्ञिक—। ४ मूले अप्सु। ५ मूले मूर्ध्नि।
६ क इत्युक्ता।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रजतानि पादपीठे निधाय—अतो देवा अवन्तु न इति विष्णुं स्थापयेत्।

अथ गन्ध-पुष्प-धूप-दीप-नैवेद्यान्याकाशोन्मुखानि कृत्वोपोत्थाय आवाहनं करोति—प्रणवयुक्तव्याहृतिभिर्व्यस्तैः समस्तैश्च ॐ भूः पुरुषमावाहयामि, ॐ भुवः पुरुषमावाहयामि, ॐ स्वः[1] पुरुषमावाहयामि, ॐ भूर्भुवः स्वः पुरुषमावाहयामि। इत्यावाह्य रत्नकलशेनाभिषिञ्चति।

एवं प्रणवेन धारयेत्, प्रणवेन ब्रह्मेति विज्ञायते प्रणवेन कूर्चं ददाति। दूर्व्वा-विष्णुपर्णी-श्यामाक-पद्मपत्रकलशेन पाद्यं ददाति। एला-लवङ्ग-कक्कोल-कर्पूरमिश्रकं पानीयं[2] ददाति।

अपःक्षीरकुशाग्रैश्चाक्षतैर्यवतण्डुलैस्तिलैः[3] सिद्धार्थकैश्चैव अर्घ्यं दद्यात्[4]॥

इमा आपः शान्ताः शिवाः शिवतमाः, पूताः पूततमाः, मेध्या मेध्यतमाः, अमृता अमृतरसाः पाद्या आचमनीया अर्घ्यास्ता जुषन्तां प्रतिगृह्यन्तां प्रतिगृह्णातु भगवान्महाविष्णुर्विष्णवे नमः। इति पाद्यमाचमनीयमर्घ्यं ददाति।

इदं विष्णुर्विचक्रमे इति प्रतिसरं विसंसयति।

देवतां नमस्कृत्याऽथ गन्धं ददाति—

इमे गन्धाः शुभा दिव्या सर्व्वगन्धैरलङ्कृताः।
पूता ब्रह्मपवित्रेण पूताः सूर्य्यस्य रश्मिभिः॥ ३॥

प्रतिगृह्यतां प्रतिगृह्णातु महाविष्णुर्विष्णवे नम इति।

---

१ मूले सुवः। २ मूले आचमनीयं।
३ क ख पुस्तकद्वये यवैरिति पाठः। ४ क्वचित् ददातीति पाठः।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

माल्यं ददाति—

इमे माल्याः शुभा दिव्याः सर्व्वमाल्यैरलङ्कृताः ।
पूता ब्रह्मपवित्रेण पूताः सूर्य्यस्य रश्मिभिः ॥ ४ ॥

पुष्पं ददाति—

इमे पुष्पाः शुभा दिव्याः सर्व्वपुष्पैरलङ्कृताः ।
पूता ब्रह्मपवित्रेण पूताः सूर्य्यस्य रश्मिभिः ॥ ५ ॥

धूपं ददाति—

वनस्पतिरसो धूपो धूपेभ्यो धूप उत्तमः ।
आग्नेयः सर्व्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ६ ॥

प्रतिगृह्यतां प्रतिगृह्णातु नम इति ।

दीपं ददाति—

ज्योतिः शुक्रश्च तेजश्च देवानां सततं प्रियः ।
भास्वरः सर्व्वभूतानां दीपोऽयं प्रतिगृह्यताम् ॥ ७ ॥

प्रतिगृह्णातु भगवान् महाविष्णुर्विष्णवे नम इति ।

अथ द्वादशनामभिः पुष्पाणि दद्यात् ।

तैरेव तर्पणं कृत्वा कृसरं पायसं गुडोदनं हरिद्रोदनमिति हवींषि [1]निवेदयेत् । पवित्रं ते विततमिति पायसं निवेदयेत् । घृताप्लुतं पूर्णशरावं निवेदयेत् । कृसरं तिलमिश्रमाज्यं जुहुयात्—

वासुदेवाय स्वाहा, सङ्कर्षणाय स्वाहा, प्रद्युम्नाय स्वाहा, अनिरुद्धाय स्वाहा, शान्त्यै[2], श्रियै, सरस्वत्यै, पुष्ट्यै, तुष्ट्यै, विष्णवे स्वाहा ।

---

१ ख ग पुस्तकद्वये निवेदयेत् पदं नास्ति । २ मूले ईशान्यै ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुरुषसूक्तेन, विष्णोर्नुकं, तदस्य प्रियं, प्रतद्विष्णुः, परोमात्रया, विचक्रमे, त्रिर्देव इति।

द्वादशनामभिरमुष्मै स्वाहाऽमुष्मै स्वाहेति स्विष्टकृत् प्रभृति-सिद्धमाधेनुवरप्रदानात्।

अथ सर्व्वहविषां बलिमुपहरति—

त्वामेकमाद्यं पुरुषं पुरातनं
नारायणं विश्वसृजं यजामहे।
त्वमेव यज्ञो विहितो विधेय-
स्त्वमात्मनाऽऽत्मन् प्रतिगृह्णीष्व[1] हव्यम्॥८॥ इति

अथाग्रेणाग्निमश्वत्थपर्णेषु हुतशेषं निदधाति भूर्भुवः-स्वरोमिति। त्रिश्चतुर्व्वा प्रदक्षिणं सहाग्निं परिक्रामति।

विश्वभुजे नमः, सर्व्वभुजे नमः, आत्मने नमः, परमात्मने, नम इति। ब्रह्मचारिणो गृहस्थान्[2] द्वादश ब्राह्मणान् संयतान् हरिद्रोदनं भोजयेत्। आचार्य्यायाऽङ्गुलीयकं कुण्डलद्वयं (ददाति)। वस्त्रयुग्मेन वाऽऽचार्य्यं प्रपूजयेत्। आचार्य्याय गास्तिस्रो दद्यात्। महान्ति श्रेयांसि प्राप्नोति। सर्व्वान् कामानवाप्नोति। सन्तिष्ठते विष्णुप्रतिष्ठाविधिः।

इति बौधायनगृह्योक्तो विष्णुप्रतिष्ठाविधिः॥

---

एवमेव रुद्रप्रतिष्ठाविषयोऽपि।

गृह्यपाठविशेषस्तु लिख्यते—

अथातो रुद्रप्रतिष्ठाकल्पं व्याख्यास्यामः। चतुर्थ्या-मष्टम्यामपि भरण्यां वा[3] यानि च निःक्षिपति नमस्ते

---

१ घ पुस्तके प्रतिगृह्णातु। २ मूले ब्रह्मचारी गृहस्थो वा।
३ ख घ पुस्तकद्वये आर्द्रायामथ भरण्यां वा।

रुद्रमन्यव इति। प्रतिसरं बध्नाति—कृष्णायोरित्यनेन, नमस्ते अस्तुधन्वन इत्यष्टाभिः स्नापयति। शमीतेजो-ऽसीति—लिङ्गे चेन्निवर्त्तते चक्षुषोऽभावात्। अथ देव या त इषुः शिवतमेत्यन्तेनानुवाकेनाज्याहुतीर्जुहुयात्।

अथाज्याहुतीरुपजुहोति। (द्रा) जापे सहस्राणीत्ये-ताभ्यामनुवाकाभ्यां प्रत्यृचं सर्वो वै रुद्र इति पादपीठे स्पृशेत्। पुनस्ताभिरेवाज्याहुतीर्जुहुयात्। कद्रुद्राय[१] इति नाभिदेशे स्पृशेत्।

उदुत्यमित्युत्थाप्य पञ्चब्रह्मसंज्ञकेन पञ्चानुवाकेन देवालयं प्रवेश्य मणिपीठे निधाय नमस्ते रुद्रमन्यवे, इति रुद्रं संस्थापयेत्। दद्याद्गन्धमथोपवाहनं करोति। प्रणवान्ते प्रतिगृह्णातु भगवान् महादेवो रुद्राय नम इति पाद्यम्।

नमोऽस्तु नीलग्रीवायेति प्रतिसरं विसृज्य देवतां नमस्कृत्य गन्धं ददाति—इमे गन्धा इति। महादेवाय नम इति माल्यं ददाति। रुद्राय नम इति पुष्पं ददाति। रुद्राय नम इति धूपं, रुद्राय नम इति दीपं, भवाय नम इत्यादिभिः पुष्पाणि दद्यात्तैरेव तर्पणं कृत्वा कृसरं पायसं गुडोदनं हरिद्रोदनमिति हवींषि पवित्रैर्जुहुयात्।

भवाय देवाय स्वाहा, शर्वाय देवाय स्वाहा, ईशानाय देवाय स्वाहा, पशुपतये देवाय स्वाहा, रुद्राय देवाय स्वाहा, उग्राय देवाय स्वाहा, भीमाय देवाय स्वाहा, महते देवाय स्वाहा, इति गुडोदनं जुहुयात्।

---

१ क ग पुस्तकद्वये कद्रुद्रायेति।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भवस्य देवस्य पत्न्यै, शर्व्वस्य, ईशानस्य, पशुपतेः, रुद्रस्य, उग्रस्य भीमस्य महत इति हरिद्रोदनं जुहोति।

भवस्य देवस्य सुताय स्वाहा, तथा शर्व्वस्य, त्र्यम्बकं, मानो महान्तं, मानस्तोके, आराते गोघ्नं विकिरिद् विलोहित सहस्राणि सहस्रश इति।

द्वादशनामभिः—शिवाय, शङ्कराय, सहमानाय, शितिकण्ठाय, कपर्द्दिने, ताम्राय, अरुणाय, उपस्तरमाणाय, हिरण्यबाहवे, सद्पिञ्जराय, वल्गुशाय, हिरण्याय स्वाहेति—

स्विष्टकृत् प्रभृति सिद्धमाधेनुवरप्रदानात्। अथ हविषां बलिमुपहरति,—

त्वामेकमाद्यं पुरुषं पुरातनं
रुद्रं शिवं विश्वसृजं यजामहे।
त्वमेव यज्ञो विहितो विधेय-
स्त्वमात्मनाऽऽत्मन् प्रतिगृह्णीष्व हव्यम् ॥७॥ इति

अथाऽग्रेण ब्रह्मणे। सन्तिष्ठते प्रतिष्ठाविधिरिति।

अथोभयत्राऽपि द्वादश्यां चतुर्थ्यामित्यादि सप्तमीभिः प्रधानं प्रत्येवाऽधिकरणत्वं बोध्यते। ततश्च तेष्वनन्तरं विष्णुप्रतिष्ठां कुर्य्यादिति शेषः। रुद्रप्रतिष्ठामिति च युग्मानि नान्दीश्राद्धोक्तिः। ततः प्रागेव गणपतिपूजन-ग्रहयाग-मातृकापूजनानि कार्य्याणीत्यर्थात् सिद्धं नान्दी-श्राद्धोत्तरं पुण्याहवाचनम्। गव्येनेत्यादि तृतीयाद्वय-स्याभिषिञ्चतीत्यत्राऽन्वयः।

प्रतिकृतिः प्रतिमा, तत्समीपे चक्षुरुन्मीलनार्थस्य सुवर्णस्य निधानमुपकल्पनं दूर्वाङ्कुरमित्येकवद्भावः। एवं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

माल्यमिति। अन्यतमजले (?) शय्या तस्यां कुशादि-वाससाऽऽच्छाद्य प्रतिमायाः शयनं करणीयं भवति भगवन् इति मन्त्राभ्यामित्यर्थः।

मात्रा पलादिपरिमाणं, तेन पञ्चगव्येन सतेजसा सहितेन लिङ्गे निवर्त्तते चक्षुरुन्मीलनं अग्निमुखादिति गृह्योक्तपाकयज्ञतन्त्रं कृत्वेत्यर्थः। विष्णुमिति तत्प्रतिष्ठा-प्रकरणे पुनस्तद्ग्रहणं विष्णु-रुद्रान्यतरदेवताप्रतिष्ठासु स्थापनमन्त्रभेदोऽस्तीति ज्ञापनार्थम्। कारयेति अवगुण्ठनं कुर्य्यादित्यर्थः। पाद्याचमनीयार्घ्या इति प्रतिपदं पूर्व्वो-त्तरानुषङ्गेण मन्त्रत्रयं बोध्यव्यम्।

माल्यं मल्लिकापुष्पं तदितरत्कुसुमम्। हवींषीति—निवेदनं होमः, बलिर्ब्राह्मणभोजनार्थमित्यर्थः[१]। तत्र व्यवस्था-विनियोगानुसारेण बोध्या।

सहेति अग्निसहितं प्रतिष्ठापितं देवमित्यर्थः। द्वय-मित्यन्ते दद्यादित्यर्थः। गोदानाङ्गपूजनमाह वस्त्रेति, पञ्चब्रह्मेति सद्योजातमित्यादिनेत्यर्थः।

इति बौधायनोक्त-प्रतिष्ठाविधिः॥

---

अत्र च पौराणतान्त्रिकाङ्गोपसंहार आवश्यकः। बौधायनोक्तश्रौतस्मार्त्तेतरकर्म्मस्विवेहापि यावदुक्तमात्रे-णोपपत्तेः। पुण्याधिक्यलिप्सयाऽधिकचिकीर्षायां तु मण्डपा-द्यपि कुर्य्यात्।

---

१ क ब्राह्मणान् भोजयेदित्यर्थः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यथोक्तं मत्स्यपुराणे,—

अथातः सम्प्रवक्ष्यामि प्रतिष्ठाविधिमुत्तमम्।
कुण्डमण्डपवेदीनां [1]प्रतिमानं यथाक्रमम् ॥ १ ॥
चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा।
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥ २ ॥
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ॥ ३ ॥
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी।
आसु प्रतिष्ठा विधिवत्कृता बहुफला भवेत् ॥ ४ ॥
आषाढे द्वे तथा मूलमुत्तराचयमेव च।
ज्येष्ठा-श्रवण-रोहिण्यः पूर्व्वभाद्रपदा तथा ॥ ५ ॥
हस्ताऽश्विनी रेवती च पुष्यो मृगशिरास्तथा।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ॥ ६ ॥
बुधो बृहस्पतिः शुक्रस्त्रयोऽप्येते शुभग्रहाः[2]।
एभिर्निरीक्षितं लग्नं नक्षत्रञ्च प्रशस्यते ॥ ७ ॥
ग्रहताराबलं लब्ध्वा ग्रहपूजां विधाय च।
निमित्तशकुनं लब्ध्वा वर्ज्जयित्वाऽद्भुतादिकम् ॥ ८ ॥
शुभयोगे शुभे स्थाने क्रूरग्रहविवर्ज्जिते।
लग्ने ऋक्षे प्रकुर्व्वीत प्रतिष्ठादिकमुत्तमम् ॥ ९ ॥
अयने विषुवे तद्वत् षडशीतिमुखे तथा।
एतेषु स्थापनं कार्य्यं विधिदृष्टेन कर्म्मणा ॥ १० ॥

---

१ मूले प्रमाणञ्च यथाक्रमम्। २ ख शुभावहाः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्राजापत्येषु शयनं श्वेते तूत्थापनं[१] तथा ।
[२][मुहूर्त्ते स्थापनं कुर्य्यात् पुनर्ब्राह्मे विचक्षणः ॥ ११ ॥
प्रासादस्योत्तरे वापि पूर्व्वे वा मण्डपो भवेत् ।]
हस्तान् षोडश कुर्व्वन्ति दश द्वादश वा पुनः ॥ १२ ॥
मध्ये वेदिकया युक्तः परिक्षिप्तः समन्ततः ।
पञ्च-सप्त-चतुर्व्वापि करान् कुर्व्वन्ति वेदिकाम् ॥ १३ ॥
चतुर्भिस्तोरणैर्युक्तो मण्डपः स्याच्चतुर्म्मुखः ।
प्लक्षद्वारं भवेत् पूर्व्वे[३] याम्ये चौदुम्बरं भवेत् ॥ १४ ॥
पश्चादश्वत्थघटितं वाटकञ्च[४] तथोत्तरे ।
भूमौ हस्तप्रविष्टानि चतुर्हस्तानि चोच्छ्रये ॥ १५ ॥
सूपलिप्तं तथा शुक्लरजसा स्यात् सुशोभनम् ।
वस्त्रैर्नानाविधैस्तद्वत् पुष्पपल्लवशोभितम् ॥ १६ ॥
कृत्वैवं मण्डपं पूर्व्वं चतुर्द्वारेषु विन्यसेत् ।
अव्रणान् कलसानष्टौ ज्वलत्काञ्चन[५]गर्भितान् ॥ १७ ॥
चूतपल्लवसंच्छन्नान् पीतवस्त्रयुगान्वितान् ।
नानापूग[६]फलोपेतान् चन्दनोदकपूरितान् ॥ १८ ॥
एवं निवेश्य तद्गर्भे गन्धपुष्पार्च्चनादिभिः ।
ध्वजाधिरोहणं कार्य्यं मण्डपस्य समन्ततः ॥ १९ ॥
ध्वजांश्च लोकपालानां सर्व्वान् दिक्षु निवेशयेत् ।
पताका जलदाकारा[७] मध्ये स्यान्मण्डपस्य तु ॥ २० ॥

---

१ क घ पुस्तकद्वये श्वेतेषूत्थापनम् ।
२ ख पुस्तके [ ] चिह्नितांशः पतितः ।
३ ख घ पुस्तकद्वये पूर्व्वम् ।
४ मूले नैयग्रोधम् ।
५ क ख ग जलकाञ्चन— ।
६ ग पुस्तके सर्व्वौषधि— ।
७ ख घ पुस्तकद्वये जलजाकाराः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गन्धपुष्पादिकं कुर्य्यात् स्वैः स्वैर्मन्त्रैरनुक्रमात् ।
बलिञ्च लोकपालेभ्यः स्वमन्त्रेण निवेदयेत् ॥ २१ ॥
ऊर्द्ध्वं तु ब्रह्मणे देयस्त्वधस्ताच्छेषवासुकेः ।
संहितायां तु ये मन्त्रास्तद्दैवत्याः शुभाः[१] स्मृताः ॥२२॥
तैः पूजा लोकपालानां कर्त्तव्या च समन्ततः ।
त्रिरात्रमेकरात्रं वा पञ्चरात्रमथापि वा ॥ २३ ॥
अथवा सप्तरात्रन्तु कार्य्यं स्यादधिवासनम् ।
एवं सतोरणं कृत्वा अधिवासनमुत्तमम् ॥ २४ ॥
तस्याऽप्युत्तरतः कुर्य्यात् स्नानमण्डपमुत्तमम् ।
तदर्द्धेन त्रिभागेन चतुर्भागेन वा पुनः ॥ २५ ॥
आनीय लिङ्गमर्च्चां वा शिल्पिनः पूजयेदथ ।
वस्त्राभरणरत्नैस्तु येऽपि तत्परिचारकाः ।
क्षमध्वमिति तान् ब्रूयाद्यजमानोऽप्यतःपरम् ॥ २६ ॥

उत्तरायणग्रहणेनैव माघादिग्रहणे सिद्धे माघादिग्रहण-माषाढनिवृत्त्यर्थम् । वक्ष्यमाणेषु संक्रमणकालेषु करणेऽपि मासविशेषादरसिद्ध्यर्थञ्च । अतीत इति मकरसंक्रमणे जाते सतीत्यर्थः । इदञ्च मकरसंक्रमणात् पूर्व्वभाविनां माघादीनां निरासार्थम् । प्रतिष्ठादिषु प्रतिष्ठा-स्नपन-महापूजासु । विधाय चेति सत्यपि ग्रहतारावले विना-यकग्रहपूजयोरावश्यकत्वार्थम् । एतदनन्तरं मातृपूजन-नान्दीश्राद्ध-वसोर्धारा-स्वस्तिवाचनाऽऽचार्य्यादिवरणानां कर्त्तव्यता बोध्या ।

---

१ ग श्रुतौ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

निःशङ्कप्रवृत्तेर्निमित्तं शकुनं सुस्वप्नादि, अद्भुतशान्तिनिमित्तं भूकम्पादि, योगे शुभे व्यतीपातादिभिन्ने। यद्वा नन्दादितिथ्यादेर्भृगुवारादिना योगे सिद्धिप्रभृतिसंज्ञे।

विवर्ज्जित इति लग्नर्क्षयोः प्रत्येकं विशेषणं, षडशीतिप्रकरणपठितैस्तत्परिमाणविधिभिः प्रतिष्ठायां चतुर्द्दशहस्तादिमानान्तरं निवर्त्तते[१]।

एवं वेदिपरिमाणविधिभिरपि तन्त्रोक्तवेदिमण्डपस्य त्रिभाग इति वेदिमानं निवर्त्तते। उच्चतायामपवादाभावात्तदुक्तैव सा ग्राह्या।

चतुर्थांशोच्छ्रितिस्तस्य त्रिसप्तपञ्चमोऽपि च। इति

परिक्षिप्तः परित आच्छादितः, वाटकं—वटप्रकृतिकं,[२] भूमावित्यर्द्धान्ते द्वाराणामिति शेषः। शुक्लरजसा निर्मितस्वस्तिकादिभिरिति शेषः। न्यसेदिति एकैकस्मिन् द्वारे द्वौ द्वावित्यर्थः।

चन्दनोदकेति प्रथममौषज्जलयुक्तानुक्तकलसान्निधाय चन्दनोदकेन पूरयेदित्यर्थः, मण्डपस्यादेरुत्तरत्रान्वयः। पताकेति ततश्च परितो नता आवश्यका इति ज्ञाप्यते। शेषसहितो वासुकिरिति मध्यपदलोपी समासः। आनीयेति कारुशालान्तरिति शेषः। सा च स्नानमण्डपादुत्तरतो बोध्या।

यथोक्तं हेमाद्रौ,—

मण्डपस्योत्तरे कार्य्यः स्नानाख्यो मण्डपः परः।
मण्डपस्यार्द्धमानेन तदर्द्धेनाऽथ वा पुनः॥ २७॥

---

१ ख घ पुस्तकद्वये वाध्यते।　　२ ख पुस्तके वटप्रतिकाम्।

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

तदुत्तरे कारुशालां स्नानाख्यस्यार्द्धमानतः ।
प्रासादमानतो वाऽपि कुर्व्वीत स्नानमण्डपम् ॥२८॥

नोच्चतायामेष विधिः किन्तु विस्तारे ।

वेदिकाद्वयसंयुक्तं तोरणद्वयभूषितम् ।
ज्येष्ठस्य तु चतुर्हस्तं मध्यमस्य द्विहस्तकम् ।
वेदिकामानमुद्दिष्टं भद्रपीठं ततो न्यसेत् ॥ २९ ॥

स्नानमण्डपेति समाख्यया एका वेदिः स्नानार्थं मध्यभागे, द्वितीया किमर्थमिति, तत उक्तं तत इति तदुत्तरतः कृतवेद्यामित्यर्थः ।

भद्रपीठमाह,—

श्रीपर्णीकाष्ठसम्भूतमौदुम्बरमथापि वा ।
हस्तमात्रं तु दैर्घ्येण अष्टाङ्गुलिसमुच्छ्रितम् ॥ ३० ॥
पञ्चाशदङ्गुलं दैर्घ्यं त्रिंशदङ्गुलमेव वा ।
षट्त्रिंशाऽङ्गुलिकं वा स्याद्भद्रपीठं सुशोभनम् ।
वस्त्र-स्वर्ण-कुशैर्युक्तं देवं तत्र निवेशयेत् ॥ ३१ ॥

तत्राऽऽनयनात् पूर्व्वं कारुशालायां कर्त्तव्यं तत्रैवोक्तम्,—

गत्वा च कारुशालायामाचार्य्यो मूर्त्तिपैः सह ।
शिल्पिना कारयेन्मूर्त्तेः शुद्धिमाकारसंस्थिताम्[१] ॥३२॥
घृतेन मधुना चैव मृद्भिर्गोमूत्र-गोमयैः ।
दध्ना च पयसा चैव तोयेन स्नापयेत्ततः ॥ ३३ ॥
निरीक्ष्य सर्व्वाऽवयवान् न्यूनाधिक्योपशान्तये ।
शमीपल्लवसंयुक्तानक्षतान् जुहुयाद्गुरुः ॥ ३४ ॥

---

१ क पुस्तके आकारसंज्ञिनाम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गुरुराचार्य्यः, अयं होमः कारुशालायामेव स्थाप्य-देवतामन्त्रेण। तदुत्तरं स्नानमण्डपं प्रत्यानीय शिल्पिनां पूजादि कार्य्यम्।

मात्स्ये,—

देवं प्रस्नवणं कृत्वा नेत्रे ज्योतिः[१] प्रकल्पयेत्।
[२]लक्षणोद्धरणं कार्य्यं लिङ्गस्यापि समन्ततः॥३५॥ इति॥

प्रस्नवणकरणमग्न्युत्तारणं,[३] प्रतिमाया नेत्राकृति-सम्पादनम्, लिङ्गे पञ्चसूत्रीकरणोद्धरणं च कार्य्यमित्यर्थः।

यद्यपि बौधायनादिभिः प्रयोगमध्ये नेत्रोन्मीलनमुक्तम्, तथाप्यत्र बहिःप्रयोगमेतद्विधीयते। सर्व्वज्ञस्य महर्षेः पर्य्यनुयोगानर्हत्वात्। तत्प्रतीकारमेवाह।

सर्व्वतस्तु बलिं दत्त्वा सिद्धार्थघृतपायसैः।
शुक्लपुष्पैरलङ्कृत्य घृतगुग्गुलधूपितैः॥ ३६॥
विप्रवाचनकं[४] कुर्य्यात् दद्याच्छक्त्या च दक्षिणाम्।
गामेकं कनकञ्चाऽत्र स्थापकाय निवेदयेत्॥ ३७॥

स्थापक आचार्य्यः।

ॐ नमो भगवते तुभ्यं शर्व्वाय हरये नमः[५]।
हिरण्यरेतसे विष्णो-र्विश्वरूपाय ते नमः॥ ३८॥
मन्त्रोऽयं सर्व्वदेवानां नेत्रज्योतिःष्वपि स्मृतः।
एवमामन्त्र्य देवेशं काञ्चनेन विलेखयेत्॥ ३९॥

---

१ ग पुस्तके नेत्रज्योतिः। २ मूले अद्भ्योद्धरणम्।
३ क पुस्तके प्रस्नवणनामाग्न्युत्तरणम्। ४ मूले विप्राणामर्चनम्।
५ क्वचित् शिवाय परमात्मने।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

माङ्गल्यानि च वाद्यानि ब्रह्मघोषं सगीतकम्।
वृद्ध्यर्थं कारयेद्विद्वानमङ्गल्यविनाशनम्॥४०॥ इति॥

मङ्गलकारि ब्राह्मणभोजनं कुर्य्यादित्यर्थः।

आचार्य्यः कीदृशः, ऋत्विजः कीदृशाः कियन्तश्चेत्यपेक्षायां तत्रैवोक्तम्,—

आचार्य्यस्तु भवेन्नित्यं सर्व्वदोषविवर्ज्जितः।
मूर्त्तिपा[१]स्तद्विधाश्चैव कुलीना ऋजवस्तथा॥ ४१॥
द्वात्रिंशत् [२]षोड़शाऽथापि अष्टौ वा श्रुतिपारगाः।
ज्येष्ठ-मध्य-कनिष्ठेषु मूर्त्तिपालाः[३] प्रकीर्त्तिताः॥४२॥
इति॥

ततः स्नानमण्डपे भगवन्मूर्त्तेः पञ्चगव्येन मृद्भिर्भस्मनोदकेन च तत्तदुचितमन्त्रैः शोधनं, गन्धादिवस्त्रयुग्मेनाच्छादनञ्च कृत्वोत्तिष्ठेत्युत्थाप्य रथमारोप्य आकृष्णेनेति मुख्यमण्डपं प्रवेश्य शय्यायां प्राक्शिरसं स्वापयित्वा तच्छिरोभागे निद्राकलशं निधाय पट्टवस्त्रवितानभक्ष्यभोज्यादि तत्र निधाय त्र्यम्बकादितत्तद्दैवत्यमन्त्रेण सर्व्वदिक्षु बलिं दत्त्वा चतुर्व्वेदाध्यायिनो द्वारेषु चत्वारो जापका नियोज्याः।

ततः शिरोभागे देवस्याचार्य्यो व्याहृतिपूर्व्वकैस्तत्तन्मन्त्रैः पालाशोदुम्बराश्वत्थापामार्गशमीसमिधां प्रत्येकं सहस्रं हुत्वा देवस्य पाद-नाभि-मध्य-वक्षः-शिरांसि क्रमेण स्पृशेत्।

अयञ्च नवकुण्डे। परितोऽष्टकुण्डे तु पूर्व्वोक्तविकल्पानुसारेण प्रतिकुण्डं चत्वारो द्वावेको वा ऋत्विक् शतं

---

१ क मूर्त्तयः। २ क ख पुस्तके षोड़शा ते स्युः।
३ मूले मूर्त्तिपाश्च।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सहस्रं वाज्याऽऽहुतीर्जुहुयात्। कुण्डोत्तरतो निहितकुम्भेषु च संपातान्निक्षिपेत्।

कुण्डनिर्म्माणं संवत्सरदीधितौ माघकृत्योक्तरीत्या बोध्यम्। हस्तमात्राणि तानि, तद्योनिश्च वितस्तिमात्रा गजोष्ठसदृशीति नियम्यते।

होमश्च ऋत्विग्भिः किंदेवताकः कार्य्य इत्यपेक्षायामुक्तम्।

मूर्त्तिपालोकपालेभ्यो मूर्त्तिभ्यः क्रमशस्तथा।
तथा मूर्त्त्यधिदेवेभ्यः क्रमात् कुर्य्युः समन्ततः॥ ४३॥
वसुधा वसुरेताश्च यजमानो दिवाकरः।
जलं वायुस्तथा सोम आकाशञ्चाष्टमं स्मृतम्॥४४॥
देवस्य मूर्त्तयस्त्वष्टावेताः कुण्डेषु संस्मरेत्।
पृथिवीं पाति शर्व्वस्तु पशुः पञ्चाग्निमेव तु॥ ४५॥
यजमानं तथा चोग्रो रुद्रश्चादित्यमेव च।
भवो जलं तथा पाति वायुमीशान एव च॥ ४६॥
महादेवस्तथा चन्द्रं भीमश्चाकाशमेव च।
सर्व्वदेवप्रतिष्ठासु मूर्त्तिपा ह्येव[१]मेव तु॥ ४७॥
एतैस्तु वैदिकैर्म्मन्त्रैर्यथास्वं होममाचरेत्।
तथा शान्तिञ्च वै कुर्य्यात् प्रतिकुण्डं समाहितः॥४८॥

यथास्वं यथालिङ्गं तान् मन्त्रान् प्रयोगे दर्शयिष्यामः। शान्तिं शान्तिसूक्तानि।

अतीते तु सहस्रान्ते सम्पूर्णाहुतिरिष्यते।
समयादस्तथा होता [२]पूर्णाहुतिं विनिक्षिपेत्॥४९॥

---

१ ग पुस्तके सर्व्वपा ह्येवमेव च।

२ ख घ पुस्तकद्वये प्रशान्तात्मा विनिक्षिपेत्।

होता होमकर्त्ता, पूर्णाहुतिं समपादस्तिष्ठन् जुहुयादित्यर्थः ।

मूलमध्योत्तमाङ्गेषु देवं तेनाऽवसेचयेत् ।
स्थितञ्च स्नापयेत्तेन सम्पाताहुतिवारिणा ॥ ५० ॥
प्रतियामं तु धूपञ्च नैवेद्यं चन्दनोदकम् ।
पुनः पुनः प्रकुर्व्वीत होमः कार्य्यः पुनः पुनः ॥५१॥
पुनः पुनश्च दातव्या यजमानेन दक्षिणा ।
श्वेतवस्त्रैस्तु ते सर्व्वे पूजनीयाः समन्ततः ॥ ५२ ॥
विचित्रहेमकटकैर्हेमसूत्राऽङ्गुलीयकैः ।
वासोभिः शयनीयैश्च प्रतियामं स्वशक्तितः[1] ॥५३॥
भोजनञ्चापि दातव्यं यावत्तस्याऽधिवासनम् ।
बलिस्त्रिसन्ध्यं देयस्तु भूतेभ्यः सर्व्वतो दिशम् ॥५४॥
रात्रौ महोत्सवः कार्य्यो नृत्यगीतकमङ्गलैः ।
सदा पूज्यः प्रयत्नेन चतुर्थीकर्म्म यावता ॥ ५५ ॥

अधिवासनदिनेषु प्रत्यहं होमप्रभृति होतृपूजान्तं कार्य्यं, प्रतिष्ठोत्तरं चतुर्थीकर्म्मपर्य्यन्तं प्रत्यहं त्रिसन्ध्यं बलिदानप्रभृति-देवपूजान्तं कार्य्यमित्यर्थः ।

अधिवासनेऽधिककालविकल्पं वक्तुमाह—

त्रिरात्रमेकरात्रं वा पञ्चरात्रमथापि वा ।
सप्तरात्रमथो कुर्य्यात् क्वचित् सद्योऽधिवासनम् ॥५६॥
कृत्वाऽधिवासं देवानां श्वभ्रं कुर्य्यात् समाहितः ।
प्रासादस्यानुरूपेण मानं लिङ्गस्य वा पुनः ॥ ५७ ॥

---

१ घ स्वशक्तिभिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रासादाऽनुरूपमानमुक्तरीत्या प्रतिमायाः। तत्र गर्त्तः पिण्डिकायाः सलिङ्गाया निधानार्थं तदनुरूपः कार्य्य इत्यर्थः। परितो न्यासपूर्व्वको रत्नधातुप्रक्षेपश्च तत्र वक्ष्यते। आसनं कथञ्च कार्य्यमित्याकाङ्क्षायामाह—

पुष्पोदकेन प्रासादं प्रोक्ष्य मन्त्रयुतेन तु।
पातयेत् पक्षसूत्रन्तु द्वारसूत्रं तथैव च॥ ५८॥
आश्रयेत् किञ्चिदीशानीं मध्यं ज्ञात्वा दिशं बुधः।

पक्षसूत्रं कोणात् कोणपर्य्यन्तं, द्वारसूत्रं द्वारमध्यानुसारि प्राक्सूत्रम्। सूत्रत्रयसम्पातेन मध्यं तत्रैशानभुवं ईषद्वलम्ब्य प्रतिमादिस्थानं कार्य्यमित्यर्थः।

उक्तप्रशंसापूर्व्वं पक्षान्तरमाह—

ईशानीमाश्रितं देवं पूजयन्ति दिवौकसः।
आयुरारोग्यफलदमथवोत्तरमाश्रितम्॥ ५९॥
शुभं स्यादशुभं प्रोक्तमन्यथास्थापनं बुधैः।
ततः प्रक्षालितां कृत्वा पञ्चगव्येन पिण्डिकाम्॥६०॥
कषायतोयेन पुनर्मन्त्रयुक्तेन सर्व्वतः।
[1]देवताऽर्चाश्रयं मन्त्रं पिण्डिकासु नियोजयेत्॥६१॥

मन्त्रो गौरीर्मिमायेत्यादि इति यावत्।

तत उत्थाप्य देवेशं उत्तिष्ठ ब्रह्मणेति च।
आनीय गर्भभवनं पीठान्ते स्थापयेत् पुनः॥ ६२॥

न तु सहसैव मध्य इत्याशयः।

अर्घ्यपाद्यादिकं तत्र मधुपर्कं प्रयोजयेत्।
ततो मुहूर्त्तं विश्रम्य रत्नन्यासं समाचरेत्॥ ६३॥

---

१ क्वचित् देवभार्य्याश्रयम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वज्र-मौक्तिक-वैदूर्य्य-शङ्ख-स्फटिकमेव च ।
पुष्परागेन्द्रनीलञ्च नीलं पूर्व्वादितः क्रमात् ॥ ६४ ॥
तालकञ्च शिलाञ्चैव अञ्जनं श्याममेव च ।
कालिका-सीस-माक्षीकं[1] गैरिकञ्चादितः क्रमात् ॥ ६५ ॥
गोधूमं च यवं तद्वत्तिलं मुद्गं तथैव च ।
नीवारमथ श्यामाकं सर्षपं व्रीहिमेव च ॥ ६६ ॥
न्यस्य क्रमेण पूर्व्वादि चन्दनं रक्तचन्दनम् ।
अगुरुञ्चाञ्जनञ्चैव उशीरञ्च ततः परम् ॥ ६७ ॥
वैष्णवीं सहदेवीञ्च लक्ष्मणाञ्च ततः परम् ।
स्वलोकपालनाम्ना तु न्यसेदोङ्कारपूर्व्वकम् ॥ ६८ ॥

इदं प्रतिन्यासं सम्बध्यते ।

काञ्चनं पद्मरागन्तु पारदं पद्ममेव च ।
कूर्म्मं धरां वृषं [2]तद्वन्न्यसेत् पूर्व्वादितः क्रमात् ॥ ६९ ॥

कूर्म्माद्यास्तिस्रः प्रतिमाः ।

ब्रह्मस्थाने तु दातव्याः संहताः स्युः परस्परम् ॥ ७० ॥

उक्ते श्वभ्रे इत्यर्थः ॥

मौक्तिकं विद्रुमं ताम्रं कांस्यञ्चैवाऽऽरकूटकम् ।
रजतं विमलं पुष्पं लोहञ्चाऽनुक्रमेण तु ॥ ७१ ॥

संहत्येति शेषः । एतावन्न्यासाऽसम्भवे त्वाह ।

काञ्चनं हरितालञ्च सर्व्वाऽभावे विनिक्षिपेत् ।
दद्याद्दीजौषधिस्थाने सहदेवान् यवानपि ॥ ७२ ॥
लोकपालनामभिः सर्व्वरत्नस्थाने सुवर्णं क्षिपेत् ।

एवमग्रेऽपि ।

---

१ क पुस्तके काञ्ची काशी समाञ्चिकम् । २ ख पुस्तके तत्र न्यसेत् ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

न्यासमन्त्राननतो वक्ष्ये लोकपालात्मकानिह ॥ ७३ ॥
इन्द्रस्तु महसा दीप्तः सर्व्वदेवाऽधिपो महान् ।
वज्रहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥ ७४ ॥
आग्नेयः पुरुषो रक्तः सर्व्वदेवमयोऽव्ययः[१] ।
धूमकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः ॥ ७५ ॥
यमश्चोत्पलवर्णाभः किरीटी दण्डधृक् सदा ।
धर्म्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥ ७६ ॥
निर्ऋतिस्तु पुमान् कृष्णः सर्व्वरक्षोऽधिपो महान् ।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥ ७७ ॥
वरुणः सबलो[२] विष्णुः पुरुषो निम्नगाऽधिपः ।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥ ७८ ॥
वायुश्च सर्व्ववर्णोऽयं सर्व्वगन्धवहः शुभः ।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ॥ ७९ ॥
गौरो यश्च पुमान् सौम्यः सर्व्वौषधिसमन्वितः ।
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥ ८० ॥
पद्मयोनिश्चतुर्म्मूर्त्तिर्व्वेदवाक् यः पितामहः ।
यज्ञाऽध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥ ८१ ॥
ईशानः पुरुषः शुद्धः[३] सर्व्वविद्याऽधिपो महान् ।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ॥ ८२ ॥
योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्पवद्धारयेन्मूर्द्ध्नि तस्मै नित्यं नमो नमः ॥ ८३ ॥

---

१ ख पुस्तके —मयः शिखी ।
२ ग पुस्तके वरुणो धवलः ।
३ ख घ पुस्तकद्वये शुक्लः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ॐङ्कारपूर्व्वका ह्येते न्यासे बलिनिवेदने ।
मन्त्राः स्युः सर्व्वकार्य्याणामृद्धिपुत्रफलप्रदाः ॥ ८४ ॥

सर्व्वकार्य्याणां सर्व्वप्रतिष्ठानाम् ।

न्यासं कृत्वा तु रत्नादेः पायसेनानुलेपितम् ।
पटेनाऽऽच्छादयेच्छुभ्रं शुक्लेनाऽपि विशेषतः ॥ ८५ ॥
तत उत्थाप्य देवेशमिष्टांशे तु सुशोभने ।
ध्रुवा द्यौरिति मन्त्रेण श्वभ्रोपरि निवेशयेत् ॥ ८६ ॥
ततः स्थिरीकृतस्याऽस्य हस्तं दत्त्वा तु मस्तके ।
ध्यात्वा परमसद्भावादेव देवश्रुतिः फलम् ॥ ८७ ॥

भवतीतिशेषः । श्रुतिः श्रवणं प्रतिमादौ नित्यसन्निधानम् ।

देवव्रतं तथा सौम्यं रौद्रं सूक्तं तथैव च ॥ ८८ ॥

जपेदितिशेषः ।

आत्मानमीश्वरं कृत्वा नानाभरणभूषितम् ।

कृत्वा ध्यात्वा ।

यस्य देवस्य यद्रूपं तद्ध्याने संस्मरेत्तथा ॥ ८९ ॥

कथमित्याकाङ्क्षायामाह,—

अतसीपुष्पसङ्काशं शङ्खचक्रगदाधरम् ।
[2]तत् स्थापयामि देवेशं देवो भूत्वा जनार्द्दनम्[3] ॥ ९० ॥

इति विष्णोः ॥

अष्टादशभुजं देवं चन्द्रार्द्धकृतशेखरम् ।
गणेशं वृषसंस्थञ्च स्थापयामि त्रिलोचनम् ॥ ९१ ॥

इति रुद्रस्य ॥

---

२ ख उत्थापयामि । ३ घ जनार्द्दनः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऋषिभिः संस्तुतं देवं चतुर्वक्त्रं जटाधरम् ।
पितामहं महाबाहुं स्थापयाम्यम्बुजोद्भवम् ॥ ९२ ॥
इति ब्रह्मणः ॥

सहस्रकिरणं शान्तमप्सरोगणसंयुतम् ।
पद्महस्तं महाबाहुं स्थापयामि दिवाकरम् ॥ ९३ ॥
इति सूर्य्यस्य ॥

उक्तमन्त्रान्ते देवतालिङ्गान् वेदमन्त्रानपि पठेत् । ततः स्थाप्यदेवतापार्श्वे तत्तत्परिवारान् ध्यायेत् ॥

विष्णोर्गरुडविष्वक्सेनाद्याः । रुद्रस्य नन्दिमहाबलाद्याः । तत आवाहनादिषोडशोपचारैः पूजां कुर्य्यात् । विष्णोः सहस्रशीर्षेत्यादि सूक्तगतमन्त्रैः ।

आवाहयेत्तथा रुद्रं मन्त्रेणाऽनेन यत्नतः ।
यस्य सिंहा रथे युक्ता व्याघ्रयुक्तास्तथोरगाः ॥ ९४ ॥
ऋषयो लोकपालाश्च देवः स्कन्दस्तथा वृषः ।
प्रियाङ्गना मातरश्च सोमो विष्णुः पितामहः ॥
नागा यक्षाः सगन्धर्व्वा ये च दिव्या नभश्चराः ॥९५॥
तमहं त्र्यक्षमीशानं शिवं रुद्रमुमापतिम् ।
आवाहयामि सगणं सपत्नीकं वृषध्वजम् ॥ ९६ ॥
ॐ आगच्छ भगवन् रुद्राऽनुग्रहाय शिवो भव ।
शाश्वतो भव पूजां मे गृहाण त्वं नमो नमः ॥९७॥

ॐ नमः स्वागतमनु स्वागतं इति नमो नमः ।

ॐ नमः सोमाय सगणाय सपरिवाराय परिगृह्णातु भगवन्मन्त्रपूतमिदमर्घ्यं पाद्यमाचमनीयमासनं ब्रह्मणाऽभिहितं नमो नमः स्वाहेति। सानुषङ्गमन्त्रचतुष्टयेनार्घ्यादि-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतुष्टयं दत्त्वा वैदिकमन्त्रैः पञ्चामृताभिषेकं गन्धोदकैरभिषेकञ्च कृत्वा बौधायनोक्तमन्त्रैरेवावशिष्टपूजां समाप्य शिवध्याननिष्ठश्चतुर्वारमेतान्मन्त्रान् जपेत्। यज्जाग्रतः। ततो विराडजायत। अभित्वा। पुरुष एवेदं। त्रिपादूर्द्ध्वं। येनेदम्भूतम्। नत्वावामन्य इति।

सर्व्वास्वेव प्रतिष्ठासु मन्त्रान् जप्त्वा पुनः पुनः।
चतुःकृत्वः स्पृशेदङ्घ्रिमूले मध्ये शिरस्यपि ॥ ९८ ॥
स्थापिते तु ततो देवे यजमानस्य मूर्त्तिपम्।
आचार्य्यं पूजयेद्भक्त्या वस्त्राऽलङ्कारभूषणैः ॥ ९९ ॥
ब्राह्मणान् भोजयेत् पश्चात् सहस्रं शतमेव वा।
दीनाऽन्धकृपणांस्तद्वत् ये चान्ये समुपस्थिताः ॥१००॥

ततः प्रथमेऽहनि मधुना देवं लेपयेत्। ततोऽभिषेकः। द्वितीये सिद्धार्थहरिद्रया। तृतीये सयवचन्दनेन। चतुर्थे सप्रियङ्गुमनःशिलया। पञ्चमे सतिलकृष्णाजिनदानम्। षष्ठे सघृतपद्मकेसरदानम्। सप्तमे नागपुष्पसहितरोचनादानम्। चतुर्थेऽहनि देवस्य महाभिषेकात्मकचतुर्थीकर्म कार्य्यमृत्विग्भ्यो दक्षिणादानञ्च।

सद्योऽधिवासनपक्षे सर्व्वमेतत् सद्यः। अन्ते ईश्वरार्पणं कुर्य्यात्। इति मात्स्योक्तप्रतिष्ठा।

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# ग्रामादिप्रतिष्ठाविधिः ॥ १२ ॥

एवं प्रासादे देवताप्रतिष्ठां विधाय नृपो[१] ग्रामतडागारामादिनिर्माणपूर्वकं तत्प्रतिष्ठां कुर्यात् ।

ग्रामादिनिर्माणविधिश्च श्रीभागवते वैण्यपृथुसंज्ञकप्रथमनृपगोचरपरकृतिरूपाऽर्थवादेनोन्नीयते ।

यथोक्तं चतुर्थस्कन्धे,—

भूमण्डलमिदं वैण्यः प्रायश्चक्रे समं विभुः ।
अथाऽस्मिन् भगवान् वैण्यः प्रजानां वृत्तिदः पिता ॥१॥
निवासान् कल्पयाञ्चक्रे तत्र तत्र यथाऽर्हतः ।
ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च ॥२॥
घोषान् व्रजान् सशिविरानाकरान् खेटखर्व्वटान् ।
प्राक् पृथोरिह नैवैषा पुरग्रामादिकल्पना ॥ ३ ॥
यथासुखं वसन्ति स्म तत्र तत्राऽकुतोभयाः ॥ ४ ॥

ग्रामा हट्टादिशून्याः, पुरो हट्टादिमत्यः, ता एव महत्यः पत्तनानि, दुर्गाण्यौदकादीनि ।

यथाह बृहस्पतिः,—

औदकं पार्व्वतं वार्क्ष्यमैरणं धान्वनन्तथा ॥५॥ इति ।

घोषाः आभीरवासाः, व्रजाः गोनिवासाः, शिविरं सेनानिवासस्थानम् । आकरा हैमरजतादिस्थानानि । खेटाः कर्षकग्रामाः । खर्व्वटाः पर्व्वतप्रान्तग्रामा इति ।

---

१ घ पुस्तके नृप इति पदं नास्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीधरीये भृगुस्तु,—

विप्राश्च विप्रभृत्यास्तु यत्र ये च वसन्ति ते।
स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च॥ ६॥
एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम्।
मिश्रं तु खर्व्वटं नाम नदीतीरसमाश्रयम्॥७॥ इति

वराहमिहिरः,—

आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवति कूपः।
नित्यं स करोति भयं दाहञ्च समानुषं प्रायः॥ ८॥
नैर्ऋतिकोणे बालक्षयञ्च वनिताक्षयञ्च वायव्ये।
दिक्त्रयं त्यक्त्वा शेषासु हितावहः कूप इति॥ ९॥

भविष्ये,—

तडागं नगरोपान्ते धन्यस्य किल जायते।
उभयोरर्थसंसिद्धिर्दृष्टा कर्त्तुर्जनस्य वा॥ १०॥ इति

विष्णुधर्म्मोत्तरे,—

गवां प्रचारे तत्कृत्वा गोलोकं प्राप्नुयाद्ध्रुवम्।
शक्रलोकमवाप्नोति तडागकरणात् पथि॥ ११॥

अथैषां परिमाणानि तत्रैव। शौनकस्तु ग्रामादीनां लक्षणे निर्म्माणप्रकारकथनपूर्व्वकं प्रतिष्ठाविधिमाह,—

अथ प्रतिष्ठां वक्ष्यामि शौनको ग्राम-खेटयोः।
पुरी-नगरयोश्चैव पत्तनस्य द्विजन्मनाम्॥ १२॥
सभा-मण्डप-कुट्टीनां प्रपा-चत्वरयोस्तथा।
विप्राणामालयो ग्रामः पुरी स्यात् क्षत्रियस्थली॥१३॥
[1]अभिषेकेण संयुक्तं पत्तनं वणिगालयः।
ब्राह्मण-क्षत्त्रिय-विशामालयः खेट उच्यते॥ १४॥

---

१ ख घ पुस्तकद्वये अभिषिक्तेन।

सर्व्वजातेः प्रियं यस्मिन्नालयं ब्राह्मणादिभिः ।
संयुतं नगरं प्रोक्तं खेटाख्यं स्याच्चतुर्गुणम् ॥ १५ ॥
धर्म्मार्थमालयो यत्र सा सभेति प्रकीर्त्तिता ॥ १६ ॥
अभिषिक्तेन संयुक्तमालयो मण्डपो भवेत् ।
कूटी-प्रपाश्वत्वराश्च द्विजातेर्धर्म्मकारणात् ॥ १७ ॥
श्वेते च मधुरास्वादे भूतले सिकतोत्कटे ।
ग्रामादीन् कारयेद्राजा विप्राणामालयार्थिनाम् ॥१८॥
लोहिते मधुरास्वादे भूतले सिकतोत्कटे ।
पुरीं प्रकल्पयेद्राजा क्षत्रियाणां यथाविधि ॥ १९ ॥
पीते च मधुरास्वादे भूतले सिकतोत्कटे ।
वैश्यानामालयं कार्य्यं राज्ञा पूर्त्तेतिसंज्ञितम् ॥ २० ॥
बिल्वापामार्गशाखादिक्षीरकण्टकपादपान् ।
उन्मूल्योद्वासयेत्तस्माद्भूभागात् परितो बहिः ॥ २१ ॥
अनुखरे समे देशे प्रागुदक्प्रवणेऽपि वा ।
ग्रामादीन् कारयेद्राजा वल्ल्यौषधिवनस्पतौ ॥ २२ ॥
सहस्रसीति तत्कृत्वा लोष्टास्थिशकलानि च ।
उद्वास्य भाग एकस्मिन् अधिवासो भवेद्भुवि ॥ २३ ॥
पञ्चगव्येन भूभागं प्रोक्षयेत्त्रिःप्रदक्षिणम् ।
शम्युदुम्बरशाखाभ्यां संवतीभिः परिव्रजन् ।
ऋग्भिरब्देवताभिश्चाऽविच्छिन्नोदकधारया ॥ २४ ॥
पुण्याहं वाचयेत्तस्मिन् ब्राह्मणै[1][र्वेदपारगैः ।
चतुरस्रं यथादिक्स्थं समं वायतमेव वा ॥ २५ ॥
ग्रामादीन् नृपतिस्तस्मिन्] कारयेत्तक्षविद्यया ।
मार्गवन्ति गृहादीनि विप्रादीनां प्रकल्पयेत् ॥ २६ ॥

---

१ ख पुस्तके [ ] चिह्नितांशः पतितः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ग्रामादीनां मध्य एव गृहं विष्णोर्विशेषतः ।
अस्मिन्नेव सभाकूटमण्डपादीनि कल्पयेत् ॥ २७ ॥
श्री-भू-सरस्वतीनाञ्च गृहं गणपतेरपि ।
प्राच्यामिन्द्रगृहं कार्य्यं दक्षिणस्यां यमालयम् ॥ २८ ॥
प्रतीच्यां वारुणं वेश्म उदीच्यां सौम्यमालयम् ।
प्राग्दक्षिणायामाग्नेयं नैर्ऋतं दक्षपश्चिमे ॥ २९ ॥
वायोः प्रत्यगुदग्देशे प्रागुदीच्यां शिवालयम् ।
सर्व्वासां देवपत्नीनां तैः सहैवालयं भवेत् ॥ ३० ॥
परितः पालनार्थाय प्राकारं कारयेन्नृपः ।
द्वारदेशे च दुर्गाया आलयं संप्रकल्पयेत् ॥ ३१ ॥
एवं गृहाणि सर्व्वेषां कारयित्वा यथाविधि ।
अलङ्कृते तु सर्व्वत्र प्रतिष्ठाहोममाचरेत्[1] ॥ ३२ ॥
लेपनास्तरणाहारैर्वितानध्वजतोरणैः ।
मुक्तादामैः पुष्पदामैर्द्दिक्षु सर्व्वास्वलङ्कृतैः ॥ ३३ ॥
शरावपालिकाकुम्भैः संस्कृतैर्द्दिक्ष्वलङ्कृतैः ।
पूर्णकुम्भैर्धूपदीपैर्द्दिक्षु दिक्षूपशोभितैः ॥ ३४ ॥
वादित्राद्यैर्नृत्यगीतैर्वेणुशङ्खैः सुघोषितैः ।
ब्राह्मणैश्चैव घोषेण घोषितं वेदपारगैः ॥ ३५ ॥
ग्रामादीनां ततो मध्ये पुण्याहं वाचयेत् पुनः ।
याः प्रवतो निवत इत्यथार्चा नदीं व्रजेत् ॥ ३६ ॥
प्रस्तुव आप इत्यद्भिः कुम्भानां नवभिर्नवैः ।
नदीतोयेन सम्पूर्य्य हारयेत्तद्द्विजोत्तमैः ॥ ३७ ॥
एकैकस्य चतुष्कासु सदूर्व्वासु शिलास्वथ ।
व्रीहिराशिषु कुम्भानां स्थापनं क्रमशो भवेत् ॥ ३८ ॥

---

१ ख प्रतिष्ठां काममाचरेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एकं मध्ये प्रतिष्ठाप्य प्रागारभ्य प्रदक्षिणम् ।
अष्टावष्टासु वै दिक्षु गन्धमाल्यैरलङ्कतान् ॥ ३९ ॥
कुशान् व्रीहि-यवांश्चैव हिरण्यं प्रक्षिपेदथ ।
विधाय व्रीहिसम्पूर्णशरावैः सकुशैर्दृढान् ॥ ४० ॥
कुम्भान् वस्त्रैश्च संछाद्य अहतैः सकुशैः पृथक् ।
एषां पुरस्तात्कर्त्तव्यो वास्तुहोमो यथाविधि ॥ ४१ ॥
उपलेपादि यत्तच्च आज्यभागान्तमुच्यते ।
[1]ऋग्भिश्च तिसृभिर्हुत्वा हविरेकं यथाविधि ॥ ४२ ॥
ततः स्विष्टकृदारभ्य होमशेषं समापयेत् ।
कुम्भेभ्यः पश्चिमे देशे प्रतिष्ठाहोममाचरेत् ॥ ४३ ॥
उपलेपादिकं कृत्वा आज्यभागान्तकं ततः ।
जुहुयाद्धविरेताभिर्ऋग्भिर्विप्रः समाहितः ॥ ४४ ॥
गणानां त्वा गणपतिं सूक्तमेकोनविंशकम् ।
उत्तिष्ठ ब्रह्मणस्पते सूक्तमष्टर्चकं तथा ॥ ४५ ॥
सोमानं वरुणं पञ्च ससामं विद्धि षोडशम् ।
इन्धानो अग्निमित्यादि सूक्ताभ्यां ब्रह्मणस्पतिम् ॥४६॥
स्योना पृथिवीत्यनया पृथिवीं जुहुयाद्धविः ।
इयमददादित्यादिसूक्तेनैव सरस्वतीम् ॥ ४७ ॥
शालीनां तण्डुलैः पक्वं पायसं जुहुयाद्धविः ।
हिरण्यवर्णामित्यादि श्रीसूक्तेन श्रियं पुनः ॥ ४८ ॥
अब्दैवत्याभिराज्येन होमं कुर्य्यादतन्द्रितः ।
प्रसृव आप इति नव आपोहिष्ठामयोभुवः ॥ ४९ ॥

---

१ ख ग पुस्तकद्वये 'अविस्मरेण तं तन्त्रं कृत्वा वास्तोष्पते इति' अधिकः पाठः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आपोऽस्मान्मातरः पञ्चैता ते गृणन्तमष्टभिः ।
समुद्रादूर्म्मिरिति च सूक्तमेकादशार्च्चकम् ॥ ५० ॥
अथाऽष्टर्च्चं निवर्त्तध्वमेता अब्दैवता ऋचः ।
ततः स्विष्टकृदारभ्य होमशेषं समापयेत् ॥ ५१ ॥
आत्वेति-ध्रुवसूक्तेन ग्रामादीननुमन्त्रयेत् ।
अब्दैवताभिरेताभिः प्रोक्षयेत्त्रिः प्रदक्षिणम् ॥ ५२ ॥
नवकुम्भस्थतोयेन सर्व्वतः परिषिञ्चयेत् ।
ग्रामादीनथ कर्त्तृंश्च द्विजाग्रः स्वस्ति वाचयेत् ॥ ५३ ॥
ब्राह्मणान् भोजयेत् पश्चाद्यथाशक्ति विपश्चितः ।
स्वस्त्यात्रेयं जपेत् पश्चाद्यजमानः समाहितः ॥ ५४ ॥
दक्षिणाञ्च यथाशक्ति दद्यादृत्विग्भ्य एव च ।
आज्यं हिरण्यं वासश्च पशुभूम्यादिकानपि ॥ ५५ ॥
शीर्णे दग्धे च नष्टे च शून्ये चिरविवासिते ।
ग्रामादीन् पुनरुत्पाद्याऽनेनैव प्रोक्षयेद्द्विजः ॥ ५६ ॥
अनेन विधिना हुत्वा प्रोक्ष्याऽपि प्रविशेद्द्विजः ।
आपः प्रजा विभूतिञ्च हरन्ति ब्रह्मराक्षसाः ॥ ५७ ॥
यक्ष-रक्षः-पिशाचाश्च वसन्त्यत्र न संशयः ।
तस्मादनेन होतव्यमात्मनो भूतिमिच्छता ॥ ५८ ॥
एवं होमे कृते कर्त्ता अनन्तफलमश्नुते ।
पापाद्रोगाच्च सर्व्वस्मात् मुच्यते नाऽत्र संशयः ॥ ५९ ॥
अनेन[1] कृत्वा ग्रामादीन् द्विजान् प्रावेशयेन्नृपः ।
आयुः कीर्त्तिं विभूतिञ्च श्रियञ्चानुपमां लभेत् ॥६०॥

---

१ ग एवञ्च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एतत् स्वस्त्ययनं होमं पवित्रं पुष्टिकारकम् ।
पुण्यं यशस्यमायुष्यं स्वर्ग्यं धर्म्यं सुमित्रियम् ॥६१॥
सर्व्वदारिद्र्यशमनं पुण्यलोकप्रदायकम् ।
सर्व्वान् कामांश्च सम्प्राप्य ब्रह्मलोकं स गच्छति ॥६२॥

विप्राणामिति यत्र विप्रा एव तिष्ठन्ति नाधिकृतः क्षत्रियादिर्नापि क्रयविक्रयसमर्थो वैश्योऽतो न शूद्रव्यावृत्तिः। लक्ष्यते चैवमुदाहृतभृगुवचनसंवादात् क्षत्रियादीनां प्रजापरिपालनाधिकृतानां, नत्वभिषिक्तस्यैवेति। नचात्र ब्राह्मणादिव्यावृत्तिः।

अभिषेकेणेति यत्राऽभिषेकेण पालनाधिकारी लभ्यते, यत्र क्रयादिसमर्थवणिक्बाहुल्यञ्च तत्पत्तनमित्यर्थः। खेटलक्षणे ब्राह्मणादिशब्दैः कर्षणप्रवृत्त्या स्वोचितव्यवहारसमर्थजातिमात्रं विवक्षितम्। न चेतरयोगनियमः।

नगरलक्षणे सर्व्वपदेन वर्णसङ्करजातयश्च गृह्यन्ते। सर्व्वप्रियं यत्र लक्ष्यते अतएव सर्व्वाधिष्ठितञ्चतुर्गुणमित्यपरो विधिः। अतस्तदाधिक्येऽपि न दोषः। मार्गादौ पान्थश्रमनिवृत्तौ निर्म्मितं स्थलं धर्म्मशालेति यावत्। सा सभेत्युच्यते।

अभिषिक्तेति यत्र नवग्रहमखाद्यङ्गत्वेन यजमानाभिषेको विहितस्तादृशमित्यर्थः। यथाऽभिषेकसंस्कृतस्य नृपस्य चतुष्पादन्यायदर्शनेन प्रजापरिपालनार्थं यत् स्थानं तदित्याशयः। ततश्च तत्रापि वक्ष्यमाणप्रतिष्ठा कार्य्येति लभ्यते।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मण्डपसमुदायवती भूः कुटीत्युच्यते मध्यभागोच्चमण्डपवती वा । प्रपा-ग्रीष्मर्त्तौविहिता तस्याः, स्थानं चत्वरो विश्रामस्थानतया निर्म्मितः, अतएवोक्तं धर्म्मकारणादिति ।

अथ ग्रामादिनिर्म्माणमाह श्वेत इति । ग्रामादेर्निर्म्माणपूर्व्वकप्रतिष्ठायां नृपस्यैवाधिकार इति दर्शयितुं राजेति विप्रोद्देश्यक-ग्रामादिकरणं श्वेतादिलक्षणभूखण्डे कर्त्तुमुचितमित्यर्थः । एवमग्रेऽपि बोध्यम् ।

पूर्व्वतः पूर्व्वभागे सहस्रेत्युपलक्षणं यथा भूः शल्यशून्या भवति तथा कर्षणं कार्य्यमित्याशयः ।

एकस्मिन्निति न चिकीर्षितग्रामादेः परितो रथ्यादौ प्रक्षेप उचित इत्याशयः । पुण्याहमिति निर्म्माणागमे तत्प्रतिष्ठाङ्गं वक्ष्यते ।

यथादिक्स्थमिति दिक्साधनपूर्व्वकं यथा दिक्ष्वेव कोणं भवति, तथा समचतुरस्रं दीर्घचतुरस्रं वा कार्य्यं वर्त्तुलाद्याकारमित्यर्थः । तक्षेति शिल्पशास्त्रानुसारेणेत्यर्थः । ततश्च पूर्व्वोदाहृतराजवल्लभवचनात् वास्तुपूजां कृत्वेत्यपि लभ्यते ।

अस्मिन्नस्य समीपे, नैर्ऋते शिवालयसमीपे पार्व्वत्या एकमन्यत् । सर्व्वेषां तृतीयान्तानां अलङ्कृत इत्यत्रान्वयः ।

लेपनं गोमयादिना भुवः । स्तरणान्यासनानि उपवेशनार्थानि । आहारः—अन्नानि, मुक्तामालादिभिरलङ्कृता ये वितानादयस्तैरलङ्कृता इत्यन्वयः । शरावाः पिधानार्थाः पालिका निधानार्थं कुम्भानाम् । संस्कृतैश्चन्दनलेपनादिना अलङ्कृतैरिति भावे निष्ठा शोभितैरिति तद्विशेषणं एतादृशाऽलङ्करणैः समलङ्कृतास्तैरिति-कुम्भानां विशेषणम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्णकुम्भैरिति धूपदीपविशेषणं बहुव्रीहिश्च। ब्रह्मणो वेदस्य। तत आरम्भानन्तरं, आरम्भपदेन संकल्पगणेश-ग्रहमातृकापूजनाभ्युदयिकश्राद्धान्युच्यन्ते।

तदनन्तरं मध्यभागे स्वस्तिवाचनमृत्विग्वरणादि च कर्म्म कुर्य्यात्। नवभिरिति कुम्भानां द्विजोत्तमानां च विशेषणम्। एकः कुम्भ आचार्य्येण पूरणीयः। अष्टाभि-रष्टर्त्विग्भिर्दूर्व्वासु शिलानां निधानादि गृह्योक्तरीत्या बोध्यम्। मध्यकुम्भनिधानादि आचार्य्यः कुर्य्यात्। दिक्षु कुम्भानां निधानादृत्विजः कुर्य्युः।

प्रतिष्ठाप्येति न समानकर्त्तृकत्वं विवक्षितम् किन्तु पूर्व्वकालतामात्रम्।

यदीवंशं नरः श्रुत्वा सर्व्वपापैः प्रमुच्यते॥ ६३॥

इतिवत्।

अलङ्कृतानित्यनन्तरं प्रतिष्ठापयेयुरित्यध्याहारः। एषां कुम्भानां पूर्व्वभागे अविस्मरेणेति अविस्मरतेत्यर्थः। पति-मित्यादि द्वितीया विष्णुं यजतीतिवत् देवतात्वाभिप्राया। एताभिः पूर्व्वोक्ताभिः, कर्त्तृनिति बहुवचनं सपरिवार-स्याभिषेकप्रापणार्थम्। दद्यादित्यनन्तरमाचार्य्यायेति शेषः। अर्द्धदयान्तेऽपि दद्यादित्यनुषङ्गः।

शून्ये प्राणिमरणेन, विवासिते वा ग्रामान्तरे सर्व्व-गमनेन, अनेनैव विधिना प्रोक्षणादि कुर्य्यादित्यर्थः स्पष्टी-कर्त्तुमुत्तरो ग्रन्थः। प्रावेशयेदिति आ समन्तात् येऽप्यन्य-वर्णानां गृहास्तेष्वपि प्रकृष्टद्विजान् ब्राह्मणपूर्व्वं निवेश्य ततोऽन्यनिवेशनं कुर्य्यादित्यर्थः।

इति ग्रामादिप्रतिष्ठाविधिः॥ १२॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# सामान्यनिवासस्थानम् ॥ १३ ॥

एवं निर्मितग्रामादिसहिते स्वनिवासस्थानपत्तनाभिमते दुर्गं कुर्य्यात्। तच्च सहस्रपदवास्तुपूजापूर्व्वकं कुर्य्यात्। उक्तराजवल्लभवचनात् ।

राजनिवासस्थानञ्चोक्तम् । विष्णुधर्म्मोत्तरे,—

राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमानतसामन्तं[1] पशव्यं देशमावसेत् ॥ १ ॥

यवसं तृणं, सामन्ता भौमिकाः, पशव्यं पशुहितकरणम् ।

किञ्च ब्राह्मणसंयुक्तं बहुकर्म्मकरन्तथा ।
अदेवमातृकं कर्म्मस्वनुरक्तजनान्वितम् ॥ २ ॥
वैश्यशूद्रजनप्रायमनाहार्य्यं तथा परैः ।
करैरपीडितं वाऽपि बहुपुष्पफलन्तथा ॥ ३ ॥

अदेवमातृकं नदीमातृकम् । वृष्ट्यपेक्षं न भवति नदीबाहुल्यात् । करः करभागः ।

अगम्यं परचक्राणां तद्बाधाऽविषयं[2] पुनः ।
समदुःखसुखं राज्ञः सततञ्च प्रिये स्थितम् ॥ ४ ॥

सुखमित्यन्तस्य पूर्व्वेणैवान्वयः। तद्बाधाऽविषयं शत्रुकृतदुःखायोग्यम् ।

सरीसृपविहीनञ्च व्यालतस्करवर्ज्जितम् ।
एवम्बिधं यथाकामं राजा विषयमावसेत् ॥५॥ इति ।

विषयो देशः, सरीसृपाः व्याघ्रादयः, व्यालाः सर्पाः ।

---

१ क ग पुस्तकद्वये रम्येण रजसामन्तम् । २ क न बाधाविषयम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

याज्ञवल्क्योऽप्याह,—

रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत् ।
आजीव्यमनुजीव्यञ्च कन्दमूलफलादिना ॥६॥ इति

जाङ्गलमिति यद्यप्यल्पोदकतरुपर्व्वतोद्देशो जाङ्गल इति प्रसिद्धस्तथाऽप्यत्र समस्तजलतरुपर्व्वतोद्देशो जाङ्गलशब्देन विवक्षणीयः ।

मनुरपि,—

जाङ्गलं शस्यसम्पन्नमार्य्यप्रायमनाविलम् ।
रम्यमानतसीमान्तं स्वाजीव्यं देशमावसेत् ॥ ७ ॥

इति सामान्यनिवासस्थानलक्षणम् ॥ १२ ॥

# अथ दुर्गलक्षणम् ॥ १४ ॥

याज्ञवल्क्यः,—

तत्र दुर्गाणि कुर्व्वन्ति जनकोशात्मगुप्तये ॥ १ ॥

तत्र पूर्व्वोक्तगुणोपलक्षिते देशे ।

मनुः,—

एकः शतं योधयति प्राकारस्थो धनुर्द्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ॥ २ ॥
तत्स्यादायुधसम्पन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन वा ॥ ३ ॥ इति ।

विष्णुधर्म्मोत्तरे,—

दुर्गञ्च परिखोपेतं वप्रोद्यानकसंयुतम्[1] ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च तथा युतम्[2] ॥ ४ ॥

वप्रः प्राकारः ।

दुर्गे च यन्त्राः कर्त्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राम तैस्तु रक्षा विधीयते ।
दुर्गे द्वाराणि गुप्तानि कार्य्याण्यपि च भूतये[3] ॥ ५ ॥

यन्त्रायुधाऽट्टालचयोपपन्नं
समग्रधान्यौषधिसम्प्रयुक्तम् ।
वणिग्जनैः शोभनमावसेत
दुर्गं सुगुप्तं नृपतिः सदैव ॥ ६ ॥ इति ।

अत्राऽपेक्षित-सर्व्वपदार्थानां संग्रहः कर्त्तव्यः ।

इति दुर्गलक्षणम् ॥

---

१ क्वचित् मूले नृपाट्टालकसंयुतम् । २ ख पुनः । ३ ग भूभुजा ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ दुर्गभेदाः ।

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च ।
नृदुर्गं गिरिदुर्गञ्च समाश्रित्य वसेत् पुनः ॥१॥ इति ।

तत्र धन्वदुर्गं यथा धन्वनि मरुभूमौ दुर्गं कुर्य्यात् । निर्ज्जलदुर्गमत्त्वादित्यर्थः ।

तथा चौशनसे धनुर्व्वेदे,—

सलिलवर्ज्जितमतिशर्कराान्वितं रूक्षं निराश्रयं विषमै- र्विषकीटैश्चितं विषमप्रदेशे दुःसञ्चरं दलवद्भिः पालकै- रुपेतं, रोगविनिर्म्मुक्तं धन्वदुर्गं श्रेयसे ।

भवेदिति ।

अथवा निराश्रया निरुदका भूमिर्धन्वा तेन युक्तं दुर्गं स्वनिवासस्थानात् परितो निर्ज्जलं वृक्षादिरहितञ्च भूमि- प्रदेशञ्च कुर्य्यादित्यर्थः ।

अतएव महाभारतेऽप्युक्तम्,—

यदा तु पीड़ितो राजा भवेद्राज्ञा बलीयसा ।
तदाऽभिसंश्रयेद्दुर्गं बुद्धिमान् पृथिवीपतिः ॥ २ ॥

इत्युपक्रम्य अनन्तरमेवाभिहितम्,—

शस्याऽभिहारं कुर्य्याच्च स्वयमेव नराधिपः ।
असम्भवे प्रवेशस्य दाहयेदग्निना भृशम् ॥ ३ ॥
क्षेत्रस्थेषु च शस्येषु शत्रोरुपचयो भवेत् ।
विनाशयेद्वा तत्सर्व्वं बलेनाऽथ स्वकेन वै ॥ ४ ॥
नदीषु दुर्गेषु सदा संक्रमानवसादयेत् ।
जलं निस्रावयेत् सर्व्वमनिस्राव्यञ्च दूषयेत् ॥ ५ ॥

दूषयेद्विषादिनेत्यर्थः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दुर्गाणाञ्चाऽभितो राजा मूलच्छेदं प्रकारयेत् ।
सर्व्वेषां क्षुद्रवृक्षाणाञ्चैत्यवृक्षं विवर्ज्जयेत् ।
प्रवृद्धानाञ्च वृक्षाणां शाखाः प्रच्छेदयेदिति ॥ ६ ॥

केचित्तु—धन्वनां धनुषां लक्षणयाऽधिष्ठातृपुरुषाणां धन्विनां मण्डलरूपं दुर्गमित्याहुः ।

तन्न युक्तं, लक्षणादोषप्रसङ्गात् । एतादृशदुर्गस्याश्रुतत्वाद्दुष्करत्वाच्च वक्ष्यमाणनरदुर्गेण पौनरुक्त्यापत्तेश्च ।

नरदुर्गं नाम बलदुर्गं, तच्च गज-रथाऽश्व-धनुर्द्धराद्यैः सम्पद्यते । तच्च बलदुर्गे सम्पादिते धनुर्द्धरदुर्गं नान्तरीयकतया सिद्धमेवेति ।

महीदुर्गं यथा मह्यामिष्टकापाषाणादिनिर्म्मितं दुर्गं महीदुर्गम् । मह्येवोच्चावचप्रदेशप्रचुरा दुर्गमिति केचित् ।

औशनसे धनुर्व्वेदे,—

सर्व्वोपकरणोपेतं गुप्तञ्चोपायसंयुतम् ।
अत्युत्सेधाऽतिनिम्नञ्च महीदुर्गं तदिष्यते ॥७॥ इति ।

सर्व्वोपकरणोपेतं सर्व्वाऽपेक्षितपदार्थसमन्वितम्, गुप्तमविज्ञातमार्गं, पराऽप्रवेश्यं पराऽभेद्यमिति वा, उपायसंयुतं उपायाः परैरवरुद्धे दुर्गे तन्निराकरणसमर्थाः शतघ्नीयन्त्रप्रमुखास्तद्युक्तम् ।

अथवा प्रबलैः शत्रुभिरुपरुद्धे स्वनिर्गमनप्रकारा उपायाः । अत्युत्सेधो अत्युच्चता ।

जलदुर्गं यथा,— नद्यादिप्रवाहेणोभयतः समं [1]तेनागम्यप्रदेशो जलदुर्गम् ।

---

१ ख समन्ततोऽगम्यप्रदेशः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

औशनसे धनुर्व्वेदे,—

संक्षिप्तेनैकमार्गेण सविषैस्तु जलेचरैः ।
सलिलैर्विषमस्पर्शनखार्द्दनवधप्रियैः ॥ ८ ॥ इति ।

एतैर्विषममित्यर्थः ।

वनदुर्गं यथा,— घनतरवनवेष्टितो भूभागविशेषो वनदुर्गम् ।

औशनसे धनुर्व्वेदे,—

अज्ञातमार्गगहनं वृक्षगुल्मलतादिभिः ।
सकण्टकैर्वनं दुर्गं भूतले स्यात् सुविस्तृतम् ॥९॥ इति ।

बलदुर्गं यथा,— बलस्य स्वसैन्यस्य स्थितिविशेषसम्पादनं व्यूहादिवत् बलदुर्गम् ।

औशनसे धनुर्व्वेदे,—

मौलं वश्यं सुसन्तुष्टं शिक्षायुक्तं सनायकम् ।
भौमञ्चैवाऽप्रवृत्तञ्च बलदुर्गं प्रशस्यते ॥ १० ॥ इति

बलदुर्गं तदिष्यत इति पाठान्तरम्, मौलं परम्परागतकुलीनन्टपतियुक्तम् ।

एतस्य प्रशंसाऽप्युक्ता महाभारते,—

दुर्गेषु च महाराज ब्रुवेऽहं[१] शास्त्रनिश्चिताः ।
सर्व्वदुर्गेषु शस्यन्ते(?) नरदुर्गं सुदुस्तरम् ॥११॥ इति ।

अन्योन्यसंश्लिष्टहस्तमानुषमण्डलं नृदुर्गमिति केचित् । तन्न [२]हृदयङ्गमम् । एतादृशदुर्गस्य दुस्तरत्वाऽभावात् ।

---

१ ख—षट् तु ये । २ ख हृदयं मम ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गिरिदुर्गं यथा,—

गिरिशिरोभूभागः परिमण्डलगिरिवलयवेष्टितो देश-विशेषो वा गिरिदुर्गम् ।

औशनसे धनुर्व्वेदे,—

दुरारोहं परैर्दूरं शरपातस्य गोचरात् ।
सर्व्वसम्पत्समायुक्तं दुर्गं स्यात्पार्व्वतं श्रिये॥१२॥ इति ।

एतस्य प्राशस्त्यमुक्तं विष्णुधर्म्मोत्तरे,—

सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥१३॥ इति ।

एतेषु षट्सु दुर्गेषु नृपतिरन्यतमदुर्गमाश्रयेत् ।

तदुक्तं विष्णुस्मृतौ,—

धन्वन-मही-वारि-गिरिदुर्गाणामन्यतमं दुर्गमाश्रयेत् । इति ।

विष्णुधर्म्मोत्तरेऽपि,—

तच दुर्गं नृपः कुर्य्यात् षणामेकतमं बुधः ॥ १४ ॥

इति दुर्गभेदाः ।

अथ दुर्गपरिमाणं सिद्धान्तशेखरे,—

चत्वारिंशत्समायुक्तं दण्डानां षट्शतं मतम् ।
दुर्गस्य विस्तरं दैर्घ्यं विदध्यादधमस्य च ॥ १५ ॥
शतैश्च सप्तभिः कुर्य्याच्चतुर्भिः सह मध्यमम् ।
अष्टषष्टियुतैः श्रेष्ठं दण्डानां सप्तभिः शतैः ।
विस्तारञ्चायतं कुर्य्याद्दुर्गलक्षणमीरितम् ॥ १६ ॥

इति दुर्गपरिमाणम् ॥१४॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अन्यान्यगृहलक्षणाम् ॥ १५ ॥

एवं निर्म्मिते दुर्गे राजा स्वस्य स्वपुरोहितादीनाञ्च गृहाणि कुर्य्यात् ।

तल्लक्षणानि बृहत्संहितायाम्,—

वास्तुज्ञानमथाऽतः कमलभवान्मुनिपरम्परायातम् ।
क्रियतेऽधुना मयेदं विदग्धसांवत्सरप्रीत्यै ॥ १ ॥
किमपि किल भूतमभवद्रुधानं रोदसी शरीरेण ।
तदमरगणेन सहसा विनिगृह्याऽधोमुखं न्यस्तम् ॥२॥
यत्र च येन गृहीतं विबुधेनाऽधिष्ठितः स तत्रैव ।
तदमरमयं विधाता वास्तुनरं कल्पयामास ॥ ३ ॥
उत्तममष्टाभ्यधिकं हस्तशतं नृपगृहं पृथुत्वेन ।
अष्टाष्टोनान्येवं पञ्च सपादानि दैर्घ्येण ॥ ४ ॥
षड्भिः षड्भिर्हीना सेनापतिसद्मनां चतुःषष्टिः ।
पञ्चैवं विस्तारात् षड्भागसमन्विता दैर्घ्यम् ॥ ५ ॥
षष्टिश्चतुर्व्विहीना वेश्मानि भवन्ति पञ्च सचिवस्य ।
स्वाष्टांशयुता दैर्घ्यं तदर्द्धतो राजमहिषीणाम् ॥ ६ ॥
षड्भिः षड्भिश्चैवं युवराजस्यापवर्ज्जिताशीतिः ।
त्र्यंशान्विता च दैर्घ्यं [१]पञ्च तदर्द्धैस्तदनुजानाम् ॥ ७ ॥
[२]नृपसचिवतुल्यमानन्तु सामन्तप्रवरराजपुरुषाणाम् ।
नृपयुवराजविशेषः कञ्चुकिवेश्याकलाज्ञानाम् ॥ ८ ॥

---

१ क ख पुस्तकद्वये पञ्चदशास्तदनुजानाम् ।
२ मूले नृपसचिवान्तरतुल्यम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अध्यक्षाऽधिकृतानां सर्व्वेषामेव कोशरतितुल्यम् ।
सामन्तमन्त्रिविवरं कर्म्मान्ताध्यक्षदूतानाम् ॥ ९ ॥
चत्वारिंशद्धीनाश्चतुश्चतुर्भिस्तु पञ्च यावदिति ।
षड्भागयुतं दैर्घ्यं [1]दैवज्ञभिषक्पुरोहितानाञ्च ॥ १० ॥
वास्तुनि यो विस्तारः स एव चोच्छ्रायनिश्चयः शुभदः ।
शालैकेषु गृहेष्वपि विस्ताराद्दिगुणितं दैर्घ्यम् ॥ ११ ॥
चातुर्व्वर्ण्यव्यासो द्वात्रिंशत्स्यात् चतुश्चतुर्हीनाः ।
आषोडशादिति परं न्यूनतरमतीवहीनानाम् ॥१२॥
सदशांशं विप्राणां क्षत्रस्याष्टांशसंयुतं दैर्घ्यम् ।
षड्भागयुतं वैश्यस्य भवति शूद्रस्य पादयुतम् ॥ १३ ॥
नृपसेनापतिगृहयोरन्तरमानेन कोशरतिभवने ।
सेनापतिचातुर्व्वर्ण्यविवरतो राजपुरुषाणाम् ॥ १४ ॥
अथ पारसवादीनां स्वमान[2]संयोगदलसमं भवनम् ।
हीनाधिकं स्वमानादशुभकरं वास्तु सर्व्वेषाम् ॥ १५ ॥
पश्वाश्रमिणाममितं धान्यायुधवह्निरतिगृहाणाञ्च ।
नेच्छन्ति शास्त्रकारा हस्तशतादुच्छ्रितं परतः ॥ १६ ॥
सेनापतिनृपतीनां सप्ततिसहिते द्विधाकृते व्यासे ।
शाला चतुर्दशहृते पञ्चत्रिंशद्धृतेऽलिन्दः ॥ १७ ॥
हस्तद्वात्रिंशादिषु चतुश्चतुस्त्रिकत्रिकाः शालाः ।
सप्तदशत्रितयतिथि त्रयोदशकृताङ्गुलाभ्यधिकाः ॥१८॥
त्रित्रिद्विद्विसमाः क्षयक्रमादङ्गुलानि चैतेषाम् ।
[3]द्येका विंशतिरष्टाविंशतिरष्टादशत्रितयम् ॥ १९ ॥

---

१ मूले दैवज्ञपुरोधसोर्भिषजः । २ क्वचित् समान— ।
३ मूले व्येका ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शाला त्रिभागतुल्या कर्त्तव्या वीथिका बहिर्भवनात्।
यद्यग्रतो भवति सा [1]सोष्णीषं नामतो भवेद्वास्तुः ॥२०॥
व्यासात् षोडशभागः सर्व्वेषां सद्मनां भवति भित्तिः[2]।
सुस्थितमिति च समन्ताच्छास्त्रज्ञैः पूजिताः सर्व्वाः ॥२१॥
[3][सापाश्रयमिति पश्चात् सावष्टम्भं भवेद्गृहोच्छ्रायः।
द्वादशभागेनोना भूमौ भूमौ ज्ञेयः समस्तानाम् ॥२२॥
विस्तारषोडशांशः सचतुर्हस्तो भवेत् गृहोच्छ्रायः]।
पक्वेष्टकाकृतानां दारुकृतानां तु न विकल्पः[4] ॥ २३ ॥
एकादशभागयुतः सप्तसप्ततिर्न्टपबलेशयोर्व्यासः।
उच्छ्रायोऽङ्गुलतुल्यो द्वारस्यार्द्धेन विष्कम्भः ॥ २४ ॥

अत्र प्रथमश्लोके गृहनिरूपणं प्रतिज्ञाय द्वाभ्यां श्लोकाभ्यां वास्तुपुरुषस्य देवतामयशरीरस्योपन्यासस्तत्पूजनादेरावश्यकत्वज्ञापनार्थः। चतुर्थश्लोके न्टपगृहं पञ्चविधं निरूप्यते।

उत्तरोत्तरन्यूनैः पञ्चभिर्द्दैर्घ्यैर्विस्तारैश्च—

तत्र हस्ताः १२५, दैर्घ्यं, १०८, विस्तार इत्येकं १। तथा १२५, १००, इति दैर्घ्य-विस्ताराभ्यां द्वितीयं २॥ ११५, ९२, इति तृतीयं दैर्घ्य-विस्ताराभ्यां ३॥ १०५, ८४, इति चतुर्थम् ४॥ ९५, ७६, इति पञ्चमम् ५।

एवं पञ्चमश्लोके सेनापतिगृहं पञ्चविधं निरूप्यते। ६४। ५८। ५२। ४६। ४०, इति पञ्चविधहस्तसंख्याभि-

---

१ क ग सोच्छीषं। २ क्वचित् भित्तिः।
३ घ पुस्तके [ ] चिह्नितांशो नास्ति। ४ मूले सविकल्पः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विस्तारः पञ्चविधः । ७४ । ६७ । ६० । ५३ । ४६, इति । हस्तसंख्याभिः प्रत्येकं षोडशाङ्गुलसहिताभिर्दैर्घ्यं पञ्चविधम् ।

एवं षष्ठश्लोके सचिवगृहाणि ६० । ५६ । ५२ । ४८ । ४४, इति विस्ताराः । ६७ । ६३ । ५८ । ५४ । ४९, इति दैर्घ्याणि ।

सचिवगृहगतविस्तार-दैर्घ्याणामर्द्धेन पञ्च राजमहिषी-गृहा उह्याः ।

एवं सप्तमश्लोके युवराजस्य तदनुजानाञ्च गृहाणि ८० । ७६ । ६८ । ६२ । ५६ । पञ्च युवराजगृहे विस्तारः, यथा स्वतृतीयांशसहितदैर्घ्याणि तदर्द्धपरिमितत्वं तदनुज-गृहेषूह्यम् ।

अष्टमश्लोकपूर्व्वार्द्धे सामन्तश्रेष्ठानां राजपुरुषाणां गृहाणि । तत्र नृपोत्तमगृहविस्तारः १०८, सचिवोत्तम-गृहविस्तारः ६०, तयोरन्तरं ८४ तावत् परिमितं तेषा-मुत्तमं गृहं भवतीत्यर्थः । एवमग्रेऽप्युह्यमन्तरम् ।

नवमे वक्ष्यमाणकोशरतिगृहतुल्यता विधीयते । न तत्राऽश्वलालनादिष्वध्यक्षरूपेणाधिकृतानाम् । कर्म्मान्ता-ध्यक्षाः पाकादिकर्म्मस्वधिकृताः ।

दशमे ४० । ३६ । ३२ । २८ । २४ इति विस्ताराः, यथास्वं षष्ठांशयुतानि दैर्घ्याणीति ज्योतिर्व्विदादिगृहा-ण्युच्यन्ते ।

अनेकशालेषु दैर्घ्यनियममुक्त्वैकशालेषु तमाह शालै-केष्विति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्वादश-त्रयोदशयोश्चतुर्वर्णगृहा उच्यन्ते। ब्राह्मणस्य गृह-विस्तारः ३२। २८। २४। २०। १६। अनुपदं क्षत्रियस्य २८। २४। २०। १६। वैश्यस्य ३। २४। २०। १६। शूद्रस्य २। २०। १६।

चतुर्द्दशश्लोकपूर्व्वार्द्धे ४४। ४२। ४०। ३८। ३६ इति पञ्चविधेनान्तमानेन कोशभवन-रतिभवनयोः प्रत्येकं पञ्च-विधत्वं ज्ञाप्यते।

उत्तरार्द्धेऽपि विवरमन्तरं ततश्च राजपुरुषाणां ब्राह्मणानां गृहाणि ३२। ३०। २८। २६। २४। तादृश-क्षत्रियाणां ४। ३० इत्यादयः। तादृशवैश्यानां २८ इत्यादयः। तादृशशूद्राणां २। २६। २४।

पञ्चदशपूर्व्वार्द्धे-पारसवो ब्राह्मणादूढायां शूद्रायां जातः, आदिशब्देनानुलोमजातीयाः सर्व्वे संगृह्यन्ते तेषां भवनं स्वीयपित्रोर्ये भवने तत्परिमाणयोः संयोगे मेलने या संख्या सम्पद्यते तदर्द्धं, तत्परिमितं कार्य्यमित्यर्थः।

अत्र सर्व्वत्र हस्ताः स्वामिनो ज्येष्ठपत्न्या वा।

यथाह राजमार्त्तण्डः,—

स्वामिहस्तप्रमाणेन ज्येष्ठपत्नीकरेण वा।
मिनुयाद्धस्तसंख्यानमिति प्रोक्तं पुरातनैः॥२५॥ इति

वास्तुशास्त्रेऽपि।

गृहेषु हस्तमानं स्यात् स्वामिहस्तप्रमाणतः।
देवादीनां तु धिष्ण्येषु कर्म्मिहस्तेन केवलम्॥ २६॥

षोडशे पशूनामश्वादीनां शालासु न विस्तारदैर्घ्य-नियमः, तासु धान्यादिशालासु च शताधिकोच्छ्रायश्च निषिध्यते।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सप्तदशे सेनापतिनृपतिगृहमुपलक्षणार्थं यस्य कस्याऽपि व्यासं सप्तत्या संयोज्य द्विधाकृत्वा एकत्र चतुर्दिशो विभागो शालामानं परत्र पञ्चविंशो भागोऽलिन्दमानमित्यर्थः। पञ्चदशहृत इति वा पाठः। अङ्गनसम्मुखो यागमनिका क्रियते। तदलिन्दमिति केचित्। प्रतिशालेत्यन्ये। अलिन्दं बहिर्द्वारप्रकोष्ठ इत्यमरः।

अष्टादशैकोनविंशयोश्चतुर्वर्णगृहेषु शालापरिमाणमलिन्दपरिमाणञ्चोच्यते।

ब्राह्मणस्य पञ्चसु ४ । ४ । ३ । ३ । ३ हस्ताः १७ । ३ । २५ । १३ । १४ इयदङ्गुलसम्मिताः क्रमेणालिन्द मानं समौ द्वौ क्षयो गृहं। ततश्च ३ । ३ । ३ । २ । २ हस्ताः १९ । ८ । २० । १९ । ३ इयदङ्गुलिसहिताः क्रमेणालिन्दमानं एतेष्वेवैकैकह्रासेन क्षत्रियादीनामुत्तराणि ४ । ३ । २ चेति ज्ञेयम्।

विंशैकविंशयोर्वीथीमानं तथा गृहभेदसंज्ञाश्च कथ्यन्ते, शालामानस्य यस्तृतीयोऽंशस्तेन मिता वीथिर्गृहस्येचाद्बहिः कार्य्या, पश्चात् स्थितया वीथ्या साऽपाश्रयं, पार्श्वयोः स्थितया साऽवष्टम्भं समन्तात् स्थितया सुस्थितमित्यर्थः।

---

अथोपरिभूमयः।

तत्र शिल्पशास्त्रे विश्वकर्म्मा,—

यजते राजसूयाद्यैः क्रतुभिर्योऽवनीश्वराः।
तलैरर्द्धाष्टमैस्तेषां कारयेद्भवनोत्तमम् ॥ २७ ॥

अर्द्धमष्टमं येषु, सार्द्धाः सप्तेत्यर्थः। एवमग्रेऽपि।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथाऽर्द्धसप्तमैरेव विप्राणां कारयेद्गृहम् ।
अर्द्धषष्ठैः क्षत्रियाणां वैश्यानामर्द्धपञ्चमैः ।
त्रिभिः सार्द्धैश्च शूद्राणां भवनं शुभदं स्मृतम् ॥ २८ ॥
इति ।

अथ तेषामुच्छ्रायमानं द्वाविंशश्लोकेनोच्यते नृपगृह-विस्तारः । १०८ । अस्य षोडशांशहस्ताः ६ अङ्गुलानि १८ । स चतुर्हस्तस्तावद्भि द्व्यङ्गुलसहिता दशहस्ता इति यावत् । प्रथमभूमेरुच्छ्रायमानमेतत् ।

तद्द्वादशांशोनं द्वितीयभूमेरुच्छ्रायमानं तद्द्वादशांशहीनं तृतीयमस्याः, एवमग्रेऽपि भित्तेर्व्विस्तारमानमाह व्यासा-दिति विकल्पो विस्तार । चतुर्विंशे द्वारम् ।

यथा नृपगृहव्यासः १०८ । तदेकादशभागः किञ्चि-दूना दश, तैः सप्तत्या च युतः १८८ ।

तावन्त्यङ्गुलानि द्वारोच्छ्रायः । तदर्द्धं ९४ द्वारविस्तार इत्यर्थः ।

इति गृहपरिमाणम् ।

---

अथ राजगृहविन्यासः ।

विष्णुधर्म्मोत्तरे,—

वीथ्यग्रे च द्वितीये वै राजवेश्म विधीयते ॥ २९ ॥

इत्युपक्रम्य,—

राज्ञः कोशगृहं कार्य्यं [1]दक्षिणे राजवेश्मतः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥ ३० ॥

---

१ क पुस्तके वामतो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गजानां प्राङ्मुखी शाला कर्त्तव्या वाऽप्युदङ्मुखी ।
आग्नेये च तथा भागे आयुधागार इष्यते ॥ ३१ ॥
महानसं तथा प्रोक्तं कर्म्मशालास्तथाऽपराः ।
गृहं पुरोधसः कार्य्यं वामतो राजवेश्मनः ।
मन्त्रि-दैवविदाञ्चैव चिकित्साकर्त्तुरेव च ॥ ३२ ॥

पुरोधसो वामतो मन्त्रिगृहं, तद्वामतो दैवविदः, तद्वामतश्चिकित्सकस्येत्यर्थः ।

तत्रैव च तथाभागे गोष्ठागारं विधीयते ।

तथाभागे आग्नेयतुल्ये ऐशानभाग इति यावत् ।

गवां स्थानं हि यत्रैव तुरगाणान्तथैव च ॥ ३३ ॥

अश्वशाला ऐशान्यामित्यर्थः ।

उत्तराभिमुखी श्रेणी तुरगाणां विधीयते ।
प्राङ्मुखी वापि धर्म्मज्ञ परिशेषा विगर्हिता ॥३४॥

दक्षिणात् प्रत्यङ्मुखी विगर्हितेत्यर्थः । यदन्यदप्यश्वशालासम्बन्धि-वक्तव्यं, तत् संवत्सरकृत्यदीधितौ वाजिनीराजनप्रकरणे उक्तमिति नेहोच्यते ।

गृहसम्बन्धि-वास्तुपूजाविधिः सामान्यत उक्तं विशेषं तत्प्रयोगे वक्ष्यामः ।

इति नृपगृहनिरूपणम् ॥ १४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथात्र गृहे भद्रासनम् ॥१५॥

देवीपुराणे,—

हैमञ्च राजतं ताम्रं क्षीरवृक्षमयञ्च वा ।
भद्रासनञ्च कर्त्तव्यं सार्द्धहस्तसमुच्छ्रितम् ।
सपादहस्तमानञ्च राज्ञो माण्डलिकान्तरात् ॥ १ ॥

इति पञ्चम्या उच्छ्रितमित्यत्रान्वयः । अतस्तस्य न्यूनं हस्तमात्रमित्यर्थः ।

तथा च वराहसंहितायाम्,—

त्रिविधस्तत्रोच्छ्रायो हस्तः पादाधिकेऽर्द्धयुक्तश्च ।
माण्डलिकानन्तरजित् समस्तराज्यार्थिनां शुभदः ॥
॥ २ ॥ इति ।

विष्णुधर्म्मोत्तरे,—

भद्रासनं नरेन्द्रस्य क्षीरवृक्षेण कारयेत् ।
उच्छ्रायश्च तथा तस्य अध्यर्द्धकरसम्मितः[1] ॥ ३ ॥

अध्यर्द्धः सार्द्धः ।

हस्तत्रयं तथा [2]तत्र विस्तारन्तु प्रकल्पयेत् ।
आयामस्तत्र कर्त्तव्यो विस्तरेणाऽर्द्धसम्मितः ॥ ४ ॥

अर्द्धं सम्मितं यस्येति बहुव्रीहिः । ततश्च पट[3]स्तत इत्यर्थः ।

चतुरस्रञ्च कर्त्तव्यं राज्ञो भद्रासनं तथा[4] ।
[5]अष्टास्रञ्च तथा वृत्तं न च दीर्घं कदाचन ॥ ५ ॥

उक्तपरिमाणान्नाऽतिरिक्तमित्यर्थः ।

---

१ मूले अध्यर्द्धं तु समं भवेत् । २ मूले विष्टं विस्तरेण तु कारयेत् ।
३ ग पदः । ४ ग शुभं । ५ मूले नाष्टास्रं न तथावृत्तं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुवर्णरूप्यताम्रैश्च चित्रं कार्य्यं विशेषवत्[१]।
रत्नैः प्रशस्तैश्च तथा न रत्नप्रतिरूपकैः ॥ ६ ॥
चत्वारः पुरुषास्तत्र विन्यस्ता भृगुनन्दन।
द्विगुणाश्च तथा सिंहाः स्तम्भास्तद्विगुणा मताः ॥ ७ ॥

सिंहाः ८। स्तम्भाः १६।

भद्रासनं तत्र भवेन्नृपस्य
तलेन[२] पूर्णस्य सुखं परार्द्धम्।
वैयाघ्रचर्म्मास्तरणं सुखार्थं
वरासनं तस्य समामनन्ति ॥ ८ ॥ इति

तत्रैवाऽन्यो विशेषः।

भद्रासनञ्च छत्रञ्च वालव्यजनमेव च।
खड्गं चक्रं तथा चापं रत्नानि विविधानि च ॥ ९ ॥
राज्ञः पूर्व्वस्य ये त्वासन् सर्व्व एव नराधिप।
न ते कार्य्या नरेन्द्रस्य तेन दैवविदा तदा ॥ १० ॥
कामं सांवत्सरः कार्य्योऽलाभेऽन्यस्यैव भूभुजा।
गुणाधिकाश्चेन्न कार्य्या ये ऽन्यत्राभिहिता मया ॥ ११ ॥ इति

पूर्व्वे चेद्गुणाधिकास्तदा त एव ग्राह्या इत्याशयः।

अवताऽवनितलनिलयं बुधसदोघं कलेरच्छं विलयम्।
नीतं वत नवनीतं घृतमिव रूपं कृतं कृतं येन ॥१२॥

---

१ क्वचित् विशेषतः। २ ख कुलेन।

वाजवाहदुरचन्द्रभूपतेः
कौस्तुभेऽच नृपधर्म्मगोचरे ।
दीधितिः प्रथमभाग ईदृश-
स्तोषकृत्सुकृतिनां व्यजायत ॥ १३ ॥

इति श्रीमत् सकलभूमण्डलमण्डनायमानवाजवाहदुरचन्द्रदेवाज्ञा-प्रवृत्तेन विद्वन्मुकुटशिरोमणिश्रीमदापदेवसुतेनानन्तदेवेन कृते राजधर्म्म-कौस्तुभे प्रथमदीधितिः समाप्तिमगमत् ॥ * ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ वास्तुकर्म्मविधिः ।

उपनिषदधिगतरूपं मुनयो मनसा भजन्त्यरूपं यत् ।
कुरुषु [१]धृतोत्कटकोपं विजयविजयदं महो जयति ॥१॥

यशःकर्पूरपूरेण सर्व्वाशाः परिपूरयन् ।
लज्जाजलनिधौ [२]सर्व्वान्प्राक्षिपन् नृपतीश्वरान् ॥ २ ॥

प्रतापतीक्ष्णरश्मिना यदीयहस्तगामिना ।
समस्त-शत्रुतेजसामकारि [३]चाशु संक्षयः ॥ ३ ॥

[४]स्वविषयगतसर्व्वाऽऽकाङ्क्षितार्थार्पकः सन्
न भजति परवाक्याऽधीनतां स्वार्थसिद्धौ ।
सततमपि धृतो यो न्यायपादैश्चतुर्भिः
सदसि भुवि सदोदाह्रीयतेऽतो य एकः[५] ॥ ४ ॥

प्रयुक्तिशक्तिर्न कदापि शास्त्र-
प्रसङ्गिनामित्युदितं हि भाट्टैः ।
तदन्यथाऽकारि नृपस्य यस्य
स्थित्या सभायामपि तादृशेषु[६] ॥ ५ ॥

या धीर्व्वेदशिखोद्भवा परपदप्राप्त्यै प्रसिद्धा नृणां
भित्वा शाश्वतपञ्चकोशनिचयं [७]तस्यैव चेत् कस्यचित् ।

---

१ क पुस्तके धृतकपटकोपम् ।
२ क पुस्तके सर्व्वानाक्षिपन् नृपतीन् परान् । ग—प्राक्षिपन् नृपतीन् परान् ।
३ ख ग पुस्तकद्वये चास्तगामिता । ४ ख स्वगतविषयसर्व्व— ।
५ क पुस्तके उदाह्रार्य्यते सोऽयमेकः । ६ क्वचित् तादृशेन ।
७ क ख पुस्तकद्वये तस्मै भवेत् ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मन्ये धन्यतमन्तु यस्य नृपतेः खड्गो विनिःसारितः
कोशाद्वैरिदृशां गतो विषयतां धत्ते ह्यसूंस्तत्पदे ॥६॥
नैवाऽतिदेशगतिरस्ति यदीयमन्त्रे
स्यादन्यथात्वमतिरत्र कथं परेषाम् ।
ऊहेन बाधविषमां तु तदीयवार्त्तां
विद्वज्जनाः श्रुतिगतामपि नो सहन्ते ॥७॥
गन्तुं नार्हन्ति यत्र क्षणमपि मनुजास्तत्र देशे स्थितान् यो
दूरीकृत्याखिलारीन्निजभुजविलसच्चण्डकोदण्डबाणैः ।
श्रीमद्भीमेशतीर्थप्रभृतिसुरजन[1]स्थानसद्वह्मशक्तीः
स्पष्टीकर्त्तुं पुराणं परनगरगतं स्कान्दखण्डं जहार ॥८॥
येनाऽकारि बकारिवत् क्षितिभुजां दुष्टाशयानां क्षयो
येनाऽधारि भुजे निजे दिनमणिः प्रौढप्रतापाह्वयः ।
येनाऽवादि च कौस्तुभाभिधनिबन्धोऽयं सदर्थो मुदा
येन श्रीनगरादहारि च परा श्रीवंशवृद्धिप्रदा ॥९॥
बाजबाहदुरचन्द्रभूपते-
स्तस्य भूरियशसे प्रतन्यते ।
राजधर्म्मविषयेऽत्र कौस्तुभे
ऽनेकपद्धतियुताऽथ दीधितिः ॥१०॥
भूपरीक्षा दिशां शोध उदितः पूर्व्वदीधितौ ।
प्रयोगास्तत्र कथ्यन्ते वास्तुपूजादिगोचराः ॥११॥

तत्रादौ वास्तुपूजोच्यते । तत्र स्थाप्या[2] देवता एकाशीतिपदमधिकृत्योक्ताः ।

---

१ घ सुरजल— ।　　२ ख ग पुस्तकद्वये पूज्याः ।

P. P. Ac. Gunratnasuri M.S.　Jin Gun Aaradhak Trust

मात्स्ये—

दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्ववास्तुविभागेषु विज्ञेया नवका नव ॥१२॥
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवांस्त्रिंशत्पञ्चदशैव तु ॥१३॥

त्रिंशत्पञ्चदश पञ्चचत्वारिंशदित्यर्थः । एकाशीतिपदे तदन्यसर्व्ववास्तुषु चैतानेव पूजयेत् इत्यर्थः ।

शिखी चैवाऽथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥१४॥
पूषा च वितथश्चैव गृहक्षत-यमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ॥१५॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोष-पापौ च रोगो ऽहिमुख्य एव च ॥१६॥
भल्लाटः सोम-सर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चाथवा [१]शृणु ॥१७॥
आपश्चैवाऽथ सावित्रो जयो रुद्रस्तथैव च ।
मध्ये नवपदो ब्रह्मा तस्याष्टौ(च)तत्समीपगाः ॥१८॥
[२]साध्यानेकान्तरान् विद्यात् पूर्व्वाद्यान् नामतः शृणु ।
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ॥१९॥
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः ॥ २० ॥

इत्येता एव देवता सर्व्ववास्तुसाधारण्येनोक्ताः ।

---

१ ख ग पुस्तकद्वये तदन्तश्चतुरः शृणु । मूले तदन्तस्तु ततः शृणु ।
२ साध्यानित्यादि पङ्क्तिः ख ग पुस्तकद्वये नास्ति ।

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

वास्तुशास्त्रे,—

ईशस्तु पर्ज्जन्य-जयेन्द्र-सूर्य्याः
सत्यो भृशाऽकाशक एव [१]सर्व्वः ।
वह्निश्च पूषा वितथाभिधानो
गृहक्षतः प्रेतपतिः क्रमेण ॥ २१ ॥
गन्धर्व्व-भृङ्गौ मृग-पैतृ(?)संज्ञौ
दौवार-सुग्रीवक-पुष्पदन्ताः ।
जलाधिनाथोऽप्यसुरश्च शोषः
स पापयक्ष्मा च पिशाच-नागौ[२] ॥ २२ ॥
[३]मुख्यश्च भल्लाटकुवेरशैला-
स्तथैव वाह्ये ऽप्यदितिर्दितिश्च ।
द्वात्रिंशद्देवाः क्रमतोऽर्च्चनीयाः
त्रयोदशैव त्रिदशास्तु मध्ये ॥ २३ ॥
प्रागर्य्यमा दक्षिणतो विवस्वान्
मैत्रो परे सौम्यदिशां विभागे ।
पृथ्वीधरोऽर्च्च्यस्त्वथ मध्यतोऽपि
ब्रह्माऽर्च्चनीयः सकलेषु नूनम् ॥ २४ ॥
आपाऽऽपवत्सौ शिवकोणमध्ये
[४]सावित्रकोऽग्नौ सविता तथैव ।
नैर्ऋत्यकोणे विबुधाधिपो जयो
राजक्ष्म-रुद्रौ त्वथ वायुकोणे ॥ २५ ॥

---

१ ख पूर्व्वें।

२ क ग पुस्तकद्वये ऽपि च रोगनागौ ।

३ क पुस्तके मुख्यश्च भल्लाटकसोमसर्व्वा

४ ख कोणे महेन्द्रेन्द्रजयौ तृतीये रुद्रोऽनिलेऽन्योऽपि च रुद्रदासः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वाह्यवीथ्यां ईशाद्यदित्यन्तानां द्वात्रिंशद्देवतानां मध्ये ब्रह्मा। कोणे द्वौ द्वौ, उक्तक्रमेण। अग्नावाग्नेयकोणे। तृतीये नैर्ऋत्ये। अनिले वायव्ये। मात्स्योक्त-नामभ्यः क्वचिन्नामभेदस्तु देवताविकल्पाभिप्रायः। आसां देवतानां वास्तुभेदेन व्यवस्थितः स्थानविधिरपि।

अत्र दशविध-वास्तुमण्डलानि वक्ष्यन्ते। तत्रादौ एकोनपञ्चाशत्पदवास्तुः स्मर्य्यते।

वास्तुशास्त्रे,—

[१]वेदांशो विधिरर्य्यमप्रभृतयस्त्र्यंशा नवाऽप्यष्टके
कोणेऽन्त्येऽष्टपदार्द्धगाः परसुराः षड्भागहीने पदे।
वास्तुर्नन्दयुगांश एव महिमा[२]ष्टांशैश्चतुःषष्टिकः
सन्धेः सूत्रमितां सुधीः परिहरेद्भित्तिन्तुलास्तम्भकान्॥
२६॥ इति।

सप्तधा विभाजिते क्षेत्रे नन्दयुगांशक एकोनपञ्चाशत्-पदको वास्तुरेव सम्पूज्यः[३]। विधिश्चतुष्पदः। अर्य्यमा-प्रभृतयश्चत्वारः प्रत्येकं त्र्यंशास्त्रिपदा इत्यर्थः। मध्य-कोणगे देवताष्टके नवपदानि एकं पदं पदाष्टमांश-सहितमेकदेवतास्थानमेवाष्टस्थानानीत्याशयः।

अन्त्यकोणस्था अष्टौ देवताः पदार्द्धगाः, एवमेकोन-त्रिंशत्पदानि, अवशिष्टचतुर्व्विंशतिदेवतानामेकैकदेवतायाः

---

१ ख ग पुस्तकद्वये वेदेत्यारभ्य इदं वास्तुमण्डलं बोध्यमित्यन्तोऽंशो परे लिखितः।

२ ग एवमधुना।

३ ख पुस्तके इतः परं सहस्रपदवास्तुप्रणाली लिखिताऽपि साऽस्माभिरा-दर्शानुसारतो यथास्थानं निवेशिता चास्ते।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

षष्ठभागहीनमेकैकपदस्थानमिति विंशतिपदानीत्यर्थः। चतुर्थपादस्यार्थमवसरे वक्ष्यामः। [1][एवं भित्ति-तुला-स्तम्भस्थापनादिके इदं वास्तुमण्डलं बोध्यम्।

अथ चतुःषष्टिपदात्मकं वास्तुमण्डलम्।

ब्रह्मा वेदपदस्तु तेन समका देवार्य्यमाद्या अमी
[2]कोणस्था द्विपदास्तथाऽष्टमरुतः कोणेऽर्द्धभागाद्बहिः।
शेषा एकपदाः सुराः सुकथिता वेदर्त्तवोऽर्थे नव
(?) एते षट्पदिनोऽर्य्यमादिविबुधाऽष्टौ परे चैकशः]॥ २७॥

अष्टधाभाजिते क्षेत्रे वेदर्त्तवः ६४ एवं चतुःषष्टि-पदके वास्तुमण्डलमध्ये चतुःपदात्मिक-ब्रह्मा पूज्यः।

अर्य्यमाद्याः—अर्य्यमा विवस्वान् मित्रः पृथ्वीधरश्चेते चत्वारो देवाः ब्रह्मसमाश्चतुष्पदाः, तस्मादेवं चतुर्द्दिक्षु प्राच्यादिषु प्रत्येकं चतुःपदात्मकसमचतुरस्रस्थाना इत्यर्थः।

कोणस्था इत्यनन्तरमष्टमरुत इत्यनुषङ्गः। मरुतो देवाः—आपाऽऽपवत्सौ, सवितृ-सावित्रौ, महेन्द्र-जयौ, रुद्र-राजयक्ष्माणौ[3]। इत्येते अष्टौ देवाः व्यवहिताः, व्यवहितकोणस्थतिर्य्यक्दीर्घचतुरस्रेषु प्रत्येकं द्विपदात्मकेषु पूज्या इत्यर्थः।

बहिःकोणेऽन्त्यकोणे अष्टमरुतः ईशानकोणाद्याः पदार्द्ध-स्थानाः। शेषाः सुराः पर्ज्जन्याद्याः २४ एकैकपदस्थाः पूज्याः।

---

१ ख पुस्तके [ ] चिह्नितांशो नास्ति।

२ ख पुस्तके कोणेशाः।

३ ख पुस्तके रुद्रदासौ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बहिःकोणयोर्द्वयोरन्तरालस्थलेषु षट्सु षट्सु पूज्या इत्यर्थः। तत्र चतुष्पदाः पञ्च, द्विपदा अष्टौ, एकपदा चतुर्व्विंशतिः। अर्द्धपदा अष्टौ। एवं पञ्चचत्वारिंशद्देवताः।]

अथ मात्स्योक्तश्चतुःषष्टिपदात्मको वास्तुप्रकारः।

चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणोदितः[1] ॥ २८ ॥
ब्रह्मा चतुष्पदस्तत्र कोणेष्वष्टपदास्तथा ॥
बहिःकोणेषु चाष्टौ तु सार्द्धाश्चोभयसंस्थिताः।
विंशतिर्द्विपदाश्चैव चतुःषष्टिपदे स्थिताः ॥ २९ ॥

बाह्यकोणस्थाः शिख्याद्या अष्टौ, आन्तरकोणस्था आपाऽऽपवत्साद्याश्चाष्टावर्द्धपदिकाः प्रत्येकं बोध्याः। एवं ब्रह्मणा सहैषां द्वादशपदानि शिख्यादीनां बाह्यकोण-स्थानां द्वयोर्द्वयोः पार्श्वद्वयस्थाः अदिति-पर्ज्जन्य-जय-भृश-भृङ्गराज-दौवारिक शोषाख्याः। ऐशानादिकोणेषु द्वौ द्वावित्येवमष्टौ सार्द्धपदिका इति।

तेषामपि द्वादश प्राच्यादि-दिक्स्था बाह्यवीथ्यां षोडश-जयन्ताद्याः। आन्तरवीथ्यामर्य्यमाद्याश्चत्वार इति। चतु-र्व्विंशतिः प्रत्येकं द्विपदा इत्यर्थः।

अथैकाशीतिपद-वास्तुमण्डलप्रकारो[2] बृहत्संहिता-याम्,—

एकाशीतिविभागे दश दश पूर्व्वोत्तरा रेखाः।
अन्तस्त्रयोदशसुरा द्वात्रिंशद्बाह्यकोष्ठस्थाः[3] ॥ ३० ॥

---

१ ख ब्रह्मणा स्मृतः। घ ब्रह्मणः स्मृतः।
२ ख वास्तुरुक्तो बृहस्पतिसंहितायाम्।
३ क ख बाह्यकोणस्थाः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शिखि-पर्ज्जन्य-जयन्तेन्द्र-सूर्य्यसत्या भृशोऽन्तरीक्षश्च ।
ऐशान्याद्याः क्रमशो दक्षिणपूर्व्वेऽनिलः कोणे ॥ ३१ ॥
पूषा वितथ गृहक्षत[1] यमगन्धर्व्वाख्यभृङ्गराजमृगाः ।
पितृ-दौवारिक-सुग्रीव [2]कुसुमदन्ताम्बुपत्यसुराः ॥३२॥
शोषोऽथ पापयक्ष्मा रोगः कोणे ततोऽहिमुख्यौ च ।
भल्लाट-सोमभुजगास्ततोऽदितिर्द्दितिरिति क्रमशः ॥३३॥
मध्ये ब्रह्मा नवकोष्ठकाधिपोऽस्त्यर्य्यमा[3] स्थितः प्राच्याम् ।
एकान्तरात् प्रदक्षिणमस्मात् सविता विवस्वांश्च ॥३४॥
विबुधाधिपतिस्तस्मान्मित्रोऽन्यो राजयक्ष्मनामा च[4] ।
पृथ्वीधरापवत्सावित्येते ब्रह्मणः परिधौ ॥३५॥
आपोनामैशाने कोणे हौताशने च सावित्रः ।
जय इति च नैर्ऋते रुद्र आनिलेऽभ्यन्तरपदेषु ॥३६॥
आपस्तथापवत्सः पर्ज्जन्योऽग्निर्द्दितिश्च वर्गोऽयम् ।
एवं कोणे कोणे पदिकाः स्युः पञ्च पञ्च सुराः ॥३७॥
वाह्या द्विपदाः शेषास्ते विबुधा विंशतिः समाख्याताः ।
शेषाश्चत्वारोऽन्ये त्रिपदा दिक्ष्वर्य्यमाद्यास्ते[5] ॥३८॥ इति ।

ऐशानकोणे शिखिनमावाह्य पर्ज्जन्याद्याः सप्त प्राच्यां वीथ्यामाग्नेयकोणादर्व्वाक् पदेष्वावाह्य तस्मिन् कोणे वायुमावाह्य पूषाद्या अष्टौ देवता दक्षिणवीथ्यामावाह्य

---

१ क्वचित् पाठः वृहत्क्षत ।

२ क पुस्तके कुमुदान्ताम्बुपत्य सुराः ।

३ —क ख—तस्मादर्य्यमा ।

४ क राजयक्ष्मा च ।

५ क ख पुस्तके अर्य्यमाद्यास्त्रिषः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दौवारिकाः सप्त देवताः [1]पश्चिमवीथ्यामावाह्य वायव्यकोणे रोगमावाहयेत्। तत्र कुसुमदन्तः पुष्पदन्तः, अम्बुपतिर्वरुणः। तत्र उत्तरवीथ्यां दित्यन्ताः सप्त नवपदस्थाः ब्रह्मणः प्राच्यादि-दिक्षु कोणेषु चैकपदव्यवधानेन अर्य्यमाद्या अष्टौ पूज्याः।

इदञ्च नवानां मध्यपदे ब्रह्मणो मुख्यस्थानमित्यभिप्रायेण शिख्यापवत्सयोर्म्मध्ये आपः, एवं शेषाभ्यन्तरपदेषु बोध्याः सवितृ-सावित्राकाश-वायु-पूषाणो द्वितीयकोणे। एवमपरकोणयोरपि पञ्च पञ्चपदैकैकस्थाः पूज्याः, बाह्यां जयन्ताद्या भृशान्ताः प्राच्यां, एवं दिगन्तरेष्वपि पञ्च-पञ्च द्विपदा बोध्याः। चत्वारोऽन्येऽवशिष्टद्वादशपदेष्वित्यर्थः। एवमत्र शिख्यादिक्रमः।

अन्यच्च ब्रह्मादिक्रमोऽप्युक्तः—

तत्र मध्यस्थितो ब्रह्मा कोष्ठेषु नवसु[2] स्वयम्।
हृदये वास्तुपुंसोऽथ पूर्व्वस्यां त्रिपदोऽर्य्यमा ॥३९॥

इत्यादि सर्व्वाणि वास्तुमण्डलानि चतुरस्राणि कार्य्याणि। वास्तुपुरुषस्य चतुरस्रा[3]कृतित्वात्।

यथोक्तं महाकपिलपञ्चरात्रे,—

देवैः स वास्तुपुरुषः स्थापितश्चतुरस्रकः ॥४०॥ इति।

पदार्थादर्शेऽपि,—

चतुरस्राकृतिः कश्चिदसुरः सर्व्वनाशकः ॥४१॥ इति।

---

१ क ग पुस्तकद्वये पश्चिमवीथ्यामित्यारभ्य प्राच्यादिदिक्ष्वित्यन्तोऽंशः पतितः।

२ ख पुस्तके कोष्ठे पुनर्वसुः द्वयं।

३ ख चतुरस्रीवृत्तित्वात्।

ब्रह्मस्थाने पदनवकं मार्ज्जयित्वा सितेन रजसा पूरयेत्। तत्राऽष्टदलकमलं कृत्वा तत्र ब्रह्माणं सम्पूजये-दित्यपि तत्रैवोक्तम्।

मध्ये पदानां नवकं मार्ज्जयित्वा प्रपूजयेत्।
सितेन रजसा भूयस्तत्तद्दिक्षु चतसृषु ॥४२॥
षट्कं सम्मार्ज्ज्य रजसा रक्तेन परिपूरयेत्।
शिष्टानि च पदान्यत्र यथास्थानं प्रकल्पयेत् ॥४३॥
विचित्राणि ततो मध्ये ब्रह्माणं सम्प्रयोजयेत्।
सर्व्वमध्ये यजेत् सर्व्वो ब्रह्माणं कमलासनम् ॥४४॥
इति।

तथाऽन्या अपि देवतास्तत्रैव पूज्यत्वेन शारदातिलके उक्ताः,—

ईशानाद्राक्षसं यावत् यावदग्नेः प्रभञ्जनः।
एवं सूत्रद्वयं दद्यात् कर्णसूत्रं समाहितः ॥ ४५ ॥

इति प्रक्रम्य।

तत्कर्णसूत्रोभयतः कोष्ठद्वन्द्वेषु देशिकः।
सर्व्वं गुहञ्चार्य्यमणं जृम्भिकं[1] पिलिपिच्छकम्।
चरकीञ्च विदारीञ्च पूतनामर्च्चयेत् क्रमात् ॥४६॥
इति।

शैवसिद्धान्तशेखरे तु,—

वास्तोर्व्वाह्ये चरक्याद्याः शङ्कुस्थाः पदवर्ज्जिताः।
[2]चरकी च विदारी च पूतना पापराक्षसी ॥४७॥
ईशानादिषु कोणेषु राक्षस्योऽत्र व्यवस्थिताः।
स्कन्दोऽर्य्यमा [3]जृम्भकश्च पिलिपिच्छो ग्रहा इमे ॥

---

१ ग जम्भकम्। २ ख पुस्तके पादद्वयं पतितं।
३ ख जम्भकश्च।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वास्तुवाह्ये क्रमाद्दिक्षु सम्पूज्याः पदवर्ज्जिताः ॥ ४८ ॥

इति।

एवंनामसु स्थानेषु क्रमे च विरोधप्रतीतौ स्मार्त्तेषु पूर्त्तशान्त्यादिकेषु मात्स्योक्तो[१] वास्तुः। शिवविष्णवादि-प्रतिष्ठायां शैवागमोक्तदीक्षायां च शारदातिलकोक्त-वास्तुरिति व्यवस्थेति केचिदाहुः।

अन्ये तु वास्तुपूजाधिकारे तुल्यवदुपदिष्टानामङ्गादीनां दीक्षणीयाऽवाङ्नियमन्यायेन तदपूर्व्वप्रयुक्तत्वादैच्छिक-विकल्पः सर्व्वत्राहुः।

मध्ये नवपदैर्ब्रह्मा अर्य्यमादयश्च चत्वार उक्ताः। दिक्षु प्रत्येकं षट्पदिकाश्चत्वारः, द्विपदा अष्टौ ८ एकपदा विंशतिः, अर्द्धपदा अष्टौ, एवं पञ्चचत्वारिंशद्देवता इति।

## अथ शतपदवास्तुः।

ब्रह्मा कलांशो वसुतोऽर्य्यमाद्याः ४
कोणेऽष्ट ८ वाह्येऽपि च सार्द्धभागाः।
विधातृकोणे द्विपदास्तथाऽष्टौ ८
शेषाः सुरा एकपदाः २४ शतांशे ॥ ४९ ॥

शतपदे त्वेष विभागः।

ब्रह्मा षोडशपदात्मकः, अर्य्यमाद्याः प्रत्येकमष्टपदा-श्चत्वारः, तत्कोणस्था अष्टौ ईशानाद्याः प्रत्येकं द्विपदा अष्ट ब्रह्मणो व्यवहिताः वाह्यकोणस्थाः, सार्द्धपदा अष्टौ ८। शेषाः, पर्ज्जन्याद्या चतुर्व्विंशत्येकपदा इत्यर्थः। तत्र षोडश-

---

१ ख पुस्तके पौराणोक्तो वास्तुः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पदा एका १, अष्टपदा चत्वारि ४ द्विपदा अष्टौ ८ एकपदा चतुर्व्विंशतिः (२४) सार्द्धपदिकाऽष्टौ ८। एवं पञ्च-चत्वारिंशद्देवता शतपदवास्तुमण्डले च।

अन्यच्च—

[१][वापीकूपतडागादौ वनेषूपवनेषु च।
उक्ताऽनुक्तेषु सर्व्वत्र वास्तुः शतपदः शुभः ॥५०॥
शतपदात्मको वास्तुः तडागादिषु योजितः।
कुर्य्यात् सम्पूज्य यत्नेन रेखैकादश नामतः ॥५१॥
शान्ता यशोवती कान्ता विशाला प्राणवाहिनी।
सती सुमतिर्वै नन्दा सुभद्रा सुरथा वसुः ॥५२॥
प्रागायता उदक्संस्था हिरण्येन लिखेद्बुधः।
सौम्यायता ऐन्द्रिसंस्था तथैव च लिखेत्ततः ॥५३॥
हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला प्रिया।
जया काला विशोका च ईडा ज्वालेति नामभिः ॥५४॥
एवं शतपदं कृत्वा तृतीये पंक्तिकोणगे।
पदानि च विभज्यैव अष्टावर्द्धपदाः स्मृताः ॥५५॥
द्विपदैशानमारभ्य द्वात्रिंशच्च यथा तथा।
शिख्यादि अदितीत्यन्तान् क्रमेण च वियोजितः ॥५६॥
ईशानस्थे च प्रागर्द्धे आपवत्सादि योजितः।
चतुःपदाः चतुः प्रोक्ता अष्टावर्द्धपदाः स्मृताः ॥५७॥
मध्ये षोडशकोष्ठानि ब्रह्मस्थानं प्रकल्पयेत्।
एवं शतपदं वास्तु तत्तच्छास्त्रानुसारतः ॥५८॥ इति ॥]

१ ख पुस्तके [ ] बन्धनीमध्यस्थित कारिकावलिर्न दृश्यते।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ चतुश्चत्वारिंशोत्तरशतपदवास्तुमण्डलम् ।

ब्रह्मा जिनांश उदितः शिवतोऽर्य्यमाद्याः
कोणेषु सार्द्धपदिकाश्च तथैव चाष्टौ ।
शेषा द्विभागसमका रविभागकोऽयम्
पूज्यो रथाश्वगजवाहनकेऽम्बुयन्त्रे ॥५९॥

रविभागकः-द्वादशसंख्याभागिन्यां द्वादशसंख्यायां निष्पन्नश्चतुश्चत्वारिंशदधिकशतपदको १४४ यस्तत्रायं विशेषः। ब्रह्मा चतुर्व्विंशत्पदात्मकः १ अर्य्यमाद्याश्चत्वारः, प्रत्येकं शिवत एकादशात्मपदात्मकाः ४ प्रतिकोणे सार्द्ध-पदिकाद्वयमेवं चाष्टौ सार्द्धपदिकाश्च ८ एवमशीतिपदानि विनियुक्तानि। अपराणि चतुःषष्टिपदानि द्वात्रिंशद्देवता-समविभागेनैव कार्य्याणीति विधीयते।

तथा मध्यकोणस्थस्यार्द्धपदिका अष्टौ आपापवत्सादि-देवताश्च तथैव शिख्यादिद्वात्रिंशद्देवतावशिष्टानां चतुःषष्टि-पदानां अत्र विनियोग इत्याशयः।

अथैकोनसप्तत्युत्तरशतपदात्मकं वास्तुमण्डलम् ।

यन्त्रे त्रयोदशपदैरपि पूजनीय-
स्तत्पञ्चविंशतिरजो दशतोऽर्य्यमाद्याः ।
कोणेऽब्धयोऽमरगणा बहिरेककांशा
भद्रेऽधिकं रसविभागपरे द्विभागाः ॥६०॥

यन्त्रे जलयन्त्रादौ त्रयोदशसंख्याभाजिते त्रयोदशपदै-र्युक्त-एकोनसप्तत्यधिकशतपदात्मको वास्तुः पूज्यः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्रेयं व्यवस्था, अत्र अजो ब्रह्मा पञ्चविंशतिपदात्मकः २५। अर्य्यमाद्याश्चतुरः ४ प्रत्येकं दशपदाः। बहिःकोणे आपापवत्साद्याश्चत्वारो गणा अष्टौ देवा द्विपदा इति यावत्। प्रत्येकं भद्रेऽधिकमित्यनन्तरं कोणेऽन्ययोऽमरगणा इत्यनुषङ्गः। चतुःसंख्ये मध्यकोणेऽष्टौ देवाः प्रत्येकं रसविभागाः षट्पदा इत्यर्थः। अपरे विंशतिदेवाः प्रत्येकं द्विपदा इति यावत्।

अथ षण्णवत्युत्तरशतपदो [1]वास्तुः।

द्वात्रिंशत् कमलासनोऽर्य्यमुखाः स्युः सूर्य्यभागाः क्रमात्
कोणेष्वष्टसुरा द्विभागसहिता बाह्येषु सार्द्धांशकाः।
अष्टौ रामपदाः पुनर्द्विपदिकाः षड्गागिनोऽष्टौ सुराः
क्षेत्रे षण्णवचन्द्रभागसहिते स्याद्देवतानां क्रमः॥६१॥

षण्णवचन्द्रभागसहिते षण्णवत्यधिकशतपदे वास्तुक्षेत्रे देवतानामयं क्रमः स्यात्। ब्रह्मा द्वात्रिंशत्पदकः, अर्य्यमप्रमुखाश्चत्वारः प्रत्येकं द्वादशपदाः स्युः। मध्यकोणगता आप प्रभृतयोऽष्टसुराः प्रत्येकं द्विपदाः, एवं षण्णवतिः सिद्धा। वाह्यकोणगता अष्टौ ईशानाद्याः प्रत्येकं सार्द्धपदिनः।

आसां मध्ये ईशस्याव्यवहितदक्षिणे पर्जन्यः आकाशस्याव्यवहितोत्तरे सूर्य्य इत्येवं चतुर्दिक्षु अष्टौ सुराः प्रत्येकं त्रिपदाः स्युः। एवं पर्जन्यदक्षिणतो भृशोत्तरे सत्य इत्येवमष्टौ सुराश्चतुर्दिक्षु प्रत्येकं द्विपदगाः। एवं जयदक्षिणे

---

१ ख ग पुस्तकद्वये षण्णवत्युत्तरशतपदवास्तुविवरणं न लिखितं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इन्द्रस्योत्तरे सूर्य्यः, इत्येवं चतुर्द्दिक्षु अष्टौ सुराः। प्रत्येकं षट्सु षट्सु पदेषु पूज्या इति सिद्धान्त इत्याशयः।

अथ सहस्रपदात्मकं वास्तुमण्डलम्।

मध्ये ब्रह्मा पूजनीयः शतांशै-
श्चत्वारिंशद्भिः पदैर्वाह्यवीथ्याम्।
प्रोक्ता देवा अर्य्यमाद्या अशीत्या
मध्ये कोणेऽष्टौ शतं चाष्टषष्ट्या ॥ ६२ ॥
कोणे च ये नन्दपदैः सुराश्च
शेषाश्च वाह्ये वसुभागिनश्च।
वीथी च वाह्ये रविभागयुक्तं
शतं पदानां कथितं मुनीन्द्रैः ॥ ६३ ॥

चत्वारिंशदधिकशत १४० संख्यपदैर्मध्ये ब्रह्मा पूज्यः। ब्रह्मसमीपवर्त्तिबाह्यवीथ्यां मध्यदेशगतायां अर्य्यमाद्याश्चत्वारो देवाः प्रत्येकमशीत्या पदानां[1] पूज्या अशीतिचतुष्टयमेलनेन विंशत्यधिकशतत्रयपदानि भवन्ति। पूर्व्वैः सह षष्ट्यधिकशतचतुष्टयं भवति। ४६०। मध्यकोणे ये आपापवत्साद्या अष्टौ देवास्ते प्रत्येकं एकविंशति २१ पदैः पूज्याः। एवमष्टौ मिलितानां तेषामष्टषष्ट्यधिकशतं भवति १६८ पूर्व्वैः सह मेलने कृतेऽष्टाविंशत्यधिकषट्शतानि पदानि भवन्ति ६२८।

वाह्यकोणे ईशानाद्या[2]श्चत्वारो ये सुरास्ते प्रत्येकं नन्दैर्नवपदैः पूज्या, एवं पदानि षट्त्रिंशत् ३६। वाह्यवीथ्या-

---

१ ख पदानां अशीत्या पूज्याः। २ ख इन्द्राद्याः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मवशिष्टा पर्ज्जन्याद्या अष्टाविंशतिर्देवतास्ताः प्रत्येकं वसुभिरष्टाभिः ८ पूज्या इति। तन्मेलने चतुर्व्विंशत्यधिकशतद्वयं भवति २२४। ततो बाह्यवीथ्यां प्रादक्षिण्येन द्वादशाधिकशतपदानि ११२ इति। संख्याचयमेलनेन षट्त्रिंशदधिकशतत्रयं भवति ३३६। तत्पूर्व्वैः सह मेलनेन सहस्रपदानि भवन्ति १०००। इति मुनीन्द्रैः कथितम्।

[1][तत्र चतुष्कोणे प्रत्येकं षट् षट्पदान्यधिकानि तानि सन्त्यजेदित्यर्थः] इति सहस्रपदवास्तुप्रकारः।

अत्रैव सिद्धान्तशेखरे,—

ब्रह्मा चतुर्म्मुखो रक्तो लम्बकूर्च्चश्चतुर्भुजः।
अक्षमालास्रुवं दक्षे वामे दण्डकमण्डलुम्।
दधानमष्टनयनं [2]यन्त्रमध्ये व्यवस्थितम्॥ ६४॥
ईशानः क्षीरधवलः पर्ज्जन्योऽञ्जनसन्निभः।
जयन्तोऽञ्जनसङ्काशो महेन्द्रश्चामलद्युतिः॥ ६५॥
आदित्यो रक्तवर्णः स्यात् सत्यो विचित्रवर्णकः।
भृशो बन्धूकपुष्पाभः कुन्दाभश्चान्तरीक्षकः॥ ६६॥
उद्यद्दिनकराभोऽग्निः पूषा रक्ताब्जसन्निभः।
वितथश्चेन्द्रचापाभो विद्युद्वर्णो गृहक्षतः॥ ६७॥
यमश्चाञ्जनसंकाशो गन्धर्व्वः पद्मवर्णवत्।
भृङ्गराजस्तु भृङ्गाभो मृगो जीमूतसन्निभः॥ ६८॥
निर्ऋतिः पावकाभश्च पीतो दौवारिकः स्मृतः।
सुग्रीवो नीलकण्ठाभश्चन्द्राभः पुष्पदन्तकः॥ ६९॥

---

१ [ ] चिह्नितांश ख पुस्तके अधिकः।
२ ख पुस्तके यजेन्मध्ये।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वरुणः स्फटिकाभासो भृङ्गाभश्चासुरो मतः[1] ।
शोषश्चोत्पलसङ्काशः पापश्चैवेन्द्रनीलवत् ॥ ७० ॥
हरित्संकाशको वायुररुणश्च अहिः स्मृतः ।
मुख्यः स पीतकः प्रोक्तो भल्लाटो रक्तवर्णकः ॥७१॥
सोमः स्फटिकसंकाश उरगो रक्तवर्णकः ।
दितिश्च पीतवर्णः स्यात् हरितोऽदितिरेव च ॥७२॥
अर्य्यमा पीतवर्णः स्याद्विवस्वान् रक्तवर्णकः ।
मित्रो वै रक्तवर्णः स्यात् कृष्णवर्णस्तु भूधरः ॥७३॥
सविता नीलवर्णाभः सावित्रो धूम्रवर्णकः ।
इन्द्रश्चाऽरुणवर्णाभः शुक्लश्च जयसंज्ञकः ॥ ७४ ॥
रुद्रः प्रवालसदृशो राजयक्ष्मा सुपीतकः ।
आपो वै क्षीरधवलः आपवत्सो जवाद्युतिः ॥ ७५ ॥

एवं पञ्चचत्वारिंशद्वर्णैर्वास्तुमण्डलं विरच्य ब्रह्मस्थानं चतुष्पदादीन्मार्ज्जयित्वा सितरक्तादिनाऽष्टदलकमलं कृत्वा तत्र ब्रह्माणं पूजयेत् ।

ततः,—

सितो रक्तश्च पीतश्च कृष्णः स्कन्दादिका ग्रहाः ।
वज्रं शक्तिञ्च खड्गञ्च पाशञ्च विकृताननाः ॥ ७६ ॥
दधाना भीषणाः प्रोक्ता ग्रहाः स्कन्दादिकाश्च ते ।
चरकी रक्तवर्णाभा कृष्णाभा च विदारिका ॥ ७७ ॥
पूतना हिमसंकाशा मेघाभा पापराक्षसी ।
खड्गञ्च पानपात्रञ्च छुरिकां कर्त्तरीन्तथा ।
दधाना भीमरूपास्ता राक्षस्यः परिकीर्त्तिताः ॥७८॥
इति ब्रह्मपुराणे ।

१ क असुरोत्तमः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[१]कारिकायान्तु—

मध्ये तु श्वेतवर्णं स्याल्लिखेद्ब्रह्म चतुर्म्मुखम् ।
पूर्व्वादिक्रमयोगेन अर्य्यम्ने रक्तवर्णकम् ॥ ७९ ॥
सवित्रे कृष्णवर्णं स्यात् रक्तवर्णं विवस्वते ।
विबुधाधिपे नीलं स्यात् कोष्ठानां तु त्रयं त्रयम् ॥८०॥
ईशानादिकोणयोगे आपवत्से तु रक्तकम् ।
मित्रे श्वेतं नीलवर्णं राजयक्ष्मं लिखेत्ततः ॥ ८१ ॥
पृथ्वीधरे पीतवर्णं कोणे चैव तथोपरि ।
आपः पीतं शुक्लवर्णं सावित्रे तु प्रपूरयेत् ॥ ८२ ॥
जये तु पीतवर्णं स्यात् रुद्रे शुक्लं तथैव च ।
शिखिने कृष्णवर्णं स्यात् पर्ज्जन्ये श्वेतवर्णकम् ॥ ८३ ॥
रक्तं जयन्ते कुलिशे नीलं पीतं दिवाकरे ।
श्वेतं सत्ये भृशे रक्तमन्तरीक्षे च कृष्णकम् ॥ ८४ ॥
वायौ नीलं पुष्णि रक्तं वितथे पीतमेव च ।
ग्रहे नीलं यमे कृष्णं गन्धर्व्वे पीतमेव च ॥ ८५ ॥
शुक्लं भृङ्गे मृगे रक्तं पित्रे श्वेतं लिखेत्तथा ।
दौवारिके कृष्णवर्णं सुग्रीवे पीतवर्णकम् ॥ ८६ ॥
पुष्पदन्ते च नीलाभं वरुणे श्वेतमालिखेत् ।
असुरे श्वेतवर्णाभं शोषे च सितपीतकम् ॥ ८७ ॥
पापयक्ष्मणि नीलाभं रोगे पीतं तथैव च ।
शुक्लमहौ मुख्ये रक्तं भल्लाटे कृष्णवर्णकम् ॥ ८८ ॥
श्वेतं सोमे नीलं सर्पे अदितेः पीतवर्णकम् ।
दितेर्वर्णन्तु नीलाभं वास्तुरङ्गं समालिखेत् ॥ ८९ ॥

---

१ कारिकालिखित वास्तुमण्डलस्थदेवतावर्णव्यञ्जकप्रमाणानि ख पुस्तके न सन्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तद्बहिरीशानादिक्रमः ।

चरकीं श्वेतवर्णान्तु विदार्य्यीं रक्तवर्णकम् ।
पूतना पीतवर्णा च पापराक्षसी कृष्णजा ॥ ९० ॥
पूर्व्वे स्कन्दं श्वेतवर्णमर्य्यम्ने रक्तदक्षिणे (?) ।
पश्चाज्जृम्भे पीतं नीलपिलिपिच्छस्तु उत्तरे ॥ ९१ ॥
पूर्व्वादिक्रमयोगेन इन्द्रादीनां यथाक्रमम् ।
पीतं रक्तं कृष्ण-नीलं श्वेतं धूम्रं सिताऽरुणम् ॥९२॥ इति

एवं मण्डलाद्बहिरावाह्य पूजयेत् ।

सामान्यतः सर्व्वमण्डलस्थदेवताध्यानम् ।

सर्व्वे चतुर्भुजा देवा वास्तुदेहे व्यवस्थिताः ।
कृताञ्जलिपुटाः सर्व्वे खड्गखेटकपाणयः ॥ ९३ ॥
ब्रह्माणं संनिरीक्षन्ति तद्वक्त्राऽभिमुखाश्च ते ।
स्वे स्वे स्थाने स्थिताश्चैव साधारणमुदाहृतम् ॥९४॥ इति

तथैव स्कन्दादिध्यानम् ।

वज्रं शक्तिञ्च खड्गञ्च पाशञ्च विकृताननाः ।
दधाना भीषणाः प्रोक्ता ग्रहाः स्कन्दादिकाश्च ते ॥९५॥
इति ।

P. P. Ac. Gunratnasuri M.S.　　　　Jin Gun Aaradhak Trust

# अथ वास्तुयागप्रयोगः ॥ १८ ॥

यजमानो देशकालोच्चारणान्ते यथोक्तफलमुद्दिश्य तदङ्गत्वेन वास्तुपूजां करिष्ये, इति संकल्प्य—स्वतन्त्रप्रयोगे तन्मात्रं संकल्प्य, तदङ्गत्वेन गणपतिपूजनाद्याचार्य्यवरणान्तं कृत्वा तं प्रार्थयेत्।

आचार्य्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।
तथा त्वं मम यज्ञेऽस्मिन् आचार्य्यो भव सुव्रतः ॥१॥

तत ऋत्विजश्चतुरोऽष्टौ वा वृणुयात्।

आचार्य्यस्तु [1][ सुव्रतेत्येवं पृथक् पृथक् प्रार्थ्य ] यदत्र संस्थितमिति श्लोकद्वयान्ते,—

भूत-प्रेत-पिशाचाद्या अपक्रामन्तु राक्षसाः।
स्थानादस्माद्व्रजन्त्वन्यत् स्वीकरोमि भुवन्त्विमाम् ॥

इति

गौरसर्षपादीन् विकीर्य्य पूर्व्वदीधित्युक्तलक्षणां [2]भूमिं सम्पाद्य उक्तरीत्या च तच्छुद्धिं विधाय सद्योजातं प्रपद्यामीत्यादिपञ्चब्रह्ममन्त्रैः पञ्चगव्येन भुवमासिच्य[3] तत्र हस्तमात्रायामष्टहस्तायां वा तण्डुलमय्यां वेदिकायां कनकशलाकया रत्नेन वा भूमावेव वा पिष्टकुङ्कुमान्यतरालोहितेन[4] वा पीठं कृत्वा सूत्रेण संवेष्ट्य चतुःषष्टिपदेन वा एकाशीतिपदेन वा वास्तुमण्डलं विरच्य तत्र रेखाः

---

१ क पुस्तके [ ] चिह्नितांशोऽधिकः। २ ख भुवं स्वीकृत्य।
३ ख—ग्टहं शुचावो हव्य इति ऋचा प्रोक्षेत्। इत्यधिकः।
४ ख लोहितसूत्रेण वा।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रागायता उदगपवर्गा उदगायताः प्रागपवर्गाश्चैवं नाम-मन्त्रैः कुर्य्यात्।

तत्र देवताक्रमः,—

लक्ष्मीर्यशोवती कान्ता सुप्रिया सुफला शिवा।
सुभगा सुमुखी नन्दा नाड्यः प्राचीमुखोद्गताः ॥३॥

तथैव,—

धन्या प्राणा विशाला च स्थिरा भद्राऽनघा निशा।
विरजा विभवा चैव नाड्यः सौम्यमुखाः स्मृताः ॥४॥

ॐ लक्ष्म्यै नम इत्यादि।

अथैकाशीतिपदे तु,—

शान्ता यशोवती कान्ता विशाला प्राणवाहिनी।
सती वसुमती नन्दा सुभद्रा सुरथा इति ॥५॥

ॐ शान्तायै नम इत्यादि। एताः प्रतीच्यारम्भाः[1]।

हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला प्रिया।
जया ज्वाला विशोका च ईडा चैवेति नामभिः ॥६॥

एता दक्षिणारम्भा उदक्संस्था इति।

टद्वास्तु—कुण्डाद्वा स्थण्डिलात्पूर्व्वभागे चतुरङ्गुलोन्नतं यजमानहस्तमितं वेदिद्वयं मृदैव निर्माय तद्दैशानवेदी-शानादि कोणेषु चतुरः शङ्कून् रोपयेत्।

विशन्तु भूतले नागा लोकपालाश्च सर्व्वशः।
मण्डपे[2]ऽत्रावतिष्ठन्तु आयुर्बलकराः सदा ॥७॥

---

१ ख पुस्तके इत्युदीच्यारम्भाः।

२ ख प्रासादे।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति मन्त्रेणावर्त्त्यमानेन शङ्कून्रोपयेत्। ततो रोपण-क्रमेण शङ्कुपार्श्वे माषभक्तबलीन्दद्यात्।

[1][ॐ अग्निभ्योऽथ सर्पेभ्यो ये चान्ये तान् समाश्रिताः।
तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ ८॥]

प्रतिशङ्कु मन्त्रावृत्तिः, ततो रेखाकरणमित्याहुः।

एवं पूर्व्वोक्तप्रकारेण शलाकया रेखां लिखित्वा [2](उप-लेपनोल्लेखनञ्च कृत्वा ततो मण्डलाद्बहिःकोणेषु गुरुं गणेशं दुर्गां क्षेत्रपालं) समचतुरस्रं मण्डलं कृत्वा मध्ये ब्रह्मस्थाने अष्टदलकमलाकृतिमण्डलं विधाय ततः—

[3]वृद्धास्तु—प्राच्यादिदिक्षु यथोक्तं कुण्डं वा स्थण्डिलं चतुरङ्गुलोन्नतं च हस्तादिमानयुतं च कृत्वा उपलेपोल्लेख-नञ्च कृत्वा मण्डलाद्बहिःकोणेषु गुहं गणेशं दुर्गां क्षेत्र-पालञ्च वास्तुमण्डलमध्ये ब्रह्माणमावाहयेदित्याहुः।

ॐ ब्रह्मणे नमः, ब्रह्माणमावाहयामि। ब्रह्मन् इहा-गच्छ, इह तिष्ठेति। ततोऽर्घ्यमादिदेवतास्तत्तन्नाममन्त्रेण। एवं ब्रह्मादिक्रमेण मण्डलान्तः पञ्चचत्वारिंशद्देवता आवाह्य वहिश्चाष्टौ चरक्याद्याश्चावाह्य पूजयेत्।

यद्वा शिख्यादिप्रादक्षिण्यक्रमेण पञ्चचत्वारिंशद्देवता आवाह्य पूजयेत्। यथा—

ॐ शिखिने नमः, शिखिनमावाहयामि ॐ पर्ज्जन्याय नमः ॐ जयन्ताय नमः ॐ कुलिशायुधाय ॐ सूर्य्याय

---

१ ग पुस्तके [ ] बन्धनीस्थितांशो नास्ति।
२ क्वचित् ( ) बन्धनीस्थोऽंशोऽधिकः।
३ ग पुस्तके वृद्धा इत्यादि वृद्धमतमनुल्लिखितम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ॐ सत्याय ॐ भृशाय ॐ आकाशाय ॐ वायवे ॐ पुष्णे ॐ वितथाय ॐ गृहक्षताय ॐ यमाय ॐ गन्धर्व्वाय ॐ भृङ्गराजाय ॐ मृगाय ॐ पितृभ्यो ॐ दौवारिकाय ॐ सुग्रीवाय ॐ पुष्पदन्ताय ॐ वरुणाय ॐ असुराय ॐ शोषाय ॐ पापाय ॐ रोगाय ॐ अहये ॐ मुख्याय ॐ भल्लाटाय ॐ सोमाय ॐ सर्पाय ॐ अदित्यै ॐ दित्यै।

एवं वहिर्वीथ्यामेतद्द्वात्रिंशद्देवता आवाह्य अन्तःकोणे मध्यभागे ईशानादि ॐ अद्भ्य ॐ अर्य्यम्ने ॐ सावित्राय ॐ सवित्रे ॐ विवस्वते [१]ॐ जयाय ॐ रुद्राय ॐ विबुधाधिपाय ॐ मित्राय ॐ राजयक्ष्मणे ॐ पृथ्वीधराय ॐ आपवत्साय ॐ ब्रह्मणे नमः।

एवमेव वास्तुशास्त्रोक्त-आवाहनक्रमः। उपक्रमे तत्तदुक्तरीत्या स्थापनव्यवस्था चोन्नेया।

इति मात्स्योक्तः क्रमः।

---

१ क ग पुस्तकद्वये जयाय रुद्रायेति वाक्यं पतितं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततो मण्डलान्तरतो हैमरौप्याऽन्यतरप्रतिमायां—वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् ॐ वास्तोष्पते प्रपद्ये। अनेन मन्त्रेण वास्तुमावाह्य ततो प्राच्यादिदिक्षु वक्ष्यमाण-विशेषविशेषदेवता आवाहयेदिति केचित्।

सर्व्ववास्तुमण्डलाद्बहिरीशानादिस्थानेषु चरक्याद्या आवाह्य पूजयेत्। ॐ चरक्यै नमः, चरकीमावाहयामि ॐ विदार्य्यै ॐ पूतनायै ॐ पापराक्षस्यै नमः, एवं कोणेषु। अथ प्रागादिषु— ॐ स्कन्दाय १ ॐ अर्य्यम्णे २ ॐ [1]जम्भकाय ३ ॐ पिलिपिच्छाय ४।

एवमावाहितदेवता— "गृहा वैतदस्तु" इत्यादिना प्रतिष्ठाप्य स्वशाखोक्तविधिना पूजयेत्। तत्र ध्यानन्तु प्रागुक्तं "ब्रह्मा चतुर्म्मुखो रक्तः" इत्यादि, ध्यात्वा ॐ भूर्भुवः स्वः शिखिने नमः। इत्यादि नमोऽन्तैः स्वस्वनाम-मन्त्रैः पाद्याद्युपचारैः पूजयेत्। अन्ते यजमानः पुष्पाञ्जलिं समर्प्य नमस्कुर्य्यात्।

ततो मण्डलादीशाने अक्षतोपरि मही द्यौरित्यादिना सुलक्षणं दध्यक्षतविभूषितं निर्म्मलजलपूरितं पञ्चपल्लवोपेतं पञ्चरत्नादिसमन्वितं कलसं निधाय तत्र इमं मे वरुणेति शुनःशेफो वरुणो गायत्री वरुणावाहने विनियोगः। ॐ इमं मे वरुणः श्रुधीत्यनेन वरुणमावाह्य,—

गङ्गाद्याः सरितः सर्व्वाः समुद्राश्च सरांसि च।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥ १॥

---

१ ख ज्म्भकाय।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति तीर्थान्यावाह्य अश्वस्थान-गजस्थान-वल्मीक-सङ्गम-ह्रद-गोकुल-रथ्यासम्बन्धिनीः सप्तमृदः पृथिवीति मन्त्रेण कलशे निक्षिप्य गङ्गादितीर्थसहिताय वरुणाय नम इति पञ्चोपचारैः सम्पूज्य—

मुरा[१]मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
शुण्ठी-चम्पक-मुस्ता च सर्व्वौषधिः प्रकीर्त्तिता[२] ॥२॥

एवं सर्व्वौषधीः कलशे प्रक्षिप्य,—

[३]देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥३॥
त्वत्तोये सर्व्वतीर्थानि देवाः सर्व्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥४॥
शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वञ्च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवा सपैतृकाः ।
त्वयि तिष्ठन्ति सर्व्वेऽपि यतः कामफलप्रदाः ॥ ५ ॥
त्वत्प्रसादादिमं यज्ञं कर्त्तुमीहे जलोद्भव ।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्व्वदा ॥ ६ ॥

इति कलशं प्रार्थयेत् ।

---

१ ख जटामांसी ।
२ क्वचित् सर्व्वौषधिगणः स्मृतः ।
३ ख पुस्तके देवदानवेत्यादि प्रार्थनामन्त्राः न सन्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ होमप्रयोगः ॥ १६ ॥

कुण्डे स्थण्डिले वा गृह्योक्तरीत्याऽग्निं प्रतिष्ठाप्य—दक्षिणवेद्यां ग्रहाणामावाहनान्तं कृत्वा अन्वाधानं कुर्य्यात्।

वृद्धास्तु— ततः चक्षुषी आज्येनेत्यन्तेन नवग्रहान् अर्कादिजातीयसमिदाहुतिभिस्तिलाज्याहुतिभिश्च एतत्संख्याहुतिभिरधिदेवता प्रत्यधिदेवता विनायकाद्या एतत्संख्याभिः समिदाज्याहुतिभिः शिख्यादिदेवता उदुम्बरसमित्तिलपायसाज्याहुतिभिः प्रत्येकमेतत्संख्याहुतिभिः पञ्चभिर्विल्वफलाहुतिभिः तद्बीजाहुतिभिर्वा रत्नाद्याहुतिभिरेतत्संख्याभिरन्वाधानपूर्व्वकं वह्निहोमं कुर्य्यादित्याहुः।

अन्ये तु— कलशोत्तरतस्तदावाहनान्वाधानपूर्व्वकं तथैव होमं कलशपूजाङ्गं कृत्वाऽग्निसमीपमेत्य गृह्योक्तविधिनाऽऽज्यभागान्तं कृत्वा प्राक्तनहोमं कुर्य्यादिति

अन्ये तु— ग्रहपूजनचिकीर्षायामाश्वलायनशाखीय[१]-यजमानश्चेत् वक्ष्यमाणहोमानुसार्य्यन्वाधानपूर्व्वकं होमं कुर्य्यादित्याहुः।

येन क्रमेणावाहनं कृतं तेनैव क्रमेण देवता उद्दिश्य ब्रह्मणे नमः स्वाहेत्येवंरूपैर्नाममन्त्रैः प्रतिदैवतं यवैः कृष्णतिलैर्व्वा अष्टोत्तरसहस्रं अष्टोत्तरशतमष्टौ वा ब्रह्मणे शतमन्येभ्यो दश दश वा आहुतीर्जुहुयात्।

---

१ ग प्राखी।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मध्वाज्यप्रसिक्ताभिः क्षीरवृक्ष-पलाश-खदिराऽपामार्गो-दुम्बर-कुश-दूर्व्वाणामन्यतमसमिद्भिर्व्वा तावतीराहुती-र्जुहुयात्।

ततो वास्तोष्पते प्रतिजानीहीति वास्तोष्पतिलिङ्गैः पञ्चमन्त्रैः,— वास्तोष्पतये नमः स्वाहेति नाममन्त्रावृत्त्या वा जुहुयात्। वास्तोष्पत इति चतसृणां वशिष्ठो वास्तोष्पते त्रिष्टुपन्त्या गायत्री होमे वास्तोष्पते ध्रुवा-स्थूणामित्येतस्ये-रिरिं विटिर्वास्तोष्पतिर्बृहती।

ततश्चरुकादिभ्यो न्यूनसंख्यया द्रव्यचतुष्टयं जुहुयात्। उक्त पञ्च-वास्तुमन्त्रैः पञ्च विल्वफलानि तद्बीजानि वा जुहुयात् घृताक्तानि। ततः पालाशादीन्धनेन वास्तुपुरुषं पर्य्यग्निं कुर्य्यात्।

ततः प्रायश्चित्तहोमान्तमुत्तरतन्त्रं समाप्याऽग्निमन्त्रेण वरुणमन्त्रेण वा पूर्णा(र्व्वा)हुतिं हुत्वा ब्रह्मादिदेवताभ्यो मात्स्योदाहृत-बलीन् नाममन्त्रैः प्रणवादिनमोऽन्तैर्दद्यात्॥

यद्वा वक्ष्यमाणमन्त्रैस्तल्लिङ्गोक्तान् बलीन् लिङ्गोक्त-देवताभ्यो दद्यात्।

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बलिप्रदानमन्त्राः ।

ते च महाकपिलपञ्चरात्रे—

पायसौदनलाजैश्च युक्तं धूपैः सलूनकैः ।
अक्षताभिश्च संयुक्तं माषभक्तादिमण्डितम् ।
गृहाणेमं बलिं ब्रह्मन् वास्तुदोषं प्रणाशय ॥ ७ ॥
गन्धादि शर्करायुक्तं पायसोपरिसंस्थितम् ।
अर्य्यमाख्य गृहाणेमं सर्व्वदोषं प्रणाशय ॥ ८ ॥
सगुड़ं पायसं नाथ[1] कर्पूराऽगुरुमण्डितम् ।
विवस्वंश्च[2] गृहाणेमं सर्व्वदोषं प्रणाशय ॥ ९ ॥
सगुड़ं पायसं नाथ पुष्पादिषु समन्वितम् ।
गृहाणेमं बलिं हृद्यं[3] मित्र शान्तिं प्रयच्छ मे ॥१०॥
माषौदनं समांसं च गन्धक्षीरादिसंयुतम् ।
गृहाणेमं बलिं हृद्यं मित्र शान्तिं प्रयच्छ मे ॥११॥
क्षीरखण्डसमायुक्तं पुष्पादि च सुशोभितम् ।
गृहाणेमं बलिं हृद्यं सोम शान्तिं प्रयच्छ मे ॥१२॥
दधीदं गुडसंमिश्रं गन्धादिवस्तुमण्डितम् ।
गृहाणेमं बलिं वत्स विघ्नमात्रं प्रणाशय ॥ १३ ॥
पुष्पादि-कुशपानीयं कर्पूरादिसुवासितम् ।
सावित्र वै गृहाणेमं शान्तिमत्र प्रयच्छ मे ॥ १४ ॥
पिष्टकं सगुडं नाथ रक्तगन्धादिशोभितम् ।
गृहाणेमं बलिं सूर्य्य विघ्नं मित्र प्रणाशय ॥ १५ ॥

---

१ ख पुस्तके चन्दनाद्यर्च्चितं नाथ । २ ख विवस्वन् वै ।
३ ख पुस्तके हृद्यमित्यत्र रुद्र इति पाठः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शीतमन्नं तथा पुष्पं कुङ्कुमादि-समन्वितम् ।
गृहाणेमं बलिं हृद्यं शक्रदेव नमोऽस्तु ते ॥ १६ ॥
ओदनं घृतसंयुक्तं वस्त्रगन्धादि-मण्डितम् ।
गृहाणेमं बलिं हृद्यं रुद्रदेव नमोऽस्तु ते ॥ १७ ॥
पक्काऽपक्कमिदं मांसं वस्त्रपुष्पादिसंयुतम् ।
गृहाणेमं बलिं हृद्यं रुद्रदेव नमोऽस्तु ते ॥ १८ ॥

अनयोर्विकल्पः—

हृन्मांसं सघृतं पक्कं गन्धपुष्पादिसंयुतम् ।
गृहाणेमं बलिं हृद्यं जय देव नमोऽस्तु ते ॥ १९ ॥
रक्तपुष्पैः समांसं वै रक्तवस्त्रादिसंयुतम् ।
विदारि वै गृहाणेमं रक्षोविघ्नं प्रणाशय ॥ २० ॥
पीतं रक्तास्थिसंयुक्तं रक्तगन्धादिमण्डितम् ।
गृहाणेमं बलिं पाप रक्षोविघ्नं विनाशय ॥ २१ ॥
सघृतं माषभक्तञ्च वस्त्रगन्धाद्यलङ्कृतम् ।
बलिं गृहाण शर्व्वेमं रक्षोविघ्नं प्रणाशय ॥ २२ ॥
मांसं पुष्पादिसंयुक्तं माषभक्तोपरिस्थितम् ।
गृहाणेमं बलिं स्कन्द रक्षोविघ्नं प्रणाशय ॥ २३ ॥
समांसपिष्टकैर्युक्तं माषभक्तोपरिस्थितम् ।
अर्य्यमन् वै गृहाणेमं रक्षोविघ्नं विनाशय ॥ २४ ॥
रक्तमांसोदनं मत्स्य-गन्धपुष्पसमन्वितम् ।
जृम्भक त्वं गृहाणेमं रक्षोविघ्नं प्रणाशय ॥ २५ ॥
छागवर्णान्वितं मांसं वस्त्रगन्धादिसंयुतम् ।
पिलिपिच्छ गृहाणेमं रक्षोविघ्नं विनाशय ॥ २६ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

घृतेन साधितं मांसं वस्त्रगन्धादिसंयुतम् ।
चरकि त्वं गृहाणेमं रक्षोविघ्नं विनाशय ॥ २७ ॥

सघृतं चाऽक्षतान्नं च वस्त्रगन्धाद्यलङ्कृतम् ।
गृहाणेमं बलिं त्वीश वास्तुदोषापहारकम् ॥ २८ ॥

उत्पलं पायसैर्युक्तं वस्त्रादिकसमन्वितम् ।
गृहाणेमं बलिं हृद्यं मेघराज नमोऽस्तु ते ॥ २९ ॥

पञ्चहस्तं सुपीतञ्च ध्वजं भक्तादिमण्डितम् ।
गृहाणेमं बलिं हृद्यं विष्णुदूत नमोऽस्तु ते ॥ ३० ॥

ओदनं घृतसम्पूर्णं पञ्चरत्नादिमण्डितम् ।
गृहाणेमं बलिं हृद्यं देवराज नमोऽस्तु ते ॥ ३१ ॥

रक्तपुष्पयुतं भक्तं रक्तगन्धादिभिर्युतम् ।
गृहाणेमं बलिं हृद्यं भास्कर त्वं नमोऽस्तु ते ॥३२॥

वितानं धुम्रवर्णाभं गन्धोदकसुशोभितम् ।
रक्तयुक्तं गृहाणेमं बलिं सोम नमोऽस्तु ते ॥ ३३ ॥

इदन्तु मांसभक्तं वै वस्त्रगन्धादिपूजितम् ।
गृहाणेमं मृग बलिं वास्तुदोषं प्रणाशय ॥ ३४ ॥

इदन्तु शार्दूलं मांसं नैवेद्यादिसुसंयुतम् ।
गृहाणेमं बलिं हृद्यं व्योम शान्तिं प्रयच्छ मे ॥ ३५ ॥

सुवर्णपिष्टकं वाऽथ वस्त्रगन्धादिभिर्युतम् ।
घृताऽन्वितं गृहाणेमं सप्तजिह्व नमोऽस्तु ते ॥ ३६ ॥

क्षीरं लाजसमायुक्तं रक्तपुष्पादिमण्डितम् ।
गृहाणेमं बलिं हृद्यं पूषदेव नमोऽस्तु ते ॥ ३७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दधिगन्धादिभिर्युक्तं पीतपुष्पसमन्वितम् ।
बलिं वितथ गृह्णेमं विमिचञ्च प्रणाशय ॥ ३८ ॥
भक्तं मधुस्रुतञ्चैव रक्तवस्त्रादिमण्डितम् ।
गृहाणेमं बलिं हृद्यं यमदेव नमोऽस्तु ते ॥ ३९ ॥
पक्वमांसोदनं नावनीतवस्त्रादिमण्डितम् ।
प्रीतिप्रदं गृहाणेमं गृहक्षत नमोऽस्तु ते ॥ ४० ॥
नानागन्धसमायुक्तं रक्तभूषादिसंयुतम् ।
बलिं गृहाण गन्धर्व्व सर्व्वदोषं प्रणाशय ॥ ४१ ॥
इमान्तु शष्कुलीं जिह्वां माषभक्तोपरिस्थिताम् ।
गृहाणेमं बलिं हृद्यं मृग शान्तिं प्रयच्छ मे ॥ ४२ ॥
एवं घृतं तिलोपेतं गन्धपुष्पादिसंयुतम् ।
गृहाणेमं बलिं हृद्यं मृगदेव नमोऽस्तु ते ॥ ४३ ॥
शर्करासंयुतं शङ्खं वस्त्रगन्धादिमण्डितम् ।
प्रीतो बलिं गृहाणेमं यक्षराज नमोऽस्तु ते ॥ ४४ ॥
चन्दनागुरुकाष्ठञ्च गन्धपुष्पादिभिर्युतम् ।
गृहाणेमं बलिं हृद्यं दौवारिक नमोऽस्तु ते ॥ ४५ ॥
इदन्तु पायसं नाथ गन्धपुष्पादिमण्डितम् ।
सुग्रीवेदं गृहाणेमं बलिं शान्तिं प्रयच्छ मे ॥ ४६ ॥
यवाऽग्राणि च गोदुग्धं भक्तोपरि सुशोभितम् ।
गृहाणेमं बलिं हृद्यं जलराज नमोऽस्तु ते ॥ ४७ ॥
माषभक्तं कुशस्तम्बं घृतगन्धादिसंयुतम् ।
पुष्पदन्त गृहाणेमं सर्व्वदोषं प्रणाशय ॥ ४८ ॥
मधुना साधितं पिष्टं गन्धाद्यैरुपशोभितम् ।
बलिं गृहाणाऽसुरेमं सर्व्वदोषं प्रणाशय ॥ ४९ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

घृतञ्चान्नसमायुक्तं कर्पूरादिसमन्वितम् ।
गृहाणेमं बलिं शेष सर्व्वशान्तिं प्रयच्छ मे ॥ ५० ॥
यवजं तण्डुलं नाथ गन्धपुष्पादिसंयुतम् ।
गृहाणेमं बलिं रोग सर्व्वदोषं प्रणाशय ॥ ५१ ॥
सघृतं मण्डकञ्चेदमन्नाद्यैरुपशोभितम् ।
गृहाणेमं बलिं हृद्यं मृगवाह नमोऽस्तु ते ॥ ५२ ॥
इदन्तु कृसरं चान्नं पुष्पगन्धादिमण्डितम् ।
पातालेश गृहाणेमं विघ्नमाचं प्रणाशय ॥ ५३ ॥
नारिकेलोदकं भक्तं पीतवस्त्रादिसंयुतम् ।
गृहाणेमं बलिं मुख्य वास्तुदोषं प्रणाशय ॥ ५४ ॥
पायसं मधुना मिश्रं नानापुष्पोपशोभितम् ।
गृहाणेमं बलिं सोम सर्व्वदोषं प्रणाशय ॥ ५५ ॥
ओदनं घृतसंमिश्रं गन्धपुष्पसमन्वितम् ।
गृहाणेमं बलिं हृद्यं भल्लाट त्वं नमोऽस्तु ते ॥ ५६ ॥
माषान्नन्तु घृताभ्यक्तं पुष्पगन्धादिमण्डितम् ।
गृहाणेमं बलिं हृद्यं मङ्गलाख्य नमोऽस्तु ते ॥ ५७ ॥
क्षीरं खण्डसमायुक्तं नानापुष्पोपशोभितम् ।
दैत्यमातर्गृहाणेमं सर्व्वदोषं प्रणाशय ॥ ५८ ॥
पोलिकां मधुसंमिश्रां वस्त्रगन्धादिसंयुताम् ।
गृहाणेमं बलिं हृद्यं देवमातर्नमोऽस्तु ते ॥ ५९ ॥
स्वर्ग-पाताल-मर्त्येषु ये देवा वास्तुसम्भवाः ।
गृह्णन्त्विमं बलिं हृद्यं तुष्टा यान्तु स्वमन्दिरम् ॥ ६० ॥
मातरो भूत-वेतालाः ये चान्ये बलिकाङ्क्षिणः ।
विष्णुपारिषदा ये च तेऽपि गृह्णन्त्विमं बलिम् ॥ ६१ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सपित्र-क्षेत्रपालेभ्यो बलिं दद्यात् प्रकामतः ।
अभावादुक्तमार्गस्य कुशपुष्पादिभि[१]र्यजेत् ॥६२॥ इति ।

वृद्धास्तु,—

प्रायश्चित्तहोमान्ते इन्द्रादिदिक्पालेभ्यो ग्रहेभ्यश्च स्वदेयमासभक्तबलिं दत्त्वा नारिकेलादियुक्तं द्वादश-गृहीतं चतुर्गृहीतं वा आज्यमादाय मन्त्रेण पूर्णाहुतिं जुहुयात् । मूर्द्धानं भारद्वाजो वैश्वानरस्त्रिष्टुप् । ततः पूर्णपात्रनिनयनादिशेषं समाप्य मण्डलपश्चिमदेशे शिखिने एष पायसबलिर्नम इत्येवं शिख्यादिभ्यो बलिन्दद्यात् । विप्रे घृतयुक्तपायसेन क्षत्रियादिषु मन्त्रलिङ्गोक्तैः पक्वान्नैस्तदभावे पायसेन । ततश्चरक्यादिभ्यो माषभक्तबलिदानमित्याहुः ।

ततो दिशां बलिरुक्तः प्रयोगसारे,—

[२]वास्तुशेषक्रियाभूतः सर्व्वरक्षाविभूतिकृत् ।
भूतप्रीति-प्रदश्चास्मिन् दिशां बलिरुदीर्य्यते ॥ ६३ ॥
दध्यम्बु-रजनी-पुष्प लाजपुष्पतिलान्धसा ।
पायसेन घृताक्तेन कार्य्योऽसौ समुदीरितः ॥ ६४ ॥

सवाहनायै सपरिवारायै सशक्तिकायै सपार्श्वदायै सपालायै ससर्व्वभूतायै प्राच्यै एष बलिर्नम इत्येवं प्रतिदिशं दानमूह्यम् ।

---

१ क ग जपेत् ।

२ क पुस्तके वास्तुरक्षाक्रियाभूतः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]बलिप्रार्थना—

बलिं गृह्णन्त्विमे देवा आदित्या वसवस्तथा ।
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ ९५ ॥
असुरा यातुधानाश्च पिशाचा डाकिनीगणाः ।
शाकिन्यो यक्षवेताला ये च विघ्नविनायकाः ॥९६ ॥
जगतां शान्तिकर्त्तारो ब्राह्म्याद्याश्चैव मातरः ।
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः ॥ ९७ ॥
भूतानि यानीह वसन्ति तानि
बलिं गृहीत्वा विधिवत्प्रयुक्तम् ।
अन्यत्र वासं कुरुत प्रयान्तु
क्षमध्वमद्यात्र नमोऽस्तु तेभ्यः ॥ ९८ ॥

ततः पूर्व्वस्थापित-कलशद्वयोदकेनर्त्विगाचार्य्यौ बह्वृच यजमानस्य समुद्रज्येष्ठेत्यादिभिस्तैत्तिरीयस्य तु पञ्चब्रह्म-मन्त्रैः सुरास्त्वित्यादिभिश्चाभिषेकं कृत्वा सर्व्वौषधिभिरनु-लिप्य स्नापयेयुः ।

ततो रक्तमण्डलमध्यस्थित-ब्रह्मपादतले भूषितसुरूप-स्त्रीरूपां पृथ्वीं ध्यात्वा, ॐ धरायै नम इति मन्त्रेण पूजयेत् ।

सर्व्वदेवमयो वास्तुर्वास्तुदेवमयं पुरम् ।

इति गृहादि संस्कार्य्यम् ।

प्रागादितस्त्रिसूत्र्या पवमानेन रक्षोघ्नेन च सूक्तेन शनैर्वेष्टयेत् यथा सूत्रच्छेदो न भवति। ततो दुग्धपूर्णाभ्यां

---

१ ख ग पुस्तकद्वये बलिप्रार्थनामन्त्रा न सन्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्वस्तनकुम्भाभ्यां तेनैव सूक्तद्वयेन प्रागादितोऽविच्छिन्न-धाराद्वयं कुर्य्यात्।

अथ यजमानो गृहादेराग्नेये जानुदघ्ने अवटं खात्वा गोमयेनोपलिप्य श्वेतचन्दनाक्षतपुष्पैरलङ्कृत्य व्रीह्यादि-सप्तबीजयुक्तं दध्योदनं तत्र प्रक्षिप्य श्वेतगन्धाद्यर्चितं जलपूर्णकुम्भं हस्तद्वयेनादाय जानुभ्यामवनिं गत्वा नमो वरुणायेति जलेनाऽवटं पूरयेत्। तत्र प्रदक्षिणे जलावर्त्ते पुष्पस्योर्द्धमुखत्वे शुभं विपरीते त्वशुभम्।

ततो मृत्पेटिकायां सप्तबीजं शैवालफलपुष्पयुतं दध्योदनं प्रक्षिप्य तुर्य्यमङ्गलघोषानीतां पूर्व्वार्च्चितां सौवर्णीं वास्तु-प्रतिमां तत्र निधाय पञ्चोपचारैः सम्पूज्य श्लोकाभ्यां प्रार्थयेत्।

पूजितोऽसि मया वास्तो होमाद्यैरर्च्चनैः शुभैः।
प्रसीद पाहि विश्वेश देहि मे गृहजं सुखम् ॥ ६९ ॥
वास्तुदेव नमस्तेऽस्तु भूशय्याभिरत प्रभो!।
मद्गृहं धनधान्यादिसमृद्धं कुरु सर्व्वदा ॥ ७० ॥

ततो मृत्पेटिकयैवाऽऽच्छाद्य शनैस्तस्मिन्नवटे तन्मृदोऽनेन मन्त्रेण क्षिपेत्।

सशैलसागरां पृथ्वीं यथा वहसि मूर्द्धनि।
तथा मां वह कल्याणि सम्पत्सन्ततिभिः सह ॥७१॥
इति।

तथैव तन्मृदा गर्त्तपूरणे मृदाधिक्ये शुभं, साम्ये मध्यमं, न्यूनत्वे त्वधमं फलम्। ततो गर्त्तोपरिभुवमुपलिप्य श्वेतगन्धादिभिर्भूषयेत्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततो यजमानोऽग्नेः पश्चिमत उपविश्य आचार्य्यं सम्पूज्य सवत्सामलङ्कृतां गां वस्त्रयुग्मञ्च दद्यात्। ऋत्विग्भ्यो यथाशक्ति दक्षिणां दत्त्वा स्थापितदेवताः सम्पूज्य विसृज्या-चार्य्याय निवेद्याऽग्निं सम्पूज्य गच्छ गच्छेति विसृज्य, शान्तिपाठं कारयित्वा स्थापितदेवताप्रीत्यर्थं प्रतिदैवतं त्रींस्त्रीनेकैकं वा ब्राह्मणान् भोजयित्वा भूयसीं दक्षिणां दत्त्वाऽऽशिषो गृहीत्वा परमेश्वरार्पणं कुर्य्यात्।

इति वास्तुशान्तिः।

गृहप्रवेशाऽङ्गत्वेन तां विधाय परमेप्सितमित्थं कुर्य्यात्। फलपल्लवदूर्व्वादियुतं वस्त्रेण वेष्टितं सुधालिप्तपूर्णपात्रं जलपूर्णं नवकलसमञ्जलिनाऽऽदाय सकुटुम्बः स्वस्त्ययन-सूक्ते ब्राह्मणैः पठ्यमाने कुलदेवतास्मरणपूर्व्वकं तुर्य्यघोषेण गृहं प्रविश्य मुख्यगृहमध्ये धान्ये कलसं संस्थाप्य ब्राह्मणान् सम्पूज्य पुण्याहादि वाचयित्वा भोजयित्वाऽऽशिषो गृहीत्वा सुहृद्युतो भुञ्जीततेति गृहप्रवेशविधिः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथाश्वलायनोक्तशान्तिः ॥ २० ॥

तत्शाखिनां पूर्व्वोक्तया एषा च समुच्चीयते। अशक्तानान्तु एषैव कार्य्या।

बह्वल्पं वा स्वगृह्योक्तं यस्य यत् कर्म्म चोदितम्।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतो भवेत् ॥१॥

इति शास्त्रात्[१]।

तत्रैष क्रमः।

सर्व्वत उच्छ्रितां मध्यतो निम्नां ईषत् च प्राक्प्रवणां भूमिं कृत्वा गृहान् कुर्य्यात्। तत्र प्राच्यां दिशि गृहिणः शयनीयगृहं कुर्य्यात्। तस्योत्तरतो महानसम्। तदुत्तरतो जलमार्गं तथा कुर्य्यात् यथा आपः सर्व्वाभ्यो दिग्भ्यो आगत्य मध्यं प्राप्य प्रदक्षिणं शयनीयं परीत्य प्राङ्मुखा भवेयुः।

एवं गृहं निर्म्माय बीजसंयुक्तं ब्राह्मणैः सतुर्य्यघोषं सुमुहूर्त्ते प्रविश्य शुचौ देशे सभार्य्यः शुचिर्देशकालौ संकीर्त्यास्मिन् गृहे निर्व्विघ्नचिरकालवाससिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गृह्योक्तवास्तुशान्तिं करिष्य इति संकल्प्य गणेशपूजादिनान्दीश्राद्धान्तं कृत्वा गृह्याग्निसत्त्वे तमेव प्रज्ज्वाल्य विच्छिन्नाग्निः प्रायश्चित्तहोमद्रव्यदानपूर्व्वकं पुनः सन्धानेन तं सम्पाद्य सर्व्वाधानी तु केवलं पुनः सन्धानेनैव तमुत्पाद्य शुचौ देशे शुद्धाश्चतस्रः शिलाः संस्थाप्य तासु दूर्व्वा निधाय तत्र मृद्भाण्डं मणिकाख्यं स्थापयेत्।

---

१ ग शास्त्रार्थत्वात्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पृथिव्या अधिसम्भवेति। अरङ्गवो वावदीति। त्रेधा बद्धो वरत्रया। इहामुह प्रशंसति। अनिरामपबाधता-मिति वा।

ततस्तत्र भाण्डे अप आसेचयेत्।

[1]एतु राजा वरुणो रेवतीभि-
रस्मिन् स्थाने तिष्ठतु मोदमानः।
इरां वहन्तो घृतमुक्षमाणां
मित्रेण साकं सह संविशन्तु॥ २॥

इति मणिकात् पात्रान्तरे अप आदाय तासु व्रीहियवान् हिरण्यञ्चावदध्यात्।

गन्धदूर्व्वाशमीशाखामुडुम्बरशाखाफलञ्च प्रक्षिपेत्। इत्यन्ये।

ततः शन्नो इन्द्राग्नीति सूक्तं गृहप्रागदेशे उपविश्य पठेत्। अस्य सूक्तस्य वशिष्ठऋषिः विश्वेदेवा देवतास्त्रिष्टुप् छन्दो व्रजने विनियोगः। पञ्चदशर्चैः पठित्वा व्रजनारम्भं कुर्य्यात्। प्रादक्षिण्येन व्रजन् गृहं प्रोक्षयेत्। एवं सूक्तस्य व्रजन-प्रोक्षणयोश्च त्रिरावृत्तिः।

ततः प्रागदेशे उपविश्य आपो हिष्टेति ऋचं पठेत्। अस्याम्बरीषः सिन्धुद्वीप आपो गायत्री व्रजने विनियोगः। तृचान्ते व्रजनमारभ्य तथैव व्रजन्नविच्छिन्नां धारां ताभि-रेवाद्भिः कुर्य्यात्। तृचस्य धारा-व्रजयोश्चावृत्तिः।

वृत्तिभाष्यादि सकलगृह्यग्रन्थविरुद्धसूक्ततृचयोः प्रोक्षण-धाराङ्गत्वं सकृत्पाठञ्च वदद्भ्यो नमो मान्येभ्यः।

---

१ क्वचित् येतु।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततो मध्येऽगारं गृह्याग्निं प्रतिष्ठाप्य अन्वाधानं कुर्य्यात्। चक्षुषी आज्येन वास्तोस्पतिञ्चतुर्व्वारं चरुणा शेषेत्यादि काले वास्तोस्पतिमुद्दिश्य षोडश कृत्वा तुष्णीं निरूप्य तथैव प्रोक्ष्य आज्यभागान्तेऽवदानविधिनाऽवदाय चतुष्कृत्वो जुहुयात्। वास्तोस्पत इति चतसृणां वशिष्ठो वास्तोस्पतिः, त्रिष्टुप् अन्त्या गायत्री वास्तुशान्तिप्रधान-चरुहोमे विनियोगः।

ॐ वास्तोस्पते प्रतिजानीहि इत्यादि चतुष्पदे स्वाहा।

ॐ वास्तोस्पते प्रतरणो इत्यादि स्वः स्वाहा।

ॐ वास्तोस्पते शग्मया इत्यादि एधि स्वाहा।

ॐ अमी वहा वास्तोस्पतेः...एधि नः स्वाहा।

सर्व्वत्र वास्तोस्पतये इदं नमः॥

स्विष्टकृदादिहोमशेषं समाप्य गृहसिद्धान्नेन शतं तदर्द्धं दश त्रीन् वा ब्राह्मणान् भोजयेत्। दक्षिणादानादिना सुपूजितांश्च वाचयेत् शिवं वास्तु शिवं वास्त्विति। अथ भुक्तवतो द्विजान् वाचयेत्। ते च तद्वाक्यं तथैवोचुः सुपूजिताः। शास्त्रान्तरेण संस्कृत्य विशीर्णं यो गृहं वसेत्। शिवं वास्त्विति तस्य स्यात्। बीजस्थापनपूर्व्वक-मिति कारिकोक्तेः तथैव जयन्तोक्तेश्च।

इत्याश्वलायनगृह्योक्तवास्तुशान्तिः॥ २०॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ कात्यायनोक्तं शालाकर्म्म ॥ २१ ॥

तत्रोदगयनशुक्लपक्षयोर्ज्योतिर्विदुक्ते पुण्याहे गोभिलगृह्योक्ते विप्रस्य गौरपांशौ क्षत्रिय यस्य लोहितपांशावित्याद्युक्तलक्षणे देशे कारितशालायां बलकामस्य प्राग्द्वारायां पुत्र-पशुकामस्य उदग्द्वारायां सर्व्वकामस्य दक्षिणद्वारायां न प्रत्यग्द्वारायामित्याद्युक्तलक्षणायां गणेशपूजाभ्युदयिकान्तं कृत्वा [१]भूशालाऽऽग्नेयादिकोणे स्तम्भावटेषु अच्युताय भौमाय स्वाहेति मन्त्रावृत्त्या चतस्रः संस्कृताऽऽज्याहुतीर्जुहुयात् इदमच्युताय भौमायेति त्यागः।

अवटेषु तुष्णीं शिलाः स्थापयित्वा इमामुच्छ्रयामीत्यादि श्रेयोवसान इत्यन्तस्य मन्त्रस्यावृत्त्या होमक्रमेण चतुःस्तम्भानुच्छ्रयति। स्तम्भशालायामनेनैव मन्त्रेण स्तम्भस्थाने शिलान्यासः।

अर्द्धनिष्पन्नशालाभ्यन्तरे पञ्चभूसंस्कारपूर्व्वकमावसथ्यमग्निमुपसमाधाय ब्रह्माणमुपवेश्य उत्तरत उदगन्तं प्रतिष्ठाप्य प्रणीतादिचरुश्रपणान्तं कृत्वा प्रोक्षण्युत्पवनान्ते वहिर्निष्क्रम्य गृहाभिमुखं द्वारसमीपे स्थित्वा ब्रह्मन् प्रविशामीति ब्रह्माणमामन्त्र्य तेन प्रविशस्वेत्यनुज्ञातः शालां प्रविशेत् 'ऋतं प्रपद्ये शिवं प्रपद्ये' इति मन्त्रेण।

अथ स्वासने उपविश्याज्यं संस्कृत्य उपयमनकुशादानसमिदाधानपर्य्युक्षणानि कृत्वा इहरति उपसृजमिति आज्याहुतीर्हुत्वा पराश्चतस्रः आज्याहुतीर्जुहुयात् वास्तो-

---

१ ख घ पुस्तकद्वये स्तम्भशाला।

स्पत इति पूर्व्वोक्तैः चतुर्भिर्मन्त्रैः, इदमग्नय इत्याघारा-हुतयोस्त्यागः इदं वास्तोस्पतये इति चतसृषु।

ततः आघाराज्यभागौ हुत्वा चरुणा षडाहुतीर्जुहुयात्। ॐ अग्निमिदं वाजिनः स्वाहा इदमग्नये। इन्द्राय। बृहस्पतये। विश्वेभ्यो देवेभ्यः। स्वरस्वत्यै आज्येनैव सर्प-देवजनाय वाजिनः स्वाहा इदं सर्पजनेभ्यो हिमवते सुदर्शनाय वसुभ्यो रुद्रेभ्यो आदित्येभ्य ईशानाय जयदेभ्यश्च पूर्व्वाह्ण वाजिनः स्वाहा। इदं पूर्व्वाह्णायाऽपराह्णाय मध्यन्दिनाय प्रदोषायाऽर्द्धराचाय पुष्ट्यै[1]देव्यै महापन्थायै च कर्त्तारं च वाजिनः स्वाहा, इदं कर्त्रे विकर्त्रे विश्वकर्म्मण ओषधिभ्यो वनस्पतिभ्यश्च धातारं च वाजिनः। इदं धात्रे विधीनां पतये च स्योनं देवता स्वाहा। इदं ब्रह्म-प्रजापतिभ्यां सर्व्वाभ्यश्च देवताभ्यः। ततश्चरुणा स्विष्ट-कृतं हुत्वा संस्रवप्राशनान्ते ब्रह्मणे दक्षिणादानम्।

अथ कांस्यपात्रे क्षीराणि औडुम्बरपत्राणि दूर्व्वा-गोमय-मधु-दधि-घृत-कुश-यवान्निक्षिप्य गन्धाद्यासनानि देवतास्थानानि च प्रोक्ष्येति चितयैः सम्भारैरथ पूर्व्वकुड्य-मभिमृशेत् श्रीश्च त्वा यशश्चेति। येनामिति दक्षिणम्। [2]यशश्चत्वेति पश्चिमम्। अन्नं च त्वेति उत्तरमूर्त्तत्वेति।

अथ गृहान्निष्क्रम्य चतस्रो दिश उपतिष्ठेत्।

केता सुकेतावेति प्राचीं, गोपायमानं अर्चेति दक्षिणां, दिविश्च जागृविश्चेति[3] पश्चिमम्,—

---

१ ख घ पुस्तकद्वये व्युष्टारै। २ क पुस्तके यज्ञश्चत्वेति।
३ ख जागृविश्चेति।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अस्वप्नश्चेत्युत्तरां सर्व्वेषां क्रमेण पुरस्तात् गोपायेतां दक्षिणतो गोपायेतां उत्तरतो गोपायेतामित्यन्ताः ।

ततो निष्पन्नां शालां मातृपूजाभ्युदयिकं कृत्वा मङ्गल-तूर्य्यादिसहितः शान्तिपाठेन सजलकुम्भब्राह्मणपुरःसरः स्त्रीपुत्रादिभिः सह शुक्लमाल्यादिधरः पुण्यदिने [१]प्रविशेत्। धर्म्मस्थूणेत्यादिना सर्व्वत इत्यन्तेन। सद्यः प्रवेशे मातृ-पूजादेर्नावृत्तिः। ततो ब्राह्मणभोजनम् ।

अथ मणिकावधानम् ।

मातृपूजा-श्राद्धे विधाय शालाग्नौ ऐशान्यां देवस्य त्वेत्यादिना यूपस्यादानपरिलेखनपूर्व्वकमणिकं पर्य्याप्त-मवटं खात्वा प्राचः पांशुनाऽपोह्य प्रागग्रान् कुशानास्तीर्य्य यवान् रिच्छफलानि कुङ्कुमगन्धपुष्पाक्षतफलानि चोप्यावटे मणिकमवदधाति समुद्रोऽसि इत्यादिना शम्भुरित्यन्तेन। तस्मिन् अप आसिञ्चति आपो रेवतीत्यादिना वन्धोधा इत्यनेन आपो हिष्ठेति तिसृभिः पुनः सकृदासिञ्चति ।

ततो ब्राह्मणभोजनशालाकर्म्मदिन एव एतदनुष्ठाने मातृपूजादेर्नावृत्तिः। इति कात्यायनोक्तं वास्तुकर्म्मोक्तम्॥

वाजवाहदुर-चन्द्रभूपतेः
कौस्तुभे नृपतिधर्म्मगोचरे ।
वास्तुकर्म्मविधिरित्यनेकधा
शून्यरूपि समभवत् सताम्मुदे ॥ ३ ॥

---

१ ख पुस्तके प्रवेशयेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# तडागादिप्रतिष्ठा ॥ २२ ॥

अथ पूर्व्वदीधितिनिर्द्दिष्टक्रमेण प्रतिष्ठा उच्यन्ते ।
तत्र प्रथमतः शौनकोक्तस्तडागादिप्रतिष्ठाप्रयोगः ।
तत्र पूर्व्वदिने ।

सौवर्णौ कूर्म्म-मकरौ राजतौ मत्स्य-दुन्दुभौ ।
ताम्रौ कुलीर-मण्डुकावायसं शिशुमारकम् ।
वासो नवं घटं सक्तून् लाजा दधि पयो घृतम् ॥१॥

उपकल्प्य मण्डपवास्तुपूजा-ग्रहयज्ञग्रहणपक्षे तत्तदुपयोगिसामग्रीमप्युपकल्प्य कृतनित्यक्रियः पवित्रपाणिः सभार्य्यः प्राणानायम्य देशकालौ संकीर्त्त्य च करिष्यमाण— तडागप्रतिष्ठाङ्गत्वेनाद्योपोषणं करिष्य इति सङ्कल्पं कुर्य्यात् । एवं कूपप्रतिष्ठाङ्गत्वेन आरामप्रतिष्ठाङ्गत्वेन चेति तत्तद्विषये सङ्कल्प ऊह्यः । द्वयोर्ब्बहूनां वा प्रतिष्ठायां युगपच्चिकीर्षायां कूपारामप्रतिष्ठाङ्गत्वेन वापीकूपाराम-प्रतिष्ठाङ्गत्वेन वेति सङ्कल्पः ।

ततः परेद्युः सपत्नीको वस्त्राभरणगन्धमाल्याद्यलङ्कृतो देशकालौ संकीर्त्त्य स्वकृततडागस्य सर्व्वलोकभोगार्हत्व-सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं शौनकोक्तविधिना प्रतिष्ठां करिष्य इति सङ्कल्पयेत् । कूपस्य आरामस्य कूपारामयो-रिति वा सङ्कल्प ऊह्यः ।

तदङ्गत्वेन गणपतिपूजनं मातृकापूजनं नान्दीश्राद्धं स्वस्तिवाचनमाचार्य्यवरणञ्च करिष्य इति सङ्कल्पयेत्—

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

क्रमेणैतानि कृत्वा गन्धाद्यलङ्कृतमृद्कुम्भं पुरस्कृत्य सपत्नीकः सबान्धवः स्वस्तिनो मिमीतामिति वेदघोषेण भेर्य्यादिनिनादेन च तडागदेशं गत्वा तं प्रदक्षिणीकृत्य पश्चिमद्वारेण मण्डपं प्रविशेत्। तदभावे तडागादिपश्चिमतटे प्राच्यैशान्युदीच्यन्यतरदिक्प्रवणां मार्ज्जनोपलेपन-वितानबन्धन-कदलीस्तम्भाम्रपल्लवाद्यलङ्कृतां भुवं प्रविशेत्।

तत्राचार्य्यः—यदत्र संस्थितमिति सर्षपान् विकीर्य्य शुचीव इति पञ्चगव्येन भुवं प्रोक्ष्याऽऽपोहिष्ठेति त्र्यृचेनाद्भिः प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति प्रार्थ्य संस्कृतभुवो मध्ये कुण्डं स्थण्डिलं वा हस्तमात्रं कृत्वा तत्पूर्व्वभागे हस्तोच्छ्रायां चतुरस्रां कूर्म्मपृष्ठोन्नतां वेदिकां कृत्वा मण्डपपक्षेऽग्निमीळे इत्यादितोरणाभिमन्त्रणपूर्व्वकं पर्जन्यादिदेवतापूजनप्रभृति-प्रागादिशाखामूलेषु कुम्भस्थापनान्तं कुर्य्यात्।

ततो वास्तुपूजनपक्षे चेत् उपर्य्यैशानमण्डले वास्तुदेवतामावाह्य पूजयेत्। वास्तुमण्डलं षन्नवत्यधिक शतसंख्यपदकं कार्य्यमुदाहृतवास्तुशास्त्रात्।

केचित्तु—तडागादौ सैकविंशं शतपदं, कूपेषु चतुश्चत्वारिंच्छतपदमित्याहुः।

ततः कुण्डस्य स्थण्डिलस्य वा पश्चिमत उपविशेत्। मण्डपाद्यभावपक्षे प्रार्थनानन्तरमेव उपविश्य मण्डूकादीनामग्न्युत्तारणं कृत्वा तेषावाहनादिपूजां मण्डूकादिदेवताभ्यो नम इति कुर्य्यात्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्थण्डिलोपलेपनादिपूर्व्वकमग्निं प्रतिष्ठाप्य चत्वारि शृङ्गेत्यादिध्यानान्ते 'ग्रहयज्ञपक्षे वेद्या उत्तरतो वेद्यां ग्रहाणामावाहनादिपूजनान्तं कृत्वा' तदैशान्यां कलस-स्थापनादि वरुणपूजान्तं कृत्वा अग्नेः पश्चिमत उपविश्य समिद्द्वयमादायान्वाधानं[१] कुर्य्यात् । चक्षुषी— आज्ये-नेत्यन्तेन ।

अत्र प्रधानं वास्तुयज्ञः । ग्रहयज्ञपक्षे तद्दैवतान्वाधान-पूर्व्वकं तदभावे वक्ष्यमाणदेवतान्वाधानमेव कुर्य्यात् । आपः[२] पञ्चविंशतिवारमाज्येन आपोऽर्णववारं[३] सक्तुभिः वरुणं द्वात्रिंशत्वारमाज्येन वरुणमष्टवारं चरुणा शेषेण स्विष्टिकृतमित्यादि, पात्रासादने चरुस्थाल्या सह सक्तु-लाजस्थाल्योरप्यासादनम् ।

प्रणीताप्रणयनान्ते अग्नेरीशानदेशे मही द्यौरिति भूमिं स्पृष्ट्वा ॐ ओषधयः शम्, इति धान्यं प्रक्षिप्य तत्र प्रागग्रान् कुशान् निधाय कलसम् "इमं मे गङ्गे" इति गङ्गादिमहानदीजलेनापूर्य्य "युवं वस्त्राणीति वासो वेष्टितं गन्धद्वारामिति गन्धपुष्पार्च्चितञ्च कृत्वा पञ्चपल्लव-दूर्व्वा-यव-पञ्चरत्न-हिरण्यफलानि" अश्वत्थेव इत्यादि तत्तन्मन्त्रैः प्रक्षिप्य मण्डूकादीनि रूपाणि तुष्णीं प्रक्षिपेत् ।

ततः पूर्णा दर्व्वीति पूर्णपात्रेण पिहितानन्तरं "कलस-माकलसेषु धावति" इति मन्त्रेण तेषु कुशेषु निधाय तस्मिन् कलसे निहितप्रतिमायां वरुणं सम्पूज्य कलसस्य

---

[१] ख आधानं । [२] ख अपः ।

[३] ख पुस्तके आपो नववारम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुखे विष्णुरित्यभिमन्त्र्य-देवदानवसंवाद इति प्रार्थ्य-पविचान्तर्हिते शूर्पे तुष्णीं द्वात्रिंशत्वारं निरूप्य तावद्वारं प्रोक्ष्य पयसि श्रपयेत् ।

ततः पयोदधिनालोडितशक्तुना एकस्यां स्थाल्यामन्यस्थाल्यां आज्यमिश्रितलाजांश्च प्रक्षिप्य आज्यनिर्व्वापादिकाले आज्येन सह चरुसक्तुलाजानां पर्य्यग्निकरणं, सम्मार्गान्ते शक्तून् लाजांश्च अग्नावधिश्रित्य अभिघारणादि बर्हिरासादनं, आज्यं दक्षिणतः आन्तरमुदकसंस्थं कृत्वा चरुमभिघार्य्यान्तर्बर्हिषि सादयेत् ।

तत आज्यभागान्ते कृते प्रधानाहुतीर्जुहुयात् । यदि वास्तुपूजा कृता ग्रहयज्ञश्च तदा तद्धोमान्ते जुहुयात् ।

आपो हिष्ठेति नवानामम्बरीषः सिन्धुद्वीप ऋषि आपो देवता गायत्रीछन्दः पञ्चमी वर्द्धमाना, सप्तमी प्रतिष्ठा, अन्त्ये द्वे अनुष्टुभौ, तडागप्रतिष्ठाप्रधानाज्यहोमे विनियोगः । एवं कूपादावूह्यम् ।

आपो हिष्ठेत्यादि चक्षुषे स्वाहा १ योव इत्यादि मातरः स्वाहा २ तस्मा इत्यादि जिह्नत स्वाहा ३ शन्नो देवीति दधातनः स्वाहा ४ ईशानेत्यादि स्वाहा ५ अप्सु मेत्यादि स्वाहा ६ आपः पुनन्तु ७ इदमापः ८ आपो अघा इति[१] स्वाहा ९ ।

आपोऽस्मानिति पञ्चानां देवश्रवा ऋषिः, आपो देवता, आद्यास्तिस्त्रस्त्रिष्टुभ अन्त्येऽनुष्टुभौ । तडाग इत्यादि ।

---

१ ख ह्वयाः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आपोऽस्मान् १ [1]द्रप्सश्च स्कन्द २ यस्ते द्रप्स स्कन्द ३ यस्ते द्रप्सः ४ पयस्वति ५ ।

समुद्रादूर्म्मीति एकादशर्चस्य सूक्तस्य वामदेव ऋषिः आपो देवता, त्रिष्टुप् छन्दः, अन्त्या जगती, तडाग-प्रतिष्ठापने विनियोगः।

समुद्रादूर्म्मी १ वयं नाम २ चत्वारि शृङ्गाणि ३ त्रिधा हितं ४ एता अर्षति[2] ५ सम्यक् [3]श्रवन्ति ६ सिन्धो-रिव ७ अभिप्रवन्त ८ कन्या इव ९ अभ्यर्षत १० धामन्ते विश्वं ११ ॥

ततो दर्व्व्यामाज्येनोपस्तीर्य्य सक्तुभ्यो द्विरवदाय हवि-रभिघार्य्य अवटमभिघारयेत्।

एवं पुनः पुनरवदाय नवाहुतीर्जुहुयात्। प्रसुव इति नवर्चस्य सूक्तस्य सिन्धुद्वीप[4] ऋषिः, आपो देवताः, जगती छन्दः, तडागप्रतिष्ठाप्रधानसक्तुहोमे विनियोगः। प्रसुवः १ प्रतेरदद्वरुणो २ दिवि स्वनो ३ अभि त्वा सिन्धो ४ इमं मे गङ्गे ५ तृष्टामया ६ ऋजीसेनीरुशती ७ स्वश्वासिन्धुः ८ सुखं रथं ९ ।

ततो दक्षिणेन तडागं सयजमान आचार्य्यो लाजा-नादाय प्राग्भागे गत्वा तत्रोपविश्य भुवं प्रक्षाल्य तस्यां हस्तेनादाय लाजानां नवाहुतीर्जुहुयात्।

अम्ब योयन्तीति नवानां मेधातिथिर्ऋषिः आपो देवता

---

१ ख द्रप्सश्च। २ अर्षन्ति।
३ ग सवन्ति। ४ ख सिन्धुच्छिप्रः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आद्यास्तिस्रो गायत्र्यः, चतुर्थी पुरोष्णिक् पञ्चमी अनुष्टुप् षष्ठी प्रतिष्ठा अन्त्यास्तिस्रोऽनुष्टुभः, तडागचतुर्दिक्षु लाज-होमे विनियोगः ।

अम्ब योयन्त्यध्वभिः १ अमूर्या उप २ आपोदेवीरुप ३ अप्स्वंतरं ४ अप्सु मे सोमः ५ आपः पृणीत ६ इदमापः ७ आपो अद्या ८ संमाग्नेर्व्वर्चसा ९ । एवं उत्तर-पश्चिम-दक्षिणदिक्षु नव लाजाहुतीर्जुहुयात् । क्रमेणोक्तेषु आज्य-सक्तु-लाजहोमेषु सर्व्वत्र अब्भ्य इदं न ममेति त्यागः ।

अथाग्नेः पश्चिमतः उपविश्य त्रिंशदाज्याहुतीर्जुहुयात् ।

नहि त इति त्रिंशत्संख्यस्य शुनःशेफ ऋषिः, वरुणो देवता आद्या दश त्रिष्टुभः, विंशतिर्गायत्र्यः तडागप्रतिष्ठा-प्रधानहोमे इत्यादि ।

नहि ते क्षत्रं १ अबुध्ने राजा २ उरुं हि राजा ३ शतं ते राजन् ४ अमी य ऋक्षाः ५ तत्त्वायामि ६ तदिन्नक्तं ७ शुनःशेफः ८ अवते हेलो ९ उदुत्तमं १० अच्चिद्धिते ११ मानो वधाय १२ विमृलीकाय १३ पराहि मे १४ कदा क्षत्रश्रियं १५ तदित् समान १६ वेदा योविनां १७ वेदमायोधृतव्रतः १८ वेदवातस्य वर्त्तनी १९ निषसाद २० अतो विश्वामि २१ सनो विश्वाहा २२ बिभ्रद्रापिं २३ नयं [1]दिशन्ति २४ उत यो मानु २५ परा मे यन्ति २६ सन्तु वचावहै २७ दर्शं नु विश्व २८ इमं मे वरुण २९ त्वं विश्वस्य ३० । सर्व्वत्र वरुणायेदम् ।

---

१ ख दिप्सन्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततश्चरौरवदानसम्पदा अष्टावाहुतीर्जुहुयात्। प्रसम्राज इत्यष्टर्चस्य सूक्तस्य अत्रिः ऋषिर्वरुणो देवता त्रिष्टुप्छन्दः तडागप्रतिष्ठाप्रधानहोमे विनियोग इत्यादि।

प्रसम्राजे बृहदर्चा १ वनेषु व्यं २ निचीनवारं ३ उनत्ति भूमिं ४ इमामुष्मा ५ इमामुनु ६ अर्य्यम्यं वरुण ७ कितवासो ८ सर्व्वत्र वरुणायेदम्।

ततो दर्व्वीमुपस्तीर्य्य स्रुवेणाज्यमादाय सक्तु-लाज-चरूणामुत्तरार्द्धात् सकृदवदाय द्विरभिघार्य्य स्विष्टकृदादि प्रायश्चित्तहोमान्ते कृते ग्रहमखादिसत्त्वे माषभक्तबलि-दानादि पूर्णाहुत्यन्तं कुर्य्यात्। ततः [1]प्रणीतानिनयन संस्राजप-विसर्ज्जनपरिसमूहनादि।

ततः स्थापितकलसोदकैकदेशेनाचार्य्यो दूर्व्वापल्लवैरुद-ङ्मुखस्तिष्ठन् बान्धवैश्च प्राङ्मुखस्य यजमानस्याऽभिषेकं कुर्य्यात् समुद्रज्येष्ठेत्यादिभिरभिषेकमन्त्रैः। पत्नी वामत उपविशेत्।

ततो धृतश्वेतवस्त्राणां सर्व्वेषां श्वेतचन्दनपुष्पमालाभि-राचार्य्योऽर्च्चनं कुर्य्यात्। ततः सयजमाना बान्धवाः तडागं प्रदक्षिणीकृत्याऽग्नेः परित आज्यधारां कुर्व्वन्तोऽग्निं प्रदक्षिणीकुर्य्युः। मानस्तोकेति विभूतिधारणं कुर्य्युः।

ततः स्थापितकुम्भात् कूर्म्मादिरूपाण्युद्धृत्य तडागमध्ये साचार्य्यो यजमानः कुम्भं निदध्यात्। तथा कूपादावपि।

---

१ प्रणीतानि संस्राप्य परिस्तरण।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततोऽस्मै तडागाय स्वस्ति भवन्तो ब्रुवन्त्विति ब्राह्मणान् वाचयेत्। ते चास्मै तडागाय स्वस्तीति वदेयुः।

ततः पश्चिमतीर एव सर्व्वतीरेषु वा शतं यथाशक्ति वा ब्राह्मणान् भोजयित्वा यथाशक्ति तेभ्यो दक्षिणाञ्च दत्त्वा उभयमपि सङ्कल्प्य आवाहितब्रह्मादीनामन्येषां ग्रहादीनाञ्चोत्तरपूजनपूर्व्वकं विसृष्टानामाचार्य्याय निवेदनं कृत्वा जलमध्येन पश्चिमतीरमारभ्य ऐशानदिक्पर्य्यन्तं पुच्छाग्रेणारब्धो गां नयेत्।

इमां धियमित्यस्य नाभाकृत्स[1] ऋषिर्वरुणो देवता त्रिष्टुप्छन्दः इमां धियं शिक्षमाणस्येति अवतीर्य्यमाणामनुमन्त्रयते।

इदं सलिलं पवित्रं कुरुष्व
शुद्धा पूता अमृताः सन्तु नित्यम्।
मां तारयन्ती कुरु तीर्थाभिषिक्तं
लोकाल्लोकं तरते तीर्य्यते च ॥ ३ ॥ इति

आपोऽस्मान् मातर इत्युत्तीर्य्य हृयवशात् भगवती हि भूया इति गामैशान्यान्दिशि स्थापयेत्। यदि गौर्हिं कुर्य्यात्तदा हिं कृण्वति वसुमती इत्यनुमन्त्रयेत्।

ततो वस्त्रवेष्टितकण्ठां हैमशृङ्गीं रौप्यक्षुरां ताम्रपृष्ठां कांस्यदोहां वृषप्रजां तां गामाचार्य्याय दद्यात्।

यज्ञसाधनभूता या विश्वस्याऽघप्रणाशनी।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥ ४ ॥ इति

---

१ ख नाभाख्य ऋषिः।

यदि गोरुत्तारणकाले च्छन्दोगद्वारा स्रवाख्य-सामगानं कार्य्यते तदा सामगायैतत् गोदानं तदा आचार्य्यायाऽन्या पयस्विनी देया ।

ततो यजमानः सकुशतिलोदकमञ्जलावादायोत्सर्गं कुर्य्यात् । एतत् तडागस्थितं जलं काश्यपगोत्रोऽमुष्य प्रपौत्रोऽमुष्य पौत्रोऽमुष्य पुत्त्रोऽसावहं परमेश्वरप्रीतिकामो नानाभूतेभ्यः साधारणमुत्सृजामि । देवपितृमनुष्याः प्रीयन्तामिति । आचार्य्योऽपि देवपितृमनुष्याः प्रीयन्तामिति वदेत् ।

ततो यजमानः—

सर्व्वसत्त्वेभ्य उत्सृष्टं मयैतत् जलमूर्ज्जितम् ।
सेवन्तां सर्व्वभूतानि दानपानाऽवगाहनैः ॥ ५ ॥
सामान्यं सर्व्वसत्त्वेभ्यो मया दत्तमिदं जलम् ।
धर्म्मार्थकाममोक्षेषु साधनं स्यादहर्निशम् ॥ ६ ॥ इति

ततो जलान्तिकदेशादग्नेः पश्चिमदेशमागत्य तत्रोपविश्य रजतरूपामन्यां वा भूयसीं दक्षिणां ब्राह्मणेभ्यो दत्त्वा शिल्पिनः सम्पूज्य विष्णुं स्मृत्वा भगवदर्पणं कुर्य्यात् ।

इति शौनकोक्ततडागादिप्रतिष्ठाविधिः ॥ २२ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# विशेषविधिः ॥ २३ ॥

वापी-कूपयोर्गोरुत्तरणं न कार्य्यमिति केचित्। तत्रापि त्रिः परितो गोर्भ्रामणं कार्य्यमिति मदनरत्ने। द्वयोर्ब्बहूनां वा युगपद् प्रतिष्ठाचिकीर्षायामपि तावत् सन्निहितोचित-होमदेशसत्त्व-भेदेन[१] घटस्थापन-लाजहोमश्च अन्यचरुहोम तन्त्रेण भ्रामणपूर्व्वकं साधारणैशानदेशे दानसम्भवे गौरेकैव तथा सम्भवति चेत् भेदेन गोर्भ्रामणदाने कार्य्ये।

एवं वाप्याश्च कूपस्य सरितश्च वनस्पतेः।

इति शौनकोक्तेः कृत्रिमसरित आरामस्य चैवमेव प्रतिष्ठा कार्य्या। सरिति तडागवत् सम्भवात् गोरुत्तरणं नित्यमारामे तु विशेषः। वास्तुपूजनपक्षे वास्तुशास्त्रोक्तं षन्नवत्यभिमण्डलं कार्य्यम्।

केचित्तु—

सप्तधा भाजिते क्षेत्रे कोणभागेऽर्द्धकोष्ठके।
त्रिपदास्तु मरीच्याद्या ब्रह्मा नवपदो मतः ॥ १ ॥
विदिक्ष्वर्द्धपदाश्चाष्टावन्ये तु पदिकाः स्मृताः।
उद्यानारामवृक्षाणां वास्तुरुक्तः प्रशान्तये ॥ २ ॥

इत्येतत् मण्डलमिच्छन्ति।

अग्निस्थापनात् पूर्व्वमाचार्य्यो वृक्षसमीपे गत्वा वृक्षान् सर्व्वौषधियुक्तकलसोदकेन संस्नाप्य पिष्टेनाघ्राव्य पताका-

१ क होमदेश-सम्भेदन।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुष्पमालारक्तसूत्रवेष्टनैरलंकृत्य "त्वं च सोमनोवश" इति मन्त्रेण आवाहनादिषोडशोपचारैः सम्पूजयेत् । गुग्गुल-धूपन्दद्यात् ।

ततो मध्यस्थितवृक्षस्य परित अष्टौ कलसान् स्थापयेत् तेषु वरुणकलसस्थापनान्ते अग्निस्थापनादि कुर्य्यात् । अन्वाधाने वरुणं चरुणा इत्यनन्तरं वनस्पतिचरुपलाश-समिदाज्य-यव-कृष्णतिलानां प्रत्येकमष्टोत्तरसंख्याभि-राहुतिभिः शेषेणेत्यादि पूर्व्ववत् ।

कलसस्थापनकाले मण्डूकादिरूपाणां स्थाने सौवर्ण-राजतानां सप्तानामष्टानां वा फलानां वा कलसप्रक्षेपः । तत्समीपे सुवर्णसूचीशलाका-क्षुरमौञ्जमेखला-वासांसि स्थापयेत् ।

निर्व्वापकाले च तुष्णीं निर्व्वापादिसंस्कारपूर्व्वकं वारुणपायसेन सह चरुपलाश-समिदाज्य-यव-तिलानां पर्य्यग्निकरणं कृत्वा आज्यसंस्कारादि हविरासादनान्ते होमकाले वारुणहोमानन्तरमुक्तमन्त्रेण पञ्चद्रव्यैः पञ्चा-ऽष्टोत्तरसंख्यहोमः कार्य्यः । तडागपदस्थाने आराम-पदप्रयोगः ।

होमशेषं समाप्य मध्यस्थस्य वृक्षस्याऽष्टभिः पूर्व्वस्थापित-कलसैरभिषेकः । तैश्च स्वगृह्योक्तविधिना जातकर्म्मादयः संस्काराः कार्य्याः । सुवर्णसूच्या कर्णवेधः सुवर्णशलाकया मधुघृताभ्यामञ्जनम् सुवर्णक्षुरेण चूड़ाकर्म्ममौञ्जिमेखला-वासश्च परिधापयेत् । मालत्या माधव्या वा सह विवाहः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततो गृहा वै प्रतिष्ठेत्यन्ते सुप्रतिष्ठा वृक्षा भवन्त्वीति ब्राह्मणा वदेयुः। ततो यजमानाभिषेकादि-विभूति-धारणान्तं पूर्व्ववत्। ततः कुम्भात् फलान्युद्धृत्य मध्यवृक्षाल-वालजले निधानम्, एतेभ्यो वृक्षेभ्यः स्वस्ति भवन्तो ब्रुवन्त्विति वाचनं ब्राह्मणभोजनादिफलानां ग्रहादिप्रतिमानां चाऽऽचार्य्याय निवेदनान्तं कृत्वा गोर्वृक्षमध्ये नयनादि ततस्तन्मध्य एव दानं चोदङ्मुखायाः गोः कार्य्यम्।

नयनमन्त्रो मदनरत्ने,—

इदं वनं पवित्रं कुरुष्व शुद्ध।
एनं पूतममृतमस्तु नित्यम् ॥ ३ ॥

मामित्यादिपूर्व्ववत्। एवं वृक्षे इमं वृक्षमिति। ततो यजमान उक्तमन्त्रेण पुष्पाञ्जलिं समर्प्य मुख्यवृक्षं प्रार्थयेत्।

ये शाखिनः शिखरिणां शिरसो विभूत्यै
ये नन्दनादिषु वनेषु सुप्रतिष्ठाः।
ये कामदाः सुरनरोरगकिन्नराणां
ते मे नतस्य दुरितार्त्तिहरा भवन्तु ॥ ४ ॥ इति।

अथ पुत्रप्रार्थनार्थं श्लोकान्तरं पठेत्—

एतैर्द्विजैर्हि विधिवच्च हुतो हुताशः
पश्यत्ययं शिशिरदीधितिरम्बरस्थः।
त्वं वृक्ष पुत्रपरिकल्पनया वृतोऽसि
कार्य्यं सदैव भवता मम पुत्रकार्य्यम् ॥५॥ इति।

ब्राह्मणो यजमानः अङ्गादङ्गात् संभवसीत्यपि पठेत्। तत उत्सर्गः।

इमान् वृक्षान् काश्यपगोत्र इत्यादि पूर्व्ववत्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मन्त्रः—

सर्व्वसत्त्वेभ्य उत्सृष्टं मयैतद्वनमूर्ज्जितम्।
सेवन्तां सर्व्वभूतानि च्छायास्थानफलादिभिः ॥६॥
सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं वनम्।
धर्म्मार्थकाममोक्षेषु साधनं स्यादहर्निशम् ॥ ७ ॥

इत्यूहः। अन्यत् समानं। यद्यपि मदनरत्ने वारुण-होमस्थाने वानस्पत्यो होम इत्युक्तं तथापि वाप्यादिभिः सह वने शौनकेन प्रधानहोमस्यातिदेशकथनात्,

मत्स्यपुराणे—

वनस्पतेश्च विद्वद्भिर्होमः कार्य्यो द्विजातिभिः ॥ ८ ॥

इति चकारेण पूर्व्वप्राप्तहोमेन समुच्चयप्रतीतेर्वारुण-जलस्यालवालेषु सत्त्वाच्च वारुण-वानस्पत्यहोमयोः समुच्चय इहोक्त इति बोद्धव्यम्।

आरामे वृक्षविशेषकृतप्रशंसाञ्च पौराणीं स्मरन्ति,—

अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दश तिन्तिड़िञ्च।
कपित्थविल्वामलकत्रयञ्च
पञ्चाम्रवापी नरकं न पश्येत् ॥ ९ ॥ इति।

इति वापीकूपसरिदारामप्रतिष्ठागतविशेषविधिः ॥ २३ ॥

वाजवाहदुरचन्द्रनिर्म्मिते
कौस्तुभे नृपतिधर्म्मगोचरे।
शौनकोक्तविधिनेयमीरिता
मज्जलाशयतरूत्सृजेः कृतिः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ मत्स्यपुराणोक्तजलाशयाद्युत्सर्ग-प्रयोगः ॥ २४ ॥

अमुष्य जलाशयस्योत्तरायणे इतरस्य तु बहुजलसत्त्व-समये ज्योतिर्विदादिष्टशुभदिने उत्सर्गं कर्त्तुं सम्पादित-पूर्व्वदीधित्युक्त षोडशहस्तमण्डपादिसकलसाधनोऽधिकारी अधिवासनदिनात् पूर्व्वदिने संयतः कृतैकभक्तोऽधिवास-दिनप्रभृति यावत्समाप्तिं सऋत्विक् तथाभूत एव भवेत्।

तद्दिने प्रातः कृतनित्यक्रियः श्वेताम्बरमाल्यानुलेपन-धरः स्वाचान्तो जलाशयपश्चिमदेशे गोमयेनोपलिप्ते कुशासनान्तर्हितशुभपीठे प्राङ्मुख उपविश्य हेमरजतकुश-पवित्रान्वितदक्षिणहस्तो वामहस्तधृतबहुकुशो दक्षिण-देशस्थितपत्नीसहितः प्राणानायम्य देशकालौ संकीर्त्त्य सकुशयवतिलानादाय श्रीपरमेश्वरप्रीतिकामोऽहं जला-शयोत्सर्गं करिष्ये इति संकल्प्य यथाचारं तदुभयं विसर्ज-नान्तं कृत्वा वारुणीं दीक्षां कुर्य्यात्।

दम्पत्योरुत्तरीयान्ते सफलग्रन्थिबन्धनं कृत्वा देवस्य त्वेत्यादिमन्त्रैस्तावदभिषिच्य— "यदाबध्नं दाक्षायणं हिरण्यम्" इति यजमानकरे कुङ्कुमाक्तसूत्रबन्धनं कृत्वा स्वस्तिन इति तिलकं कृत्वा दधिक्राव्ण इति दधिचन्दन-तिलकं कारयित्वा काण्डात् काण्डादिति दूर्व्वाभिर्मार्जनं कार्य्यम्। अक्षन्नमीमदन्तेत्यक्षतचन्दनं कल्पयित्वा यज-मानहस्तेऽक्षतदानम्।

करोतु स्वस्ति ते ब्रह्मा स्वयं चाऽपि द्विजातयः।
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्व्वदा ॥१॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः।
तुभ्यं राजर्षयः सर्व्वे स्वस्ति कुर्व्वन्तु नित्यशः ॥२॥
स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च।
स्वस्त्यस्त्वपादकेभ्यश्च नित्यं तव महामखे ॥३॥ इति।

ततो गुरुर्वदेत्। त्वं दीक्षितोऽसि नियमेन स्थातव्यमिति। ततो व्रतेन दीक्षामिति पाठः। ग्रहपूजां वारुणीदीक्षाञ्च केचिन्नेच्छन्ति।

ततो देशकालौ स्मृत्वा करिष्यमाणजलाशयोत्सर्गाङ्गत्वेन गणपतिसहितगौर्य्यादिषोडश-ब्राह्म्यादिसप्तमातृकापूजनमाभ्युदयिकश्राद्धञ्च करिष्य इति सङ्कल्प्य—

ॐ भूर्भुवः स्वर्गणपते इहागच्छ इह तिष्ठेत्येवं सर्व्वा उक्तदेवता आवाह्य सर्व्वा अप्यावाहितदेवताः षोडशोपचारैः पदार्थानुसमयेन ॐ गणपतये नमः, ॐ गौर्य्यै नम इत्येवं नामरूपैर्म्मन्त्रैः पूजयेत्।

यद्वा गणपतये गौर्य्यादिषोडशमातृभ्यो ब्राह्म्यादिसप्तमातृभ्यश्च नम इति समुदितपूजां कृत्वा तत्सम्पूर्णतां वाचयित्वा विसर्ज्जनान्तं कृत्वा वाजसनेयिनि यजमाने मातृणामुपरिस्थित्यादौ वसोः पवित्रमसीति मन्त्रेण घृतं त्रिधारं पञ्चधारं सप्तधारं वा कुर्य्यात्।

ततो वसोर्धारादेवताभ्यो नम इति ताः पूजयेत्। आयुष्यं मन्त्रशान्तिं मन्त्रजपं कारयेत्। तत आभ्युदयिकश्राद्धं सपिण्डमपिण्डं वा स्वगृह्योक्तविधिना कार्य्यम्। ततः स्वाचान्तो बह्वृचगृह्यपरिशिष्टोक्त-पुण्याहवाचनं कुर्य्यात्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वाजसनेयिप्रभृतिस्तु यजमानः त्रीनधिकान् वा ब्राह्मणान् उदङ्मुखानुपवेश्य छन्दनादिभिस्तोषयित्वा गन्धादिभिस्तोषितमेकं विप्रं वाचनार्थं विनियुञ्जीत स्वर्चितं पूर्णकलसमादाय यजमानेनान्वारब्धं वाचयेत् ।

ब्राह्मणा अस्य यजमानस्य गेहे जलाशयोत्सर्गकर्म्मणः ॐ पुण्याहं भवन्तो ब्रुवन्त्वीति त्रिर्ब्रुयात् । ते च ॐ पुण्याहमिति त्रिर्ब्रुयुः स्वयमेव वाचयेत् वा । तदा मम गृह इत्येव पाठः । पुनर्ब्राह्मणा इत्यादि ॐ स्वस्ति भवन्तो ब्रुवन्त्वीति त्रिः । पुनर्ब्राह्मणा इत्यादि, ॐ ऋद्धतामिति त्रिः । तमित्थं ब्राह्मणाः ।

यजमाने क्षत्रिये तु वाचनप्रतिवचनवाक्येषु सोङ्कारः पाठः । वैश्ये निरोङ्कारार्युपांशुस्वराणि च भवेयुः, शूद्रे निरोङ्कारं स्वस्तिमात्रवाचनं नेतरे ।

ततो जलाशयसमीपे पश्चिमदेशे भुवं मार्ज्जनादिना प्रपूज्य ताम्रपात्रे गन्धदूर्व्वाफलपुष्पयवयुतं जलमादाय उदङ्मुखः कृताञ्जलिरर्घ्यं दद्यात् ।

आगच्छ सर्व्वकल्याणि वसुधे लोकधारिणि ।
उद्धृताऽसि वराहेण सशैलवनकानना ॥ ४ ॥
मण्डपं कारयाम्यद्य त्वद्गूर्द्ध्वे शुभलक्षणम् ।
गृहाणाऽर्घ्यं मया दत्तं प्रसन्ना वरदा भव ॥ ५ ॥

इति बद्धाञ्जलिः स्योना पृथिवी भवेति प्रार्थयेत् ।

ततस्तत्र सम्बत्सरकृत्यदीधित्युक्तविधिना षोडशहस्तं चतुर्द्वारं मण्डपं कृत्वा तत् क्षेत्रं तृतीय-भागाधिक-पञ्च-हस्तप्रमाणतया समपरिमाणं नवकोष्ठात्मकं विभज्य

मध्यमकोष्ठकोणचतुष्टयनिखाताऽष्टहस्त-चतुस्तम्भान्तर-मण्डपमध्ये चतुरस्रां चतुर्हस्तां हस्तमात्रोच्छ्रितां इष्टकादिभिर्वेदिं विरच्य दिक्चतुष्टये मुखाकृतिं कुर्य्यात् इति केचित्।

अन्ये तु पद्माकृतिका वेदिः कार्य्या—

तडागादिप्रतिष्ठायां पद्मिनी पद्मसन्निभा ॥ ६ ॥

इति सिद्धान्तशेखरोक्तेरित्याहुः।

वेद्याः परितश्च त्रयोदशाऽङ्गुलानि कण्ठे मेखलायोग्य-देशं चातिक्रम्य गर्त्ताः प्रत्येकमेकविंशत्यङ्गुलायामविस्ताराः कार्य्याः। ते च यथासम्भवं नव पञ्च वा तेषु च कुण्डानि कार्य्याणि। नवकुण्डपक्षे प्रतिवेदं द्वन्द्वे सप्तपक्षे ऋग्यजुर्वेदिनो द्वे द्वे अपरयोरेकैकं पञ्चपक्षे प्रतिवेदमेकैकम्। सर्व्वत्राचार्य्यस्यैकमेव। तानि त्रिमेखलान्येव। मेखलाश्च त्र्यङ्गुलोच्चा एव। तद्विस्तारस्तु कुण्डचतुर्विंशांशरूपाङ्गुलैर्द्वि-त्रि-चतुःसंख्यैः। तेषु योनिश्च षडङ्गुलविस्तृता सप्ताङ्गुलविस्तृता वा वितस्तिमात्रा वा।

मण्डपद्वारेभ्यश्च बहिर्हस्तमात्रे प्राच्यादिषु क्रमेणाश्वत्थोडुम्बरप्लक्षवटशाखाभिः सप्तहस्तोच्चाभिस्तोरणानि कार्य्याणि।

अन्ये विशेषाः सम्बत्सरदीधित्युक्तरीत्या बोध्याः। कुण्डकरणाशक्तौ अरत्निमात्राणि स्थण्डिलानि कार्य्याणि। एवमाचार्य्यस्य कुण्डं स्थण्डिलं वा कार्य्यम्।

मण्डपोपरि दिक्षु लोकपालवर्णाः पताका-ध्वजा कार्य्याः। प्राच्यां पीता, आग्नेय्यां रक्ता, दक्षिणस्यां कृष्णा, नैर्ऋत्यां नीला, प्रतीच्यां श्वेता, वायव्यां धूम्रा, उत्तरतो हरिता,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऐशान्यां चित्रा, नैर्ऋतिवरुणमध्ये श्वेता, इन्द्रेशानमध्ये रक्ता। एवं ध्वजाः सर्व्वेषां यजमानहस्तेन दशहस्ताः पञ्चहस्ता वेणुदण्डाः पञ्चहस्ता सप्तहस्ता वा। वस्त्रदैर्घ्य-वितस्तिहस्तो वा विस्तारः।

मण्डपमध्ये चतुर्द्दशहस्तो दण्डो दशहस्तदण्डो वा दशहस्तदीर्घविस्तृतः त्रिहस्तविस्तृतो वा पञ्चवर्णो श्वेत-चामरकिङ्किणीकायुतो महाध्वजः स्थाप्यो वेद्युपरि वेदि-प्रमाणं फलपुष्पोपशोभितं पञ्चवर्ण-वितानं कार्य्यम्।

ऋत्विजश्चाचार्य्येण सह प्रतिवेदं षड्षडिति पञ्च-विंशतिर्वा। प्रतिवेदं चत्वारश्चत्वार आचार्य्यश्चेति सप्तदश वा। प्रतिवेदं त्रयस्त्रय आचार्य्यश्च त्रयोदश वा। एका-ग्निपक्षमवलम्ब्याचार्य्य एक एव वा।

तथा तद्गृह्योक्तपाकयज्ञतन्त्रोपयोगिप्रोक्षणीप्रणीतापात्र-प्रभृतीनि यज्ञोपकरणानि व्यजनमग्नीन्धनार्थं हविर्धारणार्थं ताम्रपात्रं कुशासनसहिते आसने होमकर्त्तुपवेशनार्थं एक कुण्डे एकर्त्विक्पक्षे ताम्रपात्रमेकमासनं चैकं त्रयः कलशाः पञ्चपल्लवाद्युपस्कारयुताः एको वा। वारुण-होमार्थमौडुम्बर्य्योऽष्टोत्तरशतं प्रादेशमात्रः समिधो ग्रह-होमार्थं तादृश्य एवार्कादिजातीयाः प्रतिग्रहमष्टाविंशतिः अधिदेवताद्यङ्गदेवताहोमार्थं प्रत्येकमष्टसंख्याः तादृश्यः पालाश्यः।

एतद्देवताक होमपर्य्यन्तमाज्यञ्चेति सामग्री प्रतिकुण्डं सम्पाद्या ग्रहपूजार्थं तत्तच्छुतिवस्त्रगन्धाक्षतपुष्पधूपदीपाः नानाभक्ष्या नैवेद्यार्थं गुडोदन-घृत-पायस-समसुवान्न-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्षीरोदन-दध्योदन-घृतोदन-कृसर-छागमांसोदन-चित्रोदन-पायसानि ग्रहबल्यर्थानि पायसमधिदेवताबल्यर्थं सर्व्वार्थं पायसमेव वा। दिक्पालादिबल्यर्थं माषभक्तञ्च।

भूतिमिच्छतो यजमानस्य तदरत्निचयमितं तत्प्रमाणं वा वर्णक्रमेण कदम्बाश्वत्थ-पलाश-विकङ्कतमयं त्रयाणां प्रशस्तम्। क्षीरवृक्षमयं शूद्रस्य सारदारुमयं वाष्टास्त्रिमुपरि वर्त्तुलमृजु सचरवालं यूपं।

सम्परेतायां यथाशक्ति हेमनिर्म्मितपात्र्यां हैमो कुर्म्ममकरौ राजतौ मत्स्यदुन्दुभौ। ताम्रकुलिरमण्डुकौ आयसं शिशुमारं स्थापयेत्।

तारणार्थां गां हेमशृङ्गीं रौप्यक्षुरीं ताम्रपृष्ठीं मुक्तालाङ्गुलां कांस्यदोहां घंटाचामरादियुक्ताञ्च। दक्षिणार्थाश्च शतमष्टषष्टिं पञ्चाशत् षट्त्रिंशत् पञ्चविंशतिं वा शक्त्यनुसारेण।

तथा—प्रत्यृत्विजं द्विगुणानि हेमकुण्डलकेयूरकटकाऽङ्गुरीयकपवित्राणि सवस्त्राणि। अशक्तावेकगुणान्येव वा।

एक ऋत्विग्देशा द्विगुणमाचार्य्याय कुण्डलादौ प्रकृति हेम्नो द्विगुण गुरुतत्वेन द्वैगुण्यं गोषु संख्यया।

यजुर्व्वेदि—ब्रह्मदक्षिणार्थं षट्पञ्चाशदधिकशतद्वयमुष्टिपरिमितं तण्डुलपूर्णपात्रम्।

यावता बहुभोक्तुर्हि तृप्तिः पूर्णेन जायते।
नावधार्य्यमतः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥७॥

इति छन्दोगपरिशिष्टोक्तं वा शक्तौ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यच्चान्यत् यजमानस्य दातुमिष्टं तदुपकल्पयेत्। एवमुपकल्प्य मण्डपाद्बहिः पश्चिमदेशे गोमयेनोपलिप्ते शुद्धासने प्राङ्मुख उपविश्याचमनादि कृत्वाऽऽचार्य्यर्त्विग्वरणं तेषां मधुपर्केणार्हणां च करिष्ये इति संकल्प्य विद्याचारसम्पन्नं आचार्य्यत्वयोग्यं विप्रमुदङ्मुखमुपवेश्य तद्योग्यं कुण्डलादि तस्मा उपनीत तडागोत्सर्गेणाहं यक्ष्ये।

तत्र त्वमाचार्य्यो भव इति पादौ स्पृशन् प्रार्थयेत्। भवानिति परेणोक्ते तत् प्रवरानुचितै तद्गोत्रमेतद्वेदान्तर्गतैं तच्छाखाध्यायिनमेतत्कर्म्माणं त्वामेतत् प्रवरान्वितैः तद्गोत्रोत्पन्नैः तत्कर्म्माहमेतैश्चन्दनाक्षत-पुष्प-वस्त्रालङ्कारैः तस्मिन् जलाशयोत्सर्गे आचार्य्यत्वेन वृणे।

आचार्य्यस्तु यथा स्वर्गे स्मृतोऽस्मीति परः।

क्षत्रियादिकर्त्तृके वरणे शर्म्मेत्यक्षरस्थाने वर्म्मेति गुप्तेति दासेति क्रमेणोहः।

एवमृग्वेदिनौ द्वावुदङ्मुखावुपवेश्य तद्योग्यं कुण्डलादि ताभ्यामुपनीय तत्र युवां पूर्व्वकुण्डे होतारावृत्विजौ भवतामिति प्रार्थिताभ्यां भवाव इत्युक्ते एतत् प्रवरेत्यादिपूर्व्वकं पूर्व्वकुण्डे होतृत्वेन त्वां वृणे।

ऋग्वेदः पद्मपत्राक्षो गायत्र्यः सोमदैवतः।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्[1] कर्म्म मखे भव ॥८॥

इति प्रत्येकं प्रार्थयेत्। वृतोऽस्मीति तौ,

---

१ ख ऋत्विक् त्वं मे।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवं दक्षिणकुण्डे यजुर्व्वेदिनो वरणं—

काताराख्यो यजुर्व्वेदः त्रिष्टुभो विष्णुदैवतः ।
काश्यपेयस्तु विप्रेन्द्रः ऋत्विक्कर्म्मे मखे भव ॥९॥

इति प्रार्थने विशेषः ।

पश्चिमे सामवेदिनः—

सामवेदस्तु पिङ्गाख्यो जागतः सर्व्वदैवतः ।
भारद्वाजस्तु विप्रेन्द्रः ऋत्विक् त्वं मे मखे भव ॥१०॥

इत्यादि विशेषः ।

उत्तरकुण्डे अथर्व्ववेदिनो—

बृहन्नेत्रोऽथर्व्ववेदोऽनुष्टुभो रुद्रदैवतः ।
वैशम्पायन विप्रेन्द्र इत्यादि ॥ ११ ॥

तत एकैक वेदविदौ द्वौ द्वौ पूर्व्वदिशि द्वारपालत्वेन त्वां वृणे इत्येवमष्टौ द्वारपालान् वृणुयात् ।

एवमाचार्य्येण सह पञ्चविंशतिवरणं अनयैव दिशा सप्तदशपक्षे त्रयोदशपक्षे च वरणं बोध्यम् । एकाचार्य्यपक्षे नर्त्विग्वरणम् ।

तत्र ऋत्विग्शाखीय गृह्योक्तविधिना सर्व्वेषां मधुपर्कः । यजमानः शाखावशेनैवं मधुपर्कदानप्रतिग्रहान् इति जयन्तः ।

अथ यजमानः यथोक्तप्रकारेण मण्डपं प्रविश्य वास्तु-पूजनं मण्डपपूजनं कुर्य्यात् ।

ततः गुरुर्व्वेद्यां पश्चिमतः उपविश्य मङ्गलवाद्य-वेद-घोषैः सह वारुणमण्डलं विलिखेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्प्रकारो यथा—

मध्ये त्रिदण्डसूत्रेण सुधादिना विलिप्तेन यथोक्तप्रकारेण त्रिहस्तं चतुरस्रं साधयित्वा प्रागपर दक्षिणोत्तर नव नव रेखाभिः चातुःषष्टिपदं त्रिहस्तं मण्डपं कुर्य्यात्। पदानि प्रत्येकं नव नवाङ्गुलानि सम्पाद्य ततो वहिरन्त्यपंक्तिषु चतुर्दिक्षुवपार्श्वयोः कोष्ठानां द्वयं त्यक्त्वा मध्यमकोष्ठानि चत्वारि मार्ज्जयित्वा तदुपर्य्युपान्त्यपंक्तिषु चतुर्दिक्षुवपार्श्वयोः कोष्ठानां त्रयं त्यक्त्वा प्रतिदिशं मध्ये कोष्ठद्वयं मार्ज्जयेत्। तेन चतुर्दिक्षु षट् षट् पदानि चत्वारि द्वाराणि भवन्ति।

ततो मध्यस्थित-कोष्ठषोडशके मध्यानि चत्वारि कोष्ठान्यवशेष्य परितः पंक्तिचतुष्टयं स्थितानि द्वादशकोष्ठानि मार्ज्जयेत्। ततो बाह्यकोणचतुष्टये एकैकं कोणकोष्ठं विहाय कोणकोष्ठद्वारपीठान्तरापवर्त्तीन्यवशिष्टानि पञ्च पञ्च पदानि मार्ज्जयेत्। तेन चतुरस्रपीठस्य पदाः स्युः।

ततः पीठ नाभिस्थानधृतैककोटिना त्रयोदशाङ्गुलिमितेन पूर्व्वोक्तसाधनेन तदन्तश्चतुर्विंशत्यङ्गुलविस्तृतं वृत्तं सम्पाद्य पुनस्तथैव चतुरङ्गुलेन सूत्रादिना तदन्तरष्टाङ्गुलवृत्तं संपाद्य तदन्तर्द्व्यङ्गुलं सूत्रादिना चतुरङ्गुलमध्यवृत्तं संपादयेत्।

ततश्चतुरङ्गुलं कर्णिकात्मकं मध्यवृत्तं पीतेन रजसा पूरयित्वा कर्णिकावधिरेखां सितेन रजसा निर्माय तद्बहिरष्टाङ्गुलात्मके वृत्ते पीतरक्तसितरजोभिः सम्पादितमूलमध्याग्राणि षोडशकेशराणि संपादयेत्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततश्चतुर्विंशत्यङ्गुलात्मके तद्बहिर्वृत्ते सितरजसा अष्ट-दिङ्मुखाग्राणि अष्टौ पत्राणि लोहितरजो रञ्जिताग्राणि कल्पयेत् । ततो दलान्तराणि कृष्णेन रजसा पूरयेत् ।

ततोऽष्टदल-पद्मावधिरेखां सितेन रजसा विधाय तद्बहि-रेकाङ्गुलान्तरां वहिर्वृत्तरेखां सितेनैव रजसा विधाय दलान्तराणि संपाद्य वृत्तद्वयान्तरं परितोऽष्टदलाग्रचिह्नैः षोडशांशान् विभज्य प्रतिभागं यवाकारान् षोडशारान् श्यामपीतारुणरजोभिः कल्पयित्वा तदन्तर्यथाशोभं रजोभिः पूरयेत् ।

तद्बहिः सित-पीताऽरुण-श्याम-हरिताः पञ्च रेखा वृत्ताकारा लिखेत् ।

द्वारक्षेत्राणि पूर्व्वादितः पीत-श्याम-श्वेतरजोभिः पूरयेत् । आग्नेयादिकोष्ठचतुष्टयं लोहित-हरित-श्याम-धवलरजोभिः पूरयेत् । आग्नेयादिपीठे पादचतुष्टयं क्रमेण सितरक्त-पीत-कृष्णरजोभिः पूरयेत् । ततः सितेन रजसा-ऽङ्गुलोन्नतेन वहिश्चतुरस्ररेखां कुर्य्यात् इति मदन-रत्नोक्तप्रकारः ।

वृद्धास्तु प्रकारान्तरमाहुः—

वेदप्रमाणकं वेद्यां रजोभिः पञ्चवर्णकैः ।
मण्डपं वर्त्तयेत् प्राज्ञो न न्यूनं नाधिकं क्वचित् ॥ १२ ॥
शालिचूर्णोद्भवं श्वेतं कौसुम्भं लोहितं भवेत् ।
पीतं निशोद्भवं[1] ज्ञेयं कृष्णं वै हेमभस्मजम् ॥ १३ ॥

---

१ ख ग पुस्तकद्वये निशाभवम् ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हरितं विल्वपत्रोत्थं मण्डपार्थं रजः स्मृतम् ।
प्रधानं ह्यासनं त्वेतत् मानं सूत्रेण सूत्रयेत् ॥ १४ ॥
पूर्व्वं प्रसारयेत् सूत्रमृजु शुद्धं यथा भवेत् ।
[1]संबुध्य ऋजु तत् सूत्रमङ्कयेत् विन्दुना ततः ॥ १५ ॥
याम्ये चाप्यङ्कयेद्देवं कौवेरं संप्रसारयेत् ।
कोणेभ्यो मीयते भूमौ दत्तविन्दुचतुष्टयात् ॥ १६ ॥
सर्व्वतः समतां बुद्धा पांशुसूत्रं निपातयेत् ।
चतुर्द्दिक्षु प्रसार्य्यैवं सूत्रमास्फाल्य तत्समम् ॥ १७ ॥
अष्टौ भागान् प्रकुर्व्वीत मण्डले तु कनीयसि ।
सूत्रार्द्धेन भजेत्तावत्तस्यार्द्धेन पुनस्ततः ॥ १८ ॥
तस्याप्यर्द्धेन संभज्य सर्व्वान् विन्दुभिरङ्कयेत् ।
अङ्केभ्यः समतां ज्ञात्वा पांशुसूत्रं प्रसारयेत् ॥ १९ ॥
एवं विभज्य तत् सूत्रमुभाभ्यामष्टधा समम् ।
तस्मिन् द्वारादिसिद्ध्यर्थं कोष्ठानि च विलोपयेत् ॥ २० ॥
पङ्क्तिष्वन्त्यासु चत्वारि द्वितीयासु द्वयं द्वयम् ।
मध्यवर्त्तीनि कोष्ठानि लोपनीयानि देशिकैः ॥ २१ ॥
कोणजातानि कोष्ठानि कपोलार्थं[2] न लोपयेत् ।
गात्रार्थञ्च विलोप्यानि पञ्च पञ्च तदन्तिके ॥ २२ ॥
अतः षोडशकानीह कोष्ठकानि सितानि वै ।
तेषां चत्वारि मध्यानि त्यक्त्वा शेषाणि लोपयेत् ॥२३॥
तद्विलोपाद्भवेत् पीठं चतुरस्रं समन्ततः ।
मानसूत्रमथादाय देशिकः कठिनीं तथा ॥ २४ ॥

---

१ क संबुध्वा ।  २ क कपोलार्द्धेन ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एकतः सूत्रमारोप्य मध्ये सव्येन पाणिना ।
अङ्गुलानि बहिः[१] पञ्च त्यक्त्वा पीठे समन्ततः ॥ २५ ॥
भ्रामयेदपसव्येन सूत्रकं खण्डिकाचितम्[२] ।
मण्डलं जायते तस्मात् पीठेऽस्मिन् सर्व्वतः समम् ॥२६॥
चतुरस्रे चतुःकोष्ठे पद्मक्षेत्रे तथा पुनः ।
चतुरष्टाङ्गुलं मध्ये कुर्य्याद्वै मण्डलद्वयम् ॥ २७ ॥
अङ्गुलानि चतुर्विंशाद्बहिस्तस्यापि मण्डलम् ।
ततः षोडशभिर्भागैः पद्मक्षेत्रं विभाजयेत् ॥ २८ ॥
दिग्विदिग्भ्योऽग्रतस्तस्मिन् कूपात्[३] सूत्रेण देशिकः ।
एवं सकलमास्तृत्य[४] मण्डलं वेदिमध्यगम् ॥ २९ ॥
रजःपातं ततः कुर्य्यादपसव्यकरेण तु ।
प्रथमं कर्णिकाबिम्बं सितेन रजसा लिखेत् ॥ ३० ॥
पश्चात् सम्पूर्णपीतेन पाणिना दक्षिणेन तु ।
शुक्ललोहितपीतेन केसराणि द्वितीयके ॥ ३१ ॥
दलसन्धिगता रेखा शुक्लाङ्गुलसमुन्नताः[५] ।
दलान्याछाद्य शुक्ले तु दद्यादग्रेषु पाटलम् ॥ ३२ ॥
दलान्तरालं कृष्णेन रजसाछादयेत्ततः ।
पद्मस्यावरणं शुक्लं रेखासमसमुन्नतम् ॥ ३३ ॥
अतःपरं लिखेच्चक्रं पञ्चवर्णं समुज्ज्वलम् ।
श्यामपीतारुणश्वेता मध्यभागे यवाकृतीन् ॥ ३४ ॥

---

१ ख अङ्गुलाद्बहिः ।  २ ख घटिकान्वितम् ।
३ ख तिर्य्यक् कूपाम् ।  ४ ग —मासूत्र ।
५ ख शुक्लैकाङ्गुलमुन्नताः । क उज्ज्वलाः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आरात् समालिखेत्तत्तत् वर्णकाभिः[1] सुशोभनान् ।
अवान्तराणि सर्व्वाणि यथाशोभं विभूषयेत् ॥ ३५ ॥
रजोभिः पञ्चभिः पञ्च चक्रधारा वहिर्लिखेत् ।
सितपीतारुणश्यामहरिताश्च क्रमोज्ज्वलाः ॥ ३६ ॥
चक्रस्य बाह्यतः पीठं भूषयेच्छ्यामवर्णकैः ।
रजो विस्तारयेद्दिक्षु रेखां दद्याद्विदिक्षु वै ॥ ३७ ॥
चतुरस्रां लिखेद्रेखां सितेन रजसा ततः ।
वल्लीतिलकपात्राणि दद्यात् पीठे यथेच्छया ॥ ३८ ॥
उपपीठं तृतीयन्तु यथाशोभं विभूषयेत् ।
ततो द्वाराणि चत्वारि लेखया सितया लिखेत् ॥ ३९ ॥
पीत-श्याम-सित-हरितानि द्वारस्याभ्यन्तराणि वै ।
पूर्व्वादि-क्रमयोगेन रजोभिः पूरयेत्[2] पृथक् ॥ ४० ॥
गात्रकं रक्तमाग्नेयं हरितं नैर्ऋतं तथा ।
वायव्यं श्यामवर्णाभमैशानं धवलं तथा ॥ ४१ ॥
कपोलाः कोणसङ्कीर्णा वर्णचितयभूषणाः ।
चतुरस्रां सितां लेखां बाह्ये दद्यात् समन्ततः ॥४२॥ इति

ततः पूर्व्वादिक्रमेण प्रतिद्वारं द्वारपालानुपवेश्य एवमेव प्रतिकुण्डमेकैकशो होतॄन् ब्राह्मणानुपवेशयेत् । तथैव प्रतिकुण्डं द्वौ द्वौ जापकावुपवेश्य द्वारपालाः पठद्ध्वमिति पाठकाः पठद्ध्वमिति वा होतारो यजद्ध्वमिति होतॄन् यजद्ध्वमिति याजकांश्च विनियुज्य स्वयमीशानकुण्डे उपविशेत् । ततः सर्व्वे स्वशाखोक्तविधिनाग्निस्थापनं कुर्य्युः ।

---

१ क कर्णिकाभिः । २ घ रजोभिर्भूषयेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वृद्धास्तु—गुरुः स्वकुण्डे सिकतोपकीर्णे प्रणीताप्रणय-नान्तमग्निस्थापनं विधायाऽग्निस्थापनं कुरुध्वमिति सर्व्वान् प्रणयेदित्याहुः ।

ततो वारुणमण्डलस्थपद्मे यथोक्तप्रकारेण सूर्य्यादि-ग्रहान् स्थापयेत् ।

तत्र कर्णिकायां सूर्य्यम् । आग्नेयपत्रे चतुरस्रे सोमम् । दक्षिणपत्रे त्र्यस्रे भौमम् । ईशानपत्रे बाणाकारे बुधम् । उत्तरे दीर्घचतुरस्रे गुरुम् । पूर्व्वे पञ्चकोणे शुक्रम् । पश्चिमे धनुषि शनिम् । नैर्ऋते सूर्पाकारे राहुम् । वायव्ये ध्वजाकारे केतुमिति ।

तत्तन्मन्त्रैरधिदेवताः प्रत्यधिदेवता विनायकादीन् पञ्चावाहयेत् ।

एतेषां मन्त्रास्तु संवत्सरदीधितौ ग्रहयज्ञप्रयोगोक्ता बोद्धव्याः । ततो मण्डपपूर्व्वादि-दिक्कलशेषु इन्द्रादीनावाह्य स्थापयेदिति नवीनाः ।

मन्त्रा यथा त्रातारमित्यादि—

एह्येहि सर्व्वामरसिद्धसङ्घै-
रभिष्टुतो वज्रधराऽमरेश ।
संवीज्यमानोऽप्सरसां गणेन
रक्षाऽध्वरं नो भगवन्नमस्ते ॥ ४३ ॥

ॐ इन्द्र इहागच्छ इह तिष्ठ इत्यावाह्य—

गजस्कन्धसमारूढं वज्रहस्तं महाबलम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥४४॥

इति पूजयेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत आग्नेयकलशे अग्निं दूतमित्यादि—

एह्येहि सर्व्वामरहव्यवाह
[1]मुनिप्रवर्य्यैरभितोऽभिजुष्ट ।
तेजोवता लोकगणेन सार्द्धं
गृहाण पूजां भगवन्नमस्ते ॥ ४५ ॥

अग्ने इहागच्छ इह तिष्ठेत्यावाह्य—

शक्तिहस्तं ज्वलद्रूपं छागारूढं हविर्भुजम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥ ४६ ॥

इति पूजयेत् ।

दक्षिणकुम्भे यमाय सोममित्यादि—

एह्येहि वैवस्वत-धर्म्मराज-
सर्व्वामरैरर्च्चित-धर्म्ममूर्त्तिः ।
शुभाशुभानन्दशुचामधीश
शिवायनः पाहि यम नमस्ते ॥ ४७ ॥

यम इहागच्छ इह तिष्ठेत्यावाह्य—

महामहिषमारूढं दण्डहस्तं महाबलम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥ ४८ ॥

इति पूजयेत् ।

ततो नैर्ऋतकलशे मोषुणः परा इति—

एह्येहि रक्षोगणनायकस्त्वं
विशालवेतालपिशाचसङ्घैः ।
ममाऽध्वरं पाहि पिशाचनाथ
लोकेश्वरस्त्वं भगवन्नमस्ते ॥ ४९ ॥

---

१ घ मुनिप्रवीरैः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

निर्ऋते इहागच्छ इत्यावाह्य—

तीक्ष्णदंष्ट्रं शवारूढं खड्गहस्तं महाबलम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥५०॥

इति पूजयेत् ।

पश्चिमकुम्भे तत्त्वायामीत्यादि—

एह्येहि यादोगण वारिधीश
गणेन पर्य्यन्यमहाप्सरोभिः ।
विद्याधरेन्द्रामरगीयमान
पाहि त्वमस्मान् भगवन्नमस्ते ॥ ५१ ॥

वरुण इहागच्छेह तिष्ठेत्यावाह्य—

मकरस्थं महाबाहुं देवदेवमपाम्पतिम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥५२॥

इति पूजयेत् ।

वायव्यकलशे त्ववायद्दतच—

एह्येहि यज्ञे मम रक्षणाय
मृगाधिरूढः सह सिद्धसङ्घैः ।
प्राणाधिपः कालकवेः सहायः
गृहाण पूजां भगवन्नमस्ते ॥ ५३ ॥

वायो इहागच्छेत्यावाह्य—

मृगस्कन्धसमारूढं ध्वजहस्तं महाबलम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥५४॥

इति पूजयेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उत्तरकुम्भे आप्यायस्व—

एह्येहि यज्ञेश्वर यज्ञरक्षां
विधत्स्व नक्षत्रगणेन सार्द्धम् ।
सर्व्वौषधिभिः पितृभिः सहैव
गृहाण पूजां भगवन्नमस्ते ॥ ५५ ॥

सोम इहागच्छ इत्यावाह्य—

दशाश्वरथमारूढं गदाहस्तं महाबलम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥५६॥

इति पूजयेत् ।

ईशानकुम्भे तमीशानम्—

एह्येहि विश्वेश्वर लोकपाल
त्रिशूलखट्वाङ्गगणेन सार्द्धम् ।
लोकेश भूतेश्वर यज्ञसिद्ध्यै
गृहाण पूजां भगवन्नमस्ते ॥ ५७ ॥

ईशानेहागच्छ इत्यावाह्य—

वृषस्कन्धसमारूढं शूलहस्तं त्रिलोचनम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥५८॥

इति पूजयेत् ।

निर्ऋतिवरुणयोर्मध्ये कुम्भे आयगौः—

एह्येहि पातालधरामरेन्द्र-
नागाङ्गना-किन्नरगीयमानः ।
रक्षोरगेन्द्रामरलोकसङ्घै-
रनन्त रक्षाऽध्वरमस्मदीयम् ॥ ५९ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अनन्तेहागच्छ इत्यावाह्य—

निःशेषजगदाधारं शेषं सुरगणार्च्चितम्[1] ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥६०॥
इति पूजयेत् ।

ईशानेन्द्रयोर्मध्यकुम्भे ब्रह्मयज्ञानाम्—

एह्येहि सर्व्वाधिपते सुरेन्द्र-
लोकेन सार्द्धं पितृदेवताभिः ।
सर्व्वस्य धाताऽस्यमितप्रभावो
रक्षाऽध्वरं नः सततं नमस्ते ॥ ६१ ॥

ब्रह्मन्निहागच्छेत्यावाह्य—

श्वेतहंससमारूढं पद्मयोनिं जगद्गुरुम् ।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् ॥६२॥
इति पूजयेत् ।

अनन्तब्रह्मणोः कलशौ वैकल्पिकौ ।

सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ ।
ताम्रौ कुलीरमण्डूकौ लौहौ तु शिशुमारकौ ॥६३॥

ततश्च यज्ञे अथ ऊर्द्ध्वयोरावाहनं ततो मण्डलमध्ये पञ्चरत्नं सौवर्णपात्र्यां कृत्वा इमं मे वरुणेति मन्त्रेण स्थापयेत् ।

इमं मे शुनःशेफो वरुणो गायत्री सुवर्णपात्रीस्थापने विनियोगः "इमं मे वरुणम्" इति ।

ततो मण्डलमध्ये ब्रह्मयज्ञानां गौतमो वामदेवो ब्रह्मा त्रिष्टुभ् ब्रह्मावाहने विनियोगः ॐ ब्रह्मयज्ञानां प्रथमं पुरस्तात् ब्रह्मन्निहागच्छ इति ब्रह्माणं स्थापयेत् ।

---

१ च सुरासुरगणार्च्चितम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अवतत्य धनुः परमेष्ठी शिवोऽनुष्टुव् शिव इहागच्छेति शिवं तत्रैव स्थापयेत् ।

इदं विष्णुः काण्वोमेधातिथिर्विष्णुर्गायत्री विष्णो इहागच्छ इह तिष्ठेति ।

तत्रैव गणानां त्वा गृत्समदो गणपतिर्जगती गणपते-रिहागच्छेति गणपतिं तत्रैव स्थापयेत् ।

गन्धद्वारा, विक्लीदकर्द्दमेन्दिराकमलानुष्टुव् कमले इहा-गच्छेति, तिष्ठेति ।

अम्बिकां तत्रैव । तथा आयजन्त भौवनो विश्वकर्म्मा सूक्तानि[१] त्रिष्टुव् भूतानि इहागच्छत इत्यादिना पञ्च-भूतान्यावाह्य ।

अत्र कलशस्थाने श्रियं भूतस्थाने भूतग्राममिति लिखितवन्तो. मदनरत्नकारादयः । एवं पञ्चाच देवताः स्थापयित्वा प्रतिष्ठालिङ्गमन्त्रेण प्रतिष्ठाप्य षोडशोपचारै-र्वास्तुशास्त्रोक्तमन्त्रैः[२] पूजयेत् ।

इन्द्रादिलोकपालपूजने तु पौराणिका मन्त्रा इति विशेषः । ते च—

इन्द्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः ।
शतयज्ञाधिपो देवस्तस्मै नित्यं. नमो नमः ॥ ६४ ॥
सर्व्वतेजोऽधिपो देवो रक्तवर्णो महाबलः ।
शक्तिहस्तो महावीर्य्यो वैश्वानर नमोऽस्तु ते ॥ ६५ ॥

---

१ क भूतानि ।        २ घ पञ्चोपचारैर्वा स्वशाखोक्तमन्त्रैः ।

P. P. Ac. Gunratnasuri M.S.        Jin Gun Aaradhak Trust

दण्डहस्तः कृष्णवर्णो धर्म्माध्यक्षो महाबलः ।
प्रेताधिपतये तुभ्यं यमराजाय ते नमः ॥ ६६ ॥
सर्व्वरक्षोऽधिपो देवो निरृती नीलविग्रहः ।
महावज्रधरो देवस्तस्मै नित्यं नमो नमः ॥ ६७ ॥
नागपाशधरो नित्यं मकरस्थो दिवाकरः ।
निम्नगः शुक्लवर्णश्च नमोऽस्तु वरुणाय ते ॥ ६८ ॥
सर्व्वप्राणाधिपो नित्यं सर्व्वजन्तुषु संस्थितम् ।
ध्वजहस्तो धूम्रवर्णस्तस्मै नित्यं नमो नमः ॥ ६९ ॥
सर्व्वनक्षत्रमध्ये तु सोमो राजा व्यवस्थितः ।
शुक्लवर्णो गदाहस्तस्तस्मै नित्यं नमो नमः ॥ ७० ॥
सर्व्वदेवाधिपो देव ईशानः शुक्लविग्रहः ।
शूलपाणिर्वृषारूढो रुद्राधिपतये नमः ॥ ७१ ॥
पन्नगानां पतिर्देवो योऽनन्तो नीलविग्रहः ।
पातालवसतिर्नित्यमनन्ताय नमो नमः ॥ ७२ ॥
पलाशकुसुमाकारो ब्रह्मो सर्व्वार्थसाधकः ।
सर्व्वलोकपतिः श्रेष्ठस्तस्मै नित्यं नमो नमः ॥ ७३ ॥

इति मन्त्राः ।

तत्र मन्त्रान्ते इन्द्राय नम इत्येवं चतुर्थ्यन्तं नामोच्चारणं कृत्वा पूजयेत् । इत्यनुसन्धेयम् ।

ततः पूजितपञ्चाशद्देवताभ्यस्तत्तन्मन्त्रैर्बलिदानं वक्ष्यमाणद्रव्यैः मन्त्रान्ते सूर्य्यायैष गुडोदनबलिर्नमः । सोमायैष पायसबलिः । कुजायैष सुरान्न० बुधायैष क्षीरोदनबलिः० बृहस्पतये दध्योदनबलिः० शुक्रायैष घृतोदनबलिः०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शनैश्चराय कृषरबलिः। राहवे इदमजामांसं। (मांसोदनमिति केचित्) केतुभ्य एष चित्रौदनबलिः। (केतवे इति केचित्) सर्व्वेभ्यो घृतपायसबलिः। अधिदेवतादीनां पायसबलिः। इन्द्रादिलोकपालानां माषोदनबलिमिति केचित्। मदनरत्ने— इन्द्रादिलोकपालानां ग्रहव्यतिरिक्तानामन्येषां [1]पायसबलिर्नम इत्येवं कार्य्यः।

द्रव्यान्तरञ्चेत् द्रव्यगोचर ऊहः कर्त्तव्यः।

तत आचार्य्यो यूपं हरिद्रातैलाभ्यामभ्यज्य तीर्थोदकेन स्नपयित्वा गौरसर्षपगोरोचनागुग्गुलुदूर्व्वानिम्बपत्रगर्भां पोटलिकां पदाबध्नन् दाक्षायणा इति मन्त्रेण बद्ध्वा युवा सुवासा इति वस्त्रेणावेष्ट्य वस्त्रयुग्मेन वा पूर्व्वकुण्डात् प्राच्यां पदत्रयान्तर्हिते यूपे तत् तृतीयांशपरिमिते रेखान्ते दर्भान् यवांश्च प्रक्षिप्य ध्रुवोऽसीति मन्त्रेण निखनेत्।

तडागोत्तरे ईशाने वा तडागमण्डपयोर्मध्ये वा अधिवासितं यूपं निखनेदित्यादि-पक्षान्तरमन्यतोऽवगन्तव्यम्।

ततः प्रतिकुण्डसमीपे ईशान्यां कलशस्थापन निधाय तेषु सर्व्वे समुद्रा इति तीर्थानि न्यस्य वरुणं पूजयेत्। तत आचार्य्यः स्वस्वकुण्डे गृह्योक्तप्रकारेण अग्निस्थापनानन्तरवक्ष्यमाणदेवतानुरोधेन अन्वाधानं कृत्वा भाविकर्म्म कुर्य्युः।

तत आचार्य्यः प्रतिकुण्डं दक्षिणतो यजमान उपविश्य जलं गृहीत्वाऽस्मिन् कर्म्मणि इदं हविः—सूर्य्य सोम-भौम-

---

[1] ग पायसबलिरित्युक्तम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बुध-गुरु-शुक्र-शनि-राहु-केतु-ग्रहेभ्य ईश्वरोमा-स्कन्द-विष्णु-ब्रह्मेन्द्र-यम-काल-चित्रगुप्ताधिदेवताभ्योऽग्न्यप्-भूमि-विष्णिवन्द्राणी-सर्प-प्रजापति-ब्रह्म-प्रत्यधिदेवताभ्यो विनायक-दुर्गा-वाय्वाकाशाश्विपञ्चलोकपालेभ्य इन्द्राग्नि-यम-निर्ऋति-वरुण-वायु-सोमेशानन्त-ब्रह्मादि-दिक्-पालेभ्यो ब्रह्म-शिव-विष्णु-गणपति-श्री-अम्बिका-भूत-ग्राम-विश्वकर्म्म-वरुणाग्नि-वायु-सूर्य्य-प्रजापति-स्विष्ट-कृदादिपूर्व्वोत्तराङ्ग-देवताभ्यो नम इति त्यजेत् ।

सकुशावयवं जलमादाय अद्येत्यादि अमुकजलाशयो-त्सर्गकर्म्मणि इदं हविर्द्रव्यं वरुणादि विश्वकर्म्मान्ताभ्यः प्रधानदेवताभ्यः पूर्व्वोक्तदेवताभ्यश्च होतुं मया त्यक्तं नम इति प्रतिकुण्डं द्रव्यत्यागं कुर्य्यादिति वृद्धाः ॥

होमे क्रियमाणे जापका द्वारपालाश्च शान्त्यादि पाठं कुर्य्युः ।

तत्रादौ द्वारपालजपमन्त्राः प्रदर्श्यन्ते

श्रीसूक्तं पावमानञ्च सोमसूक्तं सुमङ्गलम् ।
शान्त्यध्यायं चेन्द्रसूक्तं रक्षोघ्नञ्चेति बह्वृचः ॥ ७४ ॥

श्रीसूक्तं हिरण्यवर्णामिति पञ्चदशर्चं । पावमानं स्वादिष्टयेत्यादि । सोमसूक्तं त्वं सोमप्रचिकित इत्यादि गविष्ठावित्यन्तं त्रयोविंशत्यृचं । सुमङ्गलं कतिकाद् इत्यादि शान्तिकाध्यायः । शन्न इन्द्राग्नीत्यादिकः । इन्द्रसूक्तं यो जातवेदेत्यादिकं । रक्षोघ्नं कृणु पाज इत्यादि दक्षिण-द्वारपालौ तु रुद्रान् पुरुषसूक्तकं श्लोकाध्यायं शुक्तिपञ्च-मण्डलाध्यायमेव च रुद्र नमस्ते इत्यादि मन्त्रान् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुरुषसूक्तम्। सहस्रशीर्षेत्यादि षोडश-स्नोकाध्यायं देव सवित इत्यादिकम्। माध्यन्दिनानां कतरो देव सवित इति प्रसिद्धः। शुक्तिपञ्च ऋचं वाचयत्यध्यायः[१]। मण्डलाध्यायमादित्यो वा एष यन्मण्डलमिति तैत्तिरीये प्रसिद्धः। माध्यन्दिनानान्तु मण्डलब्राह्मणमिति।

वामदेव्यं बृहत्साम ज्येष्ठसाम रथन्तरम्।
तथा पुरुषसूक्तञ्च रुद्रसूक्तमतःपरम्॥ ७५॥
आज्यदोहादि-सामानि शान्तिकाध्यायमेव च।
वारुणानि च सामानि पश्चिमे द्वारपालकौ॥७६॥

वामदेव्यं कयानश्चित्रमित्यस्यामृचि गीतम्। बृहत्साम त्वामिद्धिहवामहे इत्यस्यां, ज्येष्ठसाम मूर्द्धानं दिव इत्यस्यां, रथन्तरमभि त्वा शूरणो नु म इत्यस्याम्।

पुरुषसूक्तं सहस्रशीर्षेत्यादिकमुक्तमेव। रुद्रसूक्तमावो राजानमिति वर्णद्वयम्। आज्यदोहानि देवव्रतानीत्यादि। शान्तिकाध्याये अबोध्याग्निरित्यादि गारुड़ानि। इमं स्तोममित्याद्यृक्षु गीतानि।

अथर्व्वाङ्गिरसं नीलं रुद्रञ्चैवापराजितम्।
देवीञ्च मधुसूक्तञ्च रौधसं शान्तिकाध्यायम्॥७७॥
अथर्व्वाणौ द्वारपालौ पठनामुत्तराश्रितौ।

अथर्व्वाणं छन्दोगा यद्बृहद्गायेत्यादि। आङ्गिरसमङ्गिरसो जन्मनीत्यादि। नीलरुद्रं या रुद्रपाल्यावित्यादि।

---

१ च शुक्तियं ऋचं वाचमित्यध्यायः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अपराजितं देविपरिवर्त्मनीत्यादि। मधुसूक्तं मधुवाता ऋतायते इत्यादि। रोधसं अभयं द्यावा पृथिवीत्यादि। शान्तिकाध्यायः शन्न इन्द्राग्नी भवतामित्यादि।

अथ जापकजाप्यमन्त्राः।

रात्रिसूक्तं रात्रीव्यख्यदायतीत्यष्टर्चम्। रौद्रमिमा रुद्राय तव स इत्यादि सूक्तत्रयन्तु पूर्व्वोक्तमेव च।

शाक्रं रौद्रञ्च सौम्यञ्च कौष्माण्डं जातवेदसं।
सौरं चेति जपेतां द्वौ दक्षिणेन यजुर्विदौ ॥ ७८॥

शाक्रं आशुः शिशान इत्यादि इन्द्रर्चो विश्वतस्परी-त्यनुवाको वा। रौद्रमिमा रुद्राय स्थिरधन्वन इति ऋक्-चतुष्टयम्। सौम्यं सोमो धेनुमिति षडृचम्। कौष्माण्डं यद्देवा इति ऋक्चतुष्टयमिति वृद्धाः।

अनुवाकचतुष्टयमिति तु मदनरत्नकारादयः। जात-वेदस यस्त्वाहृ इत्यनुवाकः सौर्यं सूर्य्योदेवी षडृचम्।

वैराजं पौरुषं सूक्तं सौपर्णं रुद्रसंहितां।
शैशिरं पञ्चनिधनं गायत्रं ज्येष्ठसामकम्[१] ॥ ७९ ॥
वामदेव्यं बृहत्सामं रौरवं स रथन्तरम्।
गवां व्रतं विकीर्णञ्च रक्षोघ्नञ्च यशस्तथा ॥ ८० ॥
गायेयुः सामगा राजन् पश्चिमद्वारमाश्रिताः।

वैराजं पिवा सोममिति। सौपर्णं मुद्देगा शुता मघ-मित्यादि त्रीणि सामानि। रुद्रसंहिता आवो राजान-मित्यादि। शैशिरमिद्राते[२] जातवेदसमित्यस्यां गीतम्।

---

१ ख साम च। २ ख उच्छ्रिते।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गायत्रं तत्सवितुरित्यस्यां गीतम्। ज्येष्ठसाममूर्द्धानं दिव इति प्रसिद्धम्। वामदेव्यं कयानश्चित्रेत्यस्यां गीतम्। बृहत्साम त्वामिद्धि हवामह इति प्रसिद्धम्। सौम्यं सोमव्रतम्। सन्ते .पयांसीति। रौरवं पुनः पुनर्मामैत्यत्र प्रसिद्धम्। रथन्तरं अभित्वा शूरणो नुम इत्यस्यां गीतम्। गवां व्रतं तेऽमन्वत प्रथमं अग्निमीले इत्यनयोर्गीतं सामद्वयम्। विकीर्णं विभ्राडित्यस्यां गीतम्। रक्षोघ्नं अग्ने रक्षाण अग्ने युङ्क्ष्वाहीत्यनयोर्गीतम्। यशः वहदिन्द्रायेत्यस्य गीतम्।

आथर्व्वाणः स्वोत्तरतः शान्तिकं पौष्टिकं तथा।
जपेयुर्मनसा सूक्तमाश्रित्य वरुणं प्रभुम्॥ ८१॥

अत्र पाठान्तरमपि ग्रन्थान्तरे।

जपेताप्याथर्व्वाणौ शान्तिकं पौष्टिकं तथा।
अन्ते वरुणसूक्तञ्च जपेयुः सर्व्व एव हि॥ ८२॥

शान्तिकपौष्णिकानि शं न इन्द्राग्नीत्यादीनि होमानन्तरं जापजाप्यानि सर्व्वे जपेयुरिति कश्चिदिति वृद्धाः। वरुणसूक्तं स्वस्वशाखीयम्। तत्र तावत् ऋग्वेदिनां मोषुण इति पञ्चानां वषिष्ठऋषिः गायत्रीछन्दः वरुणो देवता वरुणप्रीत्यर्थं जपे विनियोगः। ॐ मोषु वरुणः[१] रौरिषः।

अथ यजुर्वेदिनां।

इमं मे वरुणेतिद्वयोः शुनःशेफ ऋषिः आद्या गायत्री द्वितीयात्रिष्टुब् वरुणो देवता—ॐ इमं मे वरुणं मोषीः।

---

१ घ मोषुणो रौरिषः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सामगानान्तु—इमं मे वरुण इति पुष्पच्छव[1]ऋषिः गायत्री० वरुणो०। आथर्व्वणानां उदुत्तममिति ब्रह्माऋषिस्त्रिष्टुव्० वरुणो देवता ।

ततः पूर्व्वादिकुण्डेषु होमकर्त्तारः स्वस्वशाखोक्तं आज्य-भागान्तं कृत्वा प्रधानं वारुणहोमं कुर्य्युः। तत्रादौ ऋग्वेदी आज्यभागान्ते वारुणैर्मन्त्रैरष्टोत्तरशतसंख्याका आज्याहुती-र्हुत्वा तावत्संख्याका औडुम्बरसमिदाहुतीश्च जुहुयात् ।

ते च मन्त्रा यथा—

तत्त्वायामि० तद्वि नक्तं तद्दिवा० शुनःशेफो० अवेत-हेळो० उदुत्तमं० त्वन्नो अग्ने० सत्वन्नो अग्ने० इमं मे वरुण इत्यष्टौ ।

अत्राद्यमन्त्रचतुष्टयस्य चतुर्द्दशावृत्तिरितरेषान्तु त्रयो-दशावृत्तिरित्येव यथोक्तसंख्यासम्पत्तिः ।

ततो ग्रहाणां समिद्भिस्तत्तन्मन्त्रैर्यथोक्तसंख्याकमाज्या-हुतीभिश्च होमं कुर्य्यात्। ततः पलाशसमिद्भिराज्याहुती-श्चाधिदेवतानां विश्वकर्म्मान्तानां [2]ग्रहेभ्यो न्यूनसंख्याको होमः। यस्य ग्रहस्य या अधिदेवता या प्रत्यधिदेवतास्तस्य तत्तद्ग्रहसमिद्धोमः। विनायकादीनां पलाशसमिद्भिरिति केचित्। ग्रहाणां सर्व्वेषां अष्टाविंशतिसंख्याको होम इति वृद्धाः ।

तत्राधिदेवतानां मन्त्रास्तु ग्रहयज्ञप्रकरणोक्ता ज्ञेयाः। इन्द्रादित्रयस्य तु त्रातारमिन्द्रमिति गर्गऋषिस्त्रिष्टुव्छन्दः

---

१ घ पाप्पलऋषिः । २ घ ग्रहेभ्योऽन्यत्संख्याकः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इन्द्रो देवता। कद्रुद्रायेत्यस्याघोरऋषिः गायत्रीछन्दः शिवो देवता मरुतो यस्येति रहूगणो० गायत्री० मरुतो देवता। तथा लोकपालानां द्रष्टव्या। ब्रह्म-विष्णु-शिव-गणपति-श्री-अम्बिका-भूतग्रामाणां तत्तन्मन्त्रैर्होमः।

तत्र श्रियो मन्त्रः—गन्धद्वारां०। अम्बे अम्बिके० इति अम्बिकायाः। भूतग्रामस्य तु नाममन्त्र एव।

ततः स्विष्टकृदाद्युत्तराङ्गहोमस्त्वन्त्यदिन एवेति विकल्पः। पूर्णाहुतिस्त्यन्त्यदिवसे अशक्तौ तद्दिने वा।

## अथ यजुर्वेदिनां वारुणमन्त्राः।

इमं मे वरुण इत्यस्य शुनःशेपऋषिः गायत्रीछन्दो वरुणो देवता वरुणप्रीत्यर्थं जपे विनियोगः। तत्त्वायामीति शुनःशेफः० त्रिष्टुप्० वरुणः०। त्वन्नः सत्वन्न इत्यनयो-र्वामदेव० त्रिष्टुव्० अग्निवरुणौ देवते। अयाश्चाग्नेऽसीति प्रजापतिः ऋषिः पङ्क्तिः० अग्निः०। ये ते शतमिति शुनः-शेफ० त्रिष्टुव्० वरुणः०। आदित्यास्त्व० कृष्णाजिन० वरुण० वनेषु वाति० कृष्णाजिन० त्रिष्टुव्० वरुणः० उदुत्तमं० शुनःशेफ० त्रिष्टुव्० वरुणः०।

वरुणस्योत्तम्भनमिति अभितपनो० जगती० वरुण०। निषसादेति प्रजापतिर्गायत्रीवरुणो०। घृतवती० भर-द्वाजो० जगती० वरुणो०। इति द्वादशमन्त्राः।

एतेषां नवावृत्त्याष्टोत्तरशतसंख्या भवति। ग्रहादि-मन्त्रास्तु तत्प्रकरणोक्ता एव। इन्द्रादित्रयस्य तु त्रातार-मिति गर्ग० त्रिष्टुव्० इन्द्रो०। ततः प्रणीतोदकस्पर्शः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मरुतो यस्येति गौतमो० गायत्री० मरुतो०। लोकपालानामपि ग्रहप्रकरणोक्त एवं।

विश्वकर्म्मन् हविषेति भौवन० त्रिष्टुव्० विश्वकर्म्मा० इति विश्वकर्म्मणः। ततो व्याहृतिहोमाद्युत्तराङ्गाणि।

## अथ छन्दोगानां।

इमं मे इति पुष्कलो० गायत्री० वरुण०। उदुत्तममिति गौतमः० त्रिष्टुव्० वरुणः०, घृतवतीति० भरद्वाजो० जगती० वरुणः०।

एतेषां त्रयाणां षट्त्रिंशद्वारावृत्त्या अष्टोत्तरशतसंख्या सम्पन्ना भवेत्। ग्रहादीनान्तु प्रकरणोक्ता बोध्या।

इन्द्रादित्रयस्योच्यते। त्वामिद्धि० भरद्वाजो० बृहती० इन्द्रः०—आत्वा सोमस्येति सोमो० बृहती० चन्द्रः०।

पवमाना असृक्षतेति आङ्गिरसो० गायत्री० मरुतः०।

## अथ लोकपालानां।

तत्रेन्द्रस्य सूक्तञ्च। अग्निर्वृत्राणीति श्रौतो गायत्र्यग्निः नाके सुपर्णं० त्रिष्टुव्० यमः०। वेत्थेत्यादि आदित्य उष्णिक् निर्ऋतिः। इमं मे पुष्कलो गायत्री वरुणः।

वात आवातु गायत्री वायुः स्वादिष्टयागम्भीरा गायत्री सोमः तद्वो गाय सुते रुद्रो गायत्रीशानः समानोऽध्वा उन्वाना स्त्रिष्टुव् अनन्तः।

ब्रह्मयज्ञानं ब्रह्मास्त्रिष्टुव् ब्रह्मा विश्वकर्म्मन् हविषेति भौवनस्त्रिष्टुव् विश्वकर्म्मा इति विश्वकर्म्मणः। तदुत्तराङ्गाणि।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथाथर्व्वणानां ।

अप्सु ते पर्व्वानुष्टुव् वरुणः । धाम्नो धाम्नो राजन्नित्यथर्व्वा पङ्क्तिर्वरुणः । उदुत्तममित्यथर्व्वा वरुणः स्त्रिष्टुव् वरुणः । इति चत्वारः ।

एतेषां प्रत्येकं सप्तविंशत्यावृत्त्या अष्टोत्तरशतसंख्या सम्पत्तिः ।

ततो ग्रहादीनां यथोक्तहोमः । तत इन्द्रादिचयस्य इदमिन्द्र बर्द्धयेति ब्रह्मास्त्रिष्टुव् इन्द्रः मानोविदेति स्त्रिष्टुव् इन्द्रः ।

अग्नेर्मन्मप्वति ब्रह्मा त्रिष्टुव् अग्निः । यमोऽचिमृत्युरिति ब्रह्मा त्रिष्टुप् यमः । अभितन्निर्ऋतिरित्यथर्व्वानुष्टुप् निर्ऋतिः । येऽप्यश्वान् जुहेवत्यथर्व्वा त्रिष्टुप् वरुणः । वायोः सवितरीत्यथर्व्वा त्रिष्टुप् वायुरुत्तरतो ब्रह्मा त्रिष्टुप् सोमः । त्राता ददात्वङ्गिरो गायत्रीशानः । अनन्त पितृमित्यथर्व्वापङ्क्तिरनन्तः ब्रह्मा परं पूज्यतामित्यथर्व्वा त्रिष्टुप् ब्रह्मा । पितृयज्ञा वाचस्पतिस्त्रिष्टुप् विश्वकर्म्मा इति विश्वकर्म्मणः ।

ततो ध्यातानाद्युत्तराङ्गाणि आचार्य्योऽपि स्वशाखोक्तरीत्या एवमेवैतासां देवतानां होमं कुर्य्यात् । एवं रात्राधिवासनं कृत्वाचार्य्यः कुण्डनिकटस्थापित-सर्व्वकलशेषु अश्वगजस्थानरथ्यावल्मीकसङ्गमह्रदगोष्ठचतुष्पथमृत्तिकाः रोचनां श्वेतसर्षपान् कुङ्कुम-कर्पूर-चन्दनागुरु-कस्तूरिक-जातीफल-मुस्तादीन् यथासम्भवं तथा गुग्गुलं आम्रादिवृक्षसम्बन्धिपञ्चपल्लवांश्च प्रक्षिपेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततः पश्चिमकुण्डात् पश्चिमदिशि पुत्रकलत्रादिसहितं प्राङ्मुखोपविष्टं यजमानं सर्व्वकलशोदकेन पल्लवैरुदङ्मुखा आचार्य्यादयः सूर्य्योदयात् प्राक् स्वस्वशाखोक्तैर्वैदिकैः पौराणिकैश्च सुरास्त्वामभिषिञ्चामीत्यादिभिर्मन्त्रैश्चाभिषिञ्चेयुः। रात्रावेवाभिषेकं कुर्य्यादिति वृद्धाः। अधिवासदिने सयजमानानामृत्विजामुपवासः। अशक्तौ हविष्यादिकम्। रात्रौ पुराणश्रवण-गीतगायनश्रवणादिना जागरणं वा। ततः प्रातःस्नानादि सर्व्वेषां यजमानः शुक्लवासः प्राङ्मुखः उदङ्मुखोपविष्टेभ्य आचार्य्य-ऋत्विग्भ्यो यथोक्तदक्षिणां दद्यात्।

मण्डपाद्बहिरीशान्यां दद्यादिति रूपनारायणः। मण्डपान्तरैशान्यामिति वृद्धाः। मदनरत्नादयश्च गवां शतमष्टषष्टिः पञ्चाशत् षट्त्रिंशत् पञ्चविंशतिर्व्वेति। शक्त्यपेक्षया दक्षिणा विकल्पः।

तत्र प्रयोगः। देशकालादि सङ्कीर्त्त्य कर्त्तव्यामुकजलाशयोत्सर्ज्जनाङ्गभूतकृतैतदधिवासनकर्म्मसाङ्गतासिद्ध्यर्थं रुद्रदेवताः शतं गाः अष्टषष्टिं वा पञ्चाशतं वा षट्त्रिंशतं वा पञ्चविंशतिं वा अमुकगोत्रेभ्योऽमुकशाखाध्यायिभ्योऽमुकगोत्रोऽमुकशर्म्माहं युष्मभ्यं सम्प्रददे।

न ममेति सयवकुशजलं वरणक्रमेण गुरुहस्ताधःस्थापितोत्तानहस्तेषु सर्व्वेषां युगपत्प्रक्षिपेत्। गवामभावे निष्क्रयत्वेनेदं द्रव्यं सम्प्रददे। इति द्रव्यदानम्। ते च स्वस्तीत्युक्त्वा पुच्छेषु ताः प्रतिगृह्य कामस्तुतिं पठेयुः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततो यजमानः कर्म्माङ्गदेवताः प्रीयन्तामिति ब्रूयात्। [प्रीयन्तामिति ब्रूयुः][1] ततः शुभलग्ने कनकशृङ्गीं रौप्यखुरां मुक्तालाङ्गुलां सवस्त्रां शोभनां गां गन्धादिभिः सम्पूज्य ब्राह्मणैः शान्तिपाठपरैश्च मङ्गलगीतवाद्यादिक्रियमाणे जलाशये ईशानाभिमुखीमवतारयेत्। तत्र मन्त्रः। इरावतीति वशिष्ठ ऋषिस्त्रिष्टुप् छन्दो विष्णुर्देवता जले गोरवतारणे विनियोगः।

इरावतीमयूखैरिति, नात्र स्वाहाकारान्तोऽयं मन्त्रः। स्वाहाकारस्य यजुष्ट्वेन मन्त्रान्तरत्वाद्धोमार्थत्वात्तदभावाच्च। तरन्तीं गामनुमन्त्रयेत्।

तत्र मन्त्रः।

इदं सलिलं पवित्रं कुरुष्व
शुद्धाः पूतामृताः सन्तु नित्यं।
मां तारयन्ती सर्व्वतीर्थाभिषेकं
लोकाल्लोकं तरते तीर्य्यते च ॥ ८३ ॥ इति

वापीकूपोत्सर्गे तु गां त्रिः परिभ्रामयेदिति रूपनारायणादयः। ततो यजमानः आचार्य्यान्वारब्धः पुत्रादिसहितोऽपीति केचित्।

पुच्छलग्नो जले गच्छन्नेव मन्त्रद्वयं पठेत्। तत्र समुद्रादूर्म्मिरिति, अस्य वामदेवो गौतमस्त्रिष्टुप् जपे विनियोगः। [2][समुद्रा-नाभिः पिवासोत्यस्य वशिष्ठः शर्म्मानुष्टुप् जपे विनियोगः।] (ये वासोरोचने) ये वामी रोचने नम इति। तत ऐशान्यां परपारे गत्वा जानुदघ्ने जले

१ क पुस्तके नास्ति। २ ख पुस्तके [ ] चिह्नितांशः पतितः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उदङ्मुख्या गोः पुच्छमादाय गुरुणान्वितो यजमानः सकुशैर्यवतिलैः स्वशाखोक्ततर्पणं कुर्य्यात्। ततो यजमानः पुच्छलग्न एव ईशान्यामुत्तरे। तत्र मन्त्रः। आपोऽस्मा-नित्यस्य देवश्रवा आपस्त्रिष्टुप् उदकादुत्तरणे विनियोगः। आपो अस्मान् एमि। एवं पठन् उत्तरेदिति तु वृद्धाः। तामुत्थापयेत्तत्र मन्त्रः। सूयवसादिति दीर्घतमा गौ त्रिष्टुप् गौर्जलादुत्थापने सूयवसाद्भगवती हि भूया अथो० चरन्तीति। यदि हिं कुर्य्यात्तदा जपेत्। अनु-मन्त्रयेतामिति तु मदनरत्नकारादयः।

अन्वाख्य हिं कृण्वती वसुपत्नी। ततो यजमानो वाससी परिधाप्य[1] गां सम्पूज्य सामगाय प्रतिपादयेत्। नात्र दक्षिणाप्रतिपत्तिरूपत्वात्।

ततो गीतवाद्यादिघोषे जायमाने हरिद्रा-कुङ्कुमादि-रञ्जितेन त्रिवृता मण्डलसूत्रेण वैदिकैर्मन्त्रैर्जलाशये वेष्टयेत्। उत्सर्गानन्तरं वेष्टनमित्यन्ये।

ततो नूतनं श्वेतोष्णीषं बद्धा तत्समीपे यजमानः उप-विशेत्। ततो गुरुः प्रागादितां पञ्चरत्न-सौवर्णकूर्म्मादि-युतां सुवर्णपात्रीं गृहीत्वा दध्यक्षतैर्भूषयित्वा महानदी-जलेन पूरयित्वा चतुर्भिर्ऋत्विग्भिर्जलाशयसमीपं नीत्वा स्वयं प्राङ्मुखः उत्तराभिमुखैर्ऋत्विग्भिः सह स्थित्वा अगाधजले सौवर्णकूर्म्ममकरौ प्रागाग्नेयभागयोः प्रत्यङ्मुखौ क्षिपेत्। दक्षिणनैर्ऋत्यदिशौ उदङ्मुखौ राजतौ मत्स्य-डुण्डुभौ क्षिपेत्। पश्चिमवायव्ययोस्ताम्रमयौ प्राङ्मुखौ

---

[1] ख परिधाय।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुलीरमण्डूकौ क्षिपेत्। दक्षिणाभिमुखमायसं शिशुमारं उत्तरस्यां दिशि प्रक्षिपेद्वरुणैर्म्मन्त्रैः।

अर्थान् तत्र पञ्चरत्नादीन् तत्र प्रक्षिपेत्। तत उत्तराभिमुखो गुरुः शन्नोदेवीरित्यस्यां गीतेनाथर्व्वणेन साम्ना तथा पुनर्मामैत्विन्द्रियं, पुनरायुः पुनर्भगः, पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु मां इत्यरण्यनगसाम्नापोहिष्ठेति ऋचा तां पाचीं न्युब्जीकुर्य्यात्।

ततो गुरुर्ऋत्विग्भिः सह मण्डपमागत्य वाससी परिधाप्याचामेत्। ततो यजमानो जलाशय एव प्राङ्मुख उपविष्टः कुश-यव-तिल-यवान्यादाय उत्सर्गं कुर्य्यात्।

तत्र कालादि सङ्कीर्त्त्य सकलपापक्षयपूर्व्वक-रुद्रालय-गमनानन्तर-बहुकल्पकालावधिक-भूर्लोकभोगानुभव-पूर्व्वकपरार्द्धद्वयकालावच्छिन्नमहस्तपःप्रभृति-लोकाकाङ्क्षा-सहिततल्लोकभोगोत्तरकालं सद्योगबलं प्राप्य वैष्णवपरम-पदप्राप्तिकामोऽहमिमं जलाशयं वरुणदेवताकं स्नान-पानावगाहनाद्यर्थं सर्व्वेभ्य उत्सृजे। इति जलाशयं निरीक्ष्य भूमौ जलं निक्षिपेत्।

ततो मन्त्रद्वयं पठेत्।

सर्व्वभूतेभ्य उत्सृष्टं मयैतज्जलमूर्ज्जितम्।
रक्षन्तु सर्व्वभूतानि स्नानपानावगाहनैः॥ ८४॥
सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं जलम्।
धर्म्मार्थकाममोक्षेषु साधनं स्यादहर्निशम्॥ ८५॥

ततो गुरुर्मण्डपस्य पूर्व्वादि दिक्षु इन्द्रादीनां माषभक्त-बलिदानं पूर्व्ववत् कुर्य्यात्। सदस्यान् गन्धपुष्प-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दक्षिणादिभिः सन्तोष्य ततो मण्डपस्य प्रागादि दिक्षु इति मदनरत्ने।

ततो जलाशयमागत्य वृक्षारोपणं[1]। सा च द्वादश-पञ्चदशपञ्चविंशत्यरत्निप्रमाणयज्ञियवृक्षनिर्म्मिता जला-शयाल्पत्वमहत्त्वरत्वापेक्षया कार्या। विंशत्यरत्निपरिमाण-मिति तु वृद्धादयः।

तत्रादौ गुरुः सुप्रदेशे कुम्भस्थापनं कृत्वा चूतपत्राष्टके प्रत्येकमनन्त-वासुकि-तक्षक-कर्कोटक-पद्म-शङ्ख-महापद्म-कुलिशेति नामानि लिखित्वा तस्मिन् कुम्भे तत्प्रक्षिप्या-लोड्य तत्र वरुणं पूजयेत्।

तत एकं चूतपत्रमाकृष्य तत्र लिखितनाम्ना तन्नागं प्रक्षालितायां नागयष्ट्यामावाह्य स्थापयित्वानेनास्य जला-शयस्य रक्षा कार्य्येति श्रावयित्वा यथाशक्ति तं पूजयित्वा यष्टिवर्त्तुलमस्तकोपरि लोहमयं चक्रमारोप्य जलाशयजल-मध्ये पूर्व्ववत्खाते दधि-मध्वक्षत-कुश-तीर्थजल-पञ्च-रत्नादि प्रक्षिप्य गन्धाद्यर्च्चितां तां ध्रुवाद्यौरिति मन्त्रेणा-रोपयेत्। कूपवाप्योरिदं न भवतीति रूपनारायणः। आचारादेव तत्र न कार्य्यमिति वृद्धाश्च।

ततो यजमानो गङ्गादितीर्थोदकानि जलाशये प्रक्षिप्य तत्समीपे उपविश्य मन्त्रान् पठेत्।

कुरुक्षेत्रं गया-गङ्गा-प्रभास-पुष्कराणि च।
एतानि पञ्चतीर्थानि तड़ागे निवसन्तु मे॥८६॥

---

१ ख घ नागयष्ट्यारोपणम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दशार्णा मुरला सिन्धु रथावर्त्ता दृषद्वती ।
एतानि० ॥ ८७ ॥
वितस्ता कौशिकी सिन्धु सरयूश्च सरस्वती ।
एतानि० ॥ ८८ ॥
यमुना नर्म्मदा रेवा चन्द्रभागाश्च वेदिका ।
एतानि० ॥ ८९ ॥
गोमती वाग्मती शोणो गण्डकी सागरस्तथा ।
एतानि० ॥ ९० ॥

इति पठित्वा जलं स्पृशेत् ।

[1][ततो जले ॐ ह्रियै नमः । श्रियै० शान्त्यै० मेधायै० विश्वायै० लक्ष्म्यै० इति जलमातॄन् पूजयेत् ।] ततो यजमानोऽविच्छिन्नया गोदुग्धधारया आपोहिष्ठा मयो भुव इतित्वृचा जलाशयं त्रिः प्रदक्षिणीकुर्य्यात् । पठन् कुर्य्यादिति केचित् । अवशिष्टदुग्धं आतृप्तिर्ब्राह्मणं पाययेत् ।

तत उत्सर्गदिनमारभ्य दिनचतुष्टयं यावत् गुरुः प्रत्यहं वेदिस्थापित-देवतापूजां कृत्वा ऋत्विग्भिः सह वारुणहोमादि विश्वकर्म्महोमान्तं होमं कुर्य्यात् । चतुर्थदिवसे उत्तराङ्गानि कृत्वा क्रमेण यजमानान्वारब्धाः सर्व्वे पूर्णाहुतिहोमं कुर्य्युः । असम्भवे त्वधिवासनदिवसे पूर्णाहुतिं कुर्य्यादिति केचित् । ततो वह्निपूजा त्र्यायुषकरणादि कुर्य्युः ।

दरिद्रो यजमानश्चेदेकाग्निविधानेन गुरुणैव सर्व्वं कारयेदिति मदनरत्नकारादयः ।

---

१ घ पुस्तके [ ] चिह्नितांशः पतितः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ चतुर्थीकर्म्म। तत्राचार्य्यो दर्भस्थण्डिले यद्देवा इति मन्त्रेण परिसमुह्यमानस्तोक इत्युपलिप्य त्वां वृत्रेष्विन्द्रेति स्रुवेणोल्लिख्य सदसस्पतिमित्युद्धृत्य त्वामिति हवाम इत्यभ्युक्ष्याग्निर्मूर्द्धेति वारुणमग्निमुपसमाधाय हिरण्यगर्भ इति दक्षिणतो ब्रह्मासनमास्तीर्य्य ब्रह्मयज्ञानमिति ब्रह्माणमुपवेश्य आपोहिष्ठेति कुशासने सोदकं प्रणीतापात्रं प्रतिष्ठाप्य आजिघ्रकलशेष्वितीशान्यां कलशं निधाय तत्र वरुणमावाह्य पूजयित्वा कयानश्चित्र इत्यग्निं परिस्तीर्य्य गायत्र्येण त्वां च्छन्दसासादयामीति पात्राण्यासाद्य विष्णोरराटमसीति पवित्रच्छेदनं कृत्वा प्रोक्षणीरासादयेदिति प्रोक्षणीपात्रे प्रणीतोदकमासिञ्चेत्। इति सव्यहस्ते कृत्वा दक्षिणेनोत्तानं कृत्वा पात्रप्रोक्षणं कृत्वा असञ्चरे प्रोक्षणीर्निधाय निरूप्याज्यमिषेत्वेत्यधिश्रित्योर्ज्जेत्वेत्यवेक्ष्याग्निं हुतमिति पर्य्यग्निं कृत्वा त्रातारमिन्द्रमिति स्रुवं प्रताप्य अनिशितोऽसीति सन्मार्गकुशैः संमृज्य प्रत्युष्टं(ष्टां) रक्ष इति पुनः प्रताप्य वर्हिषि निधाय उत्तिष्ठ ब्रह्मणस्पत इत्याज्यमुद्वास्य सवितुस्त्वेत्युत्पूय ऊर्ज्जेत्वेत्यवेक्ष्य प्रोक्षणीः पुनरुत्पूयस्यास्तिरन्। आसमित्युपयमनकुशानादाय समिधाग्निमिति तिष्ठन् समिधोऽप्यादाय विश्वतश्चक्षुरित्यग्निं सन्दीप्य तद्देवाग्निरिति सम्पूज्य देवसवितरिति प्रोक्षणीशेषोदकेनाग्निं पर्य्युक्ष्य प्रणीतासु पवित्रे धृत्वा दक्षिणजान्वा च ब्रह्मान्वारब्धो जुहुयात्।

ॐ प्रजापतये स्वाहा। इदं प्रजापतये॥ इन्द्राय स्वाहा। इदं इन्द्राय॥ अग्नये स्वाहा। इदमग्नये॥ सूर्य्याय

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वाहा। इदं सूर्य्याय॥ सोमाय स्वाहा। इदं सोमाय॥ त्वन्नोऽग्ने, इदमग्निवरुणाभ्यां स्वाहा॥ सत्वन्नोऽग्ने, इदमग्निवरुणाभ्यां। अपश्चाग्ने इदमग्नये। ये ते शतं इदं वरुणाय सवित्रे। विष्णवे विश्वेभ्यो देवेभ्यः मरुद्भ्यः स्वर्केभ्यश्च नमः॥

उदुत्तमं इदं वरुणाय। [1][विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः।] प्रजापतये इदं प्रजापतये। अथानन्वारब्धो मनसा जुहुयात्।

इति तिसृभिर्महाव्याहृतिभिः पूर्व्ववत्। ततः प्रणवादि हुं फडित्यन्तेन इमं मे वरुणेति मन्त्रेणोदकमभिमन्त्र्य तेनाग्निमभ्युक्ष्य गायत्र्या पञ्चदशाज्याहुतीर्जुहुयात्।

इदं सवित्रे। इदं पञ्चदशस्वपि त्यागः। ततः इमं मे वरुणेति शतमाज्याहुतीर्जुहुयात्। इदं वरुणायेति तावतस्त्यागः। ततो व्यस्ताभिर्व्याहृतिभिराहुतिचयं हुत्वा पुनर्ब्रह्मान्वारब्धः अग्नये स्विष्टिकृते स्वाहेति जुहुयात्। इदमग्नये स्विष्टिकृते नम इति त्यागः।

संस्रवप्राशनादि कृत्वा यजमानान्वारब्ध इमं मे वरुणेति पूर्णाहुतिं जुहुयात्। पूर्व्ववत्त्यागः। ततोऽग्निपूजनञ्चायुषकरणादि अग्निविसर्ज्जनान्तं कृत्वा गुर्व्वृत्विग्भ्यो दक्षिणां दद्यात्। ततो यजमानस्याभिषेकः कलशोदकेन पूर्व्ववत्। ततो मण्डपं गत्वा यजमानो ग्रहादीनामुत्तरपूजां कुर्य्यात्।

---

१ ख पुस्तके [ ] चिह्नितांशः पतितः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततो वैदिकेन यान्तु देवगणाः सर्व्वे इति पौराणिकेन मन्त्रेण सर्व्वदेवताविसर्ज्जनं कुर्य्यादाचार्य्यः। ततो यजमानो यज्ञोपकरणादिकमृत्विग्भ्यो विभज्य सदक्षिणां दत्त्वा हेमपात्रीं शय्याञ्च गुरवे दत्त्वा मण्डपं सर्व्वेभ्यो विभज्य दद्यात्। ग्रहप्रीतये ज्योतिर्व्विदे हिरण्यं दद्यात्।

ततो ब्राह्मणभोजनं सहस्रं अष्टोत्तरशतं पञ्चविंशतिं वा शक्त्यनुसारेण भूयसीं दक्षिणां दत्त्वा यस्य स्मृत्या प्रमादात् कुर्व्वतां कर्म्मेति पठित्वा त्रिर्विष्णुं स्मृत्वा कर्म्मेश्वरार्पणं कुर्य्यात्। ततो यथाचारं तिलकाशीर्व्वादादि।

इति मत्स्यपुराणोक्त-जलाशयाद्युत्सर्गप्रयोगः ॥ २४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ वापीकूपोत्सर्गविशेषः ॥ २५ ॥

प्रतिकुण्डकलशस्थापनावसरे वाप्यादिचतुर्द्दिक्षु धान्योपरि सितवस्त्रयुगच्छन्नानुक्तलक्षणान् कलशान् स्थापयित्वा तेषु तीर्थावाहनं कृत्वा,

ॐ नमस्ते विश्वगुप्ताय[1] नमो विष्णोरपां पते ।
सान्निध्यं कुरु देवेश समुद्रादिह वैत्य वै ॥ १ ॥

इत्यनेन विष्णुञ्चावाह्य पूजयेत् । ततो महावेद्यां वारुणमण्डले ग्रहलोकपालादिस्थापनानन्तरं मध्ये शम्भुं ब्रह्माणं केशवञ्चावाह्य सौवर्णकूर्म्मं रौप्यमत्स्यं रुपमण्डूकं पञ्चरत्नतीर्थोदकादिसहितायां ताम्रपात्र्यामधिवास्य प्रतिष्ठाप्य पूजयेत् ।

ततस्तड़ागवद्दह्हिदानं यूपनिखननञ्च कृत्वा यथा स्वशाखं वारुणं यवमयं चरुं श्रपयित्वा आज्यभागान्ते व्यस्तसमस्तव्याहृतिभिश्चतस्र आज्याहुतीर्जुहुयात् । तड़ागोत्सर्गकरणै[2]र्म्मन्त्रैर्यवचरूदुम्बरसमिदाज्यानां प्रत्येकमष्टोत्तरशतमाज्याहुतीर्हुत्वा ग्रहादिविश्वकर्म्मान्तदेवतानां प्रत्येकमष्टाविंशतिसमिदाज्याहुतीर्जुहुयात् । ततो वरुणलोकपालादिभ्यो बलीन्दद्यादिति केचित् । उपर्य्येव प्रादक्षिण्येन गां चिर्भ्रामयेत् । तचेदं सलिलमापोऽस्मान् सूयवसाद्भगवतीत्येते चयो मन्त्राः पूर्व्वोक्ताः ।

---

१ ख पितृगुप्ताय ।
२ ख घ पुस्तकद्वये वारुणैः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततो मत्स्यकच्छपमण्डूकान् ताम्रपात्रस्थानादाय गीत-वाद्यादिघोषणे प्रवर्त्तमाने इमं मे वरुणेति मन्त्रेण जले प्रक्षिपेत् । ततः उत्सर्गः । भ्रामितां गां गुरवे दद्यात् । ग्रहादिविसर्ज्जनानन्तरं वरुणं विसर्ज्जयेदनेन मन्त्रेण ।

मित्रो मित्राभिभूतानां धनदो धनकाङ्क्षिणाम् ।
वैद्यो रोगाभिभूतानां शरणं शरणार्थिनाम् ॥ २ ॥
इति ।

अन्यत्सर्व्वं मत्स्यपुराणीयजलाशयोत्सर्गवत् ।

इति भविष्योत्तरोक्त-वापीकूपतडागोत्सर्गविधिप्रयोगः ॥ २५ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अत्र जलाशयोपघाता शुद्धिः ॥ २६ ॥

प्रसङ्गादुच्यते—

तत्राल्पजलेषु अश्व-मार्ज्जार-वानर-शूकरादिशवे क्लिन्ने जीर्णे सति सर्व्वजलमुद्धृत्य मृत्तिकाः परितश्चोद्धृत्य पञ्च-गव्यप्रोक्षणेन शुद्धिः। पाषाणैरिष्टकादिभिर्व्वा बद्धे तत्क्षण-स्थाने दहनं, दारुबद्धे प्रक्षालनमेव। जलबाहुल्ये षष्टि-कुम्भोद्धारात् शतकुम्भोद्धाराद्वा पञ्चगव्यप्रक्षेपाच्च शुद्धिः।

मूषकादिक्षुद्रप्राणिपाते त्रिंशत्कुम्भोद्धारपूर्व्वकं गो-मूत्रादि प्रक्षेपः। जले जलप्राणिशवे दोषाभावः। वापी-कूपतड़ागजले नरशवे सर्व्वजलोद्धारणासम्भवात् घटशत-जलोद्धारणपूर्व्वकं पञ्चगव्यप्रक्षेपाद्वा शुद्धिः कार्य्या। [1][पशुशवपातेऽप्येवमेव। तत्र मनुष्यमरणे तु जलस्याहो-रात्रमाशौचं। ततः पूर्व्वोक्ता शुद्धिः कार्य्या।] त्रिरात्र-माशौचं त्रिरात्रान्ते प्रागुक्तशुद्धिरिति वृद्धाः।

उपानत्-श्लेष्म-विन्मूत्र-रक्त-वसा-मांस-मज्जास्थिपतन-दूषिते जले षष्टिकुम्भोद्धारात् शुद्धिः।

एवं मूत्र-पुरीष-चर्म्म-रुधिरादिप्रक्षेपे त्रिंशत्कुम्भजलो-द्धारपूर्व्वकं गोमूत्रादिप्रक्षेपो मार्ज्जनं चेति केचित्।

जले अशुद्धस्त्रीरक्तादिपाताद्यल्पोपघाते तु दिवा सूर्य्यरश्मि-वायुस्पर्शात्, रात्रौ वायु-चन्द्र-नक्षत्ररश्मि-स्पर्शनात्, सन्ध्यायां वायुस्पर्शात् शुद्धिः।

[2][नदी-तड़ागादिजले चाण्डालाद्यशुचिस्पृष्टे तत्-स्वीकृतजलस्थानादन्यत्र जलं शुद्धमेव।

इति जलाशयोपघातशुद्धिः ॥ २६ ॥]

---

१ क पुस्तके [ ] चिह्नितांशः पतितः। २ ख पुस्तके [ ] चिह्नितांशः पतितः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथारामप्रतिष्ठाप्रयोगः ॥ २७ ॥

तत्र यजमानो यथोक्तकालेऽधिवासनदिवसात् पूर्व्वेद्युः कृतैकभक्तादिनियमोऽधिवासनदिवसे प्रातः कृतनित्य-क्रियः आरामस्योत्तरेशान्ये प्राक्पश्चिमान्यतरदिशि शुद्धा-सने प्राङ्मुख उपविश्य जलाशयोत्सर्गवत् विनायकपूजां ग्रहपूजाञ्च विधाय सकुश-यव-तिल-जलमादाय अद्ये-त्यादिदेशकालकीर्त्तनान्ते सर्व्वकामसहितानन्तपदानु-भलेन्द्रादियुतवर्षावच्छिन्नसमय-स्वर्गलोकनिवास-सहित-स्वरोमसमसंख्याभूतभवत्स्वकुल्यपुरुषतारणपूर्व्वक-पुनरा-वृत्तिदुर्लभपदप्राप्तिकाम आरामप्रतिष्ठां करिष्य इति सङ्कल्पं कृत्वा प्रागुक्तप्रकारेण मातृपूजा वृद्धिश्राद्धं पुण्याह-वाचनं गुर्व्वृत्विग्वरणं मधुपर्कदानं मण्डपप्रवेशं तत्पूजनञ्च कुर्य्यात् ।

ततोऽग्निस्थापनात् पूर्व्वमाचार्य्यश्च चतुरस्रवेदिकामध्ये कृतालवालान् वृक्षान् सर्व्वौषध्युदकैः सिक्तपिष्टातकैः पुष्प-मालादिभिर्वस्त्रादिभिश्चालङ्कृत्य स्वर्णसूच्या प्रतिवृक्षस्कन्ध-समीपे कर्णवेधं तदुपरिप्रदेशे सुवर्णशलाकया नेत्रा-ञ्जनञ्च सौवर्णाञ्जन तदभावे कज्जलेन कृत्वा गुग्गुलधूपं कुर्य्यात् ।

ततः प्रतिवृक्षं धान्योपरि कलशस्थापनविधिना ताम्र-कलशान् स्थापयेत्। ततः प्रतिवृक्षं कलशस्थापनसेकादि-करणाशक्तौ वृक्षाष्टके कर्त्तव्यमिति निबन्धकाराः। ततो-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऽग्निस्थापनं कृत्वाचार्य्यो वारुणमण्डले ग्रहादिलोकपालाभ्यां देवतास्थापनं जलाशयोत्सर्गवत् कुर्य्यात्।

ततः प्रतिवृक्षं सप्ताष्टौ वेति वनसम[1]संख्याकानि सौवर्णरौप्यान्यतरफलानि सौवर्णपाचीस्थाने आसादयेत्।

तत्र मन्त्रः। वनस्पते वीड्वङ्गो हि भूया इति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः वनस्पतिर्देवता वृक्षासादने विनियोगः।

वनस्पते वीड्वङ्गो हि भूया अस्म० त्वानिति। ततो ब्रह्माणं शिवं विष्णुं विनायकं कमलामम्बिकां भूतग्रामं चेति संस्थाप्य ततः सर्व्वान् प्रतिष्ठाप्य पूजयेत्। ततः सर्व्वेषां वलिदानं प्रत्येकं कृत्वा पूर्व्ववत् यूपनिखननं कुर्य्यात्।

तत आचार्य्यादयः सर्व्वे अन्वाधानादि आज्यभागान्ते वनस्पते इति मन्त्रेणाज्यपलाशसमित्तिलानां अष्टोत्तरसंख्यकाज्याहुतीर्जुहुयुः। ततो ग्रहाणां समिद्भिरधिदेवताविश्वकर्म्मान्तानां पलाशसमिद्भिर्यवैः कृष्णतिलैश्च प्रत्येकमष्टाविंशतिसंख्यको होमः कर्त्तव्यः।

ततः स्विष्टिकृत्। एवमधिवासनं कृत्वा प्रातर्नित्यक्रियां निर्व्वर्त्त्य चत्वार ऋत्विजः[2] समिद्भिर्यवैः कृष्णतिलैः ऋत्विक्कुण्डसमीपस्थापितकलशोदकैर्यजमानमभिषिञ्चेयुः स्नपयेयुश्च। ततो यजमानः सोपस्कारां गां उदङ्मुखीमुत्सृजेत्।

---

१ ख कृतसंख्याकानि।

२ क ग पुस्तकद्वये आचार्य्यः।

तत्र मन्त्रः—

इदं वनं पवित्रं कुरुष्व
शुद्धं पूतममृतमस्तु नित्यं।
मां तारयन्ती सर्व्वतीर्थाभिषिक्तं
लोकाल्लोकं तरते तीर्य्यते च ॥ १ ॥ इति।

एकवृक्षप्रतिष्ठायामिमं वृक्षमित्यूहः। समुद्रादूर्म्मि। एवामी रोचन इति च मन्त्रद्वयं पठित्वा गोपुच्छोदकेन जलाशयोत्सर्गवत्तर्पणं कृत्वा सूयवसाद्भगवतीति मन्त्रं जपेत्। यदि हिं कुर्य्यात्तदा हिं कृण्वतीति च। तत्र केचिद्वनोत्सर्गं कुर्य्यादित्याहुः। स यथा सकुशयवतिल-जलमादायाद्येत्यादि देशकालौ सङ्कीर्त्त्य इदं वनमश्वत्थ-निम्ब-वट-तिन्तिड़ी-कपित्थ-विल्वामलकाम्रादि-दाड़ि-मादि-नानावृक्षमण्डितं वनस्पतिदैवतं स्वकीयसर्व्वपाप-क्षयपूर्व्वकमतीतानागतपितृकुलतारणक-भगवत्प्रीतिकामो वा सर्व्वसत्वेभ्योऽहमुत्सृजे।

इति जलं भूमौ प्रक्षिप्य मन्त्रद्वयं पठेत्।

सर्व्वभूतेभ्य उत्सृष्टं मयैतद्वनमूर्ज्जितम्।
रमन्तु सर्व्वभूतानि स्थितिवृक्षोत्सवादिभिः ॥ २ ॥
सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं वनम्।
रमन्तु सर्व्वभूतानि स्थितिवृक्षोत्सवादिभिः ॥ ३ ॥

ततो वृक्षसमीपस्थापितकलशोदकेन सपुत्रकलत्रं यजमानं पुनरभिषिच्य स्नपयेयुर्यथोक्तमन्त्रैः। ततो यजमानः कालादिसंकीर्त्त्य कृतैतदारामप्रतिष्ठाकर्म्मणः साङ्गता-सिद्ध्यर्थं अमुकगोत्रेभ्य इत्याद्युक्त्वा पूर्व्वोक्तवैकल्पितसंख्या-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विशिष्ट-गोदानं दक्षिणात्वेन दत्त्वा हेमसूत्रकटकाङ्गुलीय-वासः शय्या-पादुकाद्युपस्कारान् सर्व्वर्त्त्विग्भ्यः अशक्तौ गुरुमाचार्य्य वा दद्यात्।

ततो जलाशयोक्तप्रकार-पयोधारया वनस्पतीनां त्रिः परिषेकः, एकब्राह्मणस्य दुग्धपानञ्च, ततो गुरुर्लोक-पालेभ्यः पूर्व्ववद्वलिं दत्त्वा तद्दिनमारभ्य दिनचतुष्टयं वृक्षादिसेचनञ्च, क्षीरेण स्थापितदेवतापूजनं पूर्व्वोक्त-होमञ्च कुर्य्यात्।

ततश्चतुर्थदिवसे होमसमापनान्ते जलाशयोक्तं चतुर्थी-कर्म्म कुर्य्यात्। अत्र वानस्पत्यमन्त्रेण पूर्णाहुतिर्जुहुयात्। नागयष्टितीर्थप्रवेशनं वात्रभवतीति रूपनारायणः। उभयमपि भवतीत्यन्ये।

ततः पुनर्गुरुर्ग्रहादि-देवतापूजनादिकं ईश्वरार्पणान्तं। अन्यच्च सर्व्वं जलाशयोत्सर्गवत्।

इत्यारामप्रतिष्ठाप्रयोगः ॥ २७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ नृसिंहपरिचर्य्याद्युक्तचलार्चा-स्थापनविधिः ॥ २८ ॥

कुण्डमण्डपादि नावश्यकम् । देशकाले च तत्तत्प्रतिष्ठोच्यते । यजमानः कृतनित्यक्रियो तत्सङ्कीर्त्तनपूर्व्वकं तद्देवताप्रीत्युद्देश्यकचलार्चाप्रतिष्ठां सङ्कल्प्य तदङ्गत्वेन स्वशाखोक्तरीत्या गणपतिपूजनादिश्राद्धान्तं[१] कृत्वाचार्य्यमेव वृणुयात् । तत्राप्यशक्तः स्वयमेव वा कुर्य्यात् ।

आचार्य्योऽग्निः सप्तिमिति सूक्तस्य वैश्वानरोऽग्निस्त्रिष्टुप् अभ्युत्तारणे विनियोगः । अग्निपदरहितेनाग्निः सप्तिमिति सूक्तेनाप्युत्तारणं कृत्वा यदत्र संस्थितमिति श्वेतसर्षपान् विकीर्य्य शुचीव इति त्वृचा पञ्चगव्येन कुशोदकेन च देवयजनं प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति मन्त्रद्वयेन संप्रार्थ्य स्थण्डिलेऽग्निं प्रतिष्ठाप्याश्वलायनयजमाने चान्वादध्यात् ।

चक्षुषी आज्येनेत्यन्ते स्थापयित्वा देवताममुं समिदाज्यचरुतिलाहुतिभिः प्रत्येकमष्टोत्तरशतसंख्याभिः शेषेणेत्यादिव्रीहिचरुश्रपणान्तं कृत्वाज्यभागान्ते लिङ्गमर्चां वैशानदिशि वेदिकायां वस्त्रावृते पीठस्थापितामष्टकृत्वो मृदा संस्नाप्य तत्सवितुरिति गायत्र्या गोमूत्रेण, गन्धद्वारामिति गोमयेन, आप्यायस्वेति क्षीरेण, दधिक्राव्ण इति दध्ना, तेजोऽसीति घृतेन, मधुवातेति मधुना, आयङ्गौरिति शर्करया, पञ्चामृतैश्चाभिषिच्य अर्चायाः प्राच्याद्यष्ट-

---

१ ख पूजनादि नान्दीश्राद्धान्तं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दिक्षु मह्यौरित्यादिविधिनाष्टौ कलशान् वारिपूरितान् दूर्व्वा-सिद्धार्थ-पञ्चपल्लवोपेतान् प्रतिष्ठाप्य, तैरापो हिष्ठा मयोभुव इत्यादिमन्त्रैः प्रत्येकमावृत्तैरभिषिच्य, वस्त्र-गन्धाद्यैरुपचारैर्नाममन्त्रेणाभ्यर्च्याग्नेः प्राच्यां सर्व्वतोभद्रेऽष्टदले वा मध्यभागे स्थापितभद्रपीठोपरिस्थापितार्च्चादेः, प्राच्यादिदिक्षु[1] शुद्धोदकपूर्णेषु कलशेषु गन्धाक्षतचूत-पल्लवोपशोभितेषु अष्टौ घृतदीपान् प्रज्वाल्य, उत्तरतः एकं कलशं संस्थाप्य, देवदक्षिणपार्श्वे उदङ्मुखस्तिष्ठन् चित्रं देवानामित्यर्द्धर्चा सुवर्णशलाकया गन्धेन नेत्रे उन्मील्य देवस्यत्वेति मधुना च नेत्रोन्मीलनं विधाय चित्रान्नं बलिं दत्त्वा पुरुषसूक्तेन स्तुत्वाङ्गदेवताः सम्पूज्य स्थण्डिलं समेत्य समिदाज्यचरुतिलद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्यया प्रतिष्ठाप्य देवतामन्त्रेण जुहुयात् ।

एकैकद्रव्यहोमान्ते देवं स्पृशेत् ।

आज्यहोमञ्चोत्तरतः स्थापितकलशे सम्पातान् क्षिपेत् । स्विष्टकृदादिपूर्णाहुत्यन्तं हुत्वा होमशेषं समाप्यार्च्चा-समीपमागत्य प्रतिष्ठाप्यदेवं हृदि ध्यात्वा सितसुरभि-पुष्पपूर्णमञ्जलिं कृत्वा निजहृत्कमले सर्व्वसाक्षिणमनी-यांसं तेजोमयं ध्यात्वा तत्तेजोमयहृत्कमलान्नासामार्गेण करस्थपुष्पे निःसृतान् विचिन्त्य तत्पुष्पाञ्जलिं स्वमस्त-कान्तं नीत्वा सुमुहूर्त्ते तत्तन्मूलमन्त्रोच्चारणपूर्व्वकं प्रतिष्ठ परमेश्वरेति देवमूर्द्धनि पुष्पाञ्जलिं क्षिपन् तत्तेजो देव-शरीरे ब्रह्मरन्ध्रद्वारा प्रविश्यावाहयेत् ।

---

१ घ कलशानवस्थाप्य पूर्व्वस्थापितेषु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततः आत्वाहार्षमिति सूक्तेन ग्रहा वै प्रतिष्ठासूक्तमिति स्वशाखीयविधिना प्रतिष्ठितो भवेति च प्रतिष्ठाप्रणवेन निरुद्ध्य प्राणप्रतिष्ठां कुर्य्यात्।

अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः अमितं छन्दः प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रौं कीलकं अर्चायाः प्राणप्रतिष्ठाङ्गत्वे विनियोगः।

ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हैं हंसः सोऽहं देवस्य प्राणा इह प्राणाः। ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हैं हंसः सोऽहं देवस्य जीव इह स्थितः। पुनर्मन्त्रं पठित्वा देवस्य इन्द्रियाणि इह स्थितानि। पुनर्मन्त्रान्ते देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखञ्चिरं तिष्ठन्तु स्वाहा।

इति देवस्य हृदि हस्तं दत्त्वा जपेत्। ततो द्वादशवारं प्रणवजप इत्यस्य प्राणप्रतिष्ठां विधाय सुप्रसन्नो वरदो भवेति संप्रार्थ्य पुरुषसूक्तेन तत्तद्दैवत्यमन्त्रेण च स्तुवीत।

अथ वैदिकपौराणिकतान्त्रिकान्यतमेन समुचितेन वा विधिना देवं पूजयेत्।

तत्र स्नानोत्तरं पञ्चामृतैरभिषिच्य सम्पातकलशोदकेन इमा आपः शिवतमा इत्यादिभिर्मन्त्रैः शुद्धोदकेन संस्नाप्य तत्तन्मूलमन्त्रैश्च तेनैव सप्तकृत्वः संस्नाप्य वस्त्रालङ्कारादीन् दीपान्तानुपचारान्निवेद्य पुरुषाहारपर्य्याप्तं नानाविधनैवेद्यं शर्करां पायसं वा निवेद्य महानीराजनं कृत्वा देवस्य पादयोः पुष्पाञ्जलिं प्रक्षिप्य सयजमानः आचार्य्यः शक्त्या पादं नमस्कुर्य्यात्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततः पुष्पाञ्जलिं दत्त्वा देवं पञ्चाङ्गन्यासं कृत्वा देवमनेकधा सम्प्रार्थ्य शरणागतोऽयमस्य यजमानस्य कुले सर्व्वदा सानुग्रहदृष्टिर्भवेति पुनः पुष्पाञ्जलिं दत्त्वा पुनस्तस्मिंस्त्वमेव न्यासं कृत्वा देवपार्श्वस्थ-कलशैर्ब्राह्मणसहित-यजमानस्य सकुटुम्बस्य समुद्रज्येष्ठेत्यादिभिः सुरास्त्वेत्यादिभिश्चाभिषेकं कुर्य्यात्।

अथ यजमानो गवादिदक्षिणाः आचार्य्यायान्येभ्यश्च भूयसीं दक्षिणां दत्त्वा यथाशक्तिब्राह्मणान् भोजयित्वा परमेश्वरार्पणं कुर्य्यात्।

इति संक्षिप्तचलार्चाविधिः ॥ २८ ॥

इति श्रीमन्महाराजाधिराजश्रीबाजबहादुरनृपवराज्ञाप्रवृत्तेनापदेव-सुतानन्तदेवविदुषा कृते राजधर्म्मकौस्तुभे प्रयोगाख्य-द्वितीयदीधितिः समाप्ता ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ राज्याभिषेकदीधितिः ॥ ३ ॥

[1]दध्ना पूरितमात्ममूर्ध्नि कलशं धृत्वा व्रजन्ती व्रजे
काचिद्गोपकुमारिका क्वनु गतिर्युक्तेति सम्मुह्यति ।
तां दृष्ट्वा मुरलिधरः स्मितमुखो भ्रुयुग्मभङ्ग्या यया
तस्यै सूचितवान् गतिं समुचितां पायात्तया मे मतिम् ॥१॥

यत्प्रताप उदिते दितेः सुता
  विष्णुचक्र इव सर्व्वश एव ।
न्यस्तहस्तगतशस्त्रबुद्धयो
  योगमस्तमितमस्तभागिनः ॥ २ ॥

वाजवाहनृपतेरनुज्ञया
  तस्य कौस्तुभनिबन्धगामिनी ।
दीधितिः सदभिषेकगोचरा-
  ऽनन्तदेवविदुषा प्रतन्यते ॥ ३ ॥

अतीतभूपालनिबन्धरत्नैः
  सन्तोषमायान्तु भुवीह सन्तः ।
श्रीवाजवाहस्य तु कौस्तुभेऽस्मिन्
  त एव पश्यन्त्वधिकं प्रकाशम् ॥ ४ ॥

---

१ ग पुस्तके श्लोकचतुष्टयं नास्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तच प्रथमं ।

# राज्याधिकारिनिर्णयः ॥ २६ ॥

सत्स्वपीह बहुषु पुत्रेषु औरसो ज्येष्ठ एवाधिकारि ।

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।

इत्यादिना द्वादशविधपुत्राननुक्रम्य ।

अभावे पूर्व्व पूर्व्वेषां परान् समभिषेचयेत् ॥ १ ॥

इति कालिकापुराणवचनात् ।

अथोपरिचरं राजा यौवराज्येऽभ्यषेचयेत् ।

ज्यायांसमौरसं पुत्रं सर्व्वराजगुणैर्युतम् ॥ २ ॥

इत्यपरक्तेश्च[1] ।

आदिष्टो ह्यसि मे ज्येष्ठः प्रसूतः सदृशो गुणैः ।

ज्येष्ठायामपि मे पत्न्यां सदृश्यां सदृशः सुतः ॥ ३ ॥

तन्मतस्त्वं गुणज्येष्ठो रामनामात्मजः प्रियः ।

त्वया तात प्रजा ह्येताः स्वगुणैरतिरञ्जिताः[2] ॥४॥

तस्मात्त्वं पुष्ययोगेन यौवराज्यमभीप्ससि[3] ।

इति रामायणे श्रीरामं प्रति दशरथोक्तेश्च ।

ज्येष्ठेन जातमात्रेण पुत्रीभवति मानवः ॥ ५ ॥

इति मनूक्तेश्च ।

यदि कनिष्ठापुत्रो जन्मना ज्येष्ठस्तदा कनीयसि ज्येष्ठापुत्रे सत्यपि तस्यैवाधिकारः ।

---

१ ग इति तत्रत्यपरक्तेश्च । २ ग अनुरञ्जिताः ।
३ ग अवाप्स्यसि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जन्मज्येष्ठं प्रियं पुत्रं यौवराज्ये यदीप्सथ ॥ ६ ॥

इति रामायणे जन्मज्येष्ठस्यैव हेतुत्वेन कीर्त्तनात्। राजपत्नीभ्यां युगपदुत्पन्नयोस्तु ज्येष्ठायामुत्पन्नस्यैवाधिकारः। दशरथोक्तौ ज्येष्ठायामुत्पत्तिकीर्त्तनस्यानर्थक्या योगात्। ज्येष्ठायां यमयोरुत्पत्तावपि जन्मज्येष्ठस्यैवाधिकार उक्तहेतोः।

सत्स्वपि ज्येष्ठेषु क्षेत्रजादिषु कनीयस औरसस्यैवाधिकारः।

न क्षेत्रजादींस्तनयान्राजा राज्येऽभिषेचयेत्।
पितॄणां शोधयन्नित्यमौरसे तनये सति ॥ ७ ॥

इति कालीपुराणवचनात्। शोधयन्नित्यनन्तरमृणमिति शेषः।

ज्येष्ठस्याप्यन्धत्वादिदोषे कनिष्ठस्यैवाधिकारः।

अनंशौ क्लीवपतितौ जात्यन्धवधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥ ८ ॥
सर्व्वेषामपि तु न्याय्यं दातुं शक्त्या[१] मनीषिणा।
ग्रासाच्छादनमत्यन्तं पतिताः स्युरदित्सवः ॥ ९ ॥

इति मनुना ग्रासदानार्हत्वेनोक्तस्य राज्यार्हत्वासम्भवात्।

धृतराष्ट्रस्त्वचक्षुष्ट्वाद्राज्यं न प्रत्यपद्यत।
पारशवत्वाद्विदुरो राजा पाण्डुर्बभूवह ॥ १० ॥

इति महाभारतोक्तेश्च।

केनापि हेतुना अजातराज्यलाभेऽपि ज्येष्ठे तत्पुत्रस्य

---

१ ग शक्त्या।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भवत्येव राज्याधिकारः। यन्निवृत्त्यै भीष्मं प्रति दाशेनाभ्यवादि।

यत्त्वया सत्यवत्यर्थे सत्यधर्म्मपरायण।
राजमध्ये प्रतिज्ञातमनुरूपं तथैव तत् ॥ ११ ॥
नान्यथैतन्महाबाहो संशयोऽत्र न कश्चन।
तवापत्यं भवेद्यत्तु तत्र नः संशयो महान् ॥ १२ ॥
इति

भीष्मस्यापि उत्तरं—

राज्यं तावत् पूर्व्वमेव मया त्यक्तं नराधिप।
अपत्यहेतोरपि च करिष्येऽद्य विनिश्चयम् ॥ १३ ॥
अद्य प्रभृति मे दाश ब्रह्मचर्य्यं भविष्यति ॥ इति

श्रूयते चासमञ्जसपुत्रस्यांशुमतो राज्यलाभः। प्राप्ताभिषेके कनीयसि राज्यानधिकृज्ज्येष्ठस्यौरसो जातोऽपि न राज्यं लभते किन्तु कनिष्ठपुत्र एव लभते। यथा युधिष्ठिरः।

अतएव सत्यपि दुर्योधने पौरोक्तिर्महाभारते—

प्रज्ञाचक्षुरचक्षुष्ट्वाद्धृतराष्ट्रो जनेश्वरः।
राज्यं न प्राप्तवान् पूर्व्वं स कथं नृपतिर्भवेत् ॥ १४ ॥
तथा शान्तनवो भीष्मः सत्यसन्धो महाव्रतः।
प्रत्याख्याय पुरा राज्यं न स जातु ग्रहीष्यति ॥ १५ ॥
ते वयं पाण्डवं ज्येष्ठं तरुणं वृद्धशीलिनम्।
अभिषिञ्चाम साध्वग्र्यं सत्यं कारुण्यवेदिनम् ॥ १६ ॥
इति

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथाभिषेककालः ॥ ३० ॥

गारुड़े—

रोहिण्यार्द्रा तथा पुष्या धनिष्ठा चोत्तरात्रयम् ।
वारुणं श्रवणञ्चैव एते चोर्द्धमुखाः स्मृताः ॥ १ ॥
एषु राज्याभिषेकञ्च पट्टबन्धञ्च कारयेत् । इति

विष्णुधर्म्मोत्तरे—

इति सम्भृतसम्भारो राज्ञः साम्वत्सरस्ततः ।
कालेऽभिषेचनं कुर्य्यात्तं कालं कथयामि ते ॥ २ ॥
ध्रुवाणि वैष्णवं शाक्रं हस्तपुष्यौ तथैव च ।
नक्षत्राणि प्रशस्यन्ते भूमिपालाभिषेचने ॥ ३ ॥ इति

सांवत्सरो ज्योतिषिक इत्यमरः । ध्रुवाणि उत्तरात्रयं रोहिणी च, वैष्णवं श्रवणा, शाक्रं ज्येष्ठा ।

तत्रैव—

वृषोऽथ कीटसिंहौ च कुम्भो लग्नश्च शस्यते[१] ।
तारा द्वितीया षष्ठी च चतुर्थी चाष्टमी तथा ॥ ४ ॥
नवमी च तथा तारा अनुकूलश्च चन्द्रमाः ।
सौम्याः केन्द्रगताः लग्नाः शुभाश्चैव त्रिकोणगाः ॥ ५ ॥
पापाश्चोपचयस्थाने शस्तो लग्ने दिवाकरः ।

लग्ने नवांशे स्थितिरस्य वर्गे
वर्गस्तथा तस्य महानुभावः ।
सूर्य्यस्य वर्गः सकलः प्रशस्तो
राजाभिषेके[२] स नृपो ग्रहाणाम् ॥ ६ ॥

स सूर्य्यः ।

---

१ ग प्रशस्यते । २ ग राज्ञोऽभिषेके ।

तत्रैव—

नाभिषेच्यो नृपश्चैत्रे नाधिमासे च भार्गव ॥ ७ ॥
न प्रसुप्ते तथा विष्णौ विशेषात् प्रावृषि द्विज ।
न च भौमदिने राम चतुर्थ्याञ्च तथैव च ॥ ८ ॥
नवम्यां नाभिषेक्तव्यश्चतुर्द्दश्याञ्च भार्गव ।
नागं चतुष्पदं विष्टिं किन्तुघ्नं शकुनिं तथा ॥ ९ ॥
करणानि न शस्यन्ते व्यतीपातदिनं तथा ।
नक्षत्रमुल्काभिहतमुत्पाताभिहतन्तु यत् ॥ १० ॥
सोमसूर्य्यकुजाक्रान्तं परिदृष्टञ्च भार्गव ।

तथा

कुजहोरास्तथानिष्टाः सर्व्वत्र कुलिकस्तथा ॥ ११ ॥

वृत्तशते—

जन्मेशलग्नेशदशेशसूर्य्ये
भौमे बलिष्ठे क्षितिजाभिषेकः ।
ज्येष्ठाश्रवक्षिप्रमृदुध्रुवेषु
सौम्यग्रहस्याह्नि तथात्वरिक्ते ॥ १२ ॥
लग्ने स्थिरे चोपचये क्षिते च
शीर्षोदये च क्षितिपाभिषेकः ।
शस्तस्त्रिषष्ठाय गतैश्च पापैः
सौम्यैः षडन्त्याय विवर्ज्जितैश्च ॥ १३ ॥ इति

शीर्षोदयो मिथुन-सिंह-कुम्भ-तुला-वृश्चिक-कन्यान्यतमं लग्नम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथाभिषेकात् पूर्व्वं कर्त्तव्यम् ॥ ३१ ॥

तत्र विष्णुधर्म्मोत्तरे अभिषेकप्रकरणे—

कार्य्या पौरन्दरी-शान्तिः प्रागेवास्य पुरोधसा ॥ इति

पौरन्दरी-शान्तिः— आथर्व्वणोक्तानाममृताभयादि-शान्तीनां मध्ये प्रसिद्धा ऐन्द्रीशान्तिः ।

अतएव तत्रैव—

का का शान्तिर्भवेत् का वा कस्मिन् कस्मिन् तथाद्भुता। इति पृष्टेन पुष्करेण तासां प्रत्येकं विनियोगकथनावसरे उक्तम् ।

भविष्यत्यभिषेके च परचक्रभयेऽपि च ।
स्वराष्ट्रभेदेऽरिवधे शान्तिरैन्द्री प्रशस्यते ॥ १ ॥ इति

तत्पूर्व्वं कर्त्तव्यमाथर्व्वणिक-शान्तिकल्पे शान्तिसामान्य-विधिकथनावसरे उक्तम् ।

शाकभक्षः पयोभक्षः फलभक्षोऽपि वा पुनः ।
भूत्वा द्वादशरात्रन्तु महाशान्तिं प्रयोजयेत् ॥ २ ॥
[1]बिल्वाहारः फलाहारः पयसा वापि वर्त्तयेत् ।
सप्तरात्रं घृताशी वा महाशान्तिं प्रयोजयेत् ॥ ३ ॥
सप्तरात्रमतोऽन्येन वर्त्तयित्वा यथाविधि ।
महाशान्तिं प्रयुञ्जानः पयसा वर्त्तयेत् सकृत् ॥ ४ ॥
इति

यथाविधीति—

कृच्छ्रप्रकरणगत-धर्म्मप्राप्त्यर्थं तदनन्तरमपि शान्तेः पूर्व्वं विनायकस्नपनं ग्रहयागो नक्षत्रयागो नैर्ऋतयागश्चेति कर्म्माणि कार्य्याणि ।

१ क पुस्तके पद्यमिदं पतितम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुर्य्यान्नक्षत्रसंयोगादनुकूलं यदा भवेत् ।
तदा कर्म्म प्रयुञ्जीत अथ पूज्य विनायकम् ॥ ५ ॥

इति विनायकपूजनस्य—

महाशान्तिं प्रयुञ्जानस्तर्पयित्वा ग्रहान् बुधः ॥

इति ग्रहयागस्य च तत्रत्याभ्यामेव वचोभ्यां महाशान्त्यारम्भे अवश्यं कार्य्यत्वं प्रतीयते । ईशानयागादीनां तत्रत्यप्रकरणपाठादेव महाशान्त्यङ्गत्वप्रतीतेः ।

यद्यपि दिग्यागोऽपि प्रकरणे पठितस्तथापि नासावङ्गं । अथातोऽद्भुतशान्त्यौ दिशो यजत इति अद्भुताख्योत्पातनिमित्तके महाशान्तिप्रयोग एव तस्यावेष्टिवहिःप्रयोगे बार्हस्पत्यादिमध्यनिधानस्येवाङ्गत्वप्रतीतेः प्राचीनप्रयोगकर्त्तृभिस्तदनुसरणाच्च ।

अस्ति चैन्द्या अपि प्रयोगद्वयं । उक्तवचनाभ्यामेकः ।

तृतीयदिनयामे तु रात्रौ च भृगुनन्दन ।
रोहिण्यां वैष्णवे ब्राह्मे वासवे विश्वदैवते ॥ ६ ॥
ज्येष्ठायाञ्च तथा मैत्रे ये भवन्त्यद्भुतां क्वचित् ।
ऐन्द्री तेषु प्रयोक्तव्या शान्तिर्भृगुकुलोद्वह ॥ ७ ॥

इति शास्त्रान्तराच्च द्वितीयः ।

वैष्णव्याद्यष्टादशाथर्व्वणशान्तीनां प्रयोगसाधारणप्रापणे विधिः[१] ।

विष्णुधर्म्मोत्तरे—

सम्भारा ये यथा यत्र यानि द्रव्याणि यो विधिः ।
शाखां प्रति तथा तत्र तत् प्रमाणमिति स्थितिः ॥८॥

---

१ ग पुस्तके साधारणश्चापरो विधिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यः स्वसूत्रमतिक्रम्य परसूत्रेण वर्त्तते ।
अप्रमाणमृषिं कृत्वा सोऽप्यधर्म्मेण युज्यते ॥ ९ ॥
तस्मात् सर्व्वप्रयत्नेन स्वसूत्रं न विलङ्घयेत् ।
प्राक् तत्रोत्तरतन्त्रे द्वे स्वशाखाश्रयणाद्विज[1] ।
सर्व्वकर्म्मसु कर्त्तव्ये मध्ये कर्म्म विधीयते ॥ १० ॥
आथर्व्वणोऽयं कथितो विधिस्ते
संक्षेपतो भार्गववंशमुख्य ॥ ११ ॥ इति

अत्राष्टादशाथर्व्वणशान्तिप्रकरणेऽपि सर्व्वकर्म्मस्विति निर्द्देश उक्तः शान्तिप्रयोगान्तर्गते ये अग्निस्थापनादि पूर्व्वोत्तरतन्त्रे यथा स्वशाखानुसारेण कर्त्तव्ये तथा तदङ्ग-भूतग्रहयागादावपीति प्रापणार्थः ।

आद्यन्तयोः शाखाग्रहणेन च मध्ये सूत्रग्रहणस्य स्वशाखीय-परिशिष्टाङ्गलक्षणत्वप्रतीतेः । स्वशाखीयसूत्र-परिशिष्टादिनापि केनापि ग्रन्थेन ग्रहयज्ञादिविधौ सति शान्त्यङ्गग्रहयज्ञाद्यपि तथैवानुष्ठेयम् ।

अतएव स्वसूत्रानुसारि पूर्व्वोत्तराङ्गमध्ये प्रधानमात्र-मेवाथर्व्ववेदेन विधीयते नतु पूर्व्वोत्तराङ्गानामन्यथाभावं इति ज्ञापयितुं मध्ये कर्म्मविधीयते इत्युक्तं । अतश्च शान्तिप्रयोगमध्येऽग्निस्थापनादिषु केषाञ्चित् आथर्व्वण-विध्यादरः; परेषाञ्च ग्रहयागादौ नित्यवत् समादरः प्रत्यक्षवचनविरोधाद्विद्वद्भिरनादरणीय इति सिद्धम् ।

---

[1] ग प्रत्ययाद्विज ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रथमाभिषेके विशेषान्तरविधिराथर्व्वणानुक्रमणि-
कायाम् ।

अथ राजप्रथमाभिषेके प्रकृतिद्रव्याणि परीक्षेत ।

तद्यथा— रथ-सिंहासनासि-छत्र-चामर-ध्वज-गज-वाजि-वस्त्रालङ्कार-सांवत्सर-चिकित्सकपुरोहितादीन्युपयुक्तानि नोपयोजयेत् । इति

अत्र पुरोहितग्रहणमन्यराजपुरोहितो न स्वीकार्य्यः ।

वृद्धैर्वृतस्यापि पुनर्वरणमवश्यं कार्य्यमित्येतदर्थं न पुनः कुर्य्यादन्यराजपुरोहितमिति वाक्यशेषात् ।

गुरुं वृणुयात् भूपतिर्मधुपर्काद्येन विधिनेति नित्य-वद्वाक्यशेषे वरणविधानाच्च ।

अयञ्चाभिषेकप्रयोगवहिर्भूतो वरणविधिः सर्व्वकर्म्मार्थः, याज्ञवल्क्येन मन्त्रिकरणानन्तरमृत्विग्वरणात् पूर्व्वं पुरोहितञ्च कुर्व्वीतेति तथैवेतद्विधिः । परीक्षेतेतितल्लक्षण-युक्तानि ग्राह्याणीत्येतदर्थं राजलक्षणपूर्व्वकं तदीयपुरोहितादिपदार्थलक्षणानि च विष्णुधर्म्मोत्तरादायुक्तानि ।

नचोपादानकाले लक्षणानामुपादेयपरिच्छेदार्थत्वा-दुपादात्लक्षणकथनं व्यर्थमिति शङ्क्यम् ।

स्वयमीदृशलक्षणो भवेदिति तं प्रत्यपि विधिसम्भवात् यद्वा पूर्व्वराजमरणोत्तरं पुरोहित-सांवत्सराभ्यामितर-प्रजाभिर्वा कस्यचिद्राजाधिकारे संपादितव्ये बहूनां च तत्प्रसक्तौ य एव विहितलक्षणसम्पन्नस्तस्यैव तत् सम्पादन-मुचितमित्येतदर्थं तदिति बोध्यम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# तत्र राजलक्षणम् ॥ ३२ ॥

विष्णुधर्म्मोत्तरे पुष्कर उवाच—

सर्व्वदर्शनलक्षण्यो विनीतः प्रियदर्शनः ।
अदीर्घसूत्रो धर्म्मात्मा जितक्रोधो जितेन्द्रियः ॥ १ ॥

प्रियदर्शनः प्रियं दर्शनं यस्य सः, अस्य[1] राज्ञो दर्शने जाते अन्यस्य इष्टं भवति । अदीर्घसूत्र अवश्यकार्य्याणां कर्म्मणामारम्भे, आरब्धानाञ्च समाप्तौ योऽत्यन्तं न विलम्बते सः ।

स्थूललक्षो महोत्साहः स्मितपूर्व्वाभिभाषकः ।
सुरूपः शीलसम्पन्नः क्षिप्रकारी महाबलः ॥ २ ॥

स्थूललक्षो बह्वर्थदर्शी, महोत्साहः महान् उत्साहः पुरुषार्थसाधनकर्म्मारम्भेऽध्यवसायो यस्य सः ।

ब्रह्मण्यश्चाविसंवादी[2] दृढभक्तिः प्रियम्बदः ।

अविसंवादी ब्राह्मणेषु, दृढभक्तिरिति ब्राह्मणादिष्वेव ।

अलोलुपः संयतवाक् गम्भीरः प्रियदर्शनः ।
नातिदण्डो न निर्दण्डश्चारचक्षुरजिह्मगः ॥ ३ ॥
व्यवहारे समः [3]शास्ति पुत्रेण रिपुणा सह ।
रथे गजेऽश्वे धनुषि व्यायामे च कृतश्रमः ॥ ४ ॥
उपवासतपःशीलो यज्ञयाजी गुरुप्रियः ।
मन्त्रिसांवत्सराधीनः समरेष्वनिवर्त्तकः ॥ ५ ॥

सांवत्सरो ज्योतिर्विद् ।

---

१ ग यस्य । २ क घ पुस्तकद्वये ब्रह्मण्यः शास्त्रसंवादी ।
३ ग प्राप्ते पुत्रे च रिपुणा सह ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कालज्ञश्च कृतज्ञश्च न्टविशेषज्ञ एव च ।

कृतज्ञः परकृतोपकर्म्म न विस्मरति इति सः ।

पूज्ये पूजयिता नित्यं दण्ड्ये दण्डयिता तथा ॥ ६ ॥

षाड्गुण्यस्य प्रयोक्ता च शक्त्युपेतस्तथैव च ।

षड्गुणाः सन्धिविग्रहयानासनद्वैधीभावसंश्रयाश्च षाड्गुण्यं परिकीर्त्तितम् ।

तल्लक्षणं विष्णुधर्म्मोत्तरे उक्तम्—

[1][सन्धिश्च विग्रहश्चैव यानमासनमेव च ।

द्वैधीभावः संश्रयश्च षाड्गुण्यं परिकीर्त्तितम् ॥ ७ ॥]

पणबन्धः स्मृतः सन्धिरसत्कारस्तु[2] विग्रहः ।

जिगीषोः शत्रुविषये यानं यात्राभिधीयते ॥ ८ ॥

विग्रहेऽपि स्वके देशे स्थितिरासनमुच्यते ।

बलार्द्धैर्मारणं यत्र द्वैधीभावं तदुच्यते ॥ ९ ॥

उदासीने मध्यमे वा संश्रयात् संश्रयः स्मृतः । इति

तेषां प्रयोगश्च तत्रैवोक्तः—

समेन सन्धिरन्वेष्यो हीनेन[3] च बलीयसः ।

हीनेन विग्रहः कार्य्यः स्वयं राज्ञा बलीयसा ॥ १० ॥

तत्रापि तस्य पार्ष्णिस्तु बलीयान् न समाश्रयेत् ।

पार्ष्णिः सेनापतिः, न समाश्रयेत् विग्रहं कुर्य्यादित्यर्थः ।

---

१ क पुस्तके [ ] चिह्नितांशः पतितः ।

२ ग अपकारस्तु ।   ३ ग अहीनेन बलीयसं ।

आसीनः कर्म्मविच्छेदो शक्यः कर्त्तुं रिपुर्यदा ।
अशुद्ध पार्ष्णिर्बलवान् द्वैधीभावं समाश्रयेत् ॥११॥
बलिना विगृहीतस्तु यो सन्धेयेत पार्थिवः ।
संश्रयस्तेन कर्त्तव्यो गुणानामधमो गुणः ॥ १२ ॥
बहुक्षय-व्ययायासं तेषां यानं प्रकीर्त्तितम् ।
बहुलाभकरञ्च स्यात् तदा राम समाश्रयेत् ॥१३॥
सर्व्वशक्तिविहीनन्तु यदा कुर्व्वीत[१] संश्रयम् ।
एवं च बुद्धा नृपतिर्गुणानां
काले च देशे च तथा विभागे ।
समाश्रयेत् भार्गववंशमुख्य
एतावदुक्तं नृपतेस्तु कार्य्यम् ॥ १४ ॥ इति

शक्तयः प्रभावोत्साहमन्त्रजास्तिस्रः ।

उक्तैरनुक्तैस्तु गुणैरनेकै-
रलङ्कृतो भूमिपतिस्तु कार्य्यः ।
सम्भूयराष्ट्रप्रवरैर्यथावत्
राष्ट्रस्य रक्षार्थमदीनसत्वः ॥ १५ ॥ इति

याज्ञवल्क्यः—

महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः ।
विनीतः सत्वसम्पन्नः कुलीनः सत्यवाक् शुचिः ॥१६॥

वृद्धसेवकस्तु यो ज्ञानादिवृद्धानां सेवकः, सत्वसम्पन्नो सम्पदापदोर्हर्षविषादरहितः, शुचिर्वाह्याभ्यन्तरशौच-युक्तः ।

---

१ कुर्य्यात्तु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा ।
धार्म्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यविद् ॥ १७ ॥

स्मृतिमान् अवगताविस्मरणशीलः, अक्षुद्रो असद्गुण-द्वेषी, अपरुषः परदोषाकीर्त्तनः, अव्यसनः व्यसनरहितः।

व्यसनान्याह मनुः—

मृगयाक्षो दिवास्वापः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥१८॥
पैशुन्यं साहसो द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥१९॥

एषु सप्त कष्टतमानि यथाह स एव—

पानमक्षः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत् कष्टतमं विद्यात् चतुष्कं कामजे गणे ॥ २० ॥
दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा ॥ २१ ॥
इति

स्वरन्ध्रगोप्तान्वीक्षिक्यां दण्डनीत्यां तथैव च ।
विनीतस्त्वथ वार्त्तायां त्रय्याञ्चैव नराधिपः ॥ २२ ॥

स्वरन्ध्रगोप्ता स्वस्य सप्तसु राज्याङ्गेषु यत्परप्रवेशे शैथिल्यं तत्स्वरन्ध्रं तस्य गोप्ता प्रच्छादयिता।

राज्याङ्गान्याह याज्ञवल्क्यः—

स्वाम्यमात्या जनो दुर्गं कोशो दण्डस्तथैव च
मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते ॥ २३ ॥
इति

महोत्साहाद्युक्तलक्षणो महीपतिः स्वामी, अमात्या मन्त्रि-पुरोहितादयः, जनो ब्राह्मणादिप्रजाः, दुर्गं धन-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दुर्गादि, कोशः सुवर्णादिद्रव्यराशिः, दण्डो हस्त्यश्वरथ-पदातिलक्षणं चतुरङ्गबलं, मित्राणि सहज-प्राकृत-कृत्रिमाणि, एताः स्वाम्याद्या राज्यस्य प्रकृतयो मूल-कारणानि। एवं सप्ताङ्गं राज्यमुच्यते।

आन्वीक्षिक्यामात्मविद्यायां, दण्डनीत्यामर्थयोगक्षेमोप-योगिन्यां, वार्त्तायां कृषि-वाणिज्य-पशुपालनरूपायां धनोपार्ज्जनहेतुभूतायां, त्रय्यां ऋग्यजुःसामसंज्ञायां च विनीतः तत्तदभिज्ञैः प्रावीण्यं नीतः। एवंभूतो नरा-धिपः कार्य्य इति संबन्धः।

अन्यदप्युक्तं महाभारते—मन्त्रिगुणानुक्त्वा—

एतैरेव गुणैर्युक्तो राजा शास्त्रविशारदः।
यष्टव्यो धर्म्मपरमः प्रजापालनतत्परः॥ २४॥
धीरोऽमर्षी शुचिस्तीक्ष्णः काले पुरुषकारवित्।
शुश्रूषुः श्रुतवाक् श्रोता चोहाप्रोह[1]विशारदः॥२५॥
मेधावी धारणायुक्तो यथायुक्तोपपादकः।
दान्तः सदा प्रियाभाषी क्षमावांश्च विपर्य्यये॥२६॥
दानच्छेदे स्वयंकारी साध्वाचारः सुदर्शनः।
आर्त्तहस्तप्रदो नित्यमाप्तामात्यो नये रतः॥ २७॥
नाहंवादी न निर्द्वन्द्वो न यत्किञ्चनकारकः।
न निर्द्वन्द्वः शैत्योष्णादिसहिष्णुः।
कृते कर्म्मण्यमात्यानां कर्त्ता सर्व्वजनप्रियः[2]॥ २८॥

---

१ ग चूहाप्रोह। 　　२ ग भृत्यजनप्रियः।

संगृहीतजनः स्तब्धः प्रसन्नवदनः सदा ।
सदा भृत्यजनावेक्षी अक्रोधी सुमहामनाः ॥ २९ ॥
युक्तदण्डो न निर्द्दण्डो धर्म्मकार्य्यानुशासनात्[१] ।
चारनेत्रः प्रजावेक्षी धर्म्मार्थकुशलः सदा ।
राजा गुणशताकीर्णो [२]यष्टव्यस्तादृशो भवेत् ॥ ३० ॥

इति एतैरेव गुणैर्युक्त [३]इत्यष्टगुणा मन्त्रिलक्षणे द्रष्टव्याः ।

रामायणेऽपि—

धर्म्मात्मा सत्यवादी च शीलवाननसूयकः ।
दान्तः सत्वहितः प्राज्ञः कृतज्ञो विजितेन्द्रियः ॥३१॥
मृदुश्च स्थिरवृत्तिश्च नित्यदीनानुकम्पकः ।
प्रियवादी जितक्रोधो दीर्घदर्शी महामतिः ॥ ३२ ॥
बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ।
तेन तस्यातुलाकीर्त्तिर्यश[४]स्तेजश्च वर्द्धते ॥ ३३ ॥
समाप्तश्च धनुर्वेदे हयपृष्ठे गजे रथे ।
लब्धशस्त्रः शब्दभेदी[५] दूरपाती दृढायुधः ॥ ३४ ॥

इति राजलक्षणम् ॥ ३२ ॥

---

१ ग शासकः ।
२ ग एष्टव्यः ।
३ क ख घ इष्टगुणाः ।
४ ख परा तेजश्च ।
५ ख ग लब्धास्त्रः शब्दवेधी च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ पट्टमहिषीलक्षणम् ॥ ३३ ॥

अत्र—

एवं गुणगणोपेता नरेन्द्रेण सहानघ ।
अभिषेच्या भवेद्राज्ये राज्यस्थेन नृपेण वा ॥ १ ॥
राज्ञाऽग्रमहिषी कार्य्या सर्व्वलक्षणलक्षिता ।

इति विष्णुधर्म्मोत्तरादिवचनैः—

राज्ञा सहाग्रमहिषी अभिषेक्तव्या अथवा अभिषिक्तेन राज्ञा पश्चात् स्वयमभिषेक्तव्येत्युक्तं। यद्वा—वृद्धराज्ञा पुत्रस्य यौवराज्याभिषेककरणे तदग्रमहिष्या सह अभिषेकः कार्य्य इत्याशयेनेति तत्र किं लक्षणापि तल्लक्षणमभिधीयते।

विष्णुधर्म्मोत्तरे पुष्कर उवाच—

राज्ञाग्रमहिषी कार्य्या सर्व्वलक्षणलक्षिता ।
विनीता गुरुभक्ता च ईर्ष्या-क्रोध-विवर्ज्जिता ॥ २ ॥
राज्ञः प्रियहितासक्ता चारुवेशा प्रियंवदा ।
भृताभृतजनज्ञा च भृतानां तत्त्ववेक्षिणी[1] ॥ ३ ॥
अभृतानां जनानाञ्च भृतिकर्म्मप्रवर्त्तिनी ।
रागद्वेषविमुक्ता च सपत्नीनां सदैव या ॥ ४ ॥
भोजनासनयानेन सर्व्वेषामन्ववेक्षणी ।
सपत्नीपुत्रेष्वपि या पुत्रवत् परिवर्त्तते ॥ ५ ॥
मन्त्रिसांवत्सरामात्यान् या च पूजयते सदा ।
ब्राह्मण्या च दयायुक्ता सर्व्वभूतानुकम्पिका ॥ ६ ॥

---

१ ग नन्ववेक्षिणी ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कृताकृतस्य राज्ञाञ्च विदिता मण्डलेष्वपि ।
पुरराजकलत्रेषु प्रीयमाणा मुदान्विता ॥ ७ ॥
दूतादिप्रेषणकरी राजद्वारेषु[१] सर्व्वदा ।
तद्वारेण नरेन्द्राणां कार्य्यज्ञा च विशेषतः ॥ ८ ॥
एवं गुणगणोपेता नरेन्द्रेण सहानघ ।
अभिषेच्या भवेद्राज्ये राज्यस्थेन नृपेण वा ॥ ९ ॥

एवंविधा यस्य भवेत्तु पत्नी
नरेन्द्रचन्द्रस्य महानुभावा ।
वृद्धिं व्रजेत्तस्य नृपस्य राष्ट्रं
सचारकं नात्र विचार्य्यमस्ति ॥ १० ॥

इति पट्टमहिषीलक्षणम् ॥ ३२ ॥

---

१ ग पुस्तके राजदारेषु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ मन्त्रिलक्षणम् ॥ ३४ ॥

इह राजलक्षणे मन्त्रिसांवत्सराधीन इत्येतेन राज्ञा मन्त्र्यधीनेन भवितव्यम् ।

स राज्ञः सर्व्वकार्य्याणि कुर्य्यात् भृगुकुलोद्वह ।

इति वचनेन मन्त्री राज्ञः सर्व्वकर्म्माणि कुर्य्यादित्युक्तं । स च मन्त्री कथमपेक्षित इति तल्लक्षणमभिधीयते ।

विष्णुधर्म्मोत्तरे—

सर्व्वलक्षणलक्षण्यो मन्त्री राज्ञस्तथा भवेत् ।
ब्राह्मणो वेदतत्त्वज्ञो विनीतः प्रियदर्शनः ॥ १ ॥
स्थूललक्ष्यो महात्मा च स्वामिभक्तः प्रियम्बदः ।
महोत्साह इति पाठान्तरं ।
बृहस्पत्युशनःप्रोक्तां नीतिं जानाति सर्व्वतः ॥ २ ॥
रागद्वेषेण यः कार्य्यं न च हन्ति महीक्षितः ।
लोकापवादाद्राजार्थे भयं यस्य न जायते ॥ ३ ॥
क्लेशक्षमस्तु धर्म्मात्मा विजितात्मा जितेन्द्रियः ।
गूढमन्त्रश्च दक्षश्च प्राज्ञो भक्तजनप्रियः ॥ ४ ॥
इङ्गिताकारतत्त्वज्ञो ऊहापोहविशारदः ।
शूरश्च कृतविद्यश्च न च मानी विमत्सरः ॥ ५ ॥
चारप्रचारकुशलः प्राणिभिः प्रणयात्मकः ।
षाड्गुण्यविधितत्त्वज्ञश्चोपायकुशलस्तथा ॥ ६ ॥

उपायाः साम-दान-भेद-दण्डास्तेषु कुशलो यथायोग्यं तत्प्रयोगसमर्थः । उपायाश्च याज्ञवल्क्येनोक्ताः—

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

उपायाः सामदानञ्च भेदो दण्डस्तथैव च ।
[1][सम्यक् प्रयुक्ताः सिद्ध्येयुर्दण्डस्त्वगतिकागतिः ॥ ७ ॥
वेत्ता विधानात्कार्य्याणां नैव कार्य्यातिपातिता ।
समश्च राजभृत्यानां तथैव च गुणप्रियः ॥ ८ ॥]
कालज्ञः समयज्ञश्च कृतज्ञश्च जनप्रियः ।

कालज्ञः शकुनगणिताद्युपायैर्भविष्यत्कार्य्यकालवेलाभिज्ञः । समयज्ञः कार्य्योचितावसरज्ञः । कृतज्ञः कृतानामकृतानाञ्च कर्म्मणामन्वहं वेदिता ।

यथानुरूपमर्हाणां पुरुषाणां नियोजिता ।
राज्ञः परीक्षेत् कार्य्याणि सम्पराये भृगूत्तमः ॥ ९ ॥

संपराये परराष्ट्रप्रवासे ।

कृत्वा निवेदिता राज्ञे कर्म्मणां गुरुलाघवम् ।
शत्रुमित्रविभागज्ञो विग्रहस्य च तत्त्वविद् ॥ १० ॥
स राज्ञः सर्व्वकार्य्याणि कुर्य्याद्भृगुकुलोद्वह ।
विज्ञातानि[2] तथा कुर्य्यान्नाज्ञातानि महीक्षितः ॥ ११ ॥
अज्ञातानि नरेन्द्रस्य कृत्वा कार्य्याणि भार्गव ।
अचिरेणापि विद्वेषं मन्त्री समधिगच्छति ॥ १२ ॥
करोति यस्तु कार्य्याणि विदितानि महीपतेः ।
भेदो न तस्य भवति कदाचिदपि भूभुजा ॥ १३ ॥

---

१ क पुस्तके नास्ति [ ] चिह्नितपद्यः । २ ग विजितानि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवंगुणो यस्तु भवेत्तु मन्त्री
कार्य्ये वचस्यभिरतः स राज्ञः ।
राज्यं स्थिरं स्या विपुला च लक्ष्मी-
यशश्च दीप्तिर्भुवनत्रयेऽपि ॥ १४ ॥ इति ।

महाभारते—

कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानपारगम् ।
सर्व्वशास्त्रार्थतत्त्वज्ञं सहिष्णुं देशजं तथा ॥ १५ ॥
कृतज्ञं बलवन्तञ्च क्षान्तं दान्तं जितेन्द्रियम् ।
अलुब्धं लघुसन्तुष्टं[१] स्वामिमित्रबुभूषकम् ॥ १६ ॥
सचिवं देशकालज्ञं सत्वसंग्रहणे रतम् ।

सत्वं द्रव्यम् ।

सततं युक्तमनसं हितैषिणमतन्द्रितम् ।
युक्ताचारं स्वविषये सन्धिविग्रहकोविदम् ॥ १७ ॥
राज्ञस्त्रिवर्गवेत्तारं पौरजानपदप्रियम् ।
त्रिवर्गश्चापि यः प्रोक्तस्तमिहैकमनाः शृणु ॥ १८ ॥
क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गं परमं तथा ।
धर्म्मश्चार्थश्च कामश्च सेवितव्यो ह्यकामतः ॥ १९ ॥
इङ्गिताकारतत्त्वज्ञं पात्रापात्रविशारदम् ।
हस्त्यश्वशिक्षातत्त्वज्ञमहङ्कारविवर्ज्जितम् ॥ २० ॥
प्रगण्डं दक्षिणं कान्तं बलिनं युक्तकारिणम् ।
धौक्ष्यं धौक्षसमाकीर्णं सर्व्वेषां सुखदर्शनम् ॥ २१ ॥

धौक्ष्यं तीक्ष्णम् ।

---

१ ख ग लब्धसन्तुष्टं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नायकं नीतिकुशलं गुणचेष्टासमन्वितम् ।
अस्तब्धं प्रसृतं श्लक्ष्णं मृदुवादिनमेव च ।
धीरं श्लक्ष्णं महर्द्धिं च देशकालोपपादकम् ॥ २२ ॥

श्लक्ष्णं स्निग्धम् ।

सचिवं यः प्रकुरुते न चैनमवमन्यते ।
तस्य विस्तीर्य्यते राष्ट्रं ज्योत्स्ना ग्रहपतेरिव ॥ २३ ॥

इति

इति मन्त्रिलक्षणम् ॥ २४ ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ पुरोहितलक्षणम् ॥ ३५ ॥

योगक्षेमो हि राष्ट्रस्य राजन्यायत्त उच्यते ।
योगक्षेमो हि राज्ञो हि समायत्तः पुरोहिते ॥ १ ॥
यत्राहष्टभयं क्षत्त प्रजानां शमयत्युत ।
हस्त्यश्वराजबाहुभ्यां तद्राष्ट्रं सुखमेधते ॥ २ ॥

इत्यादि महाभारतवचनैः सर्व्वं राज्यं पुरोहितायत्तमवगम्यते । यत्र एवमवगम्यते तत्र राष्ट्रं सुखार्थम् ।

त्रिवेदं ब्राह्मणं राजा पुरोहितमथर्व्वणम् ।
पञ्चकालविधानज्ञं वरयेत्तं सुदर्शनम् ॥ ३ ॥

इति वचनेन पुरोहितं वृणुयादित्युक्तम् ।

तत्र स पुरोहितः किं लक्षणोऽपेक्षितः इति तल्लक्षणमुच्यते ।

याज्ञवल्क्यः—

पुरोहितञ्च कुर्व्वीत दैवज्ञमुदितोदितम् ।
दण्डनीत्याञ्च कुशलमथर्व्वाङ्गिरसे[१] तथा ॥ ४ ॥

सर्व्वेषु दृष्टार्थेषु कर्म्मसु पुरोहितं दानमानसत्कारैरात्मसम्बन्धं कुर्य्यात् । दैवज्ञं ग्रहोत्पातप्रशमनादिवेदितारं । उदितोदितं उदितैर्विद्यानुष्ठानादिभिरुदितं समृद्धं । दण्डनीत्यामर्थशास्त्रे कुशलं, अथर्व्वाङ्गिरसे शान्त्यादिकर्म्मणि च कुशलम् ॥

---

१ क ख घ अथर्व्वणिरसे तथा ।

पुष्कर उवाच—

अव्यङ्गलक्षणोपेतमनुकूलं प्रियंवदम् ।
अथर्व्ववेदविद्वांसं यजुर्वेदविशारदम् ।
द्विवेद[1]ब्राह्मणं राजा पुरोहितमथर्व्वणम् ॥ ५ ॥

अथर्व्ववेदविद्वांसमित्याद्युक्तानेकगुणयुक्तः पुरोहितो यदा न प्राप्यते, तदा अन्यो गुणहीनः केवलमभिचाराद्युपयुक्ताथर्व्ववेदविदपि पुरोहितः कर्त्तव्य इत्यथर्व्वणमिति पुनरुक्तम्[2] ।

पञ्चकल्पविधानज्ञं वरयेत्तु सुदर्शनम् ।
नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः ।
चतुर्थो शिरसा कल्पः शान्तिकल्पस्तु पञ्चमः ॥ ६ ॥
पञ्चकल्पविधानज्ञमाचार्य्यमाप्य भूपतिः ।
सर्व्वोत्पातप्रशान्तात्मा भुनक्ति वसुधां चिरम् ॥ ७ ॥
स च राज्ञस्तथा कुर्य्यान्नित्यं कर्म्म सदैव च ।
नैमित्तिकं तथा काम्यं दैवज्ञवचने रतः ॥ ८ ॥
न त्याज्यस्तु भवेद्राजा दैवज्ञेन पुरोधसा ।
पतितस्तु भवेत्त्याज्यो[3] नात्र कार्य्या विचारणा ॥९॥
तथैवापतितौ राम न त्याज्यौ तौ महीभुजा ।
तयोस्त्यागे नरेन्द्रस्य राज्यभ्रंशं विनिर्द्दिशेत् ।
दुर्गतिं परलोके च बहुकालमसंशयम् ॥ १० ॥

अपतितौ न त्याज्यावितिवदता पतितौ दैवज्ञपुरोहितौ त्याज्यावित्यभ्यनुज्ञातं भवति ।

---

१ ग द्विवेदं । २ ख उपादानं ।
३ क ख घ भवेद्याज्योः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सांवत्सरो विरुद्धस्तु त्याज्यो राज्ञा पुरोहितः ।
पुरोहितस्तथा राज्ञो यथा माता यथा पिता ॥११॥
अदृष्टमस्य व्यसनं हन्यात् दैवोपघातजम् ।
ब्राह्मणे निष्कृतिस्तस्य कुतः शक्या महीभुजा ॥१२॥
यौ च तौ राज्ञो विद्वांसौ सांवत्सरपुरोहितौ ।
वृत्त्युच्छेदे तयो राज्ञः कुलं त्रिपुरुषं व्रजेत् ॥ १३ ॥
नरकं वर्ज्जयेत् तस्माद्वृत्तिच्छेदं तयोः सदा ।
स्थावरेण विभागश्च तयोः कार्य्यो विशेषतः ॥ १४ ॥
स्वामी राजा यथा राम तथा तौ नात्र संशयः ।
एकस्मिंस्तु मते राज्यं तयोरेवान्यतः कथम् ॥ १५ ॥
स्थावरेणार्चयेद्राजा वर्त्तमाने विशेषतः ।
अनुरूपेण धर्म्मज्ञौ सांवत्सरपुरोहितौ ॥ १६ ॥

भाव्यं सदा भार्गववंशचन्द्र
पुरोहितेऽनन्यसमेन राज्ञा ।
राज्ञो यथा सर्व्वजनेन भाव्यं
विद्वान् प्रभुः स्यान्नृपतेः पुरोधाः ॥ १७ ॥

इति पुरोहितलक्षणम् ॥३५॥

# अथ ज्योतिर्विल्लक्षणम् ॥ ३६ ॥

अथ—सांवत्सरं नृपो गत्वा वरयेत् प्रयतः शुचिः ।

इति विष्णुधर्म्मोत्तरेण राजा किंलक्षणम् सांवत्सरं वृणुयादिति तल्लक्षणमुच्यते ।

विष्णुधर्म्मोत्तरे पुष्कर उवाच—

सर्व्वलक्षणलक्षण्यं विनीतं प्रियदर्शनम् ।
पुरुषं वेषसम्पन्नं नित्यमुज्जितदर्शनम् ॥ १ ॥
[1]प्रज्ञातवादिनं धीरं धर्म्मनिष्ठं जितेन्द्रियम् ।
त्रिस्कन्धं ज्ञानकुशलं द्वादशाश्रयपारगम् ॥ २ ॥
अव्यङ्गं नाधिकाङ्गञ्च वेदवेदाङ्गपारगम् ।
चतुःषष्ठ्यङ्गतत्त्वज्ञमूहापोहविशारदम् ॥ ३ ॥

त्रिस्कन्धा होरागणितसंहिता, आश्रया ग्रहसंस्थानानि द्वादशमेषादिराशयस्तत्पारगं शत्रुमित्रोच्चनीचादिविवेककुशलम् ।

तथा चतुःषष्ठ्यङ्गानि च यथा वेदस्य षडङ्गान्येवं ज्योतिःशास्त्रस्य तेषां तत्त्वज्ञं अर्थतत्त्वज्ञातारं । तानि चाङ्गानि गर्गेणोक्तानि ।

यथैव वेदस्याङ्गानि षडुक्तानि मनीषिभिः ।
चतुःषष्टिस्तथाङ्गानि ज्योतिषस्य विदुर्बुधाः ॥ ४ ॥
ज्योतिषामयनाङ्गानि चतुःषष्टिमतः पठेत् । इति

तत्र चतुर्विंशतिरङ्गानि चत्वारिंशदुपाङ्गानि । अङ्गान्यनुक्रमेणाह स एव—

---

१ ग अदीनवादिनं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

येषामग्रे कर्म्मगुणश्चन्द्रमार्गस्त्वनन्तरम्।
नक्षत्रकेन्द्रभं चैव द्विवर्गः प्रथमः स्मृतः ॥ ५ ॥
राहौ वृहस्पतौ शुक्रे धूमकेतौ शनैश्चरे।
अङ्गारके बुधेऽर्के च वारानष्टौ ततः पठेत् ॥ ६ ॥
चक्रेष्वन्तरचक्रञ्च मृगचक्रं तथैव च।
भचक्रं वातचक्रञ्च चक्राङ्गेषु चतुष्टयम् ॥ ७ ॥
वास्तुविद्याङ्गविद्या च वायसानां तथैव च।
ज्ञेयास्तिस्रस्तु विद्याश्च[1] वृद्धगर्गमताः शुभाः ॥ ८ ॥
स्वातियोगमथाषाढारोहिणीयोगमेव च।
कृत्स्नानेतान् विजानीयात् योगांश्चैव विशेषतः ॥ ९ ॥
अगस्तिचारो जनपदव्यूहश्च सलिलं ततः।
रहस्यं चेत्यथाङ्गानां चतुर्विंशति दर्शिता ॥ १० ॥

कर्म्मगुणाः तिथिनक्षत्रकरणमुहूर्त्तानां गुणाः।
तदुक्तं गर्गेण—

अथातस्तिथिनक्षत्रमुहूर्त्तकरणात्मकम्।
चतुर्व्यूहं कर्म्मगुणं गर्गेणोक्तं यथाविधि ॥ ११ ॥
तिथिनक्षत्रकरणमुहूर्त्तानाञ्च सम्पदः।
तस्माच्चतूर्णामेतेषां सम्पदा कर्म्म कारयेत् ॥ १२ ॥

इति चन्द्रमार्गः।

वेदविद्या [2]वयोवृद्धं सर्व्वशास्त्रविशारदम्।
क्रौष्टुकिः प्रयतो गर्गमपृच्छत् सोमसम्भवम् ॥ १३ ॥
कुतः समुत्थितः सोमः केन सृष्टः किमात्मकः।

इत्यादि गर्गोक्तिः।

---

१ ग विद्येताः। २ ख तपोवृद्धम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नक्षत्रकेन्द्रमेकविंशतिनक्षत्राणि ध्रुवाणि कतिनक्षत्राणि मृदूनीत्यादि चक्राणि शुभशकुनाः अङ्गविद्या पुंसंज्ञकादत्यङ्गविशेषस्य स्पर्शनदर्शनेन भाविसम्पत्फलविशेषकथनम् ।

वायसविद्या काकशकुनादयः । आषाढा पूर्व्वाषाढा योगाः स्वाती पूर्व्वाषाढा रोहिणीनक्षत्रचन्द्रयोगो वृष्टिसूचकः । जनपदव्यूहः—दिग्देशजात्युपसर्गा येन जायन्ते त्वनागताः । जनपदव्यूहं नैष्ठिकं गदतस्तथा । इति गर्गेणोक्तः । सलिलं सलिलज्ञानम् ।

उपाङ्गान्यप्याह स एव ।

अत ऊर्द्धं प्रवक्ष्यामि उपाङ्गानीह नामतः ।
आनुपूर्व्वविधानेन चत्वारिंशतमेकतः ॥ १४ ॥
ग्रहकोषो ग्रहयुद्धं ग्रहशृङ्गाटकं ततः ।
क्षत्यं ग्रहेश्वराणाञ्च ग्रहपाकास्तथैव च ॥ १५ ॥
नृपयाचाग्निवर्णश्च सेनाव्यूहस्तथैव च ।
मयूरचित्रोपनिषद् उपहारश्च शान्तयः ॥ १६ ॥
औत्पातिकतुलाकोशौ भवस्कन्दोपकारकम् ।
सर्व्वभूतरुतञ्चैव तथा पुष्पलता विदुः ॥ १७ ॥
उपानहोस्तथाछेदो वस्त्रछेदस्तथैव च ।
क्षत्त्रं भुवनकोषञ्च गर्भाधानोदगर्गलैः ॥ १८ ॥
निर्घातो भूमिकम्पस्तु परिवेशास्तथैव च ।
ऋतुस्वभावाः सन्ध्ये च तथोल्काश्चोपधारयेत् ॥ १९॥

ग्रहकोशो ग्रहाणामुत्पत्तिवर्णादिना शुभाशुभफलकथनं, ग्रहयुद्धं भौमादिपञ्चकग्रहसंयोगः, ग्रहशृङ्गाटकं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ग्रहाणामुत्पत्तिवर्णसंस्थानराशिभिः शुभाशुभफलनिर्देशः । ग्रहेश्वराणां कृत्यं ग्रहजन्मनिर्वचनादि, ग्रहपाकाः ग्रहाणां समयविशेषे फलदातृत्वं, नृपयात्रा राज्ञां यात्राकालः, अग्निवर्णो होमकालेऽग्नेः शुभाशुभसूचकं लक्षणं, सेनाव्यूहः कालविशेषेण राज्ञो जयाय तत्कथनं, मयूरचित्रं ग्रहोत्पातः, उपनिषद् भुवनपरिमाण-ग्रहनक्षत्रगत्यादि, उपहारो बलिः, शान्तयो जनमार्य्याद्युत्पातशान्तयः, उत्पातो नदी-वृक्षवाय्वादिवैकृतं, तुलाकोशः अन्नादितिलेन तत्स-मार्घासमार्घकथनं । भवस्कन्दोपकारकं भूतभविष्ययुग-धर्म्मादिकथनं शिवगुहसम्वादः, सर्व्वभूतरुतं सर्व्वप्राणिनां शब्दज्ञानं, पुष्पलता वृक्षादिपुष्पोद्गमेन धान्यवृद्ध्यादि-ज्ञानं । उपानहोच्छेदः स्थलविशेषच्छेदेन फलविशेष-कथनं, एवं वस्त्रच्छेदोऽपि । भुवनकोष इन्द्रध्वजमेषगज-पुंस्त्रीलक्षणादि । गर्भज्ञानं एषु गर्भधारणेन वृष्टिविचारः । उदगर्गलः जलवृद्धिक्षयप्रयुक्त-सुभिक्षदुर्भिक्षविचारः । ऋतुस्वभावास्तु तदृतुसाधारणलक्षणानि, सन्ध्या उद-यास्तरागेण फलविशेषकथनं, उल्का नभस उल्कापातः । अत्र ग्रहपाका अष्टौ, ऋतुस्वभावाः षट्, एवं चत्वारिंश-दुपाङ्गसंख्यापूरणं भवति ।

एवञ्चाङ्गोपाङ्गमेलनेन चतुःषष्टिर्भवति ज्योतिष-स्याङ्गानि ।

भूतभव्य-भविष्यज्ञं गणितज्ञं विशेषतः ।
विचन्द्रा शर्व्वरी यद्वत् मुकुटञ्च च्युतोपलम् ॥ २० ॥

P. P. Ac. Gunratnasuri M.S.                    Jin Gun Aaradhak Trust

गणितेन तथाहीनं ज्योतिषं नृपसत्तम ।
आस्तिकं श्रद्दधानञ्च अनुकूलं महीपतेः ॥ २१ ॥

सांवत्सरं नृपो गत्वा वरयेत् प्रयतः शुचिः ।
येनाभिषिक्तो नृपतिर्विनष्टस्तु नराधिप! ॥ २२ ॥

सांवत्सरं न तं विद्वान् वरयेन्नृपसत्तम ।
न हीनाङ्गं न वाचालं न च निष्प्रतिभं नृपः ॥२३॥

कुवेशं मलिनं चण्डं नास्तिकं पापनिश्चयम् ।
भिन्नवृत्तिं न वरयेत् वरयेत् सगुणं सदा ॥ २४ ॥

वरयित्वा तु वक्तव्यः स्वयमेव महीभुजा ।
यथैवाग्निमुखा देवास्तथा राजमुखाः प्रजाः ॥ २५ ॥

यथैवाग्नेर्मुखं मन्त्राः राज्ञां सांवत्सरस्तथा ।
त्वं मे माता पिता चैव देशिकश्च गुरुस्तथा ॥ २६ ॥

दैवं पुरुषकारश्च ज्ञातव्यश्च सदा त्वया ।

देशिकः आज्ञाप्रदः ।

मम धर्म्मज्ञ भद्रं ते राज्यं साधारणं हि ते ॥ २७ ॥

शमनीयोऽशुभो दैवस्त्वयैव मम शान्तिभिः ।
पौरुषेण पदं कार्य्यं समरे च सदा मम ॥ २८ ॥

अशुभो दैवः अशुभादृष्टम् ।

तेनोद्दिष्टौ च वरयेद्राजा मन्त्रिपुरोहितौ ।
तेनोद्दिष्टाञ्च वरयेत् महिषीं नृपसत्तमः ॥ २९ ॥

ततोऽभिषेकसम्भारं तस्य कुर्य्यात् स दैववित् ।
कुञ्जरं तुरगं कुर्य्यात् तस्य राज्ञः परीक्षितम् ॥३०॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भद्रासनञ्च छत्रञ्च वालव्यजनमेव च।
खड्गं चक्रं तथा चापं रत्नानि विविधानि च ॥ ३१ ॥
राज्ञो मृतस्य ये त्वासन् सर्व्वे चैते नराधिप।
न ते कार्य्या नरेन्द्रस्य तेन वेदविदा तथा ॥३२॥
कामं सांवत्सरः कार्य्य अलाभेऽन्यस्य भूभुजा।
गुणाधिकेऽस्य नो कार्य्या येऽन्येऽचाभिहिता मया ॥३३॥

मृतराज्ञो ये ते प्राचीनाः पदार्था भद्रासन-छत्र-चामर-खड्ग-प्रभृतय आसन् ते नूतनराज्ञे न देया किन्तु नूतना एव कर्त्तव्याः।

दैवज्ञश्च पूर्व्वज्योतिर्विदपेक्षया गुणाधिकश्चेत् प्राप्यते, तदा प्राचीनं विहाय नूतनः कर्त्तव्यः। नूतनदैवज्ञस्य गुणाधिकाभावे तु पुरातन एव दैवज्ञः स्थापनीयः।

भद्रासन-छत्र-चामर-खड्गादीनान्तु पूर्व्वेषां गुणाधिक्ये नूतनानां निर्गुणत्वेऽपि सगुणान् पुरातनान् विहाय नूतना एव कर्त्तव्या इति।

न तत्र नागाः सुभृता न योधा
राज्ञो न माता न पिता न बन्धुः।
यत्रास्य कार्य्यं भवतीह विद्वान्
सांवत्सरो धर्म्मविदः प्रयत्नतः ॥ ३४ ॥

इति ज्योतिर्विल्लक्षणम् ॥२६॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ शान्तिप्रयोगः ॥ ३७ ॥

कर्त्ता शान्तेः प्राक् द्वादशरात्रं सप्तरात्रं वा शाकाद्याहारी ब्रह्मचारी भवेत्। षड्रात्रं त्रिरात्रमेकरात्रं वेति पक्षान्तराणि केचिदाथर्व्वणिकाः।

ततो महति कार्य्ये मासद्वयमेकमासं चाघमर्षणसूक्तजपः कार्य्यः। स्वल्पकार्य्ये त्वरया कार्य्ये कर्त्तव्ये वा सप्तवारमप्यघमर्षणजपं कृत्वा शान्तिः कर्त्तव्येत्यप्याहुः।

ततः षोडशहस्तं मण्डपं तन्मध्ये वेदिकामष्टहस्तां विधाय उत्तरतः पुनर्होमात्मकग्रहमखचिकीर्षायां द्विहस्तं कुण्डं मेखलात्रयसंयुतं विधाय अन्यथा त्वेकहस्तं विधाय ध्वजान् पताकावितानं इन्द्रायुधध्वजादीनि संपादयेत्।

चित्र-धूम्र-नील-कृष्ण-पाण्डुर-रक्त-श्वेत-पीता ध्वजा ३ पताका द्विगुणा महाध्वजञ्च श्वेतं कुर्य्यात्।

इन्द्रायुधाश्चित्र-धूम-नील-कृष्णाः सपाण्डुराः।
रक्त-पीत-श्वेतवर्णाः पताकाः षोडश स्मृताः ॥ १ ॥

इति परिशिष्टात्।

अन्योऽपि विशेषस्तत्रोक्तः—

कलशान् षोडशांस्तत्र चोपरिष्टात् महाध्वजः।
वस्त्रेणाच्छादितान् कुर्य्यात् सहिरण्यान् पृथक् पृथक् ॥ २ ॥ इति।

स्नानादिनित्यक्रियान्ते देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणराज्याभिषेकाङ्गत्वेन ऐन्द्रीमहाशान्तिं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

करिष्य इति संकल्प्य गणेशपूजन-स्वस्तिवाचन-मातृका-पूजन-वसोर्धारा-नान्दीश्राद्धानि कृत्वा आचार्य्यादिवरणं कुर्य्यात्।

तत्र पूर्व्ववृतपुरोहितस्याचार्य्यत्वेन वरणं यथाचारम्।

आचार्य्यस्तु यथा स्वर्गे शक्रादीनां वृहस्पतिः।
तथा त्वं मम यज्ञेऽस्मिन् आचार्य्यो भव सुव्रत ॥ ३ ॥
यथा चतुर्मुखो ब्रह्मा सर्व्वदेवमयः प्रभुः।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम[1] ॥ ४ ॥

इति ब्रह्मणः।

अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया।
सुप्रसन्नाः प्रकुर्व्वन्तु शान्तिकं विधिपूर्व्वकम् ॥ ५ ॥

इति ऋत्विजां।

सदस्यमपि यथाचारं वृत्वा सर्व्वेभ्यो मधुपर्कं दत्त्वा मण्डपप्रतिष्ठान्ते पुरोहितो वयोयन्ति, इति कौशिक-गृह्योक्तेन शान्तिपाठेन इन्द्र जुषस्व इति सप्तभिश्च कुम्भे पुण्यनद्यादिजलमासिञ्चेत्। तेन कर्त्ता यजमानश्चाचम्य वेदिं सम्भारांश्च प्रोक्षेत्। सर्व्वत्रैवमेवाभ्युक्षणान्ते पञ्च-गव्येन चाभ्युक्षणम्।

अभ्युक्ष्य शान्तितोयेन पञ्चगव्येन चासकृत्।
गोमयेनोपलिप्यादौ पूषयेद्वर्णकैः पृथक् ॥ ६ ॥
पुष्पैश्च विविधैः शुभ्रैः फलैश्चाप्यर्च्चयेद्बुधः।

इति ब्रह्मयागपरिशिष्टोक्तेर्महाशान्तौ च ब्रह्मयाग-

---

१ ग आचार्यो भव सुव्रत।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वन्मण्डपकरणस्य पूर्व्वैः क्रियमाणत्वात्। कुण्डे स्वगृह्योक्त-विधिना अग्निं प्रतिष्ठाप्य आज्यस्य वेदेश्च संस्कारं कुर्य्यात्। तत्र स्रुवश्चान्दनः। पौष्टिके राजतं विधाय ताम्रञ्च विजयावहम्।

अमृतादौ तु विज्ञेयश्चान्दनः सिद्धिदः स्रुवः।

इति परिशिष्टात्।

द्वादशप्रसृतिपूर्णया स्रुचा तिष्ठन् समास्ते[1] इति सूक्तेन पूर्णाहुतिं हुत्वोपविश्य स्रुवेणाज्याहुतीर्जुहुयात्।

दिवः पृथिव्या पर्य्यन्तरीक्षादितिसूक्तेन आकूतिदेवी-मिति तिसृभिः, कामस्येन्द्रस्य वरुणस्येति षड्भिः, एकयेवेति कश्चित् इन्द्रो राजेत्येकयागः, स्वगृह्योक्तविधिना पूर्व्वो-त्तराङ्गविशिष्टं होमं समाप्य तस्यामेव रात्रौ आथर्व्वण-विधिना विनायकस्नपनम्। अर्द्धरात्रे ग्रामचतुष्पथे नगर-चतुष्पथे वा चतुर्हस्तं चतुरस्रं गोमयेनोपलिप्य, तस्मिन् देशे आग्नेय्यादिषु कोणदिक्षु प्रादक्षिण्येन चतुरः शोभन-कलशान् स्वगृह्योक्तविधिना संस्थाप्य, वरुणपूजान्तं कृत्वा, तस्य मण्डपस्य पूर्व्वभागे वा इन्धानिर्लक्ष्यमिति सूक्तेन शालकटं कटमावाहयामि, कुष्माण्ड-राजपुत्र य उत्सृत-मावाहयामि, देवयजनमावाहयामि, इत्येकैकत्र सहितेन मृन्मयांश्चतुरो विनायकान् संस्थाप्य, तद्दक्षिणपार्श्वे मृन्मयीं गौरीं उशीरपत्रपुत्रिकामिन्द्राणीञ्च संस्थाप्य, तत्र तत्तन्नाममन्त्रैर्देव्या विनायकानाञ्च पूजां विधाय,

---

[1] समाप्नोति।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मण्डलमध्ये अष्टदलं कृत्वा तत्रानडुहश्चर्म्मास्तीर्य्य भद्रासनोपविष्टेन स्वस्तिवाचनं कार्य्यम्। ततश्चालन्यां मृगाखूत्करमृदं कुलालमृदं नदीकूल-पुरद्वार-वल्मीकावधूतवेश्याङ्गन-राजाङ्गन-मृदो गुग्गुलु-रोचन-व्रीह्यादिसर्व्वबीजानि पद्मरागेन्द्रनील-मौक्तिक-वैदूर्य्य-प्रवालानि मधुसर्पिषी चेति सम्भारान् निक्षिप्य सम्भारचालनीं राज्ञः शिरसि ब्राह्मणा धारयेयुः।

आचार्य्य आग्नेयकलशं प्रथममादाय चालनीव्यवधानेन तमभिषिञ्चेत्।

पवित्रं शतधारमृषिभिः पावनं कृतम्।
तेन त्वामभिषिञ्चामि पावमानी पुनन्तु ताः ॥ ७ ॥
या तेऽलक्ष्मीर्यया [१]पाप्मा हृदये शाश्वतोदरे[२]।
उर्व्वोरुपस्थे पाणौ च तामितो नाशयाम्यहम् ॥ ८ ॥
या शिरसि ग्रीवायां पाणी पादौ च सेवते।
श्रोण्यां पृष्ठे तु याऽलक्ष्मीस्तामितो नाशयाम्यहम् ॥ ९ ॥

प्राचीदिशमवधाय इन्द्रदेवताकामैन्द्रीं परिषदं याः कन्या ये सिद्धा इन्द्रेण दत्ता औषधय आपो वरुणसम्मितास्ताभिस्त्वामभि तु त्वा। दक्षिणां दिशमवधाय यमं दैवतं यामीं परिषदं याः कन्याः ये सिद्धा यमेन दत्तामिता तु त्वा। प्रतीचीं दिशमवधाय वरुणं दैवतं वारुणीं परिषदं याः कन्या वरुणेन दत्तामिता तु त्वा। ध्रुवं दिशमवधाय विष्णुदैवतं वैष्णवीपरिषदं याः कन्या विष्णुना

१ ग यः पाप्मा। २ ख पार्श्वतोदरे।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दत्ता पुनन्तु त्वा। मध्यां दिशमवधाय वायुर्दैवतं वायवी-परिषदं वायुना दत्ता पुनन्तु त्वा। ऊर्द्धं दिशमवधाय बृहस्पतिर्दैवतं बार्हस्पत्यां परिषदं बृहस्पतिना दत्ता ओषधयः पुनन्तु त्वा।

सर्व्वा दिशः सर्व्वानन्तर्देशानवधाय ब्रह्माणं दैवतं ब्राह्मीं परिषदं ताः कन्या ब्रह्मदत्ताः पुनन्तु त्वेति मन्त्रैः प्रपतेन्नः पापीरलक्ष्मीरिति चतुर्भिश्च एतन्मन्त्रावृत्या त्रिभिः कलशैरेवमेवाभिषेके कृते।

अथ स्नातस्यार्द्रराचे सद्यःकृतगौरसर्षपतैलेन सद्यो-मन्थनोद्भवेन घृतेन वा उडुम्बरवृक्षस्नुवेण कुशान्तर्हित-शिरसि जुहुति, शालकलङ्कटाय स्वाहा, कुष्माण्डराज-पुत्राय स्वाहा, उत्पाताय स्वाहा, देवयजनाय स्वाहा इति यथा लिङ्गत्यागः।

ताम्रमयेनेत्यपव्याख्यानं संभविनः शास्त्रान्तरसंवाद-स्यादस्याद्देयत्वात्।

ततो माषचूर्णेन शिर उद्वर्त्य स्नात्वा भुक्तवासाः[1] श्वेत-चन्दनधारी गौरीमुपतिष्ठते इति।

भगवति भगं मे देहि, धनवति धनं मे देहि, पुत्रवति पुत्रं मे देहि, सर्व्ववति सर्व्वान् मे देहि। इत्येनेनैव मन्त्रेण पुनः प्रार्थयेत्।

अथेन्द्राणि भगवति सर्व्वभूतेश्वरि देवि शरणं त्वामह-मागतः सौभाग्यकामः सुभगे [2]महिमविनायका नित्य-मिति।

---

१ ग शुक्लवासाः। २ ग जहि मह्यं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथाचार्य्यः चतुर्षु नवशूर्पेषु चतुर्भिर्ब्राह्मणैरुपकॢप्ता-नुपहारान् चतुर्भ्यो विनायकेभ्य उपहरेत्।

तांश्च शुक्लरक्तपुष्पाणि नवीनेषु शूर्पेषु गुणान् फली-कृतान् अगुणांश्च अफलीकृतान् तण्डुलमिष्टं पक्वमामञ्च धाना मत्स्यान् तांश्च शुक्लशष्कुलीः पुरोडाशं कुल्माषान् मुद्गान् सगुडान् गज-शिग्रु-भूस्तृणमूलकसहितान् सुगन्धि-पानं मरीचपानं सुरापानमिति प्रतिशूर्पं कारयेत्।

मत्स्यास्त्रयः प्रतिशूर्पं तथा शष्कुल्यः पुरोडाशशक्तु एकच।

ततः स एक विनायकमुपस्थानं श्येनोऽभिमुखो वकः पक्षी सिंहः कलङ्कलीकलहभीरुर्विनायकः कुब्जः कुष्माण्ड-राजः पुत्रोऽहैमवतो जम्बूको विरूपाक्षः कलिङ्गकुमारो शूकरः क्रोधी वैश्रवणाय राज्ञे नमो यस्तिष्ठति वैश्रवणस्य द्वारे कुब्जः करालो विनतो विनायकस्तमहं शरणं प्रपद्ये।

ब्रह्मचारिणममुष्यकामं इमं संवर्द्धय वैश्रवणाय राज्ञे नमः। इति प्रतिविनायकं मन्त्रावृत्या कुर्य्यात्। अमुष्येति स्थाने राज्ञो नाम वर्म्मान्तं, इममित्यस्य स्थाने राज्याभि-षेकमिति वदेत्।

अथ श्वोभूते कृतसन्ध्यावन्दनः सूर्य्यमुपतिष्ठते।

नमस्ते अस्तु भगवन् शतरश्मे तमोनुद।

जहि मे देव दौर्भाग्यं सौभाग्येन मां संसृज॥ १०॥ इति

ततो ब्राह्मणभोजनञ्चैव गोमिथुनं हिरण्यं वास-श्चाचार्य्याय दद्यात्। अन्येभ्यश्च यथाशक्ति हिरण्यमिति विनायकस्नपनं। अथवा पूर्व्वोक्तं समाप्येति पूर्णाहुतिं जुहुयादिति केचित्॥३७॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ द्वितीयदिनविहित-ऐशानयागः ॥ ३८ ॥

देशकालोच्चारणान्ते ऐन्द्री-महाशान्त्यङ्गत्वेन ऐशान-यागं करिष्य इति संकल्प्य ब्रह्मवरणं सदस्यवरणञ्च ।

स च यजमान शाखोक्तपाकयज्ञविधानेन अग्नि-प्रतिष्ठान्तं कृत्वा तदीशानदिशि वेद्यां प्रतिमायामीशान-मावाह्य तदीशानदिशि रुद्रकलशं प्रतिष्ठाप्य उभय-त्रेशानाय नम इति सप्रणवमन्त्रेण पूजां विधाय—कलशे यजमानशाखीयरुद्रजपं कृत्वा तत्रत्यविधिनैव निर्वापादि-पूर्व्वकं चरुमासाद्याज्यभागान्तं चरुमवदाय, धाता दधातु न अङ्गिरा ईशानो गायत्री ईशानप्रीत्यर्थं चरुहोमे विनियोग उक्तमन्त्रेणाष्टोत्तरमष्टाविंशतिमष्टौ वाहुती-र्जुहुयात् । ॐमीशानाय स्वाहा इति वा उक्तविधि-नैवोत्तराङ्गानि ।

इत्यैशानयागः ॥ ३८ ॥

# अथ तृतीयेऽहनि ग्रहयागः ॥ ३६ ॥

देशकालसंकीर्त्तनान्ते ऐन्द्रीमहाशान्त्यङ्गत्वेन ग्रहयज्ञमहं करिष्य इति संकल्प्य स्वशाखायां यज्ञविधिसत्वे तथैव कुर्य्यात्। तदभावे स्वशाखोक्त-पौर्णमासतन्त्रयुक्तमाथर्व्वण-ग्रहयज्ञमित्थं कुर्य्यात् ।

संकल्यानन्तरं ऋत्विग्वरणं मण्डपप्रतिष्ठाप्रधानार्थैनैवाङ्गेपूपकारसिद्धे सुरभिरहतवासाः स्वगृह्योक्तविधिना अग्निप्रतिष्ठान्तं कृत्वा पुरस्तात् अग्नेर्गोमयेन गोचर्म्ममात्रं स्थण्डिलमुपलिप्य ग्रहाणां प्रत्येकं हिरण्मयानि छन्नोपानत्पादपीठानि निधायाहतेन वस्त्रेणोदग्दशेनासनान्याच्छाद्य तत्र कृतादिविविधमण्डलानि आलिख्य तेषु ग्रहानावाहयेत् ।

तत्प्रतिमागतविशेषविधिः ।

कल्पे—वर्णकमयीर्वृक्षमयीर्धातुमयीर्वा प्रतिमाः प्रत्यङ्मुखीरासनेषूपवेशयति ।

भास्कराङ्गारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ ।
राहुकेतुयमाः कृष्णाः पीतौ बुधबृहस्पती ॥ १ ॥
यमास्यसहजत्वात्तु कृष्णवर्णो शनैश्चरः ।
चान्दनौ सोमशुक्रौ च भौमार्कौ रक्तचन्दनौ[१] ॥ २ ॥
हरिद्रकावुभौ ज्ञेयौ विप्रौ बुधबृहस्पती ।
कृष्णागुरोर्ग्रहाः कार्य्या राहुकेतुशनैश्चराः ॥ ३ ॥

इति वृक्षमयत्वे ।

---

१ क रक्तचन्दनैः ।

भास्कराङ्गारकौ ताम्रौ रुक्मौ बुधबृहस्पती ।
राजतौ सोमशुक्रौ तौ शेषाः कार्ष्णायसाः स्मृताः ॥४॥

इति धातुमयत्वे ।

स्वशाखीयैराथर्वणैर्वा मन्त्रान्तरैरावाहने मन्त्राणां वक्ष्यमाणानां समुच्चयः कार्य्यः । आदित्यादि-नवग्रहा-वाहनं यं वहन्ति शोनकर्णा इति नवभिरिति कल्पगत-संख्याविधिविरोधात् ।

मन्त्रोऽपि—

यं वहन्ति शोनकर्णाः प्रतिलोमावाजिनः ।
तमहं सर्व्वतेजोमयमादित्यमावाहयामि ॥ ५ ॥

इत्यादित्यस्य ।

आग्नेये—

यं वहन्ति हंसवर्णा अनुलोमावाजिनः ।
तमहं द्विजैराप्यायमानं सोममावाहयामि ॥ ६ ॥

इति सोमस्य ।

रक्तरूपो रक्तानुलेपनश्च यः ।
तमहं रक्तवर्णं भौममावाहयामि ॥७॥ इति भौमस्य ।

ईशाने—

[1]यश्च पीतः पीतानुलेपनश्च यः ।
तमहं पीतवर्णं बुधमावाहयामि ॥ ८ ॥ इति बुधस्य ।
यश्चैवाङ्गिरसः पुत्रो देवानाञ्च पुरोहितः ।
तमहं हिरण्यवर्णं बृहस्पतिमावाहये ॥ ९ ॥

इति बृहस्पतेः ।

---

१ ख ग पुस्तकद्वये यस्य पीतं रूपं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्व्वे—

यश्च शुक्लरूपः[1] शुक्लानुलेपनश्च यः ।
तमहं शुक्लवर्णं शुक्रमावाहय ॥१०॥ इति शुक्रस्य ।
यस्यायसं रूपमायसी च प्रकृतिः ।
तमहमादित्यजं नित्यं स्थाप्यमानं मृत्युपुच-
मावाहयामि ॥११॥ इति शनैश्चरस्य ।
यस्य कृष्णं रूपं कृष्णानुलेपनश्च यः ।
तमहं कृष्णवर्णाभं राहुमावाहयामि ॥१२॥ इति राहोः ।
यस्य दीर्घा शिखा मुखञ्च परिमण्डलम् ।
तमहं ब्रह्मणः पुचं केतुमावाहयामि ॥१३॥ इति केतोः ।
ततो ग्रहाणां यथाकल्पं पूजनमिति केचित् ।

अन्ये तु— तदुत्तरतो वीथ्यां[2] सप्तकोष्ठाः चतस्रो वीथीः कृत्वा नैरृत्यकोणप्रभृतिषु कृत्तिकाद्यासनेषु उदग्-दशेनाहतेन वाससाछन्नेषु वक्ष्यमाणमन्त्रैः कृत्तिकादीनि नक्षत्राण्यावाह्य ग्रहपीठस्य तत्तद्दिक्षु इन्द्रादिलोक-पालानावाह्य सर्व्वोत्तरतो विनायकं क्षेत्रपालं दुर्गां रुद्रं ब्राह्मणं वास्तोस्पतिं लक्ष्मीमावाहयेदित्याहुः ।

अन्ये तु—ग्रहपीठस्य पूर्व्वादि-दिक्षु सप्तकोष्ठाश्चतस्रो वीथीः कृत्वा पूर्व्वादिक्रमेण नक्षत्राणामावाहनमाहुः ।

अन्ये तु—अधिदेवता-प्रत्यधिदेवतावाहनोत्तरं नक्षत्रा-वाहनमाहुः ।

अथ यद्यधिदेवता-प्रत्यधिदेवतास्थापनं कार्य्यं तदित्थं

---

१ ख ग यस्य शुक्लं रूपं । २ ग वेद्याः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

राहोर्नैर्ऋते सर्पान् शेरभकेत्यथर्व्वा सर्पाः पंक्तिः सर्पस्थापने विनियोगः। सर्पानावाह्य।

केतोराग्नेयतो ब्रह्माणं ये दिशामन्तरित अथर्व्वा ब्रह्मा स्वराड् त्रिष्टुप ब्रह्मास्थापने विनियोगः। ये दिशां ब्रह्माणमावाह्य।

इति प्रत्यधिदेवतावाहनम् ॥४०॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ नक्षत्रावाहनमन्त्राः ॥४१॥

आवाहयिष्यामि शुभां कृत्तिकां देवपूजिताम् ।
एहि साधारणे देवि ज्येष्ठदक्षसुते शुभे ॥ १ ॥
आवाहयामि वरदां रोहिणीं चन्द्रवल्लभाम् ।
एहि रोहिणि धर्म्मज्ञे ध्रुवकर्म्मसुशोभने ॥ २ ॥
आवाहयामि वरदामम्बिकां[1] शिववल्लभाम् ।
एहि मे अम्बिके[2] देवि मृदुकर्म्मसुशोभने ॥ ३ ॥
आर्द्रामावाहयिष्यामि नक्षत्रं राहुसंज्ञकम् ।
एह्यार्द्रे चारुसर्व्वाङ्गि दारुणे रुद्रसम्मते ॥ ४ ॥
ऋक्षमावाहयिष्यामि धर्म्मज्ञन्तु पुनर्वसुम् ।
पुनर्वसो इहागच्छ चरकर्म्मप्रसाधक ॥ ५ ॥
पुष्यमावाहयिष्यामि नक्षत्रं क्षिप्रसंज्ञकम् ।
एहि पुष्य महाभागं पोषं वर्द्धय सर्व्वतः ॥ ६ ॥
आवाहयिष्याम्यश्लेषां भक्तानां श्रीविवर्द्धनीम् ।
अश्लेषे त्वमिहाभ्येहि दारुणे विजयप्रदे ॥ ७ ॥
मघामावाहयिष्याम्युग्रनक्षत्रमोजसा ।
एहि मे सुभगे देवि सर्व्वार्थविनिपूरणि ॥ ८ ॥
ऋक्षमावाहयिष्यामि पूर्व्वफल्गुनीसंज्ञकम् ।
एहि भाग्ये महाभागे उग्रकर्म्मप्रसाधिके ॥ ९ ॥
ऋक्षमावाहयिष्यामि उत्तरां फल्गुनीं शुभाम् ।
एहि त्वं सुभगे देवि ध्रुवे सर्व्वाङ्गसुन्दरि ॥ १० ॥

---

१ ख ग अन्धकां ।　　२ ख ग अन्धके ।

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

रवेरुत्तरत ईश्वरं मानो विदन्निति ब्रह्मा-रुद्रोऽनुष्टुप् रुद्रस्थापने विनियोगः।

मानो विदन् रुद्रमावाहयामि। सोमस्य दक्षिणत उमां आपो हिष्ठेति मन्त्रस्य सिन्धुद्वीप ऋषिर्गायत्रीछन्द उमा-स्थापने विनियोगः। आपो हिष्ठा उमामावाहयामि।

भौमस्य दक्षिणतः स्कन्दं अग्निरिवेति ब्रह्मा-स्कन्द-स्थापने विनियोगः अग्निरिवेति स्कन्दमावाहयामि।

बुधस्य पूर्व्वदिक्षु[१] प्रतद्विष्णुरित्यथर्व्वाविष्णुर्विराट् विष्णु-स्थापने विनियोगः। प्रतद्विष्णुरिति विष्णुमावाहयामि।

गुरोः पूर्व्वतो ब्रह्माणं ब्रह्मयज्ञानं वामदेवपुत्रो नकुलो ब्रह्मा त्रिष्टुव् छन्दो ब्रह्मस्थापने विनियोगः। ब्रह्मयज्ञान-मिति ब्रह्माणमावाहयामि।

शुक्रपूर्व्वतः—इन्द्रेममिति ब्रह्मेन्द्रो देवता अनुष्टुव्छन्द इन्द्रस्थापने विनियोगः। इन्द्रेममिति इन्द्रमावाहयामि।

शनेराग्नेयतो यमं यः प्रथम इति ब्रह्मा यमस्त्रिष्टुभ् यमस्थापने विनियोगः। यमं यः प्रथमः प्रयतमाना यम-मावाह्य।

राहोरपराजितायां कालं, लोहितः काल इत्यर्चा[२]-कालोऽनुष्टुभ् कालस्थापने विनियोगः रोहितः काल इति कालमावाह्य।

केतोर्नैर्ऋते चित्रगुप्तं यदाज्ञातमिति कौशिकश्चित्रगुप्तो-ऽनुष्टुव् चित्रगुप्तस्थापने विनियोगः। यदाज्ञातमिति चित्रगुप्तमावहयामि ॥३९॥

---

१ पूर्व्वे विष्णुं। २ ग इत्यथर्व्वा।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ प्रत्यधिदेवतावाहनम् ॥ ४० ॥

तत्र तावत् सूर्य्याद्दक्षिणेनाग्निं समास्त्वाग्न इति ब्रह्माग्निस्त्रिष्टुब् अग्निस्थापने विनियोगः। समास्त्वाग्न इति अग्निमावाह्य।

सोमोत्तरतः—आपः शन्नो देवीरिति त्रिशिराः त्वाष्ट्रः सिन्धुद्वीपो वाम्बरीषो आपो गायत्री अपां स्थापने विनियोगः। शन्नो देवीरिति अप आवाह्य।

भौमपश्चिमतः—भूमिं-भूमे मातरिति ब्रह्माभूमिस्त्रिष्टुब् भूमिस्थापने विनियोगः। भूमे मातरिति भूमिमावाह्य।

बुधपश्चिमतः—नारायणं इदं विष्णुरिति मेधातिथिः काण्वो गायत्री नारायणस्थापने विनियोगः। इदं विष्णुरिति नारायणमावाह्य।

गुरोः पश्चिमतः—इन्द्रं इन्द्रजुषस्वेति ब्रह्मेन्द्रस्वरा अनुष्टुब् इन्द्रस्थापने विनियोगः। इन्द्रजुषस्वेति इन्द्रमावाहयामि।

शुक्रपश्चिमतः— इन्द्राणीं प्रेतपादर्षे चेन्द्राण्यनुष्टुब् इन्द्राणीस्थापने विनियोगः प्रेतपादाविति इन्द्राणीमावाहयामि।

शनेर्नैर्ऋते प्रजापतिं नक्तं जातेत्यथर्व्वप्रजापतिरनुष्टुब् प्रजापतिस्थापने विनियोगः। नक्तं जाता प्रजापतिमावाहयामि।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ प्रत्यधिदेवतास्थापनम् ॥ ४२ ॥

इममिन्द्र ब्रह्मेन्द्रस्त्रिष्टुव् इन्द्रस्थापने विनियोगः। अग्ने-र्मन्व[1]मिति ब्रह्मा त्रिष्टुव् इत्यग्निस्थापने। यमो मृत्युरिति ब्रह्म-यमस्त्रिष्टुव् यमस्थापने। अपन अभितं निर्ऋति-मित्यर्य्यमानिऋतिस्त्रिष्टुव् इत्यर्य्यमस्थापने। य उत्तरत इति ब्रह्मा-सोमस्त्रिष्टुव् धाता दधात्वित्थं गिरा ईशानो गायत्री। पूर्व्वेशानमध्ये अनन्तं विततमित्यथर्व्वाणं यो विराट् पंक्तिः। पश्चिमनैर्ऋत्यमध्ये ब्रह्मापरिमित्यथर्व्वा ब्रह्मा त्रिष्टुव्। ततो निर्लक्ष्मिति द्रविणोदा विनायको बृहती। पृतना जितमित्यर्व्वाक् दुर्गात्रिष्टुव् क्षेत्रियात्वेति भावं गिराः क्षेत्राधिपतिस्त्रिष्टुव्। त्र्यम्बकं ब्रह्मयज्ञानं वास्तोष्पते ये देवादि विष्टेतिशेषदेवतावाहनं। सर्व्वेभ्य आसनं दत्त्वा पाद्यार्घ्याचमनीयाः पञ्चापः पात्रचतुष्टये यथोचितं संपाद्य युगपद्दद्यात्।

इमा आपः शिवतमाः शान्ताः शान्ततमाः पूताः पूततमा[2] अमृता अमृततमाः पाद्या चार्घ्यश्च आचमनी-याश्चाभिषेचनीयाश्च प्रतिगृह्णन्तु भगवन्तो देवाग्रहा इति सपरिवारेभ्यः समर्प्य ग्रहवर्णानुरूपाणि वासांसि यज्ञोप-वीतानि समर्पयेत्। यथावर्णं पुष्पाणि वासांसि अथानु-लेपनानिति क्लृप्तान् तत्तद्गन्धान् दद्यात्।

---

१ ख मन्य इति।

२ ख पुस्तके अधिकः पाठः पुण्याः पुण्यतमाः।

इमे गन्धाः शुभा दिव्याः सर्व्वगन्धैः समन्विताः ।
पूता ब्रह्म पवित्रेण सूर्य्यस्य रश्मिभिः प्रतिगृह्णन्तु भगवन्तः ॥ १ ॥

इति तत्तद्वर्णानि पुष्पाणि दद्यात् ।

इमाः सुमनसो दिव्याः सुरभिवृक्षयोनिजाः ।
पूताभिः प्रतिगृह्णाण ॥ २ ॥

इति पुष्पाणि दद्यात् ।

वनस्पतिरसो मेध्यो दिव्यगन्धाढ्य उत्तमः ।
आघ्रेयः सर्व्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥३॥

इति धूपं दहेत् ।

अग्निः शुक्रश्च ज्योतिश्च सर्व्वदेवप्रियो हितः ।
प्रभाकरो महातेजाः दीपोऽयं प्रतिगृह्यताम् ॥४॥
बालार्च्चिर्धूमशिखरस्तिमिरारिः स्वयंप्रभुः ।
औषधिः स्नेहसम्पन्नो दीपोऽयं प्रतिगृह्यताम् ॥५॥

इति दीपं दत्त्वा,

इमे भक्ष्याः शुभा दिव्याः ।
सर्व्वभक्ष्यसमन्विताः ॥
पूता ब्रह्म पवित्राश्च ॥ ६ ॥

इति सर्व्वभक्ष्यं निवेदयेत् ।

सर्पिःपूर्णैर्हिरण्मयचमसैः सह फल-ताम्बूल-दक्षिणा-नीराजनपुष्पाञ्जलीन् दत्त्वा पश्चादग्नेः प्राङ्मुख उपविश्य स्वगृह्योक्तविधिना निर्वापादिसंस्कृतं चरुं बर्हिषा साघाराज्यभागान्ते यजमानेन चर्व्वाज्यसमिधां प्रतिग्रहं वक्ष्यमाणसंख्याहुतिपर्य्याप्तानां यथादैवतमुत्सर्गे कृते, साचार्य्यै

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हस्तमावाहयिष्यामि सावित्रं क्षिप्रमञ्जसा ।
एहि सावित्र धर्म्मज्ञ भक्तानां पापनाशन ॥ ११ ॥
चित्रामावाहयिष्यामि चित्ररूपां मनोरमाम् ।
एहि मे वरदे चित्रे मृदुकर्म्मप्रसाधिके ॥ १२ ॥
स्वातिमावाहयिष्यामि नित्यमुत्तरमार्ग्गले ।
देवि स्वाति त्वमभ्येहि चरकर्म्म-सुशोभने ॥ १३ ॥
ऋक्षमावाहयिष्यामि विशाखामुग्रतेजसम् ।
विशाखे त्वमिहाभ्येहि देवि साधारणे शुभे ॥ १४ ॥
ऋक्षमावाहयिष्याम्यनुराधां वरप्रदाम् ।
अनुराधे त्वमभ्येहि मृदुकर्म्म-सुशोभने ॥ १५ ॥
ज्येष्ठामावाहयिष्यामि नक्षत्रं शुक्रदैवतम् ।
ज्येष्ठे देवि त्वमभ्येहि दारुणे चारुलोचने ॥ १६ ॥
मूलमावाहयिष्यामि नक्षत्रं दारुणं महत् ।
एहि मूल महाभाग भक्तानामभयप्रद ॥ १७ ॥
ऋक्षमावाहयिष्यामि पूर्व्वाषाढेति संज्ञकम् ।
एहि त्वमुग्रे वरदे आषाढे पूर्व्वपूर्व्वके ॥ १८ ॥
ऋक्षमावाहयिष्यामि उत्तराषाढसंज्ञकम् ।
उत्तरे त्वं समभ्येहि आषाढे ध्रुवसाधके ॥ १९ ॥
ऋक्षमावाहयिष्यामि यत्तदभिजिदुच्यते ।
एहि धिष्ण वरिष्ठाद्य क्षिप्रकर्म्म-प्रसाधक ॥ २० ॥
ऋक्षमावाहयिष्यामि श्रवणं सर्व्वकामदम् ।
श्रवणत्वमिहाभ्येहि चरकर्म्म-प्रसाधक ॥ २१ ॥
धनिष्ठामावाहयिष्यामि नक्षत्रं शशिवल्लभम् ।
धनिष्ठे त्वमिहाभ्येहि चरकर्म्म-प्रसाधके ॥ २२ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऋक्षमावाहयिष्यामि नाम्ना शतभिषां शुभाम्।
आगच्छ त्वं शतभिषे चरकर्म्म-सुशोभने॥ २३॥
ऋक्षमावाहयिष्यामि पूर्व्वां भद्रापदं महत्।
एहि मयि पदे पूर्व्वे उग्रकर्म्मप्रसाधक॥ २४॥
ऋक्षमावाहयिष्यामि देशे भद्रपदोत्तराम्।
एहि त्वं हि महाभागे मम भद्रपदोत्तरे॥ २५॥
ऋक्षमावाहयिष्यामि रेवतीं चारुदर्शनां।
एहि रेवति धर्म्मज्ञे मृदुकर्म्म-सुशोभने॥ २६॥
ऋक्षमावाहयिष्यामि क्षिप्रमश्विनीसंज्ञकम्।
एह्यश्विनि महाभागे वरदे कामदायिनि॥ २७॥
ऋक्षमावाहयिष्यामि उग्रं भरणिसंज्ञकम्।
एहि त्वं देवि भरणि सुभगे चारुदर्शने॥ २८॥

इति नक्षत्रावाहनम् ॥४१॥

देवं भवं पशुपतिं हरं कृशं
महादेवं सर्व्वमुग्रं शिखण्डितं ।
सहस्राक्षमसिसने गृणन्ति
रुद्रः परिपातु चार्द्राय स्वाहा ॥ ११ ॥
आर्द्राया इदम् ।

या विप्रैः कविभिर्नमस्यते
दाक्षायणी देवपुरादिभिर्नृभिः ।
सा च [1]स्तुता प्रथमजा पुनर्वसुः
शिवाः क्रियाः कृणुतां कर्म्मसिद्धये ॥ १२ ॥
पुनर्वसव इदम् ।

यस्य देवा ब्रह्मचर्य्येण कर्म्मणा
महासुरं तिग्मतयाऽभिचक्रिरे ।
तं स बुधं देवगुरुं बृहस्पति-
मथार्चामि पुष्येण सहाभियातु स्वाहा ॥ १३ ॥
पुष्याया इदम् ।

या नः स्तुता परिहिणोति मेधया
या तप्यमानमृषिभिः कामशोचिभिः ।
जरत्कारुसूक्तेन ऋषिभि-र्मनीषिभिस्ता
आश्लेषा अभिरक्षन्तु नोरगैः स्वाहा ॥ १४ ॥
इदमश्लेषायाः ।

ये देवत्वपुण्यकृतोऽभिचक्रिरे
ये वापरे ये च परे मनीषिभिः ।

---

१ ख ग पुस्तकद्वये सा नः स्तुता ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अर्चामि सूनुर्यमराजगणान्[1] पितॄन्
शिवाः क्रियाः कृणुतां च नो मघा स्वाहा ॥१५॥
मघाभ्य इदम् ।

यो योजयन् कर्म्मणा चर्षणीधृतो
भूमिं चेति भगः प्रसाधयन् ।
तद्दैवत्ये शिवतमामलङ्कृते
फल्गुन्योरीडे भजतं च पूर्व्वयोः स्वाहा ॥१६॥
पूर्व्वफल्गुनीभ्यामिदम् ।

स्तुतं पूर्व्वैरर्य्यमणं मनीषिभिः
स्तौमि देवं जगति वाचमैरयन् ।
तद्दैवत्ये शिवतमामलङ्कृते
फल्गुन्यौ न उत्तरे देवतानये स्वाहा ॥ १७ ॥
उत्तरफल्गुनीभ्यामिदम् ।

[2]श्यावैर्युक्तः क्षितिपाद्धिरण्मयो
यस्य रथः पथिभिर्वर्त्तते सुखे ।
स नौ हस्तेन सवित हिरण्मया
रिणः सवितानौभि रक्षतु स्वाहा ॥ १८ ॥
हस्तायै इदम् ।

त्वष्ट्रे नमः क्षितिसृणे[3] मनीषिणे
भूतगोप्त्रे परमं कर्म्मकारिणे ।
सा नः स्तुता कृणुतां कर्म्मसिद्धये
चित्रां देवीं सहयोगेन ऋषभूत् ॥ १९ ॥
चित्रायै इदम् ।

---

१ ख यमराजगान् ।
२ ख ग पुस्तकद्वये हस्ताचित्रयोरावाहनमन्त्रौ पतितौ ।
३ ङ क्षितिस्टने ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऋत्विग्भिस्तत्र प्रतिग्रहमेकैकं द्रव्यमष्टोत्तर-शतसंख्ययाऽष्टा-विंशतिसंख्ययाष्टसंख्ययैकसंख्यया वा होतव्यम् ॥

विषा स हि मित्यर्व्वादित्यो जगती आदित्यप्रीत्यर्थं चरुहोमे विनियोगः। आज्यहोमे अर्कस्य उपस्थाने विनियोगः एवमूहो द्रष्टव्यः। समिधः प्रादेशमात्राः मधु-घृत-दधिभिः मधु-घृत-क्षीरैर्वा अभ्यक्ता होतव्याः।

कुशेषु त्रिं मन्त्रेणैकाहुतिः, अर्काद्यभावे पालाशा एव होतव्याः।

चरोरेकाहुतिपक्षे अवदानसंपदाहोमः। अन्यपक्षेषु ग्रासमात्राहुतिः हस्तेन होमान्ते तैरेव मन्त्रैरङ्गोपस्थानं तत्तद्ग्रहविषयं कार्य्यम्। आदित्यः सुप्रीतो भवत्विति वाचनं च। एवमग्रेषूह्यं। शकधूममित्यर्चा अथर्व्वा सोमोऽनुष्टुब् सोमप्रीत्यर्थं पलाशसमिध्। त्वया मन्यो इति ब्रह्मा भौमस्त्रिष्टुब् भौमप्रीत्यर्थं मधूकसमिध्। यद्राजान इति विष्णुर्बुधः पंक्तिर्बुध-प्रीत्यर्थं न्यग्रोधसमिध्। स बुधादिति ब्रह्मा बृहस्पतिस्त्रिष्टुब् बृहस्पतिप्रीत्यर्थं सक्षीरप्लक्षसमिधः। नूनं तदस्येति ब्रह्मा-शुक्रस्त्रिष्टुभ् शुक्रप्रीत्यर्थमुदुम्बर-समिध्। ॐ सहस्रबाहुरित्यस्य नारायण-शनैश्चरोऽनुष्टुब् अस्य च शनेः प्रीत्यर्थं अश्वत्थसमिध्। दिव्यं चित्रमित्यस्य कौशिको राहुस्त्रिष्टुब् आरण्यगोमयसमिध्। यक्लेष्ट पुस्तरथर्व्वा केतवस्त्रिष्टुब् केतुप्रीत्यर्थं घृतयुतकुशसमिध् होमे विनियोगः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत एतैरेव मन्त्रैः प्रत्येकमष्टसंख्यया तिलहोमः कार्य्यः ।

सर्व्वेषामपि कर्त्तव्यस्तिलहोमस्ततःपरम् ।
सघृताः सयवाश्चापि होतव्याश्च तिला द्विजैः ॥७॥

इत्याथर्व्वणवचनात् ।

ततो नक्षत्रेभ्यो वक्ष्यमाणमन्त्रैश्चरुघृतपलाशसमित्तिल-यवान् चतुरावृत्तैर्जुहुयात् ।

मन्त्राश्च—

अग्निर्देव वो यज्वनः कृष्णवर्त्मा
वैश्वानरो जातवेदा रसाग्रभुक् ।
सनक्षत्राणां प्रथमेन पाकः
कृत्तिकाभिर्ज्वलनोऽनुशाम्यतां स्वाहा ॥ ८ ॥

कृत्तिकाभ्य इदम् ।

प्रजापतिर्यः ससृजे प्रजा इमा
देवान् स सृष्टा विनियोगकर्म्मसु ।
स सर्व्वभुक् सर्व्वयोगेषु रोहिणीः
शिवाः क्रियाः कृणुतां [1]कर्म्मसिद्धये स्वाहा ॥९॥

रोहिण्या इदम् ।

विद्याविदो ये अभिशोचमानवा
अर्चन्ति शक्रं सहदेवतागणैः स ।
नो यो गोरग शिवः शिवाः क्रियाः
[2][श्रेष्ठराजः कृणुतां] कर्म्मसिद्धये स्वाहा ॥ १० ॥

मृगशिरस इदम् ।

---

१ ख क्रमसिद्धये ।

२ ख पुस्तके [ ] चिह्नितांशः पतितः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यः प्राणिनां जीवयन् वा निषेवते
शिवो भूत्वा मातरिश्वा रसाग्रभुक् ।
ध्वजोऽन्तरीक्षस्य स सर्व्वभृद्वायु-
र्देवः स्वातिना नोभिरक्षतु स्वाहा ॥ २० ॥
स्वात्यै इदम् ।

वाचेडिता वात्मविद्भिर्मनीषिभिः
सहितो यौचापि सवितातिसामगैः[१] ।
इन्द्राग्नी वरदौ च नमस्कृतौ
विशाखयोः कुर्व्वतामायुषे स्वाहा ॥ २१ ॥
विशाखाभ्यामिदम् ।

विश्वा देवा यमृषिमाहुर्मित्रं
भरद्वाजमृषितः प्रसामविद् ।
तं जगत्या गाथया स्तौम्युग्रैः
समामनुराधाभिर्भूत कृण्वोभिरक्षतु स्वाहा ॥२२॥
अनुराधाभ्य इदम् ।

शतक्रतुर्यो निजघान शंवरं
वृत्रं च हत्वा सहितः प्रसर्ज्जनः ।
संस्तुतः प्रीतमना पुरन्दरो मरुत्सखो
ज्येष्ठया नोऽभिरक्षतु स्वाहा ॥ २३ ॥
ज्येष्ठायै इदम् ।

या धारयत्योजसातिदेवं पवमानापृथिवीञ्च
सा सर्व्वभूतभृत् सा नः स्तुता कृणुतात्
कर्म्मसिद्धये मूलादेवी निर्ऋतिः सर्व्वकर्म्मसु स्वाहा ॥ २४ ॥
मूलायै इदम् ।

---

१ ख ग सहितो यो चौणि सवनानि सामगैः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पर्ज्जन्यस्रष्टास्तरुणी[1]भिरावृतं
यास्तर्पयन्त्यभिप्रवर्द्धये ।
ताः स्तौम्यथो वारुणीः पूर्व्वाषाढा
स्वधयाऽस्तु योजने स्वाहा ॥ २५ ॥
पूर्व्वाषाढाभ्य इदम् ॥

यास्त्रिंशततन्त्रीश्च मदन्ति देवा
देवानां या निर्म्मिताश्च भूयसः ।
तानाषाढा उत्तराः शतशो विश्वा
क्रियाः कृणुतां [2]सुरमताः स्वाहा ॥ २६ ॥
उत्तराषाढाभ्य इदम् ॥

यः सर्व्वज्ञः सर्व्वकृत् सर्व्वभूतभृत्
यस्मादन्यं न परं किञ्चिन्नास्ति ।
निर्म्मिताः सत्यजितः पुरुष्टुतः
स नो ब्रह्माऽभिजिता नोऽभिरक्षतु स्वाहा ॥२७॥
अभिजित इदम् ॥

स्थानाच्च ते स्थानमिन्द्राय यान्
देवैश्च य ईरयस्त्रिविचक्रमे ।
तं स्वर्गनाकपृष्ठं स्वर्विद्विष्णु-
र्देवः श्रवणेनाभिरक्षतु स्वाहा ॥ २८ ॥
श्रवणाया इदम् ॥

अष्टौ शतानि श्वेतकेतूनां
यानित्वञ्च सत्वानि जघान [3]मूषकः ।

---

१ ख तिस्रणीभिर्वाहृतं । २ ख सुमनाः ।
३ ग भूयसः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अनादेशे नो क्षयमश्च पीड़िताः
शाविष्ठाभिर्नोऽभिरक्षन्तु स्व स्वाहा ॥ २९ ॥
इदं धनिष्ठाभ्यः ॥

वाजा देवी देवम्रणानि काकुभा-
बुभावाजस्य न तत्कर्मणा शिवा ।
तावब्राजस्तो ब्राह्ममसिदेवभोजनौ
प्रत्यभिषक्तु भिषक् शिवौ नः स्वाहा ॥ ३० ॥
इदं शततारकाभ्यः ॥

सुनाशीरौ न प्रमोतजिन्नसौ
पितृभ्यो ददातु स्तनौ शिवौ तौ पूर्व्वजौ ।
कृणुतामेकपादजौ प्रतिष्ठानौ
सर्व्वकामाभयाय च स्वाहा ॥ ३१ ॥
इदं प्रोष्ठपदाभ्याम् ॥

सर्व्वार्थाय कृणोमि सर्व्वकर्म्मप्रसिद्धये
गरिष्ठायानेककारिणे नमः ।
सोऽहिब्रध्नः कृणुतामुत्तरौ शिवौ
प्रतिष्ठानौ सर्व्वकामाभयाय च स्वाहा ॥ ३२ ॥
इदमुत्तराप्रौष्ठपदाभ्यः ॥

यमहाहेहम्रषितः प्रसामविद्
भरद्वाजश्चन्द्रमसो दिवाकरम् ।
सजुष्टानामश्वयुजौ भयाय स नः
पूषा कृणुतां रेवतीः शिवाः स्वाहा ॥ ३३ ॥
इदं रेवतीभ्यः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जीर्णं स तं यौ युवानं हि चक्रतुः
ऋषिधिया च्यवनं सोमपाकृतौ ।
तौ नश्विनिभिर्माश्विनौ भिषजामस्य
शङ्करौ प्रजामश्विभ्यामश्विनौ शिवौस्ता ॥३४॥
अश्विनीभ्याम् ॥

यस्य श्यामशवलौ रक्षतः स्वधां
तत्कृत् विविधाचर्षणीधृतौ ।
तौ सावित्रीच्च सवितृधर्म्मवारिभि-
र्यमो राजा भरणीभिर्नो रक्षतु स्वाहा ॥३५॥
भरणीभ्यः ॥

इममिन्द्रेत्यादि पूर्व्वोक्तमन्त्रैरिन्द्रादिशेषदेवताभ्यस्तथैव तान्येव द्रव्याणि हुत्वा शान्त्यै कृत्वा चैतैर्नामभिर्वास्तो-ष्पत्यै राज्यं जुहुयात् ।

अस्य शान्त्यङ्गगणस्य ब्रह्मासोमेष्टि संस्कृतौ सर्व्वाणि छन्दांसि च सोमप्रीत्यर्थमाज्यहोमे शान्त्याद्यैः सूक्तैः शन्नोवातो उषा आप ऋक् २ । इति शान्त्यङ्गगणः ।

कृत्या प्रतिहरणगणस्य शक्रः कृत्यादूषणेति जगती शङ्कर्य्यौ सर्व्वाणि छन्दांसि च कृत्यादूषणप्रीत्यर्थमाज्यहोमे विनियोगः ।

दूष्याद्दूषिरसि सू १ ये पुरस्तात् सू २ ईशानानां त्वां ३ सुपर्णस्त्वा सू १ प्राग्ने चक्षुः सू १ प्रतीचीनफलो २ अयं प्रतिसरो अर्थसूक्तं ऋ ३२ यां कल्पयन्ति अर्थ सू ३० ।

इति कृत्यागणः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चातनगणस्य चातनऋषिरग्निर्द्देवता सर्व्वाणि छन्दांसि अग्निप्रीत्यर्थमाज्यहोमे विनियोगः ।

स्तुवान सू १३ इदं हविः सू ये ऽमावस्या सू १। उपप्रागाद्देवो सू १। अराय सूक्तद्वं ७ शन्नो देवी वृत्तपत्नी सू १ आपश्यति सू १ तत्सत्यौजा सू १ त्वय्यापूर्व्वा पुरस्तादुक्तो सूक्त १ अन्तर्द्दवे[1] सू १ प्राग्नये सू १ रक्षोहन इत्यनुवाक आवर्त्तनानि ।

मातृनामगणस्य मातृनामा ऋषिर्मातृनामा देवता त्रिष्टुब्-बृहत्यनुष्टुब्-जगत्युष्णिक्-शर्करीछन्दांसि मातृनाम-देवताप्रीत्यर्थमाज्यहोमे विनियोगः ।

दिव्यो गन्धर्व्वो सू १। इमं मेऽग्ने सू १। पौतोमार्ग्गं सूसक् २४ ।

इति मातृनामानि ।

वास्तोष्पतिगणस्य ब्रह्माऋषिर्वास्तोष्पतिर्द्देवता शर्क्कर्य्यतिशर्कर्य्यौ सर्व्वाणि छन्दांसि स च वास्तोष्पतिप्रीत्यर्थ-माज्यहोमे विनियोगः ।

आशानामाशा सू १। इहैव ध्रुवा सू १। ऋधङ्गचो सूक्त १। उतपुच १। इन्द्रस्य गृहोहास ऋ ४। दिवे स्वाहा ऋ ८। अस्म वर्म्म ऋ ८। पृथिवी श्रोत्राय ऋ ३। अग्निधेन्वान्यत्यय ऋ २। ऊर्ज्जं बिभ्रत् ऋ ६। सत्यं बृहदित्यनुवाकः। इति वास्तोष्पतीयानि ।

---

१ ख अन्तर्दावि सू ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततोऽभयेनोपस्थानं कुर्य्यात्। तत्र अभयगणस्यार्थर्ध्वा ऋषिश्चन्द्रमा देवता शर्कर्य्यतिशर्कर्य्यौ सर्व्वाणि छन्दांसि च चन्द्रमसः प्रीत्यर्थमुपस्थाने विनियोगः।

स्वस्ति दाविशां सू० १। ब्रह्मणे नययुक्तासि ऋ १। नजा अर्व्वा ऋ १। अभयं मित्रावरुणौ ऋ १। अभयं द्यावापृथिवी ना ऋ २। हतं तर्दं ऋ ३। पुषेमा आशा ऋ १। इन्द्रः सुत्रामा ऋ १। मैनं यथा ऋ १। स्वस्तिदा विशां यजि ऋ १। व्यवसाना नमस्ते पोषिणीभ्य ऋ १। अनिराष्ट ऋ १। इदमुच्छ्रेयो ऋ १। यत इन्द्रः सू १।

इत्यभयगणाः।

ततः स्वगृह्योक्तप्रकारेण स्विष्टकृदाघाराज्यतन्त्रं[1] समाप्य ग्रहप्रीत्यर्थं दक्षिणां दत्त्वा गृहे ब्राह्मणान् भोजयेत्।

तद्विधिः कल्पे—

भार्गवाय हयं दद्यात् सोमपुत्राय काञ्चनम्।
ऋषभं लोहिताङ्गाय छागलं धूमकेतवे॥ ३६॥
वरमाङ्गिरसे दद्यादादित्याय तु गां शुभां।
वृषलीं मृत्युपुत्राय गजं दद्यात्तु राहवे॥ ३७॥
रुक्मं चन्द्रमसे दद्यादेतदाचार्य्यशासनम्।
सोमपुत्रो बुध, आङ्गिरसो बृहस्पतिः, मृत्युपुत्रः शनिः।
गृहे बृहस्पतौ विप्रान् भोजयेद्घृतपायसैः॥ ३८॥
शुक्रे सर्व्वगुणं त्वन्नं मधुना चाभिघारितम्।
शनैश्चरे हविष्यान्नं तथा क्षीरोदनं बुधे॥ ३९॥

---

१ ङ-स्विष्टकृदाद्युत्तरतन्त्रं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कृसरान्नेन केतूनां राहौ मांसोदनेन तु ।
भौमे गुडोदनं दद्यान्मोदकैः समलङ्कृतम् ॥ ४० ॥
सर्पिषा पयसा चैव सूर्य्ये चन्द्रे तथोदनम् ।
समिदाधानमेकेषां ग्रहपूजा विधीयते ॥ ४१ ॥
अन्नदानमथैकेषां केषाञ्चिद्दक्षिणा स्मृताः ।

अनेन च प्रतिवत्सरं नित्यत्वेन वक्ष्यमाणग्रहयज्ञ-प्रयोगाशक्तस्य समिद्धोमेनैवान्नदानेनैव दक्षिणादानेनैव वा फलसिद्धिरुच्यते ।

यथोक्तं कल्पे—

एतद्ग्रहाणामतिथिं कुर्य्यात् संवत्सरादपि ।
आरोग्यबलसंपन्नो जीवेत् स शरदः शतम् ॥ ४२ ॥

इति ग्रहयागः ।

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ चतुर्थेऽहनि नक्षत्रयागः ॥४३॥

देशकालौ च सङ्कीर्त्य ऐन्द्रीशान्त्यङ्गत्वेन नक्षत्रयागमहं करिष्य इति संकल्प्य स्वगृह्योक्तप्रकारेणाग्निस्थापनान्तं कृत्वा अग्नेः पूर्व्वस्यां दिशि स्थण्डिले उक्तरीत्या अहतवस्त्राच्छन्नेषु स्थानेषु वर्णक्रमयोर्दारुमयोर्धातुमयोर्वा नक्षत्रशब्दलिङ्गानुसारेण पुंरूपाः स्त्रीरूपाः प्रत्यङ्मुखीः प्रतिमाः स्थापयित्वा पूर्व्वोक्तैरावाहयिष्यामि शुभामित्या-द्युक्तमन्त्रैरष्टाविंशतिनक्षत्राण्यावाह्यासनं दत्त्वा इमा आप इत्येतैः षड्भिर्मन्त्रैः प्रतिगृह्णन्तु भगवन्ति नक्षत्राणीत्येव-मूहितैः पाद्याद्यर्पणं पूर्व्ववत् फलार्पणञ्च कुर्य्यात् ।

वस्त्रानुलेपनपुष्पेषु नक्षत्रवर्णानुरूपवर्णविशेषविधिः ।

कल्पे—

रक्तवर्णं कृत्तिकानां फल्गुनीद्वितयस्य तु ।
हस्तस्य चैव पौष्णस्य मैत्रस्य च तथैव च ॥ १ ॥
पीतं केशस्य पुष्यस्य शर्व्ववासवयोस्तथा ।

केशं रोहिणी ।

श्वेतं सोमस्य रौद्रस्याप्यथ वारुणयोस्तथा ॥ २ ॥
आदित्यसर्पपित्र्याणां ब्रह्मवायव्ययोस्तथा ।
प्रौष्ठपदाद्वयस्याथ श्वेतमेव विधीयते ॥ ३ ॥
विचित्ररूपं त्वाष्ट्रस्य वैश्वदेवस्य चाप्यथ ।
आश्विनस्य तथा कार्य्यं नित्यमेव विजानता ॥ ४ ॥
कृष्णं याम्यस्य मूलस्य पालाशं श्रवणस्य तु ।
विशाखयोस्तु कर्त्तव्ये पीतरक्ते फलप्रदे ॥ ५ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एते पञ्चैवमृक्षाणां ध्रुवस्थानोपसादिनाम् ।
यथावर्णानि पुष्पाणि वासांस्येवानुलेपनम् ॥ ६ ॥ इति नैवेद्येषु च दक्षिणासु च विधिस्तत्रैव ।

## अथ नक्षत्रहोमः ।

महिषीघृतं कृत्तिकाभ्यः १ सर्व्वबीजानि रोहिण्यै २ पायसं मृगशिरसे ३ मध्वार्द्रायै ४ तण्डुला पूनर्वसूनां ५ घृतपायसं पुष्याय ६ सर्व्वौषधय अश्लेषाभ्यः ७ तिलतण्डुला मघाभ्यः ८ प्रियङ्गवः पूर्व्वफल्गुनीभ्यां ९ दधि हस्तायै १० घृतपायसं चित्रायै ११ घृताक्ता यवाः स्वातये १२ यवोदनं विशाखाभ्यां १३ मधुरा अनुराधाभ्यः १४ कनकं ज्येष्ठायै १५ ओषधिमूलानि मूलाय १६ शालयः पूर्व्वाषाढाभ्यः १७ पय उत्तराषाढाभ्यः १८ सर्व्वरत्नान्यभिजिते १९ तण्डुलाः श्रवणाभ्यः २० उडुम्बरवटप्लक्षाः धनिष्ठाभ्यः २१ अब्जानि पुष्पाणि शतभिषजे २२ शालयः पूर्व्वाभ्यां प्रोष्ठपदाभ्यां २३ घृताक्षता रेवत्यै २४ क्षीरवृक्षाङ्कुशा अश्वयुज्यां २५ कृष्णतिलाः सर्पिर्मधुभिश्च भरणीभ्यः २६ तथा कृत्तिकाभ्यः पायसं सर्पिषा सह ब्राह्मणेभ्यो ददाति । रोहिण्यामक्षतैर्मांसैः सह सर्पिर्मिश्रमन्नम् । मृगशिरस्यजां पयस्विनीं । आर्द्रायां कृसरं दद्यात् । तैलमिश्रमुपोषिते । मधुसहितानपूपान् पुनर्वसौ । सुवर्णं पुष्ये । अश्लेषासु रुक्मं मघासु मधुमिश्रतिलैः श्राद्धं कुर्य्यात् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्व्वयोः फल्गुन्योर्मण्डकैः फाणितं मधुना सहोत्तरयोः। हस्ते हस्तिरथं चित्रायां वृषलीमलङ्कृतां गन्धैरनुलिप्तां स्वातावेकधनं दद्यात् यदस्य गृहे प्रियं धेनुं रूपसम्पन्ना-मनड्वाहौ वोढारौ मधुमन्थेन सह विशाखयोः।

अनुराधासु प्रावरणमन्नञ्च शुचि। ज्येष्ठायां सुरा-मूलेनान्नेन सहिताः स्त्रीभ्यो न ब्राह्मणीभ्यः। पूर्व्वा-षाढासु शक्तुमयं उत्तरासु मधुमयं। अभिजिति दुहितरं विवाहोक्तेन विधिना। वेणुसहितेन कम्बलं श्रवणायां धनिष्ठासु वस्त्रयुग्मं सर्व्वगन्धान् शतभिषजि अजमांसोदनं पूर्व्वयोः रुरुमांसोदनमुत्तरयोः धेनुन्तूपसम्पन्नां कांस्य-दोहनपूर्णां रेवत्यां। वस्त्राच्छादितानड्वाहौ अश्वयुजि भरणीषु तिलधेनुम्।

अनेन विधिना नक्षत्रदक्षिणां यो ददाति सनक्षत्राणां यथासौ ज्योतिषामिव भास्करो भाति सर्व्वेषु लोकेषु इति।

सप्तम्यश्चतुर्थ्यर्थे कृत्तिकाभ्य इत्युपक्रमे चतुर्थीदर्शनात् नक्षत्रप्रीत्यर्थत्वाच्च दक्षिणानामुपोषितकृसरदानाङ्गत्वेन पूर्व्वदिनोपवास आदिश्यते[१]।

सुवर्णं शोभनवर्णं रुक्ममिति अग्रिमवाक्यादनुषङ्गः। अश्लेषासु त्वशोभनवर्णमिति ध्वन्यते।

मघोद्देश्यकदक्षिणाकार्य्ये श्राद्धं विधीयते मुख्यासम्भवे तन्निष्क्रयदानं मूलाध्यायोक्तरीत्या बोध्यम्।

ततो नक्षत्रेभ्यः पुष्पाञ्जलिं दत्त्वा स्वगृह्योक्तविधिना आज्यभागान्ते कृते, चित्राणि साकं दिवि रोचनानि इति

१ ख आक्षिप्यते।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यानि नक्षत्राणीति च सूक्ताभ्यामाज्यं हुत्वा, अग्निर्देवो यज्वन इति पूर्व्वोक्त-मन्त्राणां एकैकमन्त्रेण घृतं कृत्तिकाभ्य इत्युक्तहविषामेकैकहविषाष्टसंख्यया हुत्वा, तन्मन्त्रावृत्त्या तत्संख्यमाज्यं समिधश्च हुत्वा, तद्धोमान्ते तेन तेन मन्त्रेण तत्तन्नक्षत्रोपस्थानं कुर्य्यात्।

पुनरपि चित्राणि साधकमिति उक्तसूक्ताभ्यामाज्यं हुत्वा अभयगणेनाग्निमुपस्थाय स्विष्टकृदादितन्त्रं स्वगृह्योक्त-विधिना समाप्य, स्थापितदेवतोत्तरपूजाविसर्ज्जने कृत्वा ताः प्रतिमाः सोपस्करा आचार्य्याय प्रतिपाद्य ब्राह्मणान् भोजयेत्। ब्राह्मणान् भक्तेनेप्सन्तीति कल्पात्। सोप-स्करभक्तदानेन ब्राह्मणप्रसादं प्रार्थयेयुः। शूद्रा इत्यर्थः।

इति नक्षत्रयागः ॥ ४२ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ पञ्चमेऽह्नि रात्रौ निर्ऋति-याग: ॥ ४४ ॥

कृष्णवसनो ब्रह्मा शान्तिमण्डपनैर्ऋतकोणे स्थण्डिले स्वगृह्योक्तविधिना उपलेपनोल्लेखादिसंस्कारं कृत्वा क्रव्यादनामानमग्निं निधाय वीरणतृणैः प्रदीपयेत्।

ततः स्थण्डिलदक्षिणदेशे मृन्मयीं देवीं रासभारूढां निर्ऋतिं पटे लिखितां वा कृष्णवस्त्रामुदङ्मुखीं संस्थाप्य कृष्णवर्णैः पुष्पैः सम्पूज्य धूपं दत्त्वा बलिं हरेत्। उल्लोमिकाः कर्णवेष्टिकाः धानाः शष्कुलीः पललं तिलपिष्टं सुरां यवपिष्टं कुल्माषान् मांसं मधुमण्डकान् फलानि पुष्पाणि च कृष्णानि कृसरं मत्स्यान् अपूपानिति नैवेद्यं दद्यात्।

नैवेद्योत्तरपूजां समाप्याग्निसमीपे नैर्ऋताभिमुखं उपविश्य स्वगृह्योक्तविधिनाज्यभागान्तं कृत्वा नैर्ऋत-मन्त्रगणेन सप्तद्रव्याणि जुहुयात्। समैरेयं मांसं १ शर्करामिश्रं मलिनघृतं २ कुङ्कुमाः[1] ३ स्फुटितानि मुञ्ज-शिरांसि ४ शरपुष्पाणि ५ गोक्षुरकण्टकान् ६ धानाश्चेति सप्तद्रव्याणि जुहुयात्।

तत्र मुञ्जशिरोभिन्नानां शर्करामिश्राणां होमः मुञ्ज-शिरसान्तु तद्रहितानां मांसं कांस्येन स्रुवेण घृतस्य खादिरस्रुवेण इतरेषां हस्तेन मन्त्राश्च अभितं निर्ऋति-धत्ता १ धत्ते देवी निर्ऋतिः, यस्यास्त आसति आरादशतं अपेत एत निर्ऋतिरिति तु पञ्चेत्येवमृचः १६।

---

१ ख ग ङ कुक्कुशाः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नैर्ऋते गणे तु प्रतिद्रव्यं षोडशाहुतयः सर्व्वत्र निर्ऋतये इदमितित्यागः ।

ततस्तेषां[१] हस्तेन शर्कराहुतिः प्रजापतय इदं ततः स्वगृह्योक्तविधिना स्विष्टकृदाद्युत्तरतन्त्रसमाप्तिः ।

यद्वा नैर्ऋतचरुमेव पाकयज्ञविधिना स्वगृह्योक्तेन संपाद्योक्तर्ग्भिः षोडशाहुतीर्हुत्वा तुष्णीं शर्कराहुतिं हुत्वा तन्त्रसमाप्तिः कार्य्या ।

नात्रपक्षे मांसादिहोमः । पक्षद्वयेऽपि तत्र समाप्त्यनन्तरं खर्परे तमग्निं कृत्वा तन्त्रोक्तान् कुशां स्तुष्णीं हुत्वा, मृन्मयस्य लिखितस्य वा रासभस्य पृष्ठे हता ब्रह्मद्विष इति तत्कपालं भिनत्ति । ततोऽवस्मयोष्मेति ऋग्भिर्नीव्याया नद्याः समीपं गत्वा प्रदक्षिणावर्त्ते सिद्धे कृते वा पेटिकां निधाय तदुपरि जरन् ब्राह्मणो सूक्तगणेन स्नानं मार्ज्जनं वा कुर्य्यात् ।

अवयो यन्ति, आपो हिष्ठा, शन्नो देवीरभीष्टये, हिरण्यवर्णा इति सूक्तानि ।

पुनन्तु मा ऋक्, वायोः प्रभिः अरे वैश्वानरो रश्मिभिः।

## एषगणः ।

ततः कृष्णवस्त्र-चन्दनादिजले परित्यज्य आहृतश्वेतवस्त्रचन्दनधरः सन् तत्रैव ब्राह्मणद्वारा पुण्याहं वाचयेत् । यजमानः कांसं वसनं गाञ्च दद्यात् ।

---

१ ख ग पुस्तकद्वये तुष्णीं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ षष्ठेऽहन्यैन्द्रीशान्तिः ॥४५॥

नैर्ऋतयागाङ्गपूर्व्वाङ्गानां भिन्नप्रयोगत्वपक्षेऽधुनैव पूर्व्वोक्तसंकल्पपूर्व्वकं गणेशपूजादिमण्डपप्रतिष्ठान्तं कृत्वा तेषामेकप्रयोगत्वमवलम्ब्य सर्व्वसाधारणतया तदन्ते प्रागेव कृते सत्कृताचार्य्यः कृतनित्यक्रियोऽहतवासाः पवित्रपाणिः शुद्धं नवं कलशमादाय नदीभ्यः सरोभ्यो वा जलं पुण्यं समाहरेत्। [1]संस्रवन्तु नद्य इति तिसृभिर्ऋग्भिः।

ततः शन्न आपो हैमवति ऋग्भि यावतीषु मनुष्या इति वाचाभिमन्त्र्याग्नेरुत्तरतः स्थापयति।

तेनोदकेनाचम्य प्राणानायम्य तेनोदकेन सर्व्वं प्रोक्ष्य-त्यमूषु त्रातारमिन्द्रं २ आमन्त्रैः ३ स्वस्तिदा इति प्राङ्मुखो बद्धाञ्जलिः पठेत्।

अधुना स्वगृह्योक्तप्रकारेणाग्निस्थापनादि समास्त्वेत्या-हुतिसहितं कृत्वा प्रागेव सर्व्वसाधारणे कृत्ये त्वकृत्वा अग्नेः पुरस्तात् गोचर्म्ममात्रं स्थण्डिलमुपलिप्य तत्रोदकृदश-वस्त्राच्छादितं पीठं निधाय तन्मध्ये कुङ्कुमादिना कृतेऽष्ट-दले कर्षतदर्द्ध तदर्द्धान्यतरमितां सौवर्णप्रतिमां स्वशाखोक्त-मन्त्रैः कृताग्न्युत्तारणं विधाय—इन्द्रजुषस्व प्रवया पाहि शूर इति सप्तर्चसूक्तेन तस्यामिन्द्रमावाह्य गायत्र्यादिमन्त्रैः पञ्चगव्यैः संशोध्य एतदस्त्विति प्रतिष्ठाप्य तेन पञ्चामृता-भिषेकसहितैः षोडशोपचारैः संपूजयेत्।

---

१ ख संस्तुवन्तु।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ताम्बूलसमर्पणान्ते वस्त्रयुग्म-मधुपर्क-कुण्डल-मुद्रिकाभरण-चामर-वस्त्रोपानद्वितान-ध्वजपताकाः समर्प्य विशिष्टदक्षिणां समर्प्य तेनैव सूक्तेन महाफलसहितमर्घ्यं दत्त्वा तेनैव पुष्पाञ्जलिं समर्प्य प्रणम्याग्नेः पश्चादुपविश्य स्वगृह्योक्तप्रकारेण इन्द्रचरोर्वर्हिष्यासादनान्तं कृत्वा आज्यभागान्ते अतिसृष्टोऽपां वृषभ इति सूक्तेन कांस्यपात्रे उदकमानीय—सर्व्वा इमा आप ओषधयः इति ब्रह्माणं ब्रूयात्।

ॐ सर्व्वा इमा ओषधय इति ब्रह्मणोक्ते चित्राद्यौषधीरावाहयामीत्यौषधीरावाह्याभिमन्त्रयते। शन्नो देवी ऋक् १ तत्सवितुः १ अबन्धो यन्ति सू १ आपो हिष्ठा सू १। शन्नो देवी सू १। हिरण्यवर्णा सू १। उत्तदेवा सू १ यद्यन्तरीक्षे ऋ०। पुनर्मैत्विन्द्रियं ऋ १० शिवानः ऋ १ शंनो वातो वातु ऋ १ अग्निं ब्रूमो सू ३।

एतैर्मन्त्रैरिन्द्रजुषस्वेति सप्तभिश्चाभिमन्त्र्य यन्मातलीमिति पठेत्।

पुः तत्सवितुः ऋ १ शन्नो देवी ऋ ० एताभ्यामभिमन्त्र्य तेन शान्त्युदकेन त्रिरग्निं प्रोक्ष्य त्रिः पर्य्युक्ष्य यजमानमाचामयति प्रोक्षति वात उत्तरतो निहिते कुम्भे तच्छेषोदकं निःक्षिपेत्।

ततोऽग्नेर्दक्षिणत उपविष्टो यजमानो देवता उद्दिश्य हविस्त्यागं कुर्य्यात्।

तत आचार्य्योऽश्ववस्तुलोमानि व्रीहीन् यवान् शिग्रं उशीरतृणं गुग्गुलं अतिविषां पिप्पलीमतिपिप्पली

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अलाबुबीजानि सह देवी सहितानि शङ्खफलानि वा शरपुष्पाणि[1] शरमूलानि पञ्चाणि यथाक्रमं च तेन गणेन हुत्वा तेनैवाज्यं आविकं माहिषं वा घृतं हुत्वा तेनैव आतस्यादि समिधो होतव्याः।

ताश्च—

आतसीर्जारुषाश्चैव चापुसीर्मांसली तथा।
खादिरीरथ पालाशी[2] अष्टौ वा समिधस्तथा ॥१॥
अपामार्गीरथाश्वथ्वीरेतेनैवोपतिष्ठतु।

इति कल्पोक्ताः।

आतसी जोया। पारिजातकी मुसलीकन्दा। खदिर-पलाशा। शमी अपामार्गाश्च। एतेषामभावे पलाशा एव होतव्याः। इत्याथर्व्वणिकाः।

एतद्धोमान्ते चातनगणेनैवोपतिष्ठते।

अयं चातनगणः—

स्तुवानमग्ने (सू० १)। येऽमावस्यां (सू १)। उपप्रावा सू। शालां सू अरामक्षण मसि (सू)। शन्नो देवी (सू १)। आपश्यति (सू १) तान् सत्यौजा (सू १)। पुरस्ताद्युक्तो सू १। अनदवि (सू १) प्राग्नये (ऋ १)। रक्षोहनमित्यनुवाकः १।

इति चातनर्च्चः।

---

१ ख वीरणपुष्पाणि। २ ग शमीर्वा।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततः सर्व्वौषध्यः सप्तधान्यानीत्यर्थः ।

खदिर अपामार्गः शुण्ठी वचा भृङ्गराजः शतावरी शाल्मली चन्दनं सहदेव्यौषधिः पृश्निपर्णी । गुर्ज्जरेषु पिचनीति प्रसिद्धा । अपरा श्वेतदूर्व्वा अजशृङ्गी । भर्गासिंगीति गुर्ज्जरेषु प्रसिद्धा । एतानि संस्पृश्यामन्त्रकं सङ्कृत्वा, उत्तरतः शान्त्युदकसमीपे उडुम्बरदण्डं शतपुष्पा गौरसर्षपदशपुत्रकदशाश्मसिकताः प्रतिसरं सन्निधाय अश्मवर्त्मेति[१] सूक्तेनाज्यं जुह्वन्ति शान्त्युदकञ्च संपातयेत् ।

सर्व्वासु वेश्मनो दिक्षु मण्डलान्युपलेपयेत् ।
[२][विकीर्य्य सिकतान्तेषु शान्ताद्भिः प्रोक्षयेत्ततः ॥ २ ॥
निदध्यादश्मनस्तत्र द्वारस्योपरि लेपयेत् ।
निदध्यात्तत्र दण्डादीन् विकीर्य्य सिकतास्ततः ॥ ३ ॥]

अश्मनः सपुत्रकानिति पूर्व्वोक्तशान्त्युदकप्रोक्षणमप्यपकृष्यते ।

ततो येऽस्यामिति प्रतिदिशं हुत्वा प्राचीदिगिति प्रतिदिशमुपतिष्ठते ।

ततो वक्ष्यमाणमन्त्रैर्जुह्वन् कुम्भे सम्पातं कुर्य्यात् । तत्र शान्त्यादिपञ्चगणैः प्राग्वदाज्यं हुत्वा पाप्महादिपञ्चगणैराज्यं जुहुयात् ।

---

१ ख वर्न्मेति ।

२ क ख पुस्तकद्वये [ ] चिह्नितांशः पतितः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विद्देवा सू १ । यदग्निरापोऽऋक् । अपनः शोशुचदघं सू १ । एकैकगणान्ते स्वस्ति भवन्तो ब्रूवन्तु । इति स्वस्तिवाचनं गुग्गुलुहोमश्च कार्य्यः ।

उदगातां सू १ । अवमापाप्मन् ।

इति पाप्महागणः ।

जरायुज सू १ । यदग्निरापो सू १ । उदगगाता सू १ । हरिणस्य सू १ मुञ्चामि त्वा सू १ भवः शर्व्वौ मत्वेवा सू १ योगिरिष्यजायथाः सू १ दिवे स्वाहा सू १ । अग्निस्तोकमानं सू १ । अग्नेरिवास्य दहत एति ऋ ३ । अवमा पाप्मन् ३ । अपरो येहित्या-मिव ऋ ३ । वारणो वारणानां ऋ १ । इमं यम-मनायोगैः २ । विधृदस्य ३ नमो रुद्राय ऋ ३ । शिक्षति अर्थं सू ३ ।

इति यक्ष्मनाशनगणः ।

छो दृक्षं[1] दोर्विजित्य० सू ० । यो न जीवो ३ । पर्य्यावर्त्यें युष्मान् ३ । यो नस्तापयदीप्सति २ । यन्मे मनस ऋ २ स्वप्नः स्वप्नाभि ऋ १ । विघ्नतेत्व-प्रजविचग्राह्याः सूक्त ३ ।

इति दुःस्वप्ननाशनगणः ।

[2]अथायौः (सूं ३)। तुभ्यमेव जरिमन् (सू १)। अक्षीभ्यां ते (सू १)। मुञ्चामि त्वा सू १। उत देवा

---

१ ग दौषधूं। २ ग पुस्तके अधिकः परो ये हि ऋ १ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सू १। आवन्नस्ते (सू १)। अन्तकाय अनुवाक १। प्राणाय नमो ऋक् (१६) विषसहिं (सू ३)।

[1]इत्यायुष्यगणः।

ये त्रिसप्ता (सू १)। अस्मिन् वसु (सू १) प्रातरग्निं (सू १) हस्तिवर्चसेमं (सू १। सिंहव्याघ्र सू १। यशसामिन्द्रो (सू १) येन महानघ्राजघ्नवं (सू १)।

इति वर्चस्यगणः।

इन्द्रस्य बाहु (सू १)। पुनरिन्द्रस्य बाहु (सू १) सहस्रबाहु (सू १) आवतस्त (सू १)। अन्तकाय अनुवाक (सू १) उत देवां (सू १) प्राणाय नमो (ऋ ०) नमस्ते प्राणाक्रन्दाय (ऋ ०)। उत देवा (ऋ ०)। यत् प्राणा ता (ऋ १)। उत देवा (सू ०)। यदाप्राणो० (ऋ ०)। अभिवृषा (सू ०) उत देवा (सू ०) नमस्ते प्राणायते (ऋ ०)। उत देवा (सू ०)। नमस्ते प्राण प्राणते (ऋ ०)। उत देवा (सू ०)। या ते शण ऋक् ०। उत देवा सू ०। प्राणः प्रजा (ऋ ०)। उत देवाः (सू) प्राणो मृत्यु ०। उत देवा सा सू ०। प्राणो विराट् ऋक्। उत देवा सू ०।

अथोक्तविधया प्राणायेत्यादि-द्वादशव्यतिषिक्ते तु शान्तीये प्राणापानावित्यृचं व्यतिषज्य जुहुयात्।

---

१ ख घ पुस्तकद्वये आयुष्यगणो नास्ति।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व्यतिषिक्तास्तु ताः सर्व्वाः शान्तीये न सह स्मृताः।
व्यतिषिक्ते तु शान्तीये प्राणापानाविति स्मृता ॥ ४ ॥

इति कल्पात्।

प्राणापानौ व्रीहियवौ ऋक् प्राणाय नमो ऋक्। उत देवा सू० प्राणापानौ व्रीहियवौ ऋक्।

नमस्ते प्राणाक्रन्दाय ऋक्। यत् प्राणस्तनौ ऋक् यत् प्राणस्तनयित्नुना ऋक्। उत देवा सू० प्राणापानौ ऋक् यत् प्राणतः ऋक् उत देवा ऋक्। प्राणापानौ ऋक् यदाप्राणे ऋक् उत देवा ऋक्। प्राणापानौ ऋक् अतिष्ठषा ऋक् उत देवा ऋक्। प्राणापानौ ऋक् नमस्ते अस्त्वायते ऋक् उत देवा ऋक्। प्राणापानौ ऋक् नमस्ते प्राणापान ते ऋक् उत देवा ऋक्। प्राणापानौ ऋक् या ते प्राणे प्रिया ऋक् उत देवा ऋक्। प्राणापानौ ऋक् उत देवा ऋक्। प्राणे मृत्युः ऋक् उत देवा ऋक्। प्राणापानौ ऋक् प्राणो विराट् ऋक् उत देवा ऋक्।

तत इन्द्र जुषस्वेति सप्त प्रधानमन्त्रैराज्य० हुत्वा संपाद्य अपानत प्राणतीत्यादि प्राणसूक्तशेषं केवलं समाप्य स्वस्त्ययनाद्यष्टगणैर्जुह्वन् कुम्भे सम्पातं कुर्य्यात्।

तत्र अमूः परे सू० १ यातन्त इन्द्रा सू० येन सोम सू० नमो देववेदेभ्य सू० अभयं मित्रावरुणा ऋक्। उपप्रागात् सहस्राक्षो ऋक् १। अनमित्रं नो ३। यमो मृत्यु ऋक् ३। बृहस्पति ऋक्। त्वमुष्ट ऋक् त्रातारं ऋक्। इन्द्रः सुमाता ऋक्। आमन्त्रे ऋक्।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मर्म्माणि ते ऋक् । वर्म्म मेधा वा पृथिवी ऋक् । ऐन्द्राग्नं वर्म्म ऋक् । गिरयन्ते ऋक् । अवसानायास्ते प्राची ऋक् ।

इति स्वस्त्ययनगणः ।

स्वस्ति दाविशा सू १ ब्राह्मणेन पर्य्युक्तासि ऋक् । न ता अर्वाक् १ । अभयं मित्रावरुणा ऋक् । अभयं द्यावा पृथिवी ऋक् । हतं तर्न्द ऋक् । पूषे मा ऋक् । इन्द्र सुमात्रा ऋक् । मैतं यथा ऋक् । स्वस्ति दाविशा ऋक् । इन्द्रो वे ऋक् । अवसाना नमस्ते घोषणीभ्यां ऋक् १ । अवसाना आते राष्ट्र ऋक् यत इन्द्र भयामहे ऋक् ।

इत्यभयगणः ।

विघ्नाशरस्य सू० मानीस्वदन् सू । श० सितम सू । त्वया मन्यो सू० । एतादेव सू० । अथ मन्यु ऋक् । निर्हस्त ऋक् परिवर्त्मानि ऋक् । आभि भू ऋक् ।

इत्यपराजितगणः ।

यः सपत्नो ऋक् १ । इतश्च ऋक् १ । उपेन्द्रद्विषतो ऋक् यूय० नः प्रवतोक्त ऋक् इममग्न आयुषे । ऋक् तिस्रो देवी संहितः ऋक् इन्द्रस्य शर्म्मासि ऋक् येन देवा असुराणां ऋक् अनडुह्मः ऋक् तनुष्टे वाजिन् वाजस्य तु प्रसवे ऋक् अधिब्रूहि ऋक् रक्षोहनं ऋक्

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

येस्ता...ऋक् । वर्म्म मे द्यावापृथिवी २ । वर्म्ममज्जं ऋक् १ । मिच पृथिव्योदक्रामत् सू १ । असत्यं पुरस्तात् ऋक् १ ।

इति शर्म्मवर्म्मगणः ।

ये पुरस्तात् सू १ । ब्रह्मयज्ञानां ऋक् १ । अनाज्ञा ऋक् १ । सहस्रधारा सू १ । अग्निर्माया तु सू ४ । जितमस्माकं ऋ २१ ।

इति देवपुराणगणः ।

येऽस्यां प्रतीचीमिति रुद्रगणः ।

रुद्रं कलशे ऋक् । येऽस्या सू १ । उदितस्त्रयो सू १ । भव शर्व्वौ मन्ये वां सू १ । ब्रह्मयज्ञानं ऋक् १ । सहस्र-धारं सू १ । ग्रीष्मे हेमन्त ऋक् २ । अनुघट्ट ऋक् ३ । मह्यमायो ऋक् ६ यमो मृत्यु ऋक् ३ । याते रुद्र ऋक् १३ । योऽग्नौ रुद्रो ऋक् १ । भव शर्व्वौ रुद्रे त मृडे तं सू ३ । भव शर्व्वाविदं ऋक् १ । यस्ते सर्पोऽसि १ । तस्मै प्राच्यादिशे अन्तर्दशात् ।

इति रौद्रगणः ।

मानो विद्वन् ह ३ । अमूः पारे सू । अद्यदिष्ट सू । अग्ने यत्ते सू ५ । रुद्रं जलाष ऋक् १ । यस्यांस्थ सू १ । विद्देवा सू १ । उत देवा सू १ । आग्ने मन्वा सू १ । अयनः शोशुचदघो सू १ । पृथिव्यामग्ने सू १ । संमाग्ने वर्चसा ऋक् १ । ब्रह्मयज्ञानं ऋक् १ । अनामा ये ऋक् १ । सहस्रधार सू १ । सविताप्रसवानां सू १ । नवप्राणां सूं १ । यातं न इन्द्रा ऋक् ६ । मेनसो मा ऋक् १ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नमो देवेभ्यः ऋट ३। अभयं मित्रावरुणौ ऋट ३। उपप्रागात् सहस्राक्षे ऋट ३। सिंहव्याघ्रे ऋट ४। अभयं द्यावापृथिवी ऋट ३।

अभयं मित्रावरुणौ ऋट ३। नुपप्रागात् सहस्राक्षे ऋट ३।

ग्रीष्मे हेमन्ते ऋट २। अनडुद्भ्यः ऋट ३। मह्यमायो ऋट ६। यमो मृत्युः ऋट ३। अभित्वेन्द्र ऋट ३। विश्वजित्त्रायमाणा ऋट ४। इमम्मे त्यग्ने ऋट ४। विषाणाया शान् ऋट ४। शकधूमं ऋट ४। सोमस्यांशोः ऋट। बृहस्पति नः ऋट १। अमूपु ऋट २। इन्द्रः सुत्रामा ऋट १। आमन्द्रैरिन्द्रहरि ऋट १२। अन्तकाय अनुवाक्। अयं प्रतिसरो ऋट २२। अयं मे वरुणो मणिः ऋट २६। भव शर्व्व मृड रुद्र ३। प्राणापानौ ऋट २६। अग्निं ब्रूमो ऋट १६। सत्यं बृहत् २। गिरयस्ते ऋट २। ग्रीष्मस्ते ऋट १। उपस्थास्ये ऋट २। सहस्रशृङ्गो वृषभो ऋट १। मा प्रगामपथो ऋट २। तस्मै प्राच्यादिशो अन्तर्देशात्।

इति चित्रागणः।

ततः स्वस्तिवाचनं प्रसिद्धविधिना कृत्वा गुग्गुलुहोमं तुष्णीं कुर्य्यादिति केचित्।

अन्ये त्वेकैकगणान्ते स्वस्तिभवन्तो ब्रुवन्त्विति स्वस्तिवाचनं गुग्गुलुहोमश्च कार्य्य इत्याहुः।

ततः आज्याहुतीर्जुहुयात्। नमो रक्षोभ्यः स्वाहा १। नमो रक्षोऽधिपतिभ्यः स्वाहा। नमो गणेभ्यः स्वाहा। नमो

महागणेभ्यः स्वाहा । नमो महागणाधिपतिभ्यः स्वाहा । ततो यथा द्यौः सू० ३ । तुभ्यमेवं १ । अक्षिभ्यां ते सू १ । मुञ्चामि त्वा सू १ । उत देवा सू १ । आरजस्ते[1] सू १ । अन्तकाय अनुवाक् प्राणाय नमो ऋ १ । ३६ । विषासहिं सू ३ । इत्यायुषगणेन हुत्वा यजमाने संपातान् निषिञ्चेदिति ।

द्यौः सू ० । सिनीवाली ऋ । कुहूर्देवी ऋचः ४ । इति पात्नीवतगणेन हुत्वा पत्न्याः संपातान्निषिञ्चेत् । द्विशलाकया मथितञ्च दधि मिश्रितशक्तूंश्च इदं रक्षोभ्य इति दक्षिणस्यां दिशि दत्त्वा संपातोदकेन सपत्नीकं यजमानमभिषिञ्चेत्—

ये पुरस्तात् सू १ । ईशानां त्वा सू १ । समं ज्योतिः सू १ । उतोऽसि सू १ । पुनन्तु मा सू १ । वायो हुतः सू १ । वैश्वानरो सू । एभिर्मन्त्रैः ।

ततो दर्भमयं मणिं दधि-मधु-वासितं इन्द्र जुषस्वेति सप्तभिर्मन्त्रैरभिमन्त्र्य [2][सौवर्णादि योगेनालङ्कृत्य गन्ध-पुष्पादिभिरभ्यर्च्य यजमानदक्षिणहस्ते बध्नीयादिमं बधा-मीत्यादिभिर्वक्ष्यमाणैश्चतुर्दशमन्त्रैः ।]

इमं बध्नामि ते मणिं दीर्घायुष्वाय तेजसे ।
दर्भसम्पत्नं दम्भनं द्विषतस्तापनं हृदः ॥५॥
द्विषतस्तापनं हृदः शत्रूनां तापयन्मनः ।
दुर्हृदः सर्वास्त्वं दर्भधर्म्म इवारीन् सन्तापयन् ॥६॥

---

१ ख अवतस्ते । २ क घ पुस्तकद्वये [ ] चिह्नितांशः अधिकः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धर्म्म इवाभितप्तं धर्म्मौ द्विषतो निपतन्मणे[1] ।
हृदः सपत्नाधिरिन्द्र इव वाहुजं बलं ॥ ७ ॥
भिन्द्धिदर्भसपत्नानां हृदयं द्विषतां मणे ।
ओघत्वचामिव भूम्याः मिरण्यां पाठिता तया ॥ ८ ॥
भिन्द्धि दर्भसपत्नान् मे निधिं मे पृतनायतः ।
भिन्द्धि सर्व्वान् दुहृदो भिन्द्धि मे द्विषतोर्मणे ॥ ९ ॥
वृश्च दर्भे सपत्नान्मे वृश्च मे पृतनायतः ।
वृश्च मे सर्व्वान् दुर्हृदो वृश्च मे द्विषतोर्मणे ॥ १० ॥
क्षन्त दर्भे सपत्नान् मे क्षन्त मे पृतनायतः ।
क्षन्त मे सर्व्वान् दुर्हृदः क्षन्त मे द्विषतोर्मणे ॥ ११ ॥
पीष दर्भे सपत्नान्मे पीष मे पृतनायतः ।
पीष मे सर्व्वान् दुर्हृदः पीष मे द्विषतोर्मणे ॥ १२ ॥
बिन्ध्य दर्भे सपत्नान् मे बिन्ध्य मे पृतनायतः ।
बिन्ध्य मे सर्व्वान् दुर्हृदो बिन्ध्य मे द्विषतोर्मणे॥ १३ ॥
निक्ष दर्भे सपत्नान् मे निक्ष मे पृतनायतः ।
निक्ष मे सर्व्वान् दुर्हृदो निक्ष मे द्विषतोर्मणे ॥ १४ ॥
न्दधि दर्भ सपत्नान् मे न्दधि मे पृतनायतः ।
न्दधि मे सर्व्वान् दुर्हृदो न्दधि मे द्विषतोर्मणे ॥ १५ ॥
रुधि दर्भ सपत्नान् मे रुधि मे पृतनायतः ।
रुधि मे सर्व्वान् दुर्हृदो रुधि मे द्विषतोर्मणे ॥ १६ ॥

---

१ ख निपातन्मणे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मन्थ दर्भ सपत्नान् मे मन्थ मे पृतनायतः ।
मन्थ मे सर्व्वान् दुर्हृदो मन्थ मे द्विषतोर्मणे ॥१७॥
पिणुहि दर्भ सपत्नान् मे पिणुहि पृतनायतः ।
पिणुहि मे सर्व्वान् दुर्हृदः पिणुहि मे द्विषतोर्मणे ॥ १८ ॥
तुष दर्भ सपत्नान् मे तुष मे पृतनायतः ।
तुष मे सर्व्वान् दुर्हृदो तुष मे द्विषतोर्मणे ॥ १९ ॥
दह सर्व्व सपत्नान् मे दह मे पृतनायतः ।
दह मे सर्व्वान् दुर्हृदो दह मे द्विषतोर्मणे ॥ २० ॥
जहि दर्भसपत्नान् मे जहि मे पृतनायतः ।
जहि मे सर्व्वान् दुर्हृदो जहि मे द्विषतोर्मणे ॥२१॥
यत्ते दर्भ जरामृत्युशतं वर्म्म सुधर्म्म ते ।
तेऽपि मां वर्म्मिणं कृत्वा सपत्नान् जहि वीर्य्यैः ॥२२॥
शतं ते दर्भ वर्म्माणि सहस्रं वीर्य्याणि ते ।
तस्मै विश्वे वा देवा जहि मे भर्त्तवा आहुः ॥२३॥
त्वामाहुर्देव ब्रह्म त्वां देव ब्रह्मणस्पतिं ।
त्वामिन्द्रस्याहुर्वर्म्मत्वं ग्गुं राष्ट्राणि रक्षति ॥ २४ ॥
सपत्नक्षपणं दर्भ द्विषतस्तपनं हृदः ।
मणिक्षत्रस्य वर्द्धनं तनूनपातं दुःकृणोमि ते ॥ २५ ॥
यत् समुद्रो अभ्यक्तं पर्ज्जन्यो विद्युता सह ।
ततो हिरण्मयो विदुस्ततो दर्भो अजायतः ॥ २६ ॥

एवं सूक्ताभ्यां दर्भमणिं सम्पात्याभिमन्त्य हस्ते वध्नाति। ततो नवं वस्त्रद्वयं परिधाय वर्हिष्यासादितचरुं इन्द्र

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जुषस्वेति सप्तभिर्हुत्वा [१]स्विष्टकृदादिस्तु च माषभक्तं बलिं दत्वा सदीपं दिक्पालेभ्यो दद्यात्।

पूर्व्वे—त्रातारमिति गर्भ ऐन्द्रीस्त्रिष्टुभ्। इन्द्रप्रीत्यर्थे बलिदाने विनियोगः। त्रातार इन्द्राय नमः।

इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय। एवं माषभक्तबलिं समर्पयामि नमः, भो इन्द्र दिशं रक्ष, बलिं भक्षय, मम यजमानस्यायुष्कर्त्ता क्षेमकर्त्ता शुभकर्त्ता शान्तिकर्त्ता भव, इति पुष्पाक्षतजलानि पूर्व्वाभिमुखं समर्पयेत्।

तत आचम्याग्नेये अग्नेर्मन्वमिति। ब्रह्माग्निस्त्रिष्टुभ् अग्निप्रीत्यर्थं बलिदाने विनियोगः। अग्नेर्मः अग्नये नमः। अग्नये साङ्गाय इत्यादि भो अग्ने दिशं रक्ष।

आचम्य दक्षिणे यमो मृत्युरिति ब्रह्मायमस्त्रिष्टुभ् यमप्रीत्यर्थं बलिदाने विनियोगः। यमो मृत्युः—यमाय नमः। यमाय साङ्गाय इत्यादि भो यम दिशं रक्ष।

आचम्य नैर्ऋते अभितं निर्ऋतिरित्यथर्व्वा निर्ऋतिरनुष्टुव् निर्ऋतिप्रीत्यर्थं बलिदाने विनियोगः। अभिजं निर्ऋति निर्ऋतये नमः। निर्ऋतये साङ्गाय इत्यादि भो निर्ऋते दिशं रक्ष।

---

१ ख पुस्तके अधिक पाठः स्विष्टकृदाति तन्त्रशेषं पूर्णाहुतिं कुर्य्यात्। तच्चाथर्व्वणरीत्या इत्थं कुर्य्यात् प्रथममग्न्यायतनस्य समन्ताद्दिक्षु विदिक्षु च।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आचम्य पश्चिमे ध्येयस्त्वादित्यथर्व्वा वरुणस्त्रिष्टुब् वरुण-प्रीत्यर्थं बलिदाने विनियोगः । पश्चात् वरुणाय नमः । वरुणाय साङ्गाय भो वरुण दिशां रक्ष ।

आचम्य वायव्ये वायो सर्व्वजित्यथर्व्वा वायुस्त्रिष्टुप् वायुप्रीत्यर्थं बलिदाने विनियोगः । वायो मवि वायवे नमः, वायवे साङ्गाय भो वायो दिशां रक्ष ।

आचम्योत्तरे य उत्तरत इति ब्रह्मा-सोमस्त्रिष्टुब् सोम-प्रीत्यर्थं बलिदाने विनियोगः । य उत्तरतः सोमाय नमः, सोमाय साङ्गाय० सोमदिशां रक्ष ।

आचम्य ईशाने धाता दधातु न इत्यङ्गिरा ईशानो गायत्री ईशानप्रीत्यर्थं बलिदाने विनियोगः । धाता दधातु ईशानाय नमः । ईशानाय साङ्गाय...भो ईशानदिशां रक्ष ।

आचम्य ईशानपूर्व्वयोर्मध्ये अनन्तं विततं विराटपङ्क्तिः अनन्तप्रीत्यर्थं बलिदाने विनियोगः । अनन्तविततं अनन्ताय नमः । अनन्ताय साङ्गाय भो अनन्तदिशां रक्ष ।

आचम्य निर्ऋतपश्चिममध्ये ब्रह्मापरमित्यथर्व्वा ब्रह्मा-स्त्रिष्टुब् ब्रह्माप्रीत्यर्थं विनियोगः । ब्रह्मा परब्रह्मणे नमः। ब्रह्मणे साङ्गाय ब्रह्मदिशां रक्ष ।

तते ग्रहवेद्रे समन्ताद्वलयो देयाः ।

आचम्य पूर्व्वे विषासहिमित्यथर्व्वादित्यो जगती आदित्यप्रीत्यर्थं बलिदाने विनियोगः । विषासहि

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आदित्याय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय ईश्वराग्निरूपाधिदेवता-प्रत्यधिदेवतासहितायेमं माष-भक्तबलिं समर्पयामि। इति पुष्पाक्षतजलं क्षिपेत्।

रवे इमं बलिं गृहाण मम यजमानस्य आयुष्कर्त्ता क्षेमकर्त्ता शुभकर्त्ता शान्तिकर्त्ता भव। एवं सर्व्वत्र।

आचम्य वेद्याग्नेये शवधूममित्यथर्व्वा सोमोऽनुष्टुव् सोमप्रीत्यर्थं बलिदाने विनियोगः। शवधूमं सोमाय नमः, सोमाय साङ्गाय उमारूपाधिदेवता-प्रत्यधिदेवता-सहिताय इत्यादि भो सोम इमं बलिं गृहाण मम यजमानस्य आयुरित्यादि।

आचम्य दक्षिणे त्वया मन्यो इति ब्रह्मा-भौमस्त्रिष्टुब् भौमप्रीत्यर्थं बलिदाने विनियोगः। त्वया मन्यो भौमाय नमः, भौमाय साङ्गाय स्कन्दरूपाधिदेवता-सहिताय भौम इदं बलिं गृहाण मम यजमानस्य आयुरित्यादि।

आचम्य ईशाने यद्राजान इति विष्णुर्बुधः पङ्क्तिः बुधप्रीत्यर्थं बलिदाने विनियोगः। यद्राजानो बुधाय नारायणविष्णुरूपाधिदेवता-सहिताय भौम इदं बलिं गृहाण मम यजमानस्य आयुरित्यादि।

आचम्योत्तरे सबुध्न्यादिति ब्रह्मा त्रिष्टुव् बृहस्पति-प्रीत्यर्थं बलिदाने विनियोगः। सबुध्न्या बृहस्पतये नमः, बृहस्पते बलेन्द्ररूपाधिदेवतासहिताय भो बृहस्पते इमं बलिं गृहाण।

आचम्य पूर्व्वे नूनं तदस्येति ब्रह्मा शुक्रस्त्रिष्टुव् शुक्र-प्रीत्यर्थं बलिदाने विनियोगः। नूनं तदस्येति शुक्राय

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

साङ्गाय इन्द्रेन्द्राणीरूपाधिदेवतासहिताय भो शुक्र इमं बलिं गृहाण।

आचम्य पश्चिमे सहस्रबाहुरिति नारायणः शनैश्चरोऽनुष्टुब् शनिप्रीत्यर्थं बलिदाने विनियोगः। सहस्रबाहुः शनये नमः, शनये साङ्गाय इत्यादि। यम प्रजापतिरूपाधिदेवतासहिताय भो शने इमं बलिं गृहाण।

आचम्य नैर्ऋत्यां दिव्यं चित्रमिति राहुस्त्रिष्टुब् राहुप्रीत्यर्थं बलिदाने विनियोगः। दिव्यं चित्रं राहवे नमः, राहवे साङ्गाय कालसर्पाधिदेवता-प्रत्यधिदेवतासहिताय भो राहो इमं बलिं गृहाण।

आचम्य वायवे यस्ते पृथुरित्यथर्व्वा केतुस्त्रिष्टुब् केतुबलिदाने विनियोगः। यस्ते पृथुः केतवे नमः केतवे साङ्गाय चित्रगुप्त-ब्रह्मरूपाधिदेवता-प्रत्यधिदेवतासहिताय भो केतो इमं बलिं गृहाण।

अथ वेद्या उत्तरतो गणपत्यादि पञ्चकस्य।

आचम्य निर्लक्ष्ममिति द्रविणोदा विनायकोपरिष्टाद्विराट् बृहती-गणपतिप्रीत्यर्थं बलिदाने० निर्लक्ष्मगणपतये नमः, गणपतये साङ्गाय० ऋद्धिबुद्धिसहिताय इमां माषभक्तबलिं० भो गणपते इमं बलिं गृहाण।

आचम्य पृतनाजितमित्यथर्व्वा दुर्गा त्रिष्टुब् दुर्गाप्रीत्यर्थं बलिदाने विनियोगः। पृतनाजिते दुर्गायै नमः, दुर्गायै साङ्गायै भो दुर्गे इमं बलिं गृहाण।

अन्तरीक्षे वायव इति ब्रह्मा-वायु-विराट् पङ्क्तिः वायु-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रीत्यर्थं बलिदाने विनियोगः। अन्तरीक्षे वायवे नमः, वायवे साङ्गाय० भो वायो इमं बलिं गृहाण।

आचम्य आप्यव इत्यथर्व्वा आकाशस्त्रिष्टुव् आकाश-प्रीत्यर्थं बलिदाने विनियोगः। आप्यव आकाशाय नमः, आकाशाय साङ्गाय...भो आकाश इमं बलिं गृहाण।

आचम्य सचेन्नोपाथ इत्यङ्गिरा अश्विनावनुष्टुव् अश्विनीप्रीत्यर्थं बलिदाने विनियोगः। सचेन्नोपाथो अश्विभ्यां साङ्गाय० भो अश्विनौ इमं बलिं गृह्णीतम्। युवां मम यजमानस्यायुष्कर्त्तारौ क्षेमकर्त्तारौ शुभकर्त्तारौ शान्तिकर्त्तारौ भवतं।

आचम्य शेरन्नेक इति ब्रह्मा-वास्तोष्पतिः पुर उष्णिक् वास्तोष्पतिप्रीतये वासदाने विनियोगः। शेरन्नेकः वास्तोष्पतये नमः, वास्तोष्पतये साङ्गाय भो वास्तोष्पते इमं बलिं गृहाण।

तत आचम्य ग्रहपीठस्याग्रे महाबलिं कुङ्कुमादिना युक्तं रक्तपुष्पादियुतं सदीपं सदक्षिणं क्षेत्रपालाय दद्यात्। क्षेत्रियात्वेति भृग्वङ्गिरोक्षेत्राधिपतिस्त्रिष्टुप् क्षेत्राधिपति-प्रीत्यर्थं बलिदाने विनियोगः।

क्षेत्रियात्वा क्षेत्रपालाय भूतप्रेत-पिशाच-राक्षस-डाकिनी-शाकिनी-वेतालादिपरिवारयुताय इमं बलिं समर्पयामि। इति पुष्पाक्षतजलं क्षिपेत्। भो क्षेत्रपाल इमं बलिं गृहाण, यजमानस्य आयुष्कर्त्ता-क्षेमकर्त्ता-शान्तिकर्त्ता-पुष्टिकर्त्ता-तुष्टिदो भवेति इमं बलिं शूद्रेण दुर्बलब्राह्मणेन वा चतुष्पथे क्षेपयेत्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततः प्रक्षालितपाद आचम्य देशकालौ सङ्कीर्त्त्य कृतस्य सग्रहमखामुकशान्तिकर्म्मणः सद्गुणार्थं[1] पूर्णाहुतिं होष्ये इति संकल्पः ।

क्वचिद्द्वादशगृहीतं वा आज्यं कृत्वा वस्त्रनारिकेलादि तदुपरि निधाय पूर्णाहुतिं यजमानान्वारब्ध आचार्य्यो जुहुयात् ।

तत्र मन्त्राः ।

समास्त्वा इति सूक्तस्य शौनकोऽग्निस्त्रिष्टुप् क्षेत्रेणाग्नेः स्वेनेति चतुष्पदार्षीपङ्क्तिर्विराट्प्रस्तारपङ्क्तिःपूर्णाहुतौ विनियोगः । समास्त्वाऽऽ इदमग्नये न ममेति यजमानस्त्यागं कुर्य्यात् ।

ततः स्वगृह्योक्तविधिना समाप्याचार्य्यादीन् पूजयित्वाचार्य्याय ग्रामं दद्यात् । अन्येभ्योऽपि यथाशक्तिर्हिरण्यं दत्त्वेन्द्रं सम्पूज्य विसृज्य सोपस्करप्रतिमामाचार्य्याय प्रतिपाद्याग्निं सम्पूज्य गच्छगच्छेतिविसृज्य अयुतं सहस्रं शतं वा ब्राह्मणान् भोजयेत् । तेभ्योऽन्येभ्यश्च भूयसीं दक्षिणां दत्त्वा राज्याभिषेकाङ्गत्वेन या कृतैन्द्री महाशान्तिः सा परिपूर्णास्त्विति वाचयेत् ।

इत्यैन्द्री शान्तिः ॥

---

१ ख साद्गुण्यार्थं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथाभिषेकप्रयोग-पुराणानि ॥४६॥

अथाभिषेकप्रयोगं वक्तुं तत्प्रतिपादकानि पुराणानि लिख्यन्ते ।

विष्णुधर्म्मोत्तरे भूयसामङ्गानां श्रवणात् भूयस्त्वेनोभयश्रुतीति न्यायेन तदुत्पत्तिपरत्वम् । अन्यत्र तु गुणविधानपरत्वमिति. गुणोपसंहारार्थमन्येषामपेक्षासत्वेऽपि विष्णुधर्म्मोत्तरं तावल्लिख्यते ।

प्राप्तेऽभिषेकदिवसे सोपवासः पुरोहितः ।
सोष्णीषः श्वेतवसनः सितचन्दनभूषितः ॥ १ ॥
सितमाल्योपवीतश्च सर्व्वाभरणभूषितः ।
वेदिमुल्लिख्य मन्त्रेण हुत्वा च विधिवत्ततः ॥ २ ॥
जुहुयाद्वैष्णवान्मन्त्रांस्तथा शाक्रान्विचक्षणः ।
सावित्रान्वैश्वदेवाद्यान् सौम्यांश्च विधिवत्ततः ॥ ३ ॥
आयुःशर्म्मगणञ्चैव तथा स्वस्त्ययनं गणम् ।
आयुष्यमभयञ्चैव तथा चैवापराजितम् ॥ ४ ॥
सम्पातयन्तं कलशन्तथा कुर्य्याच्च काञ्चनम् ।
वह्नेर्द्दक्षिणपार्श्वस्थः श्वेतचन्दनभूषितः ॥ ५ ॥
श्वेतानुलेपनः स्रग्वी सर्व्वाभरणभूषितः ।
आसनस्थः सुखं पश्येन्निमित्तानि हुताशने ॥ ६ ॥
पश्येयुरन्ये च तथा नृसिंहा
दैवज्ञवाक्यं निपुणञ्च भूयः ।
साम्वत्सरस्याथ सदस्यमुख्याः
सदस्यमुख्याश्च पुरोहितस्य ॥ ७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रदक्षिणावर्त्तशिखस्तप्तजाम्बूनदप्रभः।
रथौघमेघनिर्घोषो निर्धूमश्च[1] हुताशनः॥ ८॥

अनुलोमा सुगन्धिश्च स्वस्तिकाकारसन्निभः।
वर्द्धमानाकृतिश्चैव नन्द्यावर्त्तनिभस्तथा॥ ९॥

प्रसन्नार्चिर्म्महाज्वालः स्फुलिङ्गरहितो हितः।
स्वाहावसाने ज्वलनः स्वयं देवमुखं हविः॥ १०॥

यदा भुङ्क्ते महाभाग तदा राज्ञो हितं भवेत्।
[2][हविषश्च यदा वह्नेर्न स्याच्छिमशिमायितम्॥११॥

न व्रजेयुश्च मध्येन मार्ज्जारमृगपक्षिणः।
पिपीलिकाश्च धर्म्मज्ञ तथा कुर्य्युः क्षयं नृपे]॥१२॥

अङ्गारादिलाभेषु वह्ने राज्ञो जयं वदेत्।
तथैव च जयं ब्रूयुः प्रस्तरस्यापि दाहिनि॥ १३॥

स्वस्तिकादयो राजगृहभेदाः। देवमुखमितिज्वलनविशेषणम्। मध्येन होतुरग्नेश्च। प्रस्तरस्य दर्भमुष्टेः।

स्नानं समारभेत् प्राज्ञो होमकाले पुरोहितः।
होमकाले होमसमाप्तौ।

आदौ तु स्वेच्छया स्नातः पुनरद्भिः[3] समाहरेत्।
पर्व्वताग्रमृदा तावन्मूर्द्धानं शोधयेन्नृपः॥ १४॥

वल्मीकाग्रमृदा कर्णौ वदनं केशवालयात्।
इन्द्रालयात्तदा ग्रीवां हृदयन्तु नृपाजिरात्॥ १५॥

---

१ घ विधूमश्च। २ क ख पुस्तकद्वये [ ] चिह्नितांशः पतितः।
३ ग घ पुनर्म्मृद्भिः।

करिदन्तोद्धृतमृदा दक्षिणन्तु तथा भुजम् ।
वृषशृङ्गोद्धृतमृदा वामञ्चैव तथा भुजम् ॥ १६ ॥
सरोमृदा तथा पृष्ठं उदरं सङ्गमान्मृदा ।
नदीकूलद्वयमृदा पार्श्वौ संशोधयेत्तथा ॥ १७ ॥
वेश्याद्वारमृदा राज्ञः कटिशौचं विधीयते ।
गजस्थानात्तथैवोरू गोस्थानाज्जानुनी तथा ॥ १८ ॥
अश्वस्थानात्तथा जङ्घे राज्ञः संशोधयेद्बुधः ।
रथचक्रोद्धृतमृदा तथैव चरणद्वयम् ॥ १९ ॥
मृत्पूतं स्नपनीयं स्यात् पञ्चगव्यजलेन च ।

पञ्चगव्येन जलेन कुशोदकेन ।

[1][भद्रासनं नरेन्द्रस्य क्षीरवृक्षेण कारयेत् ।
आयामस्तस्य कर्त्तव्यो विस्तारेणार्द्धसम्मितः ॥ २० ॥
चतुरस्रञ्च कर्त्तव्यं राज्ञो भद्रासनं तथा ।
अष्टास्रञ्च तथा वृत्तं न च दीर्घं भृगूत्तम ॥ २१ ॥
सुवर्णरूप्य-ताम्रैश्च चित्रं कार्य्यं विशेषवत् ।
रत्नैः प्रशस्तैश्च तथा न रत्नप्रतिरूपकैः ॥ २२ ॥
चत्वारः पुरुषास्तत्र विन्यस्या भृगुनन्दन ।
द्विगुणाश्च तथा सिंहाः स्तम्भास्तद्द्विगुणा मताः ॥२३॥
इति भद्रासनलक्षणं बोद्धव्यम् ॥]
ततो भद्रासनगतं मुख्यामात्यचतुष्टयं ।
बलप्रधानं भूपालमभिसिञ्चेद्यथाविधि ॥ २४ ॥
पूर्व्वतो हेमकुम्भेन घृतपूर्णेन वाड़वः ।

वाड़वो ब्राह्मणः ।

---

१ ग ङ पुस्तकद्वये [ ] चिह्नितांशः पतितः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दक्षिणे क्षीरपूर्णेन रौप्यकुम्भेन क्षत्रियः ॥ २५ ॥
दध्ना च ताम्रकुम्भेन वैश्यः पश्चिमतस्तथा ।
कौवेर्य्यां मधुकेनाथ छन्दोगोऽथ कुशोदकैः ॥ २६ ॥
[1][माहेयेन जलेनैव भद्रामात्योऽभिषिच्यते ।
ततोऽभिषेकं नृपतेर्वह्वृचप्रवरो द्विजः ॥ २७ ॥
कुर्व्वीत मधुना राम घृतेनाध्वर्य्युरेव च ।
क्षीरेण दध्नाथर्व्वा तु छन्दोगोऽथ कुशोदकैः ॥ २८ ॥
इति कृतकरत्नाकरे पाठः ।]
मधुना कुशोदकैश्च छन्दोगः ।
सम्पातवन्तं कलशं तथाहृत्य पुरोहितः ।
विधाय वह्निरक्षान्तु सदस्येषु यथाविधि ॥ २९ ॥
विधाय वह्निरक्षान्तु वह्निं रक्षस्वेत्युक्त्वा ।
राजसूयाभिषेके तु ये मन्त्राः परिकीर्त्तिताः ।
ते च मन्त्रा वक्ष्यन्ते ।
तैस्तु दद्यान्महाभाग ब्राह्मणानां स्वरेण तु ॥ ३० ॥
स्वरेण मन्त्रघोषेण ।
ततः पुरोहितो गच्छेद्वेदिमूलं तथैव तु ।
वेदिमूलं कुण्डम् ।
विभूषितं तु राजानं संस्थितं भद्र आसने ॥ ३१ ॥
शतच्छिद्रेण पात्रेण सौवर्णेन यथाविधि ।
अभिषिञ्चेत्तु धर्म्मज्ञः सम्यग्वेदविशारदः ॥ ३२ ॥
सा औषधिरौषधिः श्रुताभिः सुसमाहितः ।
औषधिभिरौषधिगर्भकुम्भेन[2] ।

---

१ [ ] चिह्नितांशः ङ पुस्तके पतितः । २ ङ पुस्तके ०गन्धोदकेन ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रथे तिष्ठेति गन्धैश्च आब्रह्मन्ब्राह्मणेति च ॥ ३३ ॥

सगन्धैः सर्व्वगन्धकुम्भोदकेन ।

बीजैः पुष्पैस्तथासीनं रामपुष्पवतीति च ।

बीजैर्व्रीह्यादिबीजपूर्णकुम्भोदकेन । एवं पुष्पैरित्यस्यार्थः । अयं मन्त्रश्चाथर्व्वणः ।

तेनैव चैव मन्त्रेण फलैस्तमभिषेचयेत् ॥ ३४ ॥

तदानीमेव फलपूर्णं कुम्भोदकं सम्पाद्यं तु पुर्व्वसम्पादितमिति ज्ञापनार्थो द्वितीय एवकारः ।

आशुः शिशान इत्येवं सर्व्वरत्नैश्च भार्गव ।

सर्व्वरत्नकुम्भोदकेन ।

ये देवाः पुरःसदेति कुशाद्भिः परिमार्ज्जयेत् ॥ ३५ ॥

ऋग्वेदवित्ततो राज्ञो रोचनया यथाविधि ।

मूर्द्धानञ्च तथा कण्ठं गन्धद्वारेति संस्पृशेत् ॥ ३६ ॥

ततो ब्राह्मणमुख्याश्च क्षत्रियाश्च विशस्तथा ।

शूद्राश्चावरमुख्याश्च नानातीर्थसमुद्भवैः ॥ ३७ ॥

अवरमुख्याः मूर्द्धाभिषिक्तादयः ।

नादेयैः सारसैः कौपैर्नानाकलशसंस्थितैः ।

नादेयं नदीजलं ।

चतुःसागरजैर्लाभादलाभे द्विजकल्पितैः ॥ ३८ ॥

गङ्गायमुनयोश्चैव निर्झरैश्च तथाद्रिजैः ।

छत्रपाणिर्भवेत् कश्चित् केचिच्चामरपाणयः ॥ ३९ ॥

अमात्यमुख्यास्तत्कालं केचिद्वेत्रधरास्तथा ।

शङ्खभेरीनिनादेन वेदवाद्भिःस्वनेन च ॥ ४० ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गीतवादित्रघोषेण द्विजकोलाहलेन च ।
राजानमभिषिञ्चेयुः समेत्य सहिता जनाः ॥ ४१ ॥
सर्व्वलोकाभिषिक्तस्य संमिश्रजलसंयुतम् ।
संमिश्रजलानि नादेयादीनि दश ।
सर्व्वौषधियुतं पुण्यं सर्व्वगन्धयुतं तथा ।
रत्नबीजसमायुक्तं फलपुष्पयुतन्तथा ॥ ४२ ॥
पूजितं सितसूत्रेण वेष्टितग्रीवमेव च ।
पूजितं सर्व्वतो गन्धादिनाभ्यर्च्चितम् ।
श्वेतवस्त्रावकाशैश्च संवीतं शुचिभूषितम् ॥ ४३ ॥
अवकाशो वासं तद्युक्तैर्वस्त्रान्तैः ।
क्षीरवृक्षलताच्छन्नं सुमृष्टं काञ्चनं नवम् ।
आदाय कलशं राज्ञः स्वयं साम्वत्सरस्तथा ॥ ४४ ॥
मन्त्रावसाने कलशं दद्याद्भृगुकुलोद्भव ।
मन्त्राः सुरास्त्वामित्यादयो वक्ष्यमाणाः ।
ततः पश्येन्मुखं राजा दर्पणे चापि सर्पिषि ॥ ४५ ॥
सोष्णीषं सितवस्त्रञ्च मङ्गलालम्भनन्तथा ।
कृत्वा सम्पूजयेद्विष्णुं ब्रह्माणं शङ्करं तथा ॥ ४६ ॥
लोकपालान् ग्रहांश्चैव नक्षत्राणि च भार्गव ।
ततः स्वपूजां कुर्व्वीत शयनीये ततो व्रजेत् ॥ ४७ ॥
व्याघ्रचर्म्मास्तरं रम्यं सितवस्त्रोत्तरच्छदम् ।
पुरोधा मधुपर्केण तत्रस्थं तं समर्च्चयेत् ॥ ४८ ॥
राजा द्वौ चार्च्चयेत्तत्र साम्वत्सरपुरोहितौ ।
मधुपर्केण सर्व्वज्ञ ततस्तस्य सदैववित् ॥ ४९ ॥
पट्टबन्धं प्रकुर्व्वीत मुकुटस्य च बन्धनम् ॥ ५० ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पट्टलक्षणन्तु देवीपुराणे—

सर्व्वस्नानमलङ्कारं रोचनाख्यञ्च पट्टकम् ।
[१]वृद्ध्याद्यङ्गुलमङ्गुल्यषट्त्रिंशदङ्गुलावधि ॥ ५१ ॥
वृत्तं वा चतुरस्रं वा पद्मकर्चिकनिर्म्मितम् ।
वत्सेशपद्ममत्स्येभगोस्वस्तिकविनायकैः ॥ ५२ ॥
श्रीश्रीवृक्षवराहेभस्वामी देवी शुभान्वितम् ।

अर्ध्यङ्गुलमित्यस्य मध्यमणिन्यायेनान्वयः । सप्ताङ्गुलमङ्गुल्या एकया सहितमष्टाङ्गुलमित्येकं पट्टलक्षणम् । तदारभ्य सप्ताङ्गुलक्रतवृद्ध्या चत्वारि लक्षणानि । एवं पञ्चविधाः । तस्य दैर्घ्यार्द्धेन विस्तारः । स एवं वृत्तः । कोणसहितश्चतुरस्रो वा । वत्सेशः श्रीवत्सधारी विष्णुः । इभो हस्ती महामात्राधिष्ठितः । गौः स्त्रीगवी । केवलहस्ती वृषभश्च निषिद्धो विश्वकर्म्मणा ।

व्याघ्रव्यालगजाः सिंहा अश्वोष्ट्रौ महिषो वृषः ।
भूषणे तु त्यजेदष्टौ यदीच्छेद्दीर्घजीवितम् ॥ ५३ ॥

इति ॥

श्रीवृक्षो विल्वः । इभो गणेशः । स्वामी कार्त्तिकेयः । वराहसंहितायामपि दैर्घ्यादिमानं वचोभङ्ग्यन्तरेणोक्तम् । मध्यविस्तारमुक्ता सर्व्वे द्विगुणायामा मध्यादर्द्धेन तदर्द्धविस्तारः । सर्व्वे विशुद्धकाञ्चनविनिर्म्मिताः श्रेयसो वृद्ध-पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजमहिष्योरेकशिखः सैन्यपतेः प्रसाद-पट्टो विना शिखया ।

---

१ ख पुस्तके वृद्ध्याब्ध्यङ्गुलं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विष्णुधर्म्मोत्तरे—

ततः संबद्धमुकुटः काले पूर्व्वं मयोदिते ।
परार्द्ध्यास्तरणोपेते मञ्चे वृद्धोत्तरच्छदे ॥ ५४ ॥

परार्द्ध्यं बहुमूल्यं ।

ध्रुवाद्यौरितिमन्त्रेण सोपवेश्य पुरोधसा ।
वृषस्य वृषदंशस्य द्वीपिनश्च भृगूद्वह ।
तेषामुपरि सिंहस्य व्याघ्रस्य च परं ततः ॥ ५५ ॥

वृषदंशो मार्ज्जारः, द्वीपी चित्रकः ।

तत्रोपविष्टस्य तदा प्रतीहारः प्रदर्शयेत् ।
अमात्यांश्च तथा पौरान् नैगमांश्चापणेश्वरान् ॥५६॥
तथा प्रकृतयश्चान्या यथावदनुपूर्व्वशः ।
ततोऽग्रहारवस्त्रैभतुरङ्गकनकोत्तमैः ॥ ५७ ॥
गोजा विग्रहदानैश्च साम्बत्सरपुरोहितौ ।
पूजयित्वा ततः पश्चात् पूजयेद्ब्राह्मणचयम् ॥ ५८ ॥
अनेनैव विधानेन येन राजाभिषेचितः ।

येन ब्राह्मणचयेण ।

ततः सदस्यान् सम्पूज्य साम्बत्सरपुरोधसः ।
ततो ब्राह्मणमुख्यानां पूजनन्तु समाचरेत् ॥ ५९ ॥
गोवस्त्रतिलरुप्यान्नफलकाञ्चनगोरसैः ।
मोदकैः श्वेतपुष्पैश्च महीदानैश्च सुव्रत ॥ ६० ॥

आथर्व्वणपरिशिष्टे तु विशेषः ।

मधुपर्काद्येन विधिना [१]सर्व्वार्थसम्पादितदक्षिणां दद्यात् । कोटिमध्यात्तृतीयभागं यथाभूमिप्रमाणेन वा

१ ख ग सर्व्वार्थं संपाद्य० ।

हस्त्यश्वरथयानदिव्याभरणम्। आतपत्रं हिरण्यं क्षिति गोधनधान्यरत्नादिकं गुरवे दद्याद्येन वा तुष्येत्। तत उत्तरकर्त्तव्यञ्च विष्णुधर्म्मोत्तरेऽभिहितम्।

मङ्गलालम्भनं कृत्वा गृहीत्वा सशरं धनुः।
वह्निं प्रदक्षिणं कृत्वा प्रणिपत्य यथा गुरून्॥ ६१॥
पृष्ठतो वृषमालम्भ्य[१] गां सवत्साञ्च पार्थिव।
पूजयित्वा तुरङ्गञ्च मन्त्रितं चाभिषेचितं॥ ६२॥
तमारुह्य ततो नागं पूजयेच्चाभिषेचितम्।
मन्त्रितं दक्षिणे कर्णे स्वयं वेदविदान्ततः॥ ६३॥
आरुह्य राजमार्गेण स्वपुरं तु परिभ्रमेत्।
मुख्यामात्यैः ससामन्तैः साम्वत्सरपुरोहितैः॥ ६४॥
सहितः कुञ्जरारूढैरभिगच्छेच्च देवताः।
तासां सम्पूजनं कृत्वा नगरे या निषेविताः॥ ६५॥
प्रविश्यान्तर्गृहं राजा प्रहृष्टं नरवाहनः।
दानमानादि-सत्कारैर्गृह्णीयात् प्रकृतीस्ततः॥ ६६॥

सम्पूजितांस्तांश्च विसर्ज्जयित्वा
गृहे स्वके सन्मुदितो महात्मा।
विधानमेतत् समवाप्य राजा
कृत्स्नाञ्च धात्रीं वशगां विदध्यात्॥ ६७॥ इति

कल्पतरौ नीतिकाण्डे ब्रह्मपुराणे च—

सुतिथौ च सुनक्षत्रे स्नानं नक्षत्रनामकम्।
मुहूर्त्ते सगुणोपेते सर्व्वोत्पातविवर्ज्जिते॥ ६८॥

---

१ ख ग पुस्तकद्वये आलभ्य।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्थिरे राशौ शुभयुते केन्द्रे चोपचयान्विते ।
सर्व्वलक्षणसंयुक्तस्त्वभिषेच्यो नृपस्तथा ॥ ६९ ॥
नगरं तत्र कर्त्तव्यं पताकाध्वजसंयुतम् ।
नीरजस्कास्तथा कार्य्याः राजमार्गाः शुभैर्ज्जलैः ॥ ७० ॥
पौरैः स्नातैः सुवस्त्रैश्च भाव्यं मङ्गलपाणिभिः ।
गन्तव्यं वारमुख्याभिस्तथा राजनिवेशने ॥ ७१ ॥
पौरमुख्यैस्तथाचार्य्यैर्गुणिमुख्यैस्तथैव च ।
शोभनीयञ्च नगरं सविलासैश्च नर्त्तकैः ॥ ७२ ॥
स्नानकाले च कर्त्तव्यो महाकोलाहलस्तथा ।
वादित्रशङ्खमुख्याद्यैः सूतमागधवन्दिभिः ॥ ७३ ॥
सामन्तैर्म्मन्त्रिभिर्भाव्यं छत्रचामरपाणिभिः ।
आदौ कृत्वा महाशान्तिं पुण्यां वैनायकीं शुभाम् ॥७४॥
ग्रहशान्तिं[1]न्तथा श्रेष्ठां तृतीयामाहुतिं तथा ।
पुरोधाः सोपवासश्च श्रुतिस्मृतिसमन्वितः ॥ ७५ ॥
त्रयोदशमहामन्त्रान् तर्पयेज्जातवेदसि ।
गणञ्चैवाप्रतिरथं सत्यधर्म्मगणैस्तथा ॥ ७६ ॥
आयुष्यमभयञ्चैव तथा स्वस्त्ययनं परम् ।
वैष्णवानथ मन्त्रांश्च तथा पौरन्दरानपि ॥ ७७ ॥
सावित्रब्रह्मरौद्रांश्च वारुणानथ सर्व्वदा ।

ऋताषाड़िति त्रयोदशमन्त्राः । गणा इष्टगण्यामागणेत्यादयः[2] । अप्रतिरथः आशुः शिशानेति । सत्यगणः ।

---

१ क ग्रहशान्तिं । २ क पुस्तके इष्टामागणेत्यादयः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आगात्सत्यमिति धर्म्मगणानपास्ते अग्ने घोरास्तनुव इति।
अभयस्वस्त्ययने यत इन्द्रः स्वस्तिदा इति।

राजा स्नातः पुनःस्नाप्यः पञ्चगव्येन देववत्।
मृत्ताम्ररौप्यहेमाद्यैर्जलपूर्णैस्तथा घटैः॥ ७८॥
तोयेन शूद्रैः स्नाप्यश्च पश्चिमां दिशमाश्रितैः।
ततः क्षीरेण वैश्यैश्च दक्षिणस्यां दिशि स्थितैः॥ ७९॥
क्षत्रियैश्च ततो दध्ना पूर्व्वस्यां दिश्यवस्थितैः।
अमृतेन ततो विप्रैर्घृतेनोत्तरतः स्थितैः॥ ८०॥
पर्व्वतोर्द्ध्वमृदा पश्चाद्राज्ञः शोध्यं शिरो द्विजैः।
वल्मीकमृदया कर्णौ शोधितव्यौ प्रयत्नतः॥ ८१॥
शक्रस्थानाच्च मृदया ग्रीवा शोध्या च भूभृतः।
राजवेश्यागृहद्वारमृदास्य[1] हृदयं तथा॥ ८२॥
देवालयमृदा पृष्ठं शोध्यं तस्याथ राजभिः।
गजदन्तोद्धृतमृदा दक्षिणन्तु तथा भुजः॥ ८३॥
शोधनीया शनैर्नासा वृषभ[2]स्कन्धलग्नया।
कटिदेशस्ततः शोध्यो वेश्याद्वारमृदा तथा॥ ८४॥
नदीकूल-मृदा पार्श्वे शोधितव्ये यथाक्रमम्।
अश्वशालामृदा शूद्रैः शोधितव्ये च जानुनी॥ ८५॥
गोकुलान्मृदया जङ्घे पादौ च सरसो मृदा।
सर्व्वौषधैः सर्व्वबीजैर्गन्धरत्नैश्च सर्व्वदा॥ ८६॥
सर्व्वपुष्पैः सर्व्वजलैः स्नाप्यो रोचनया तथा।
अथ भद्रासनगतः सर्व्वतोयैस्तु भास्वरैः॥ ८७॥

---

१ ग मृदया। २ ग वृषल।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यथाशक्त्या समानीतैः पुरस्कृत्य पुरोहितैः ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रमुख्यैस्तथैव च ॥ ८८ ॥
पतिव्रताभिर्नारीभिः पुत्रिणीभिश्च पुत्रवत् ।
सुस्नातोऽनुलिप्ताङ्गः कृतदेवाग्नितर्पणः ॥ ८९ ॥
आबद्धमुकुटः स्रग्वी बद्धपादो विभूषितः ।
मङ्गलानां शतं पश्येत् पुण्य[1]मष्टोत्तरं शतम् ॥ ९० ॥
[2]शान्तिप्रधानके स्थाने सर्व्वमेतद् यथाक्रमम् ।
कृत्वा शेषं ततो हुत्वा दद्यात् पूर्णाहुतिं ततः ॥ ९१ ॥
अभिषिक्तस्ततो राजा सम्पूज्यादौ विनायकम् ।
ततः क्रमेण देवांश्च ब्रह्मविष्णुमहेश्वरान् ॥ ९२ ॥
ग्रहानलञ्च राजेन्द्रमग्निं विप्रान् पुरोहितम् ।
देवान् पितॄन् समुद्दिश्य दद्याद्विप्रेषु दक्षिणाम् ॥ ९३ ॥
अभयं सर्व्वभूतेभ्यः सम्यक् तत्र ददाति च ।
आघातस्थानकात् सर्व्वान् पशूनपि विमोचयेत् ॥ ९४ ॥
बन्धनस्थानसंस्थांश्च प्रमोचयति शास्त्रवित् ।
गोब्राह्मणादिहन्तॄंश्च कण्टकान् दारुणानपि ॥ ९५ ॥
जहाति हस्तिहन्तॄंश्च क्रूरांश्चापि सुरक्षितान् ।
व्याघ्रचर्म्मोत्तरे रम्ये तथा सिंहासने शुभे ॥ ९६ ॥
उपवेश्यो भवेद्राजा स्वयमेव पुरोधसा ।
सिंहासनस्थः संपश्येत् प्रकृतीश्च समागताः ॥ ९७ ॥
छत्रायुधानि सम्पूज्य गणमुख्यांस्तुरङ्गमान् ।
आरुह्यालङ्कृतं नागं विसृजन् धनसञ्चयम् ॥ ९८ ॥

---

१ घ पुष्य । २ ग शान्त्यै प्रधानिके ।

प्रदक्षिणीकृत्य पुरं प्रविशेच्च शुभं गृहम् ।
समस्तान् पौरमुख्यांश्च कृत्वा पूजां विसर्ज्जयेत् ॥ ९९ ॥
गतेषु तेषु च धनैस्तर्पयेन्नटनर्त्तकान् ।
ब्राह्मणान् भोजयेत् सर्व्वान् दीनानाथांश्च बान्धवान् ॥ १०० ॥
ततो महाजनैः सार्द्धं पूर्व्वराजक्रमादिभिः ।
आहारं कुरुते राजा राजभृत्यान्विभज्य च ।
आचम्य ताम्बूलमुखो विहरेच्च ततः क्षणम् ॥ १०१ ॥
ततः कतिपयैः सार्द्धमन्तःपुरनिवासिभिः ।
रक्षेत्प्रयत्नादात्मानं भुक्त्वैव यथासुखम् ॥ १०२ ॥
अनेनैव विधानेन कुर्य्याद्वर्द्धापनं सदा ।
अभिषेकाह्नि यत्नेन प्रतिसंवत्सरं नृपः ॥ १०३ ॥

श्रीरामायणे,—

शनैस्तस्मिन् प्रशान्ते तु जनघोषे नराधिपः ।
प्रणम्य गुरुमासीनमित्युवाच पुरोहितम् ॥ १०४ ॥
अभिषेकाय रामस्य यत्कर्म्म सपरिच्छदम् ।
तदस्य भगवन् सर्व्वमाज्ञापयितुमर्हसि ॥ १०५ ॥
तच्छ्रुत्वा भूमिपालस्य वशिष्ठो द्विजसत्तमः ।
आदिदेशाग्रतो राज्ञः स्थितान् युक्तान् कृताञ्जलीन् ॥
युक्तान् नियोगिपुरुषान् । [१०६ ॥
सुवर्णादीनि रत्नानि मणीन्[१] सर्व्वौषधीरपि ।
युक्तञ्च माल्यलाजांश्च पृथक् च मधुसर्पिषी ।
अहतानि च वासांसि रथं सर्व्वायुधानि च ॥ १०७ ॥

---

१ ग पुस्तके बलीन् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सितवर्णञ्च तुरगं गजञ्च शुभलक्षणम्।
चामरव्यजने चोभे ध्वजं छत्रञ्च पाण्डुरम्॥ १०८॥
शतञ्च शातकुम्भानां कुम्भानामग्निवर्चसाम्।
हिरण्यशृङ्गं वृषभं समग्रं व्याघ्रचर्म्म च॥ १०९॥
यच्चान्यत् किञ्चिद्दृष्टव्यं यच्च किञ्चिन्मनोनुगम्।
उपस्थापयतः प्रातरग्न्यागारे महीपतेः॥ ११०॥
अन्तःपुरस्य द्वाराणि सर्व्वस्य नगरस्य च।
चन्दनैः स्रग्भिरर्च्चयन्तीं सुमनोदामभिस्तथा॥ १११॥
प्रशस्तं वल्गुगुणवद्दधिक्षीरोपसेचनम्[१]।
द्विजानां शतसाहस्रं सम्प्रकारं फलं लभेत्॥ ११२॥
[२]अन्नमितिशेषः।

सिद्धमन्नाद्यसम्भारः प्रत्यूषेषु च कल्प्यताम्।
सूर्य्येऽभ्युदितमात्रे श्वोभविता स्वस्तिवाचनम्॥ ११३॥
ब्राह्मणाश्च निमन्त्र्यन्तां कल्प्यन्तामासनानि च।
[३]आलम्ब्यन्तां पताकांश्च राजमार्गश्च सिच्यताम्॥११४॥
[४][सर्व्वे च नागराश्चैव गणिकाश्च स्वलङ्कृताः।
कक्षां द्वितीयामासाद्य तिष्ठन्तु नृपवेश्मनि॥ ११५॥
कक्षां प्रकोष्ठाम्।

देवायतनचैत्येषु नानाभक्ष्याः सदक्षिणाः।
उपस्थापयितव्याश्च माल्ययोगाः पृथक् पृथक्॥ ११६॥

---

१ ग सेवनं।
२ मूले अधिकः पाठः, सङ्कल्प्य द्विजमुख्यानां श्वः प्रभाते प्रदीयतां।
३ क्वचित् आवध्यन्तां। ४ ग पुस्तके [ ] चिह्नितांशः पतितः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बहुदीर्घासवो योधाः सन्नद्धा मृष्टवाससः ।
महाराजस्य भवनं प्रविशन्तु महोदयम् ॥ ११७ ॥
एवमाज्ञाप्य तत्सर्व्वं कृतमित्येव वेदयेत् ।
सप्रीतमनसे राज्ञे वशिष्ठो हर्षयन् पुनः ॥ ११८ ॥
तथाभिषेचनकं द्रव्यं सर्व्वमेवोपकल्पितम् ।
गङ्गायमुनयोश्चैव सङ्गमादाहृतं जलम् ॥ ११९ ॥
याश्चान्याः सरितः पुण्यास्ताभ्यश्च जलमाहृतम् ।
सर्व्वबीजानि गन्धाश्च रत्नानि विविधानि च ॥ १२० ॥
वाहनं नरसंयुक्तं दर्भाः सुमनसः पयः ।
आहृतानि च वासांसि शृङ्गाभ्याञ्च हिरण्मयम् ॥१२१॥
क्षीरवृक्षप्रवालैश्च पश्चात् फलविमिश्रितैः ।
पूर्णकुम्भाः स्वलङ्कृत्य काञ्चना उपकल्पिताः ॥ १२२ ॥
रसो गोरोचना चैव लाजादधिघृतं मधु ।]
तथैव पुण्यतीर्थेभ्यो मृदापो जङ्गमानि च ॥ १२३ ॥

जङ्गमानि पुण्यपक्षिणः ।

चन्द्रांशुविमले चारुमणिदण्डेष्वलङ्कृते ।
चामरव्यजने श्रीमद्रामार्थमुपकल्पिते ॥ १२४ ॥
पूर्णेन्दुमण्डलाभञ्च श्रीमन्माल्यविभूषितम् ।
रामस्य यौवराज्यार्थमातपत्रं प्रकल्पितम् ॥ १२५ ॥
मत्तो गजवरश्चैव औपवाह्यः प्रतीक्षते ।

औपवाह्यो राजवाह्यः ।

श्वेतश्च तुरगश्चैव रामार्थमुपकल्पितः ॥ १२६ ॥
अष्टौ कन्याश्च मङ्गल्याः दीर्घाभरणभूषिताः ।
रूपयौवनसम्पन्ना गणिकाश्च स्वलङ्कृताः ॥ १२७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्वेतपुष्पाणि धेनुश्च निस्त्रिंशो धनुरेव च ।
हेमदाम्ना स्वलङ्कृत्य ककुद्मी पाण्डुरो वृषः ॥ १२८ ॥
सिंहासनं व्याघ्रचर्म्मसमिधश्च हुताशनः ।
वादित्राणि च सर्व्वाणि सूतमागधवन्दिनः ॥ १२९ ॥
अमात्याः ब्राह्मणा गावः पुण्याश्च मृगपक्षिणः ।
पौरजानपदा श्रेणीनैगमानां गणैः सह ।
एते चान्ये च बहवः प्रीयमाणाः प्रियम्वदा ॥१३०॥ इति

तथा—

गते पुरोहिते रामस्ततो नियतमानसः ।
सह पत्न्या विशालाक्ष्या नारायणमुपागमत् ॥ १३१ ॥
प्रगृह्य शिरसा पात्रं हवींषि[1] विधिवत्ततः ।
महते दैवतायाज्यं जुहाव ज्वलितेऽनले ॥ १३२ ॥
शेषञ्च हविषस्तस्य प्राश्याशास्यात्मनिश्चयं[2] ।
ध्यायन्नारायणं देवं स्थण्डिले कुशसंस्थिते ॥ १३३ ॥
वाग्यतः सह वैदेह्या भूत्वा च नियतात्मवान् ।
श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ॥ १३४ ॥
कृतोपवासं रामन्तु वैदेह्या सहितं तदा ।
सभार्य्यं तु क्षितौ सुप्तं शुश्राव विधिवज्जनः ॥१३५॥ इति

राजधर्म्मेषु राज्याभिषेके—

काञ्चनोदुम्बरास्तत्र राजताः पृथिवीमयाः ।
पूर्णकुम्भाः सुमनसो लाजा वर्हिषि गोरसम् ॥ १३६ ॥

---

१ ग हविषः ।    २ मूले आत्मनः प्रियं ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

शमीपिप्पल-पालाशसमिधो मधुसर्पिषा ।
स्रुव औदुम्बरः शाखस्तथा हेमविभूषितः ॥ १३७ ॥
दाशार्हेनाभ्यनुज्ञातस्तत्र धौम्यः पुरोहितः ।
प्रागुदक्प्रवणे वेदी लक्षणेनोपलक्षितः[१] ॥ १३८ ॥
व्याघ्रचर्म्मोत्तरे शुक्ले सर्व्वतोभद्र आसने ।
दृढपादप्रतिष्ठाने हुताशनसमत्विषि ॥ १३९ ॥
उपवेश्य महात्मानं कृष्णाञ्च द्रुपदात्मजाम् ।
जुहाव पावकं धीमान् विधिमन्त्रपुरस्कृताम् ॥ १४० ॥
तत उत्थाय दाशार्हः शङ्खमादाय पूजितम् ।
अभ्यषिञ्चत् पतिं पृथ्व्याः कुन्तीपुत्रं युधिष्ठिरम् ॥१४१ ॥

वृद्धवशिष्ठोऽपि— [इति ॥

प्राग्भागे मन्दिरस्याथ गोमयेन तु कारयेत्[२] ।
मण्डलं चतुरस्रं तद्दर्शकैः समलङ्कृतम् ॥ १४२ ॥
तत्र भद्रासनं सम्यगर्च्चयेत् सुमनोहरम् ।
दिग्विदिक्षु स्थितैः शुक्लगन्धमाल्याम्बरार्च्चितैः ॥ १४३ ॥
शतौषधिमूलरत्नसद्बीजैः पल्लवैः सह ।
मृत्तिकां वृषशृङ्गञ्च गजदन्तञ्च रोचनम् ॥ १४४ ॥
उत्पलं पद्मकं पद्मं मुरारेणुककुङ्कुमम् ।
राजसर्षपमुस्तञ्च देवदारुसमन्वितैः ॥ १४५ ॥

समन्वितैः कलशैः मुस्तान्तेषु कुम्भेषु क्षिपेदितिशेषः ।

देवस्यत्वेतिमन्त्रेण आयुःपुष्टियशस्करैः ।
अभिषेको वेदमन्त्रैः शुभे लग्ने शुभान्विते ।
भद्रासनस्थे नृपतौ अभिषेकन्तु कारयेत् ॥ १४६ ॥

---

१ ग उपलिख्यतु । २ घ उपलेपयेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नीराजनञ्च कर्त्तव्यं शङ्खवादित्रनिःस्वनैः ।
आशिषो वाचनं कृत्वा चार्च्चयेच्च सुरान् पितॄन् ॥१४७॥
आयुधानि च पट्टञ्च विप्रान् गन्धादिनार्च्चयेत् ।
शुक्लमाल्याम्बरधृतः प्राङ्मुखस्य महीपतेः ॥ १४८ ॥
पट्टं शिरसि बध्नीयात् सिंहासनगतस्य च ।
विप्रेभ्यो दक्षिणां दद्यान्मानयेन्मन्त्रपूर्व्वकम् ॥ १४९ ॥
ब्रूयात् प्रत्यङ्मुखो राजा नमामि त्वां धरेति च ।
प्राच्यां त्वामभिषिञ्चन्तु वसवस्तेजसे श्रिये ॥ १५० ॥
याम्यायामभिषिञ्चन्तु त्वा रुद्रा विजयाय च ।
आदित्या अभिषिञ्चन्तु प्रतीच्यां दिशि वृद्धये ॥१५१॥
विश्वेदेवास्तथोदीच्यामभिषिञ्चन्तु पुष्टये ।
दिग्गीशास्त्वभिषिञ्चन्तु त्वां सदा विजयाय च ॥१५२ ॥

एतेष्वेव मन्त्रेषु त्वामित्यस्य स्थाने मामिति केषाञ्चित् पाठः। पूर्व्वपाठे पुरोहितस्य साम्राज्यमितिमन्त्रेण राजानं सम्यगर्च्चयेत् ।

व्याघ्रचर्म्मण्यथासीनं नवालङ्कारभूषितम् ।
भृत्यचामरसंयुक्तं राजचिह्नसमन्वितम् ॥ १५३ ॥
पुरोहितस्य जुहुयात् सावित्र्यासौ प्रयत्नतः ।
तदा सञ्चिन्त्य सप्ताङ्गं प्रजा धर्म्मेण पालयेत् ॥१५४ ॥
एवं यः कुरुते सम्यक् स राजा रमते चिरम् ॥ १५५ ॥
इति ।

आथर्व्वणगोपथब्राह्मणे—

अथ राज्ञोऽभिषेकविधिं व्याख्यास्यामः । विल्वप्रभृतीन्

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सम्भारान् सम्भृत्य षोडशकलशान् षोडशविल्वानि वल्मीकस्य च मृत्तिकां सर्व्वान्नं सर्व्वरसान् सर्व्वबीजानि तत्र चत्वारः सौवर्णाश्चत्वारो राजताश्चत्वारस्ताम्राश्चत्वारो मृन्मया कुम्भास्तान् ह्रदे सरसि वोर्द्धस्रुतो तामैनाम इत्युदकेन पूरयित्वा वेदिपृष्ठे संस्थाप्य कुम्भेषु विल्वमेकैकं दद्यात् ।

सर्व्वान्नं सर्व्वरसान् सर्व्वबीजानि प्रक्षिप्याभयैरपराजितैवायुष्यैः स्वस्त्ययनैः सौवर्णेषु सम्पातान् संस्राव्यैः संसिच्य राजतेषु भैषज्यैरंहोमुच्यैस्ताम्रेषु संवेशसंसर्गाभ्यां शन्तातीयैः प्राणसूक्तेन च मृन्मयेषु । ततस्तान् कलशान् गृहीत्वा श्रोत्रियैः पवित्रतमैः राजानमभिषिञ्चेत् ।

भूमिमिन्द्रियञ्च वर्द्धयित्वा क्षत्त्रियं म इति सिंहासनमारूढमभिमन्त्रयेत् । एवमभिषिक्तस्तु रसान् प्राश्नीयाद्विप्रेभ्यश्च दद्यात् गोसहस्रं सदस्येभ्यः, कर्त्रे ग्रामवरं विपुलं यशः प्राप्नोति, भुङ्क्ते धरां जितशत्रुं सदा भवेदिति । अन्नं यदुप्तं न प्ररोहति बीजं प्ररोहति बीजं प्ररोहार्हं व्रीह्यादि ऊर्द्धस्रुति ऊर्द्धमुखानिति कलशविशेषणं, नामेत्यादयो मन्त्राः ।

अभयैरपराजितैरित्यादिस्थले कपिञ्जलाधिकरणन्यायेन त्रयाणां त्रयाणामुपपादनमिति केचित् । तन्न, शास्त्रान्तरसंवादेन गणोपादानस्यैवौचित्यात् । संवेशा संवर्गादिषु मन्त्रगणात्मकसूक्तस्यैव विनियोगेन तत्प्रायपाठाच्चेति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऋग्विधाने—

राजानमभिषिञ्चेत्तु तिष्येण श्रवणेन वा ।
पौष्णसावित्र्यसौम्याश्विरोहिण्यामुत्तरासु च ॥ १५६ ॥
हुत्वाग्निं यन्त्रलिङ्गाभिः सावित्र्या प्रयतः शुचिः ।
महाव्याहृतिभिश्चैव सम्पातान्निर्हुतो भवेत् ॥ १५७ ॥

होमानन्तरं सम्पातयुक्तः कलशो भवेदित्यर्थः ।

सर्व्वौषधिरसैः श्लक्ष्णैर्नदीनां सलिलेन च ।
व्याघ्रचर्म्मण्यथासीनमासन्ध्याममभिषिच्य च ॥ १५८ ॥
तिष्ठन् प्रत्यङ्मुखो ब्रूयाद्जय त्वं पृथिवीपते ।
धर्म्मस्ते निखिलो राजन् वर्द्धतां पालय प्रजाः ॥१५९॥
वर्द्धस्व च श्रियै पुष्ट्यै जयायाभ्युदयाय च ।
राजानः सन्तु ते गोत्रे ततोऽप्रतिरथं जयेत् ॥ १६० ॥
वैयाघ्रन्तु भवेच्चर्म्म समिदौदुम्बरी भवेत् ।
चिरेनमभिषिच्यैवं दुन्दुभीनभिमन्त्रयेत् ॥ १६१ ॥
प्राच्यां तु दिशि वसवोऽभिषिञ्चन्तु ते जये ।
दक्षिणस्यां दिशि रुद्रा अभिषिञ्चन्तु वृद्धये ॥ १६२ ॥
प्रतीच्यां दिशि त्वादित्या अभिषिञ्चन्तु पुष्टये ।
विश्वेदेवा उदीच्यां तु अभिषिञ्चन्तु श्रेयसे ॥ १६३ ॥
आत्वाहार्षमन्त्रेवोत्पथैनमभिमन्त्रयेत् ।

पतङ्गमुक्तमसुरस्य मायया
हृदा पश्यन्ति मनसा विपश्चितः ।
समुद्रेऽन्तः कवयो विचक्षते
मरीचीनां पदमिच्छन्ति वेधसः ॥ १६४ ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पतङ्गमिति नित्यन्तु जपेद्ज्ञानभेदनम् ।
मायाभेदनमेतद्धि सर्व्वमायाप्रभेदनम् ॥ १६५ ॥ इति

सामविदथ ब्राह्मणो राजानमभिषिञ्चेत् तिष्येण श्रवणेन वा व्रीहियवै-स्तिलमाषै-र्दधिमधुसुमनोजातरूपै-र्यशस्विनीभ्यो नदीभ्यः समुद्राच्चोदकान्याहृत्य औदुम्बरे भद्रासने वैयाघ्रचर्म्मण्युत्तरलोम्न्यासीनं जीवन्तीनां गवां शृङ्गकोशैरभिषिञ्चेत् । अभ्रातृव्यमिति रहस्ये जयं कामयेतैकराजः स्यादिति नास्य चक्रं प्रतिहन्येतेति एकवृषेणाभिषिञ्चेदभिषेक्त्रे दद्याद्ग्रामवरं दासीशतसहस्रं वा । तदधीनश्च भवेदिति व्याख्यातमेतन्माधवाचार्य्येण । पुरोहितो राजानमभिषिञ्चेत् ।

अभिषेकात् पूर्व्वमपि राजशब्दो नानुपपन्नः अवेष्ट्याधिकरणन्यायेन जातिवाचकत्वात् । तिष्यः पुष्यः । पावनत्वप्रयुक्त-ख्यातियुक्त-गङ्गा-तुङ्गभद्रादिनदीभ्यः समुद्राच्च पृथक् पृथगाहृतैरुदकैर्व्रीह्यादिजातरूपान्तद्रव्यमिश्रितैरुदुम्बरसम्बन्धिनि भद्रासने पर्य्यास्तृते व्याघ्रचर्म्मणि उपरिभागस्थितलोम्नि आसीनं राजानं जीवोपेतानां गवां शृङ्गाणि स्थित्वा तदग्रच्छिद्रनिःसृतैर्जलैरभ्रातृव्य इति रहस्येन साम्ना उदकानि कोशैरिति बहुवचनाभ्यां पृथग्भूतैरेव गङ्गाद्युदकैरभिषेको गम्यते ।

पृथगाहरणस्यापीदं प्रयोजनं कामेन मन्त्रविशेष महापुरोहितो राजानमेवं कामयते । कृत्स्नस्य भूमण्डलस्यैक एव राजा स्यात्, नास्य चक्रे भूमण्डलं केनचिदपि वैरिणा प्रतिहतं भवेदिति रहस्यस्थाने एकवृषेणेति साम्नाभि-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

षेचयेत् । अन्यत् प्रागुक्तमेव राजा पुरोहितायोत्कृष्टग्रामं दासीशतं सहस्रं गाश्च दद्यात् । तदधीनश्च भवेदिति ।

एवमभिषेकविधिषु बहुविधेष्वपि विष्णुधर्म्मोत्तरे धर्म्माणां मन्त्राणां भूयसां नाम्ना नक्षत्रोत्पन्नेऽभिषेकेऽन्यत्र-विहितानामविरुद्धानां गुणानामुपसंहारेण प्रयोगाव-धारणं शक्तैः कार्य्यमशक्तानां त्वैच्छिको विकल्पः । यद्वा ऋग्विधानोक्तमृक्शाखिनां, सामविधानोक्तं सामशाखिनां, आथर्व्वणोक्तं तच्छाखिनां पौराणसर्व्वेषामिति बोध्यम् ।

अभिषेकान्ते विशेषमाह[1] हेमाद्रौ बौधायनः—

अथारुह्य ग्रामं प्रदक्षिणीकृत्य दुन्दुभिशब्देन स्वस्त्यके-नेति ।

---

१ ख शेषमाह ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथाभिषेकप्रयोगः ॥ ४७ ॥

तत्रैन्द्रीशान्त्युत्तरदिने राजा श्वःकरिष्यमाणराज्याभिषेकाङ्गत्वेन स्वस्तिवाचनं गौर्य्यादिमातृकापूजनं वसोर्धारापूजनमाभ्युदयिकश्राद्धं नारायणपूजनमाज्यहोमं हविष्यप्राशनं दर्भसंस्तरशयनञ्च करिष्ये तदादि गणपतिपूजनञ्च करिष्य इति सङ्कल्प्य गणपतिपूजनप्रभृतिश्राद्धान्तं कृत्वा युग्मान् ब्राह्मणान् भोजयित्वाऽऽशिषो गृहीत्वा शालग्रामादौ नारायणपूजनं कुर्य्यात्।

तस्याः सौवर्णादिपात्रे हविष्यं निवेदयेत्। पूजान्ते तत्पात्रं शिरसि प्रसादत्वेनाङ्गीकृत्य स्वगृह्योक्तविधिना स्थण्डिलाग्नौ प्रणवेनाष्टोत्तरशतमाज्याहुतीरौदुम्बरस्रुवेण हुत्वा पात्रस्थं नैवेद्यशेषार्द्धं भुञ्जीत। तथा परभागं पत्नी भुञ्जीत। ततो विष्णोरायतने स्थण्डिले कुशसंस्तरे सपत्नीको नैवेद्यातिरिक्ताहारशून्यो वाग्यतो ब्रह्मचारी स्वपेत्।

[1][आचार्य्यादयश्चतुरस्रां पश्चिमे ऐशाने वा चतुरस्रे पद्मकुण्डे वा अग्निस्थापनाद्याज्यभागान्ते व्रीहिभिर्यवैस्तिलमाषमिश्रितैश्च घृताक्तैर्व्याहृतिभिः सपत्नीभिरष्टोत्तरसहस्रं प्रत्येकं हुत्वा भूरग्नये च पृथिव्यै च महते च स्वाहेत्यादि महाव्याहृतिभिर्हुत्वा गायत्र्या त्र्यम्बकेन च प्रत्येकमेवाष्टोत्तरसहस्रं जुहुयुः। भारते राजधर्म्मे च शमीपिप्पलपलाशसमिधोमधुसर्पिषीति होम्यं द्रव्यमुक्तम्।

१ ख ग ङ पुस्तकेषु [ ] चिह्नितांशो नास्ति।

ततः आग्नेये वेद्यां श्रीसूक्तविधिना श्रियमावाह्य सम्पूज्य तदग्रे राज्ञो मुकुटं हेमपट्टञ्च मन्त्रवत्यश्व गव्येन प्रताप्य सम्पूज्य प्रतते। अद्य शिपिविष्टनामेति राज्ञो वाहनस्य राजमहिष्याश्च कङ्कणं बद्ध्वा राज्ञे श्री (?) वसन्ति (?)। अत्रैव दिने सर्व्वेषां कलशानामधिवासनपूर्व्वकमिति।]

तस्मिन्नेव दिवसे नगरदेवायतने ध्वजपताकातोरणादिभिरलङ्कृत्य कृतोपवासः पुरोहितोऽभिषेकदिवसे स्नातोऽनुलिप्तः शुचिः शुक्लद्विवासा सोष्णीषो वेदिदेशे स्नातेन श्वेतवस्त्रमाल्याद्यलङ्कृतेन सर्व्वाभरणभूषितेन राज्ञा तिथ्याद्युल्लेखनपूर्व्वकं मम कृत्स्नस्य राष्ट्रस्य वश्यतासिद्ध्यर्थं साम्वत्सरपुरोहिताभ्यां विष्णुधर्म्मोत्तरोक्तविधिनात्मानमभिषेचयिष्ये इति सङ्कल्पं कारयेत्।

ततः साम्वत्सरपुरोहितयोः ऋग्यजुःसामाथर्व्वविदां विप्रक्षत्रियविशाममात्यानां छन्दोगस्य विप्रामात्यस्यैकस्यान्यस्य वान्यतमविदो वरणे कृते, अन्येषु चातुर्व्वर्णमुख्येषु सन्निधापितेषु, तेषां तच्छाखोक्तविधिना स्वशाखोक्तविधिनैव वा मधुपर्कं वस्त्रालङ्कारादिना पूजने च कृते, मण्डपदेवतापूजनान्ते तस्मान्मण्डपादुत्तरतः स्नानशालायां यथासम्भवसर्व्वतीर्थजलपूर्णं, सर्व्वौषधी-सर्व्वगन्ध-सर्व्वबीज-सर्व्वफलयुतं, क्षीरं चक्रकृतपल्लवोपेतं, सर्व्वतस्त्रिगुणसितसूत्रेण वेष्टितं, श्वेताम्बरवेष्टितं, कण्ठमालादिभिरलङ्कृतं शैवालमुखं, नवसौवर्णकलशं मध्ये तत्समं ततश्च यथास्थानं पञ्चगव्यमिश्रजलकलशं, घृतपूर्णं हेमकुम्भं, क्षीरपूर्णं रौप्यकुम्भं, दधिपूर्णं ताम्रकुम्भं, मधुकुम्भं,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुशोदककुम्भं शतच्छिद्रं सौवर्णं अन्यांश्च नद्यादिजलपूर्णा-न्मृन्मयान् कलशान् कलशस्थापनविधिना स्थापयेत्।

तद्यथा महीद्यौः० भुवमभिमृश्य। ओषधयः सं० व्रीहीन् प्रक्षिप्य आकलशेषु कलशं निधाय इमं मे गङ्गेति जलं प्रक्षिप्य गन्धद्वारामिति गन्धं। या ओषधीः। सर्व्वौषधिः। काण्डात् काण्डात्, दूर्व्वाः। अश्वत्थे वो। पञ्चपल्लवान्। स्योना पृथिवी० मृदः। याः फलिनिः फलानि। सहिरण्यानि० पञ्चरत्नानि। हिरण्यरूपः स० हिरण्यम्। युवा सुवासा० वस्त्रवेष्टनं। पूर्णा दर्व्वीति पूर्णपात्रं। याः फलिनीति फलवेष्टनम्।

ततो वरुणपूजनम्। एवं काण्डानुसमये सर्व्वफल-संस्थापनम्। तत्र पञ्चगव्यं प्रक्षिपेत्। गायत्र्या विश्वामित्रः सविता गायत्री गोमूत्रं प्रतेह्वे नियोगः।

आनन्दा श्रीरनुष्टुप्। गन्धद्वारा गोमयं। ब्राह्मणो गौतमः। आप्यायः ० स्व—तत्सवितुः गन्धद्वारां गोमयं आप्यायस्व पयः। दधिक्राव्नो दधि। तेजोऽसि शुक्रमसि ज्योतिरसि घृतं। मधुप्रक्षेपे मधुवाता। कुशोदकप्रक्षेपे देवस्य त्वा। पूरयामीतिमन्त्रप्रयोगकृतो विशेषः, अन्यत् समानम्। शतच्छिद्रस्य स्थापनमात्रं मृन्मयकलशेषु हिरण्यप्रक्षेपणान्ते कृते एकस्मिन् पिष्टसर्व्वौषध्युदकम् अन्येषु अन्येषु गन्धोदक-बीजोदकसर्व्वरत्नोदक-कुशपल्लव-पूर्णोदकानि क्रमेण पञ्चसु प्रक्षिप्याणि।

तत एतेषु अन्येषु च वस्त्रवेष्टनादि। अथ यथासम्भवं पर्व्वताग्रादिमृदः पूर्व्वोक्तलक्षणं सौवर्णाद्यन्यतमनिर्म्मितं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भद्रासनम् । गन्धपुष्पताम्बूलसर्व्वौषध्यादि । औदुम्बरस्रुवं वोपकल्पयेत् ।

आथर्व्वणोक्तवेद्यां स्वशाखोक्तकुशण्डिकोक्तप्रकारेणाग्नि-स्थापनादि कृत्वा वैष्णवान् ३ शार्व्वान् ३ सावित्रान् ३ वैश्वदेवान् ३ यज्ञलिङ्गान् ३ सावित्रीव्याहृतीर्ऋताषाडिति-मन्त्रान् आगात् सत्यमिति सत्यगणं यास्ते अग्ने घोरा-स्तनुव इति धर्म्मगणा ब्राह्मणान् ३ रौद्रान् ३ वारुणान् ३ आयुःशिशानिति सूक्तञ्चेति आज्याहुतीर्हुत्वा शर्म्म-वर्म्मस्वस्त्ययनायुष्याभयापराजिताख्यैः पञ्चभिर्गणैः शान्ति-प्रकरणोक्तैराज्येन जुहुयात् । काञ्चनकलशे च होमदेशे स्थापिते सम्पातान् क्षिपेत् ।

तदा राजा वह्नेर्दक्षिणपार्श्वे स्थित्वा साम्वत्सरसामन्ता-दिभिरन्यैः सदस्यैः पुरोहितैश्च सहितो वह्नौ पूर्व्वोक्तानि शुभाशुभानि निमित्तानि पश्येत् । ततः पुरोहितः प्रधानहोमं समाप्य भस्मोपग्रहणात् प्राग्वर्त्ति उत्तराङ्गं समाप्य प्राक्कृतासनस्थं सुगन्धितैलोद्वर्त्तनादिभिः स्वेच्छया स्नानशालायां ऋग्मन्त्रैर्मृत्तिकादिभिः पुनः स्नापयेत् । तद्यथा पर्व्वताग्रादिमृदः समीपे संस्थाप्य विहिं लिप्सा पर्व्वतानामिति प्रत्येकमभिमन्त्र्य वामोविषयत् खनितेति खनित्वा स्योना पृथिवीति प्रत्येकमभिगृहीत्वा आयने ते परायण इति सदूर्व्वां कृत्वा गायत्र्याभ्युक्ष्यैकमृदा राज्ञो-ऽङ्गानि लेपयेत् । प्रतिमन्त्रं प्रणवादित्वं पर्व्वताग्रमृदा सहस्रशीर्षेति मूर्द्धानं, वल्मीकाग्रमृदा अक्षिभ्यामिति सकृत्-पाठितेन कर्णौ, विद्यालयस्थमृदा तेनैव मुखं, वृषशृङ्गो-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्भूतमृदा अक्षिभ्यामिति नासिकां, इन्द्रध्वजालयमृदा ग्रीवाभ्यस्त इति सकृत् पठितेन ग्रीवां, राजालयमृदा अन्त्रेभ्य इति हृदयं, करिदन्तोद्धृतमृदा यस्य विश्वानीति मन्त्रेण दक्षिणसव्यौ भुजौ, सरोमृदा बह्वीनामिति पृष्ठं, सङ्गममृदा नाभा नाभिन्न इत्युदरं, नदीकूलद्वयमृदा आते सिञ्चामीति पार्श्वे, वेश्याद्वारमृदा सीमानं शरण-मिति कटी, गजस्थानमृदा ऊरुभ्यामित्यूरू, गोष्ठमृदा मेहनादिति जानुनी, अश्वस्थानमृदा तेनैव जङ्घे, रथचक्रमृदा एतावानस्येति पादौ सर्व्वाभिरङ्गादङ्गेति सर्व्वाङ्गाणि, ततो गायत्र्या गन्धद्वारेति आप्यायस्वेति दधिक्राव्ण इति तेजोऽसि शुक्रमित्यादयः, पञ्चगव्य-कुशोदकमन्त्रैः पूर्व्वोक्तैः पूर्व्वदिगवस्थितं कलशमादायाभि-षिञ्चेत्।

अथ भद्रासनगतं तेजोऽसि शुक्रमिति घृतपूर्णहेम-कुम्भेन पूर्व्वदिगवस्थितेन पूर्व्वतः स्थित्वा ब्राह्मणामात्यो-ऽभिषिञ्चेत्। क्षीरपूर्णेन रूप्यकुम्भेन दक्षिणतः स्थित्वा क्षत्त्रियामात्यः आप्यायस्वेति सिञ्चेत्। दधिक्राव्ण इति दधिपूरितेन ताम्रकुम्भेन पश्चिमदिगवस्थितेन पश्चिमतः स्थित्वा वैश्यामात्योऽभिषिञ्चेत्। छन्दोगामात्यः उत्तरतः स्थित्वा मधुकुम्भेन मधुवातेतितृचाभिषिञ्चेत्। स एव तत्रैव स्थित्वा कुशोदकपूरितेनान्यकुम्भेन देवस्यत्वेति सिञ्चेत्। तत्राभिषेके अभिषिञ्चामीति मन्त्रे वाक्यशेषः।

ततः पुरोहितो वह्निं रक्षध्वमिति सदस्यान् सम्प्रेष्य संपातवन्तं सौवर्णं कलशमादाय राजसमीपं गत्वा

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ब्राह्मणस्वरयुतैः शङ्खभेर्य्योः शब्दयुतैः राजसूयगतराज्याभिषेकमन्त्रैरभिषिञ्चेत् । ते यथा सोमस्य त्वाद्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्य्यस्य वचस्येन्द्रस्येन्द्रियेण क्षत्राणां क्षत्रपतेरर्घादितिद्युन् पाहि । इमं देवा असपत्न सवध्वं महते क्षत्राय महते ज्यैष्ठाय महते जानराज्याय इन्द्रस्येन्द्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशं एष वोमी राजा सोमोऽस्माकं ब्राह्मणानां राजेतिमानुषाः ।

इममित्यत्र द्वितीयान्तं राजानममुष्येत्यत्र षष्ठ्यन्तं तत् पितृणाम् । अमुष्या इत्यत्र षष्ठ्यन्तं तन्मातृणाम् । ऋग्वेदिकासु इमा आपः शिवतमा इत्यृचः । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पुष्णोर्हस्ताभ्यामग्नेस्तेजसा, सूर्य्यस्य वर्चसा, इन्द्रस्येन्द्रियेणाभिषिञ्चामि । बलाय श्रियै यशसेऽन्नाद्याय इति यजुः । भूर्भुवःस्वरिति व्याहृतयः इति । एवमन्येषामपि तत्तच्छाखीया द्रष्टव्याः । तत्र सामशाखिनो जीवन्तीनां गवां शृङ्गकोशैरभ्रातृव्य इति साम्नाभिषिञ्चेयुः । पूर्व्वोक्तकमनायान्तु एकवृषेणेति । ततः पुरोहितः कुण्डसमीपं गच्छेत् नास्य चक्रं प्रतिहन्येत । ततः सुगन्ध्युद्वर्त्तनद्रव्येणोद्वर्त्तिताङ्गं भद्रासनगतमेव राजानं शतच्छिद्रेण सौवर्णेन वेदधर्म्मशास्त्राभिज्ञोऽन्यो ब्राह्मणो या ओषधीरिति मन्त्रेण पिष्टसर्व्वौषध्युदकेन, रथे तिष्ठन्नितिमन्त्रेण गन्धपूर्णोदकेन, आब्रह्मण ब्राह्मणेति यजुषा व्रीह्यादिबीजोदकेन, पुष्पवतीरित्यथर्व्वणमन्त्रेण, पुष्पपूर्णोदकेन तेनैव मन्त्रेण तत्कालसंभूतफलोदकेन, आशुः शिशान इतिसूक्तेन तत्पूर्व्वरत्नोदकेन "ये देवाः पुरःसद," इति

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यजुषा कुशपञ्चपल्लवपूर्णोदकेन राजानमभिषिञ्चेत्। ततोऽन्यऋग्वेदी ब्राह्मणो (ऋग्वेदविद्ब्राह्मणो) गोरोचनापिष्टेन गन्धद्वारेति मन्त्रेण राज्ञो मूर्द्धानं कण्ठञ्च संस्पृशेत्।

ततो मुख्यो ब्राह्मणो वेदविद्ब्राह्मणो गोरोचनापिष्टेन क्षत्रियवैश्यशूद्राः पतिव्रताः पुत्त्रवत्यो नार्य्योऽष्टौ स्वलङ्कृता मङ्गलवाचोऽष्टदिगवस्थिताः कन्याः मूर्द्धावसिक्ताद्याश्च यथासम्भवं समुद्रादिनानातीर्थाहृतैर्जलैरभिषिञ्चेयुः।

तत्र क्षत्रियः सुलक्षणं सुवर्णालङ्कृतं शङ्खगन्धपुष्पैः सम्पूज्य तेनाभिषिञ्चेत्। शूद्राद्यास्तुष्णीं। तत्रामात्यमुख्याश्छत्रचामरवेत्रादीनि राजचिह्नान्याहरेयुः। तत्र वन्दिनश्च स्तुतिं कुर्य्युः। ब्राह्मणा अलिङ्गमन्त्रघोषं, वादकाः शङ्खभेर्य्यादिघोषं, नर्त्तक्यो नृत्यञ्च कुर्य्युः। ततः साम्वत्सरमुख्याः सौवर्णं कलशमादाय ततो गृहीतेन कुशोदकेन सुरास्त्वामित्यादिभिर्विष्णुधर्म्मोत्तरोक्तैरभिषिञ्चेत्।

मन्त्रास्तु अभिषिञ्चन्तु इति क्रियापदानुसारेणैव सार्द्धद्विशतश्लोकात्मका ज्ञेयाः। सकलमन्त्राभिषेचनान्ते अवशिष्टकलशजलं कलशेनैव सर्व्वमूर्द्ध्नि न्यसेत्।

[१]तथा च विष्णुधर्म्मोत्तरे—

श्रीराम उवाच।

मन्त्रेण येन दैवज्ञः कुर्य्याद्राज्ञोऽभिषेचनम्।
तमहं श्रोतुमिच्छामि त्वत्तो वरुणनन्दन ॥ १ ॥

---

१ ख पुस्तके विष्णुधर्म्मोत्तरीयाभिषेकमन्त्रा न सन्ति अर्थात् श्रीराम उवाच इत्यारभ्य बुद्धिरतीव चास्तु इत्यन्ता श्लोकसमष्टिर्नास्ति।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुष्कर उवाच ।

शृणुष्वावहितो मन्त्रं राम कल्मषनाशनम् ।
येनाभिषिक्तो नृपतिश्चिरं यशसि तिष्ठति ॥ २ ॥
राज्ञोऽभिषेकमब्दान्ते दैववित् कुलवारिणा ।
कुम्भादभ्युक्षणं कुर्य्यान्मन्त्रान्ते कलशं न्यसेत् ॥ ३ ॥
सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥ ४ ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय च[१] ।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा ॥ ५ ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ॥६॥
रुद्रो धर्म्मो मनुर्द्दक्षो रुचिः श्रद्धा तु पार्थिव ।
भृगुरत्रिर्वशिष्ठश्च सनकश्च सनन्दनः ॥ ७ ॥
सनत्कुमारश्च तथा भगवानथ चाङ्गिराः ।
पुलहश्च पुलस्त्यश्च मरीचिः कश्यपः प्रभुः ॥ ८ ॥
एते त्वामभिषिञ्चन्तु प्रजाध्यक्षाः समागताः ।
प्रभाकरा वर्हिषदो अग्निष्वात्तास्तथैव च ॥ ९ ॥
क्रव्यादाश्चोपहूताश्च आज्यपाश्च सुकालिनः ।
एते त्वामभिषिञ्चन्तु पितरश्चाग्निभिः सह ॥ १० ॥
लक्ष्मीर्व्वेदः शची ख्याति[२]रनसूया तथा स्मृतिः ।
सम्भूतिः सन्नतिश्चैव क्षमा प्रीतिस्तथैव च ॥ ११ ॥
स्वाहा स्वधा च ते राजन्नभिषिञ्चन्तु मातरः ।

---

१ ख विजयाय ते । २ ख अव्यात् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा तथा क्रिया ॥ १२ ॥
बुद्धिर्लज्जावपुः [1]शान्तिस्तुष्टिः सिद्धिश्च पार्थिव ।
एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः समागताः ॥ १३ ॥
अरुन्धती वसुमती[2] लम्बभानुर्मरुत्वती ।
सङ्कल्या च मुहूर्त्ता च साध्या विश्वास्तथैव च ॥१४॥
धर्म्मपत्न्यो दशान्यास्त्वामभिषिञ्चन्तु पार्थिव ।
अदितिर्द्दितिर्दनुस्ताम्रा ह्यरिष्टातापुषा[3] मुनिः ॥१५॥
कद्रुः[4] क्रोधवशा प्राची विनता सुरभिस्तथा ।
एतास्त्वामभिषिञ्चन्तु कश्यपस्य प्रियाः स्त्रियः ॥१६॥
पत्नी ते बहुपुत्त्रस्य सुपुत्त्रायाश्च भामिनी ।
समायात्वभिषेकाय विजयाय च पार्थिव ॥ १७ ॥
कृशाश्वपत्नी च तथा सुप्रभा सुजया तथा ।
सुदर्शनस्तयोः पुत्त्रो विजयं विदधातु ते ॥ १८ ॥
मनोरमा भानुमती विशाला या च वाहुदा ।
अरिष्टनेमिपत्न्यस्त्वामभिषिञ्चन्तु पार्थिव ॥ १९ ॥
कृत्तिका रोहिणी देवी इला रुद्राणिरेव च ।
पुनर्व्वसुश्च पुष्यश्च तथाश्लेषा च पार्थिव ॥ २० ॥
मघा च फाल्गुनी पूर्व्वा तथैवोत्तरफाल्गुनी ।
हस्ता चित्रा तथा स्वाती विशाखा च तथा नृप ॥२१॥
अनुराधा तथा ज्येष्टा मूलश्च वसुधाधिप ।

---

१ ङ पुस्तके शान्तिः । २ ख ग पुस्तकद्वये वसुर्यामिः ।
३ ग ङ पुस्तकद्वये नायुषा । ४ ग कण्डुः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आषाढा च तथा पूर्व्वा तथान्ये चोत्तराह्वया ॥२२॥
अभिजिच्च तथा श्रुत्यो धनिष्ठा च तथैव च।
तथा शतभिषा चैव पूर्व्वभाद्रपदा च या ॥ २३ ॥
उत्तरा रेवती राजन् अश्विनी भरणी तथा।
एतास्त्वामभिषिञ्चन्तु सोमपत्न्यः समागताः ॥२४॥
मृगी च मृगमन्द्रा च श्वेता भद्रासना हरिः।
स्रुता च कपिला दंष्ट्री सुरसा सारसा तथा।
एता पुलस्त्यपत्न्यस्त्वामभिषिञ्चन्तु पार्थिव ॥ २५ ॥
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री तथा शुकी।
पत्न्यस्त्वामभिषिञ्चन्तु अरुणस्यार्कसारथेः ॥ २६ ॥
आयतिर्नियतिश्चैव रात्रिर्निद्रा च पार्थिव।
एतास्त्वामभिषिञ्चन्तु लोकसंस्थानहेतवः ॥ २७ ॥
उमा सेना शची चैव धूम्रोर्णा निर्ऋतिस्तथा।
गौरी शिवा च बुद्धिश्च वलया चैव नन्दना ॥ २८ ॥
अहक्षा[1] च तथा ज्योत्स्ना या च देवी वनस्पतिः।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥ २९ ॥
महाकल्पश्च कल्पश्च मन्वन्तरयुगानि च।
सम्वत्सराणि सर्व्वाणि तथा चैवायनद्वयम् ॥ ३० ॥
ऋतवश्च तथा मासा पक्षाराव्यहनी तथा।
सन्ध्याश्च तिथयश्चैव मुहूर्ताः करणानि च।
एते त्वामभिषिञ्चन्तु कालस्यावयवाः शुभाः ॥ ३१ ॥
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः।

१ ग ङ पुस्तकद्वये आहक्या च।

ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च पार्थिव ॥ ३२ ॥
स्वायम्भूवो मनुः पूर्व्वो मनुः स्वारोचिषस्तथा ।
औत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥ ३३ ॥
वैवस्वतोऽथ सावर्णौ दक्षब्रह्मसुतावुभौ ।
धर्म्मपुत्रो रुद्रपुत्रो रौच्यो भौमश्च यो मनुः ।
एते त्वामभिषिञ्चन्तु मनवस्तु चतुर्द्दशाः ॥ ३४ ॥
विश्वभुग्विश्वपाश्चिचः सुशातः सुशिखी विभुः[१] ।
मनोजवस्तथौजस्वी वलिरन्तिकमान्तिकौ[२] ॥ ३५ ॥
[३]वृषश्चक्रस्तथामाश्च दिवस्पृक् शुचिरेव च ।
एते त्वामभिषिञ्चन्तु देवपालाश्चतुर्द्दशः ॥ ३६ ॥
[४]रेवतश्च कुमारश्च तथा वर्च्चाः कुमारकः ।
वीरभद्रश्च नन्दी च विश्वकर्म्मा पुरोजवः ।
एते त्वामभिषिञ्चन्तु वसुमुख्या समागताः ॥ ३७ ॥
नासत्यौ देवभिषजौ भवेतां विजयाय ते ॥ ३८ ॥
धरो ध्रुवश्च[५] सोमश्च आपश्चैवानलानिलौ ।
प्रत्यूषश्च प्रभातश्च वसवोष्टौ महाप्रभाः ।
एते त्वामभिषिञ्चन्तु देवमुख्याः समागताः ॥ ३९ ॥
आत्मा ह्यायुर्मनोदक्षः पटुः प्राणास्तथैव च ।
हविष्यश्च गरिष्ठश्च क्रतः सत्यश्च पार्थिव ।
अभिषिञ्चन्तु राजंस्त्वां देवा ह्यङ्गिरसो दश ॥ ४० ॥
ऋतुर्द्दक्षो वसुः सत्यः कालः कामो मुनिस्तथा ।

---

१ ग स्वचित्रश्च शिखी विभुः ।    २ ग वलिरङ्कति मातिकौ ।
३ ग वृषश्च ऋतधामश्च ।    ४ ग रेवन्तश्च ।    ५ ग रुद्रश्च ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

द्युतिमान् मनुजश्चैव रोचमानस्तथैव च ।
एते त्वामभिषिञ्चन्तु विश्वेदेवास्तथा दश ॥ ४१ ॥
अङ्गारकस्तथा सर्व्वो निर्ऋतिश्च तथा स्वराट् ।
अजैकपादहिर्बुध्न्या पुष्पकेतुस्तथा बुधः ॥ ४२ ॥
भरतश्च तथा मृत्युः कपालिरथ किङ्किणी ।
एकादशैते रुद्रास्त्वामभिषिञ्चन्तु पार्थिव ॥ ४३ ॥
भुवनो भावनश्चैव सुजन्म सुजनस्तथा ।
क्रतुः सुवर्णवर्णश्च वाज्यश्चव्यसुतस्तथा ॥ ४४ ॥
प्रसवश्चाव्ययश्चैव दक्षश्च मनुजाधिप ।
एते त्वामिभिषिञ्चन्तु भृगवो नाम देवताः ॥ ४५ ॥
मनो मरुच्च प्राणश्च नरोपानश्च[1] वीर्य्यवान् ।
विनिर्हयो नयश्चैव हंसो नारायणस्तथा ॥ ४६ ॥
विभुश्चापि दिवि श्रेष्ठस्तथान्यश्च जगद्धितः ।
एते त्वामभिषिञ्चन्तु साध्या द्वादश पर्थिव ॥ ४७ ॥
धाता मित्रोर्य्यमा पूषा शक्रोंशो[2] वरुणो भगः ।
त्वष्टा विवस्वान् सविता विष्णुर्द्वादश यः स्मृतः ।
एते त्वामभिषिञ्चन्तु कश्यपादितिसम्भवाः ॥ ४८ ॥
एक-द्वि-त्रि-चतुर्ज्योतिः पञ्चज्योतिस्तथैव च ।
एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः ॥ ४९ ॥
इन्द्रश्च गत्यादृश्यन्ते ततः प्रतिसरस्तथा ।
मितश्च सम्मितश्चैव अमितश्च महाबलः ॥ ५० ॥
ऋतजित् सत्यजिच्चैव सुषेणः श्येनजित्तथा ।

---

१ ग नरोमानश्च । २ ग ड पुस्तकद्वये शक्रोंशो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अतिमित्रस्तथामित्रः पुरुजिच्चापराजितः ॥ ५१ ॥
ऋतश्च ऋतवाक्धातावरुणो विधृतो ध्रुवः ।
विधारणो महातेजा वासवस्य परस्य वा ॥ ५२ ॥
ईदृगण्यादृशश्चैव एतादृगमिताशनः ।
क्रीडनश्च तथा शक्तिः भरतश्च महायशाः ॥ ५३ ॥
धातुरग्रो मुनिर्भीमो अभियुक्तः क्षिपः सहः ।
धृतिर्वपुरनाधृष्यो वासः कामो जयो विराट् ।
एते त्वामभिषिञ्चन्तु मरुतश्च समागताः ॥ ५४ ॥
देवा ह्येकोनपञ्चाशन्महाबलपराक्रमाः ।
चित्राङ्गदश्चित्ररथश्चित्रसेनश्च वीर्य्यवान् ॥ ५५ ॥
पूर्णायुरनघश्चैव उग्रसेनश्च वीर्य्यवान् ।
धृतराष्ट्रश्च सोमश्च सूर्य्यवर्चास्तथैव च ॥ ५६ ॥
दुराधस्तृणवः कीर्त्तिर्वन्दिश्चित्ररथस्तथा ।
कालश्चाप्यन्तको राजन् पर्ज्जन्यो नारदस्तथा ॥ ५७ ॥
वृषपर्व्वा च हंसश्च तथा चैव हाहाहुहूः ।
विश्वावसुस्ताम्रकश्च तथा व-सुरुचिश्च यः ।
एते त्वामभिषिञ्चन्तु गन्धर्व्वाः पृथिवीपते ॥ ५८ ॥
आह्वत्यः सोमवन्त्यश्च[1] वेगवत्यस्तथैव च ।
आधुवत्यस्तथोर्ज्जाश्चस्तथा वेकुरयः शुभाः ॥ ५९ ॥
वभ्रावश्चामृतरुचो भुवश्चैव रुचस्तथा ।
भीरवः शोचयन्त्यश्च दिव्याश्चाप्सरसां गणाः ।
एते त्वामभिषिञ्चन्तु कामिन्यस्तरुणप्रियाः ॥ ६० ॥

---

१ ग ड शोभयन्त्यश्च ।

अनुत्तमा सुरूपा च सुकेशी च मनोवती ।
मेनका सहजन्या च वर्णाका पुञ्जिकस्थला ॥ ६१ ॥
क्रतुस्थला घृताची च विश्वाची पूर्व्वचित्यपि ।
प्रम्लोचाथाप्यनुम्लोचा रम्भा चैवोर्व्वशी तथा ॥ ६२ ॥
पञ्चचूडा सामवती चित्रलेखा च पार्थिव ।
मिश्रकेशी सुगन्धा च विद्युत्पर्णा तिलोत्तमा ॥ ६३ ॥
अट्टका लक्ष्मणा क्षेमा अतिसाचित्रकं तथा ।
सुव्रता च सुबाहुश्च सुगन्धा सुवपुस्तथा ॥ ६४ ॥
पुण्डरीका सुदारा च सुराधा सुरसा तथा ।
हेमा सरस्वती चैव कमला सुन्दतालया ॥ ६५ ॥
सुमुखी हंसपादा च वारुणी रतिलालसा ।
एतास्त्वामभिषिञ्चन्तु राजन्नप्सरसस्तथा ॥ ६६ ॥
प्रह्लादश्च महातेजास्तथा राजन्विरोचनः ।
बलिर्वाणस्तथान्ये च दितिपुत्राः समागताः ।
अभिषिञ्चन्तु दैत्याश्च दिवेत...म्भसा स्वयम् ॥ ६७ ॥
विप्रचित्तिमुखाः सर्व्वे दानवास्त्वां समागताः ।
अभिषिञ्चन्तु राजानं राज्यं कर्त्तुं सुसत्वरः ॥ ६८ ॥
हेत्यश्चैव प्रहेत्यश्च सलिलेन्द्रस्तथैव च ।
सुकेशः पौरुषेयश्च यज्ञहासुरवादकः ॥ ६९ ॥
विद्युत्सूर्य्यस्तथा व्यासो वचश्च रसनस्तथा ।
एते त्वामभिषिञ्चन्तु समागम्याथ राक्षसाः ॥ ७० ॥
सिद्धार्थो मणिभद्रश्च सुमनो नन्दनस्तथा ।
कण्डूतिः पञ्चमश्चैव मणिमान्वसुमांस्तथा ॥ ७१ ॥
सर्व्वानुभूतः शङ्खश्च पिङ्गाक्षश्चतुरस्तथा ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यमो मन्दरसो भीमः पद्मश्चन्द्रः प्रभाकरः ॥ ७२ ॥
मेघवर्णश्च भव्यश्च खद्योतश्च प्रभाकरः ।
भूतिमान् केतुमांश्चैव मौलिमांश्च सुदर्शनः ॥ ७३ ॥
श्वेतश्च विपुलश्चैव खद्युम्नश्च जयावहः ।
पद्मपक्षो बलाकश्च कुमुदश्च बलाहकः ॥ ७४ ॥
पद्मनाभः सुगन्धश्च सुवीरो विजयः कृतिः ।
पूर्णमासो हिरण्याक्षः शतजिह्वश्च वीर्य्यवान् ।
एते त्वामभिषिञ्चन्तु राजवृन्दाश्च सत्तमाः ॥ ७५ ॥
शेषः पद्मश्च राजेन्द्र मकरः कच्छपस्तथा ।
महापद्मश्च नीलश्च खर्व्वः कुन्दो मुकुन्दकः ॥ ७६ ॥
एते त्वामभिषिञ्चन्तु निधयश्च समागताः ।
छागलाश्चैकवक्त्राश्च ये च सूचीमुखा नृप ॥ ७७ ॥
द्युः पूरणा विषादाश्च ज्वलनाङ्गारकास्तथा ।
कुम्भमाचाः प्रतुण्डाश्च उपवीरा उलूखलाः ॥ ७८ ॥
अकर्णाश्चक्रखण्डाश्च तथा ये पाचपाणयः ।
पांसवश्च वितुण्डाश्च निपुणाः स्कन्दनास्तथा ।
एते त्वामभिषिञ्चन्तु पिशाचानाञ्च जातयः ॥ ७९ ॥
ब्रह्मचर्य्ये स्थिता दान्ताः सर्व्वज्ञाः सर्व्वदर्शिनः ।
नानाप्रकारवदना नानाबाहुशिरोधराः ॥ ८० ॥
चतुष्पथपुराट्टालशून्यालयनिकेतनाः ।
त्रिपुरारिं भवं देवं ये गता मनुजेश्वराः ।
ते त्वामद्याभिषिञ्चन्तु गणाः भूतपतेः स्वयम् ॥ ८१ ॥
महाकालं पुरस्कृत्य नरसिंहञ्च मातरः ।
सर्व्वास्त्वामभिषिञ्चन्तु राजराज्ये नराधिप ॥ ८२ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गुहस्कन्दो विशाखश्च नैगमेयस्तथैव च ।
अभिषिञ्चन्तु राजंस्त्वां सर्व्वे स्कन्दग्रहा इमे ॥ ८३ ॥
डाकिन्यो याश्च योगिन्यः खेचर्य्यो भूचरास्तथा ।
सर्व्वास्त्वामभिषिञ्चन्तु समेत्य मनुजेश्वर ॥ ८४ ॥
गरुडश्चारुणश्चैव आरुणिश्च महाखगः ।
सम्पातो विनतश्चैव विष्णुर्गन्धकुमारकः ॥ ८५ ॥
एते त्वामभिषिञ्चन्तु सुपर्णाः पृथिवीपते ।
अनन्तश्च महानागो वासुकिः शेषतक्षकौ ॥ ८६ ॥
सुपर्णारिश्च कुम्भश्च वामनोऽथाञ्जनोत्तमः ।
ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ॥ ८७ ॥
एलापत्रश्च खण्डश्च कर्कोटक-धनञ्जयौ ।
महाकर्णो महानीलो धृतराष्ट्रो बलाहकौ ॥ ८८ ॥
कुमारः पुष्पदन्तश्च सुमुखो दुर्म्मुखस्तथा ।
सोमनाथो दधिमुखः कालियः शालिपिण्डकः ॥ ८९ ॥
विल्वपादः पाण्डुरको नागश्चापुरणस्तथा ।
कपिलश्चाम्बरीषश्च कुमारश्चाप्यकच्छकः ॥ ९० ॥
प्रह्लादः पुष्पदन्तश्च गन्धर्व्वश्च मनस्विकः ।
नहुषः खररोमाश्च शङ्खपालस्तथैव च ॥ ९१ ॥
पद्मश्च कुलिशश्चैव पाणिरित्येवमादयः ।
नागास्त्वामभिषिञ्चन्तु राजराज्ये नराधिप ॥ ९२ ॥
कुमुदैरावतः पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलः पान्तु त्वां सर्व्वतो दिशाम् ॥ ९३ ॥
पैतामहस्तथा हंसो वृषभः शाङ्करस्तथा ।
दुर्गा सिंहश्च पान्तु त्वां यमस्य महिषस्तथा ॥ ९४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उच्चैःश्रवाश्वाश्वपतिस्तथा धन्वन्तरिर्न्नृप ।
कौस्तुभः शङ्खराजश्च पान्तु त्वां सर्व्वतः सदा ॥ ९५ ॥
चक्रं त्रिशूलं वज्रञ्च नन्दकोऽस्त्राणि वाप्यथ ।
सर्व्वेऽभिषेकं दत्त्वा च दिशन्तु विजयं ध्रुवम् ॥ ९६ ॥
धर्म्मश्च व्यवसायश्च सत्यं दानं तपस्तथा ।
यमो यज्ञस्तथैवायुः ब्रह्मचर्य्यं दमः शमः ।
एते त्वामभिषिञ्चन्तु चित्रगुप्तश्च पार्थिव ॥ ९७ ॥
दण्डपिङ्गलकश्चैव मृत्युकालान्तकावुभौ ।
बालखिल्यास्तथा सर्व्वे भवन्तु विजयाय ते ॥ ९८ ॥
दिग्धेनवश्चतस्रस्त्वां सुरभिश्च तथा नृप ।
अभिषिञ्चन्तु सर्व्वाभिर्गोभिः सार्द्धं नरेश्वर ॥ ९९ ॥
वेदव्यासश्च वाल्मीकिः शमनोऽथ पराशरः ।
देवलः पर्व्वतश्चैव दुर्व्वासा भागुरिः शुचिः ॥ १०० ॥
याज्ञवल्क्यः स जावालिर्जमदग्निः शुचिश्रवाः ।
विश्वामित्रः स्थूलशिराश्च्यवनोत्रिर्विदूरथः ॥ १०१ ॥
एकतश्च द्वितश्चैव त्रितो गौतम-गालवौ ।
शाण्डिल्यश्च भरद्वाजो मौद्गल्यो वेदवाहनः ॥ १०२ ॥
बृहदश्वस्तु विभवो जयजानुर्घटोदरः ।
यवक्रीतोऽथ रैभ्यश्च आत्माधामश्च[1] जैमिनिः ॥ १०३ ॥
ऋषिः शारङ्गवश्चैव तथागस्त्यो महातपाः ।
दुरम्र्तदुर्मिशश्चैव दृढवाहुर्म्महोदयः ॥ १०४ ॥
कात्यायनश्च कण्वश्च बलाकश्चैव नन्दनः ।

---

१ ग आत्माधानश्च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एते त्वामभिषिञ्चन्तु मुनयः पार्थिवोत्तम ॥१०५॥
पृथुर्दिलीपो भरतो दुष्मन्तः शत्रुजिद्बली।
मनुः ककुत्स्थश्चानेन यौवनाश्वो जयद्रथः॥ १०६॥
मान्धाता मुचुकुन्दश्च तथा राजा पुरूरवाः।
आयुश्च नहुषश्चैव ययातिरपराजितः॥ १०७॥
इक्ष्वाकुश्च यदुश्चैव वपुर्भूरिश्रवास्तथा।
अम्बरीषश्च नाभागो बृहदश्वो महाहनुः॥ १०८॥
प्रद्युम्नश्चाथ सुद्युम्नो भूरिद्युम्नश्च सञ्जयः।
एते चान्ये च राजानस्तव राजन् दिवं गताः।
समायान्त्वभिषेकाय विजयाय तथा श्रिये॥ १०९॥
पर्ज्जन्याद्यास्तथा भूप मेघाः सर्व्वे समागताः।
द्रुमाश्चौषधयो रत्नं बीजानि विविधानि च।
सर्व्वे त्वामभिषिञ्चन्तु राजराज्येषु सत्वराः॥ ११०॥
पुरुषश्चाप्रमेयात्मा महाभूतानि यानि च।
पृथिवी वायुराकाशमापोज्योतिस्तथैव च॥ १११॥
मनोबुद्धिस्तथैवात्मा अव्यक्तश्च महीपते।
एते त्वामभिषिञ्चन्तु समेता वसुधाधिप॥ ११२॥
रुक्मभौमः शिलाभौमः पातालो नीलमृत्तिका।
पीतो रक्तः सितश्चैव श्वेतभौमस्तथैव च।
एते त्वामभिषिञ्चन्तु विजयाय महीपते॥ ११३॥
भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः।
तपः सत्यञ्च राजेन्द्र विजयाय भवन्तु ते॥ ११४॥
जम्बूः शाकः कुशः क्रौञ्चः शाल्मलीद्वीप एव च।
प्लक्षश्च पुष्करश्चैव स्वस्वाम्यं प्रदिशन्तु ते॥ ११५॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उत्तराः कुरवः पुण्या रम्या हैरण्यगास्तथा।
भद्राश्व केतुमालश्च वर्षश्चैव इलावृतः॥ ११६ ॥
हरिवर्षः किम्पुरुषो वर्षो भारतसंज्ञकः।
एते त्वामभिषिञ्चन्तु समेत्य वसुधाधिप ॥ ११७ ॥
इक्षुद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान्।
नागद्वीपस्तथा सौम्यो गन्धर्व्वो वरुणस्तथा।
अपञ्चनवमस्तेषां स्वस्वाम्यं प्रदिशन्तु ते ॥ ११८ ॥
हिमवान् हेमकूटश्च निषधो नील एव तु।
श्वेतशृङ्गो गवां मेरुर्माल्यवान् गन्धमादनः॥ ११९ ॥
महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षवांस्तथा[१]।
विन्ध्यश्च पारिपात्रश्च सर्व्वे एव महीधराः।
समागम्याभिषिञ्चन्तु त्वामद्य वसुधाधिप ॥ १२० ॥
ऋग्वेदोऽथ यजुर्व्वेदः सामवेदस्तथैव च।
अथर्व्ववेदो वेदास्त्वामभिषिञ्चन्तु पार्थिव ॥ १२१ ॥
इतिहासो धनुर्व्वेदो गन्धर्व्वश्चायुसंज्ञितः।
सप्तोपवेदाश्च तथा विजयाय भवन्तु ते ॥ १२२ ॥
शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः।
छन्दोविचितिषष्ठानि विजयं प्रदिशन्तु ते ॥ १२३ ॥
अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्द्दश ॥ १२४ ॥
सांख्ययोगः पञ्चरात्रो वेदाः पाशुपतं तथा।
कृतान्तपञ्चकञ्चैव शास्त्राणि विविधानि च ॥ १२५ ॥
गायत्री पापशमनी गङ्गादेवी महाशिवा।

---

१ ङ पुस्तके ऋषभस्तथा।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गान्धारी च महा-विद्या विजयं प्रदिशन्तु ते॥ १२६॥
देवदानवगन्धर्व्वा यक्षराक्षस-पन्नगाः।
ऋषयो मुनयो गावो देवमातर एव च॥ १२७॥
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशास्त्राणि राजानो वाहनानि च॥१२८॥
औषधानि समस्तानि कालस्यावयवाश्च ये।
स्थानानि च समस्तानि पुण्यान्यायतनानि च॥१२९॥
जीमूतानि च सर्व्वाणि तद्विकाराश्च सर्व्वशः।
उक्तानि चाप्यनुक्तानि विजयाय भवन्तु ते॥ १३०॥
लवणक्षीरतोयश्च घृतं मण्डोदकस्तथा।
दधिमण्डोदकाश्चैव सुरोदश्च नराधिप॥ १३१॥
तथैवेक्षुरसोदश्च तथा स्वादूदकश्च यः।
गर्भोदकः स्वतोयैस्त्वामभिषिञ्चन्तु पार्थिव॥ १३२॥
चत्वारः सागराश्चैव स्वेन तोयेन पार्थिव।
समागम्याभिषिञ्चन्तु विजयं प्रदिशन्तु ते॥ १३३॥
पुष्करश्च प्रयागश्च प्रभासो नैमिषस्तथा।
तथा ब्रह्मसरः पुण्यं गयाशीर्षन्तु पार्थिव॥ १३४॥
कालोदको नन्दिकुण्डस्तथैवोत्तरमानसः।
स्वर्गमार्गप्रदश्चैव तथा पञ्चनदश्च यः॥ १३५॥
भृगुतीर्थं प्रभासश्च तथैवामरकण्टकः।
आश्रमः कालिकायाश्च तृणविन्दोस्तथाश्रमः॥ १३६॥
गोतीर्थश्चाग्नितीर्थश्च विमलः स्वर्ग एव तु।
जम्बूमार्गश्च विमलः पुण्यस्तण्डुलिकाश्रमः[1]॥ १३७॥

---

१ ग तन्दलिकाश्रमः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कापिलश्च तथा तीर्थस्तीर्थौवातिकखण्डिकौ ।
महासरस्तथागस्त्यकुमारी तीर्थमेव तु ॥ १३८ ॥
गङ्गाद्वारं कुशावर्त्तौ विल्वको नीलपर्व्वतः ।
वाराहपर्व्वतश्चैव तीर्थं कनखलं तथा ॥ १३९ ॥
सुगन्धा च धराकुम्भास्तथा शाकम्भरीति च ।
भृगुतुङ्गः सुकुब्जाम्रः कपिलस्य तथाश्रमः ॥ १४० ॥
चमसोद्भेदनः पुण्यस्तथा विनशनः शुभः ।
अजतुङ्गश्च मोदश्च अश्वगन्धश्च पार्थिव ॥ १४१ ॥
कालञ्जरः सकेदारो रुद्रकोटिस्तथैव च ।
महाकालश्च राजेन्द्र वदर्य्याश्रम एव तु ॥ १४२ ॥
नदी च सोमतीर्थञ्च सूर्य्यतीर्थं शतक्रतोः ।
अश्विनोर्वरुणस्याथ वायोर्वैश्रवणस्य तु ॥ १४३ ॥
ब्रह्मणश्चैव सर्व्वस्य यमस्य च्यवनस्य च ।
विरूपाक्षस्य धर्म्मस्य तथा चाप्सरसां नृप ॥ १४४ ॥
ऋषीणाञ्च वसूनाञ्च साध्यानां मरुतां तथा ।
आदित्यानाञ्च रुद्राणां तथा चाङ्गिरसां नृप ॥ १४५ ॥
वैश्वदेवभृगूणाञ्च तथान्येषान्तु मानद ।
ऋक्षः प्रस्रवणश्चैव सुषुम्ना च नराधिप ॥ १४६ ॥
शालग्रामसरश्चैव वराहो मानसस्तथा ।
कामाश्रमस्त्रिकूटश्च चित्रकूटस्तथैव च ॥ १४७ ॥
सपूर्व्वः क्रतुसारश्च तथा विष्णुपदं सरः ।
कपिलञ्च तथा तीर्थं वासुकेस्तीर्थमेव च ॥ १४८ ॥
सिन्धूत्तमस्तपोद्वारोऽप्यथ सूर्य्योपकुम्भकः ।
पुण्डरीकश्च राजेन्द्र गङ्गासागरसङ्गमः ॥ १४९ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सिन्धुसागरयोश्चैव सङ्गमः सुमनोहरः ।
तथा कुम्भावसुन्धश्च मानसन्तु तथा सरः ॥ १५० ॥
तथा विन्दुसरः पुण्यं सरो अच्छोदकन्तथा ।
धर्म्मारण्यं फल्गुतीर्थमविमुक्तं तथैव च ॥ १५१ ॥
लौहित्यश्च तथा पुण्यो वदरी पापनाशिनी ।
तीर्थं सप्त ऋषीणाञ्च द ,तीर्थन्तु पार्थिव ॥ १५२ ॥
पुष्पन्यासस्तथा चैव तीर्थो हंसपदस्तथा ।
अश्वतीर्थश्च कर्णाश्वो मन्योमणिस्तथैव च ॥ १५३ ॥
वेदिका इन्द्रमार्गश्च स्वर्णविन्दुस्तथैव च ।
आहल्यकस्तथा तीर्थस्तीर्थश्चैरावतस्तथा ॥ १५४ ॥
ऐरावती समुद्रे द्वे तीर्थे भोगयशःप्रदे ।
करवीराह्वयश्चैव नागमोचनिकस्तथा ॥ १५५ ॥
पापमोचनिकश्चैव ऋणमोचनिकस्तथा ।
[1]उद्वेलनस्तथा पुण्यः सम्पूज्यः सरसीवरः ॥ १५६ ॥
देवब्रह्मसरः पुण्यं सर्पिर्दधि तु पार्थिव ।
एते चान्ये तु बहवः पुण्यसङ्कीर्त्तनाः शुभाः ॥ १५७ ॥
तोयैस्त्वामभिषिञ्चन्तु सर्व्वपातकनाशनैः ।
गङ्गामहानदी पुण्या ह्रदिनी ह्रादिनी तथा ॥ १५८ ॥
पावनी च तथा पुण्या चक्षुः सिन्धुः सुनर्म्मदा ।
सुप्रभा काञ्चनाक्षी च विशाला मानसी ह्रदा ॥ १५९ ॥
सरस्वत्योघनादा च सुवेशा विमलोदका ।
क्षिप्रा शोणश्च तर्षश्च सरयूर्गण्डकी तथा ॥ १६० ॥
गोमती धूतपापा च वाहुदा च सरस्वती ।

---

१ ङ पुस्तके उद्वेजन ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अच्छोदा च विभागा च चन्द्रभागा इरावती ॥ १९१ ॥
वितस्ता देविकारम्भा कौशी देवह्रदा शिवा ।
तथा चेक्षुमती पुण्या कौशिकी यमुना तथा ॥ १९२ ॥
निर्व्विन्ध्या च तृतीया च लोहितश्च महानदः ।
वेदस्मृतिर्व्वेदमाता वेचघ्नी वरदा तथा ॥ १९३ ॥
वर्णाशा वन्दना चैव सदानीरा कुमुद्वती ।
पीतामरावती[1] धूम्रा विदर्भा वेणुमत्यपि ॥ १९४ ॥
अवन्ती च तथा कुन्ती सुरसा चपलाशिनी ।
मन्दाकिनी दशार्णा च सिन्धुरेव कुमुद्वती ॥ १९५ ॥
तपनी पिप्पला श्येनी करतोया पिपासिका ।
चित्रोत्पला चित्रवर्णा मञ्जुला वालुकामती ॥ १९६ ॥
शुक्तिमती सिनीवाली मण्डली कपिकाकपूः ।
तापी पयोष्णी निर्व्विन्ध्या सिता च निषधावती ॥१९७॥
वेण्या वैतरणी भीमा मन्दरा[2] च तथा कुहूः ।
तोया चैव महागौरी दुर्गा तिमिङ्गिला तथा ॥१९८॥
गोदावरी भीमरथी कृष्णा वेण्याथ कञ्जरा[3] ।
तुङ्गभद्रा सुप्रकारा वाह्या कावेरिरेव च ॥ १९९ ॥
कृतमाला ताम्रपर्णी पुष्पभद्रोत्पलावती ।
तृसमा ऋषिकुल्या च इक्षका त्रिदिवालया ॥ १७० ॥
लाङ्गुलिनी वंशधरी [4]जम्बूश्च मुकुलावती ।
ऋषिका वरवेगा च मन्दगा मन्दवाहिनी ॥ १७१ ॥
क्षमा देवी दयाव्योमा पयोष्णी कालवाहिनी ।

---

१ ग ङ पुस्तकद्वये चर्म्मण्वती । २ ग मेदुरा ।
३ ङ वञ्जुला । ४ ङ सुकुमारा कुलावती ।

कम्पना च विशाला च करतोया सुवाहिनी ॥ १७२ ॥
ताम्रारुणा वेत्रवती सुभद्रा च स्रवन्त्यपि ।
अहिनीका उमा चैव सुप्रकारा हिरण्मयी ॥ १७३ ॥
आपगा लोपलाभासी सन्ध्या तु वडवा नदी ।
महेन्द्रवाणी शाला च मालिका बलपार्व्वती[१] ॥१७४॥
[२]नीलोद्भूतकरा चैव वाहुदा वनवासिनी ।
नन्दा चैवोपनन्दा च वरदा वसुवासिनी ॥ १७५ ॥
एताश्चान्याश्च राजेन्द्र नद्यस्त्वां विविधोदकाः ।
सर्व्वपापप्रशमनाः सर्व्वलोकस्य मातरः ।
स्वतीर्थपुण्यैः कलशैरभिषिञ्चन्तु पार्थिव ॥ १७६ ॥

एतैर्यथोक्तैर्नृप राजराज्ये
दत्ताभिषेकः पृथिवीं समग्रां ।
ससागरां भुङ्क्ष चिरञ्च जीव
धर्म्मे च ते बुद्धिरतीव चास्तु ॥ १७७ ॥

ततः पुरोधा नृपतेरग्रतस्तिष्ठन् ब्रूयात्—

जय त्वं पृथिवीपाल जय विक्रमभूषण ।
धर्म्मस्ते निखिलो राजन् वर्द्धतां पालय प्रजाः ॥१७८॥
वर्द्धस्व त्वं श्रियै गुप्त्यै जयायाभ्युदयाय च ।
यशसे श्रेयसे चैव शत्रूनां निधनाय च ॥ १७९ ॥

---

१ ग ङ पुस्तकद्वये बलयावती । २ क तालोद्भूतकरा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ कीर्त्तनादौ फलविशेषः ॥४८॥

अथ विष्णुधर्म्मोत्तर एवैतदभिषेकमन्त्रप्रतिपाद्यदेवता-तीर्थादीनां कीर्त्तननमस्कारादौ फलविशेष उक्तः ।

पुष्कर उवाच ।

मन्त्रा ये कीर्त्तिता राम मयास्मिंस्तव भार्गव ।
तेषां सङ्कीर्त्तनं धन्यं सर्व्वपापप्रणाशनम् ॥ १ ॥
एतेषां कल्यमुत्थाय यः कुर्य्यात् कीर्त्तनं नरः ।
सर्व्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥ २ ॥
तिर्य्यग्योनिं न गच्छेत नरकं सङ्कटानि च ।
न च दुःखं न च सुखं मरणे न च मुह्यति ॥ ३ ॥
एतेषाञ्च नमस्कारं यः कुर्य्यात् प्रयतो नरः ।
न तस्य तिष्ठते पापमब्धीन्दुरिव[१] पुष्करे ॥ ४ ॥
एतेषां तर्पणं कृत्वा स्नातः प्रयतमानसः ।
महापातकयुक्तोऽपि त्वचेवाहिर्विमुच्यते ॥ ५ ॥
एतेषां पुष्पदानेन महतीं श्रियमश्नुते ।
[२][एतेषामर्घ्यदानेन सर्व्वपापैः प्रमुच्यते ॥ ६ ॥
एतेषां दीपदानेन भ्राजते चन्द्रवद्दिवि ।]
एतेषामाहुतिं दत्त्वा कामानाप्नोति पुष्कलान् ॥ ७ ॥
नैवेद्यं च बलिं दत्त्वा भोगानाप्नोति चोत्तमान् ॥ ८ ॥
एतानुद्दिश्य विप्रेषु दत्त्वा भार्गव भोजनम् ।
सन्तर्प्य दक्षिणाभिश्च त्रिदिवं प्राप्नुयाच्चिरम् ॥ ९ ॥

---

१ ङ अविन्दुरिव ।  २ [ ] चिह्नितांश ङ पुस्तके पतितः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अभिषेकदिने राज्ञा [1]पुण्यस्नाने तथैव च।
तथा सम्वत्सरग्रन्थौ सर्व्वे पूज्या हितैषिणा ॥ १० ॥
यानि तीर्थानि चोक्तानि सरितश्च समासतः।
तेषां गमेन पूय्यन्ते येऽपि पातकिनो जनाः ॥ ११ ॥
स्नानं महाफलं तेषां ततः [2]श्राद्धक्रिया तथा।
दानं बहुफलं प्रोक्तं दर्शनं पापनाशनम्।
कीर्त्तनं भार्गव श्रेष्ठं न मेऽचास्ति विचारणा ॥ १२ ॥

तीर्थेष्वथैतेषु भृगुप्रधान
स्नाता नरा यान्ति नरेन्द्रसद्म।
तीर्थानि गम्यानि ततः प्रयत्नात्
पुण्याश्च सर्व्वाः सरितश्च राम ॥ १३ ॥

इति कीर्त्तनादौ फलविशेषः।

---

१ ङ पुण्यस्नाने। २ ङ श्राद्धादिकाक्रिया।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ राज्ञः श्रीस्तवपाठः ॥ ४६ ॥

ततः शुद्धोदकेन स्नातो राजा वस्त्रालङ्कारोष्णीषादि धृत्वा, दर्पणे शुद्धे विलीनाज्ये च मुखं दृष्ट्वा, घृतपात्रं ससुवर्णं ब्राह्मणाय दत्त्वा चन्दनकुङ्कुमादिमङ्गलद्रव्यालम्भनं कृत्वा, विष्णुं सश्रीकं अभिषेकमन्त्र-देवतासहितं राजोपचारैरभ्यर्च्य, वृतान् ब्राह्मणान् वस्त्रालङ्कारादिभिः सम्पूज्य साम्वत्सरपुरोहितौ मधुपर्केनाधिकेनार्हयेत्। ततः सांवत्सरो राज्ञो ललाटे उक्तलक्षणं पट्टं वध्नीयात् मूर्द्ध्नि मुकुटं स्वस्तिन इन्द्र इत्यादि मन्त्रैः। ततो विनायकब्रह्मविष्णुमहेश्वरान् ग्रहान् देवान् पितृंश्चोद्दिश्य दक्षिणां दद्यात्। अभिषेककर्त्तृभ्यः सुवासिनीभ्यः कन्याभ्यश्च सकञ्चुकानि वासांसि च सर्व्वेभ्योऽभयं दद्यात्। आघातस्थान् पशून्, बन्धनस्थान् गोब्राह्मणादीन्, तद्वन्तून् दारुणकर्म्मकारिणश्च मोचयेत्। ततः पुरोहितो राजानं क्रमेण वृषादिचर्म्मास्तृते बहुमूल्यवस्त्राभरणच्छदे उत्तमे मञ्चे क्रमेण ध्रुवाद्यौरित्युपवेशयेत्।

आत्ताहार्षमितिसूक्तेनेति पू० तत्रोपविष्टो राजा श्रियं स्तुवीत।

सिंहासनगतः शक्रः सम्प्राप्य त्रिदिवं पुनः।
देवराज्ये स्थितो देवीं तुष्टावाज्यकरां ततः ॥ १ ॥

इति परकृत्यर्थवादोन्नीतविधेः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इन्द्र उवाच—

[1]नमस्ते सर्व्वभूतानां जननीमब्जसम्भवां।
श्रियमुन्निद्रपद्माक्षीं विष्णोर्वक्षःस्थलस्थितां ॥ २ ॥
त्वं सिद्धिस्त्वं सुधा स्वाहा स्वधा त्वं लोकपावनी।
सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥ ३ ॥
यज्ञविद्या महाविद्या गुह्यविद्या च शोभने।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥ ४ ॥
आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्त्वमेव च।
सौम्या सौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥ ५ ॥
का त्वन्या त्वामृते देवि सर्व्वयज्ञमयं वपुः।
अध्यास्ते देवि देवस्य योगिचिन्त्यं गदाभृतः ॥ ६ ॥
त्वया देवि परित्यक्तं सकलं भुवनत्रयं।
विनष्टप्रायमभवत्त्वयेदानीं समेधितम् ॥ ७ ॥
दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकान्।
भवत्येतन्महाभागे नित्यं तद्वीक्षणान्नृणाम् ॥ ८ ॥
शरीरारोग्यमैश्वर्य्यमरिपक्षक्षयं सुखं।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्ल्लभम् ॥ ९ ॥
त्वं माता सर्व्वभूतानां देवदेवो हरिः पिता।
त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम् ॥ १० ॥
मा नः शोकं गृहं गोष्ठ मा गृहं मा परिच्छदं।
मा शरीरं कलत्रञ्च त्यजेथाः सर्व्वपावनी ॥ ११ ॥

---

१ ग पुस्तके विष्णुपुराणीयनवमाध्यायः श्रीस्तवात्मको न लिखितः। ङ पुस्तके "नमस्ते सर्व्वलोकानामिति विष्णुपुराणस्य स्तोत्रं पठेदि"ति लिखितम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मा पुत्रान् मा सुहृद्वर्गान् मा पशून् मा विभूषणं ।
त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ॥ १२ ॥
सत्येन सत्यशौचाभ्यां तथाशीलादिभिर्गुणैः ।
त्यजन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयामले ॥ १३ ॥
त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ।
कुलैश्वर्य्यैश्च पूज्यन्ते पुरुषा निर्गुणा अपि ॥ १४ ॥
स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
ईश्वरः स च विक्रान्तो यस्त्वया देवि वीक्षितः ॥ १५ ॥
सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ।
पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ १६ ॥
न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ।
प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन ॥ १७ ॥

पराशर उवाच—

एवं स्त्रीः संस्तुता सम्यक् प्राह देवी शतक्रतुं ।
शृण्वतां सर्व्वदेवानां सर्व्वभूतस्थिता द्विज ॥ १८ ॥

श्रीरुवाच—

परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे ।
वरं वृणीष्व यस्तुष्टो वरदाहं तवागता ॥ १९ ॥

इन्द्र उवाच—

वरदा यदि मे देवि वरार्हो यदि वाप्यहं ।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥ २० ॥
स्तोत्रेण यस्तवैतेन त्वां स्तोष्यत्यब्धिसम्भवे ।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥ २१ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीरुवाच—

त्रैलोक्यं त्रिदशश्रेष्ठ न सन्त्यक्ष्यामि वासव ।
दत्तो वरो मया यस्ते स्तोत्राराधनतुष्टया ॥ २१ ॥
यश्च सायं तथा प्रातस्तोत्रेणानेन मानवः ।
मां स्तोष्यति तस्याहं भविष्यामि वरोन्मुखी ॥ २२ ॥

पराशर उवाच—

एवं वरं ददौ देवी देवराजाय वै पुरा ।
मैत्रेय श्रीर्महाभाग स्तोत्राराधनतोषिता ॥ २३ ॥
भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्व्वमुदधेः पुनः ।
देवदानवयत्नेन प्रसूतामृतमन्थने ॥ २४ ॥
एवं यथा जगत्स्वामी देवदेवो जनार्द्दनः ।
अवतारं करोत्येषस्तथा श्रीः त्वत्सहायिनी ॥ २५ ॥
पुनश्च पद्मादुद्भूता आदित्योऽभूद्यदा हरिः ।
यदा तु भार्गवो रामस्तदाभूद्धरणी त्वियं ॥ २६ ॥
राघवत्वे भवेत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषा सहायिनी ॥ २७ ॥
देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोर्द्देहानुरूपा वै करोत्येषात्मनस्तनुम् ॥ २८ ॥
यश्चैनं शृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः ।
श्रियो न विच्युतिस्तस्य गृहे यावत् कुलत्रयम् ॥ २९ ॥
पठ्यते येषु चैवैष गृहेषु श्रीस्तवो मुने ।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥ ३० ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एतत्ते कथितं ब्रह्मन् यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ च यथा जाता पूर्व्वं भृगुसुता सती ॥ ३१ ॥
इति सकलविभूत्यवाप्तिहेतो-
स्तुतिरियमिन्द्रमुखोद्गतादिलक्ष्म्याः ।
अनुदिनमिदं पठ्यते नृभिर्यैः
वसति न तेषु कदाचिदप्यलक्ष्मीः ॥ ३२ ॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे नवमोऽध्यायः ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथाभिषेकोत्तरकृत्यानि ॥ ५० ॥

तत्रोपविष्टाय प्रतीहारः अमात्यान् पौरमुख्यानन्यदेश-गतान् स्वदेशस्थान् वणिजः प्रकृतीश्च यथाक्रमं प्रदर्शयेत्, प्रकृतयश्च तुष्टा राज्ञे आशिषः प्रदद्युरित्याथर्वणपरिशिष्टः।

ततो राज्ञा ग्रामवस्त्रगजतुरङ्गकनकगोजाविग्रहदानैः साम्वत्सरपुरोहितौ पूजयित्वा, तद्वदेव ऋग्वेदवित्प्रभृतीं-स्त्रीन् यथाविभवं अन्यांश्च साम्वत्सरपुरोहितान् ब्राह्मण-मुख्यांश्चन्दनपुष्पान्नमोदकादिभिर्गोवस्त्र-तिल-पुष्प-फल-काञ्चन-क्षीर-महीदानैः सम्पूज्य, चन्दनकुङ्कुमादिभिः स्वदेहालम्भनं विधायायुधानि सम्पूज्य, सशरं धनुर्गृहीत्वाग्निं प्रदक्षिणीकृत्य, पूर्णाहुतिं दत्त्वा, वह्निं देवांश्च सम्पूज्य, [१]गुरून्नमस्कृत्य वृषं सवत्सां गाञ्च पृष्ठतः संपूज्य इति कमलाञ्चालभ्याऽश्वारोहणं[२] करणीयम्।

तस्य लक्षणम्।

शङ्खश्वेतो भवेद्वाजी शङ्खघोषो महास्वनः।
सलीलं हंसवद्गच्छेत् अत्यर्थं विनतोन्नतः ॥ १ ॥
तेन राष्ट्रञ्च कोशञ्च कोष्ठागारं च वर्द्धयेत्।
मित्राश्चैवानुरज्यन्ति शत्रुश्चाप्यवतिष्ठते ॥ २ ॥
यजते चाश्वमेधेन पृथ्वीञ्चाप्यनुशासति।
अरिष्टवर्णो विनतस्ताम्रोष्ठस्ताम्रतालुकः ॥ ३ ॥
पराभूताश्च तिष्ठन्ति शत्रवः कामदो हि सः।
पुष्कलं पृथिवी माला चन्द्रो वै लाङ्गलं गदा ॥ ४ ॥

---

१ ङ गुरुं नमस्कृत्य। २ ङ अश्वानयनं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वोपवेशनार्हमश्वं साम्वत्सरेण सर्व्वौषधियुतकलशो-दकेन या ओषधीरिति कृताभिषेकं गन्धमाल्यादिभिरल-ङ्कृतं दक्षिणे कर्णे वक्ष्यमाणमन्त्रैः मन्त्रितं क्षणमारुह्याव-तरेत्।

मन्त्रास्तु—

जयाश्व त्वं मया राज्ञा तुरङ्गाद्यः प्रतिष्ठितः।
स्वराज्यलक्ष्म्याः पुत्त्र त्वं गन्धर्व्व त्वं तथाप्सरः॥ ५॥
यथा नृणामयं राजा तथा त्वं भव वाजिनां।
यथा भवन्तं नृपतिर्नित्यमेवाभिरक्षति॥ ६॥
तथा त्वं रक्ष राजानं सर्व्वावस्थागतं हय।
दर्शयाश्व तथा स्वप्ने दैवदोषमुपागतम्॥ ७॥
तुरगान् सकलान्रक्ष त्वयि भारोऽयमर्पितः।
अद्यप्रभृति राजा त्वामग्रेणाभ्येति भक्तितः॥ ८॥
अभ्यर्च्चयिष्यति सदा गन्धमाल्यानुलेपनैः।
पूजनैश्च द्विजातीनां तथा च स्वस्तिवाचनैः।
रक्षन्तु त्वां महेन्द्रस्तु पूर्व्वेण त्रिदशाधिपः॥ ९॥
दक्षिणेन यमो देवः पश्चिमेन जलाधिपः।
उदग्वैश्रवणो देवः सर्व्वे रक्षन्तु सर्व्वतः॥ १०॥

ततो राजयोग्यगजानयनं करणीयं।

तल्लक्षणम्—

शृणु राजन् गजो राज्ये यादृग्भूतः शुभो भवेत्।
पीनमांसः विनासश्च कूर्म्माकार-नखस्तथा॥ ११॥
सममेष-चितांसस्तु वृत्तहस्त-घनापरः।
छाग-कक्षिः सुपार्श्वश्च कण्ठ-नाहसमन्वितः॥ १२॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]बलसत्वसमायुक्तः स्निग्धच्छविमनोरमः[2] ।
सांग्रामिको भवेद्राज्ञामभिषेकोचितो गजः ॥ १३ ॥

तथाभूतं मुख्यं गजं पूर्व्ववदभिषिच्याऽलङ्कृत्य साम्वत्सर आरुह्य दक्षिणकर्णे मन्त्रयित्वाऽवतरेत् ।

मन्त्रास्तु—

श्रीगजस्त्वं वृतो राज्ञा भव तस्य गजाग्रणीः ।
गन्धमाल्यान्नभक्षैस्त्वां पूजयिष्यति पार्थिवः ॥ १४ ॥
लोकः सदाभयां पूजां करिष्यति यथा तव ।
पालनीयस्त्वया राजा युद्धेऽध्वनि तथा गृहे ॥ १५ ॥
तिर्य्यग्भावं समुत्सृज्य दिव्यं भावमनुस्मर ।
देवासुरे पुरा युद्धे श्रीगजस्त्रिदशैः कृतः ॥ १६ ॥
ऐरावतसुतः श्रीमानरिष्टो नाम रावणः ।
श्रीगजानान्तु यत्तेजः सर्व्वमेवोपतिष्ठतु ॥ १७ ॥
तत्तेजस्तव नागेन्द्र दिव्यभावसमन्वितम् ।
उपतिष्ठतु भद्रन्ते रक्ष राजानमाहवात् ॥ १८ ॥

ततो राजा तमारुह्य तत्र स्थित एव नानागजारूढै-र्मुख्यामात्यसामन्तसाम्वत्सरपुरोहितादिभिः सहितो वाद्य-घोषेण राजमार्गेण सञ्चरन्, धनं विसृजन्, पुरं परिक्रम्य, तद्गत एव देवायतनेषु गत्वा, यथाविभवं देवान् सम्पूज्य, तादृश एव स्वप्रासादमागत्य, पूर्व्वदेवतानां पूजनं कृत्वा, अग्रे यशस्विति मुकुटं पट्टञ्चापाकरोति ।

---

१ ङ पुस्तके निम्नलिखितः श्लोकोऽधिकः ।

ज्वलनो ज्वलनेत्रश्च सुविषाणो महाकरः ।
सम्पूर्णविमुकश्चैव कूर्म्मपादो जयाकरः ॥

२ ङ स्निग्धश्च सुमनोरमः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ दुन्दुभिशब्दं श्रुत्वा निष्कसहस्रं दासीशतं ग्रामञ्च दद्यादिति बौधायनः। ततो देवतानामुत्तरपूजां कृत्वा अग्निं सम्पूज्य, विभूतिं धृत्वा, सम्भारान् पुरोहिताय दत्त्वा, सर्व्वैः सहितोऽन्तर्गृहं प्रविश्य यथोचित-दानमान-सत्कारैः सर्व्वान् वशीकृत्य यथासम्भवं ब्राह्मणान् भोजयित्वा दीनानाथेभ्यो नटनर्त्तकादिभ्यश्च भूयसीं दक्षिणां दत्त्वा सर्व्वान् विसृज्य बन्धुभिः सार्द्धं मुदितो भुञ्जीत।

तत आचम्य ताम्बूलमुखोऽन्तःपुरनिवासिभिः सह क्षणं विहृत्य आत्मानं प्रयत्नेन रक्षेत्। ततः सदर्भायां क्षितौ ब्रह्मचर्य्येण स्वपेत्।

इति श्रीविष्णुधर्म्मोत्तरोक्तमार्गेण राज्याभिषेकप्रयोगः।

---

एवं पूर्व्वोदाहृतब्रह्मपुराणादिप्रमाणकाभिषेकप्रयोगा अपि स्वतन्त्रा एवेति केचित्। तदा तेऽप्येवमेवोह्याः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ पुष्याभिषेकः[1] ॥ ५१ ॥

यथोक्त आथर्व्वणपरिशिष्टे—

अथ पुष्याभिषेकस्य विधिं वक्ष्यामि साम्प्रतम् ।
धर्म्मार्थकामसंयुक्तं राजा कुर्य्यात् पुरोहितम् ॥ १ ॥
सौवर्णै राजतैस्ताम्रैः कलशैः पार्थिवैरपि ।
सहस्रेण शतेनाथ तोयग्रहणमिष्यते ॥ २ ॥
चतुर्णां सागराणान्तु नदीनाञ्च शतस्य तु ।
अभिषेकाय राज्ञस्तु तोयमाहृत्य यत्नतः ॥ ३ ॥
एकद्वित्रिचतुर्णां वा सागरस्य तु पञ्चमम् ।
औषधीस्तेषु सर्व्वेषु कलशेषु प्रकल्पयेत् ॥ ४ ॥
सहा च सहदेवी च बला चातिबला तथा ।
मदयन्ती वचा श्वेता व्याघ्रदन्ती सुमङ्गला ॥ ५ ॥
शतावरी जयन्ती च शतपुष्पा सचन्दना ।
प्रियङ्गुरोचनोशीरमम्टता च ससारि वा ॥ ६ ॥
अश्वत्थप्लक्षविल्वानां न्यग्रोधपनसस्य च ।
शिरीषाम्रकपित्थानां पल्लवैः समलङ्कृतान् ॥ ७ ॥
हेमरत्नौषधीविल्वपुष्पगन्धाधिवासितान् ।
आच्छादितान् सितैर्वस्त्रैरभिमन्त्र्य पुरोहितः ॥ ८ ॥
सवित्र्योभयतः कृत्वा शन्नो देवी तथैव च ।
हिरण्यवर्णं सूक्तञ्च अनुवाकाद्यमेव च ।
धरण्यां पादपीठं स्याद्दूर्व्वामूलाङ्कुराञ्छुभान् ॥ ९ ॥

---

[1] ख पुण्याभिषेकः । ङ पुष्याभिषेकः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्योपरि भवेत् पीठं हेमरौप्यमथापि वा ।
अनडुद्व्याघ्रसिंहानां मृगस्य च यथाक्रमम् ।
चत्वार्य्येतानि चर्म्माणि पूर्व्वादारभ्य विन्यसेत् ॥ १० ॥
चातुर्होत्रविधानेन जुहुयाच्च पुरोहितः ।
चतुर्द्दिक्षुस्थितैर्व्विप्रैर्व्वेदवेदाङ्गपारगैः ।
विल्वाहारः फलाहारः पयसा वापि वर्त्तयेत् ॥ ११ ॥
सप्तरात्रं घृताशी च ततो होमं प्रयोजयेत् ।
गव्येन पयसा कुर्य्यात् सौवर्णेन स्रुवेण तु ॥ १२ ॥
वेदानामादिमन्त्रेण महाव्याहृतिपूर्व्वकैः ।
शर्म्मवर्म्मगणश्चैव तथा स्यादपराजितः ॥ १३ ॥
आयुष्यश्चाभयश्चैव तथा स्वस्त्ययनो गणः ।
एतान् पञ्चगणान् हुत्वा वाचयेत्तु द्विजोत्तमान् ॥ १४ ॥
हिरण्येनाक्षतार्घ्येण फलैश्च मधुसर्पिषा ।
पुण्याहं वाचयित्वास्य प्रारम्भं कारयेद्बुधः ॥ १५ ॥
तिथिनक्षत्रसंयुक्ते मुहूर्त्ते करणे शुभे ।
उच्चैर्घोषयते तूर्य्याण्यभिमन्त्र्य पुरोहितः ॥ १६ ॥
सर्व्वतूर्य्यनिनादेन अभिषिक्तो ह्यलङ्कृतः ।
सिंहासनं समारुह्य पीठकं वा क्रमागतम् ॥ १७ ॥
चामरछत्रसहितं प्रतीहारविभूषितम् ।
मत्तद्विपचतुष्कञ्च चतुर्द्दिक्षु प्रकल्पयेत् ।
उपविष्टस्ततो राजा प्रजानां कारयेद्धितम् ॥ १८ ॥

प्रजा एवाह—

आकारब्राह्मणा गावः स्त्रीबालजडरोगिणः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततस्तद्दर्शनं देयं ब्राह्मणानां नृपेण तु।
श्रेणीप्रकृतिमुख्यानां स्त्रीजनञ्च नमस्करेत् ॥ १९ ॥
आशिषस्तैर्हि दास्यन्ते तुष्टा जनपदा भुवि।
एवं प्रजानुरज्येत पृथिवी च वशा भवेत् ॥ २० ॥
पुरोहितं मन्त्रिणञ्च सेनाध्यक्षमथैव च।
अश्वाध्यक्षं गजाध्यक्षं कोष्ठागारपतिं तथा ॥ २१ ॥
भाण्डागारपतिं वैद्यं दैवज्ञञ्च यथाक्रमम्।
यथार्हेण च योग्येन[१] सर्व्वान् सम्पूजयेन्नृपः ॥ २२ ॥
राज्यं पुरोहिते न्यस्य शेषम्नणां यथाक्रमम्।
स्थानान्तराणि चान्यानि दत्त्वा सुखमवाप्नुयात् ॥ २३ ॥
दूर्व्वाः सिद्धार्थकान् सर्पिः शमी व्रीहियवौ यथा।
शुक्लानि चैव पुष्पाणि मूर्द्ध्नि दद्यात् पुरोहितः ॥ २४ ॥
अथर्व्वविहितो ह्येष विधिः पुष्याभिषेचने।
राजा स्नातो महीं भुंक्ते शक्रलोकं स गच्छति ॥ २५ ॥

इति पुष्याभिषेकः।

---

१ ग अभ्ययोगेन।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ जन्मनक्षत्रे अभिषेकः ॥ ५२ ॥

अथ राज्ञो जन्मनक्षत्रे प्रतिमासमभिषेक उक्तो विष्णुधर्म्मोत्तरे ।

पुष्कर उवाच—

राजा तु जन्मनक्षत्रे प्रतिमासं समाचरेत् ।
जन्मनः स्नानकं कर्म्म यत्तत् पूर्व्वं मयेरितम् ॥ १ ॥
पुष्य[1]स्नानं तथा कुर्य्यात् प्रतिमासं नराधिपः ।
संक्रान्त्यां पूजयेत् सूर्य्यं बालमिन्दुं तथैव च ॥ २ ॥
ग्रहं सम्पूजयेद्राजा निर्गतं रविमण्डलात् ।
निर्गतमुदितम् ।
अगस्त्यस्योदये कार्य्या तथा पूजा नराधिपैः ॥ ३ ॥

इति प्रतिमासं जन्मनक्षत्रे अभिषेकः ।

---

१ ख ग पुस्तकद्वये पुष्यस्नानम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ सम्वत्सराभिषेकः ॥ ५३ ॥

विष्णुधर्म्मोत्तरे राम उवाच—

सम्बत्सराभिषेकञ्च कथयस्व महीक्षित ।
तत्र मे संशयो देव त्वं हि सर्व्वविदुच्यसे ॥ १ ॥

पुष्कर उवाच—

राजाभिषेकनक्षत्रे प्रतिसम्वत्सरं द्विज ।
पूर्व्वोभिषेकविधिना कर्त्तव्यमभिषेचनम् ॥ २ ॥
धन्यं यशस्यं रिपुनाशनञ्च
सौभाग्यदं पुष्टिविवर्द्धनञ्च ।
वर्षाभिषेकं नृपतेः प्रदिष्टं
सौख्यावहं राज्यविवृद्धिदञ्च ॥ ३ ॥

ब्रह्मपुराणेऽपि राज्याभिषेकमुक्तम्—

अनेन विधिना यस्तु कुर्य्याद्वर्द्धापनं सदा ।
अभिषेकाद्धि यत्नेन प्रतिसंवत्सरं नृप ।
स चिरायु-र्जितामित्रो लभते विपुलां श्रियम् ॥ ४ ॥

इति संवत्सराभिषेकः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

येनार्ज्जितानि युधि भूमिपतीन् विजित्य
दुर्गाणि दुर्ग्रहतराणि परैर्न्नृपान्यैः ।
श्रीवाजबाहदुरचन्द्रनृपस्य तस्य
वाचा हरेरिव गिरावनिदेवतुष्ट्यै ॥ १ ॥

योऽनन्तदेवकृतमन्थनसन्निबन्ध-
क्षीराब्धिनाथहरिणा सततं धृतो यः ।
भूपाभिषेकविषयाभवदीदृशीयं
सद्दीधितिर्हरिमुदावहकौस्तुभस्य ॥ २ ॥

इति श्रीमन्महाराजाधिराज-श्रीवाजबाहदुरचन्द्रनृपवराज्ञा-
प्रवृत्तेनापदेव-सुतानन्तदेवविदुषा कृते राजधर्म्मकौस्तुभे
तृतीयाऽभिषेकदीधितिः ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ प्रजापालनदीधितिः ॥ ४ ॥

अथ राजधर्म्मा उच्यन्ते। तत्र राज्याभिषेकदीधित्युक्त-लक्षणलक्षितो राजा प्रासादप्रतिष्ठादीधित्युक्तप्रकारेण दुर्गगृहनिर्म्माणं भद्रासनं च निर्म्माय सभायां समन्त्रि-पुरोहितायां[1] पण्डितैः सह प्रजापालने प्रवृत्तस्तस्य प्रजा-पालनं[2] व्यवहारनिरूपणमन्तरेण न सम्यक् भवतीति तदर्थं व्यवहारा निरूप्यन्ते।

---

[1] Conjectural reading. Oxford rotograph reads सभां समन्त्रिपुरोहितं.

[2] Conjectural reading. O.R. simply reads प्रवृत्तस्य and omits प्रजापालनं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ कार्य्यदर्शनम् ॥ ५४ ॥

तत्र बृहस्पतिः—

दुर्गमध्ये गृहं कुर्य्याज्जलवृक्षान्वितं पृथक् ।
प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत् सभाम् ॥ १ ॥
भद्रासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत् ॥ २ ॥

मनुः—

व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्म्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ॥ ३ ॥
तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम् ।
विनीतवेषाभरणः पश्येत् कार्य्याणि कार्य्यिणाम् ॥ ४ ॥
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः ।
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक् ॥ ५ ॥

याज्ञवल्क्यः—

व्यवहारान् नृपः पश्येत् विद्वद्भिर्ब्राह्मणैः सह ।
धर्म्मशास्त्रानुसारेण क्रोधलोभविवर्ज्जितः ॥ ६ ॥

तत्र व्यवह्रियन्ते इति व्यवहाराः । अर्थिप्रत्यर्थिविवादविषयास्तान् दिदृक्षुः सम्यक् निर्णेषुः पार्थिवः पृथिवीपतिः, प्रजापालनप्रवृत्त इति तात्पर्य्यम् ।

तत्र [1]प्राड्विवाकब्राह्मणसहितः कार्य्यः ।

---

[1] O.R. reads प्राड्विवाको० .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यथा कात्यायनः—

विनीतवेषो नृपतिः सभां गत्वा समाहितः।
आसीनः प्राङ्मुखो भूत्वा पश्येत् कार्य्याणि कार्य्यिणाम्
॥ ७ ॥

सह सभ्यैः[1] स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः।
धर्म्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः ॥ ८ ॥

सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्म्मतः ॥ ९ ॥

नारदः—

धर्म्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः।
समाहितमतिः पश्येद्व्यवहाराननुक्रमात् ॥ १० ॥

तथोक्तं—

नियुक्तो वाऽनियुक्तो वा धर्म्मज्ञो वक्तुमर्हति ॥ ११ ॥

कात्यायनः—

अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः।
तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः॥ १२ ॥ इति।

किञ्च—

सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम्।
अब्रुवन् विब्रुवन् वापि नरो भवति किल्बिषी ॥ १३ ॥
इति मनुवचनात्।

तत्र व्यवहारे आनुकूल्यमाह

---

[1] Supplied from Kane's "*Kātyāyana-smṛti-sāroddhāra*" (Bombay, 1933). O.R. reads स तु मभ्यै.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

याज्ञवल्क्यः—

अपश्यता कार्य्यवशाद्व्यवहारान् नृपेण तु ।
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्व्वधर्म्मवित् ॥ १४ ॥

व्यवहारपदविषयमाह याज्ञवल्क्यः—

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ १५ ॥

तत्र सदाचारधर्म्मशास्त्रविरुद्धेन मार्गेण आधर्षितः अभिभूतः राज्ञे आवेदयति प्राड्विवाकाय निवेदयति तदावेदनं व्यवहारपदम् । यथा प्रतिज्ञोत्तरसंशयहेतु-परामर्शप्रमाणनिर्णयप्रयोजकात्मकः [1]व्यवहारः । स च द्विविधः, तत्त्वाभियोगः शङ्काभियोगश्च ।

शङ्का सतां कुसंसर्गात्तत्त्वंहो वादिदर्शनात् ।

तत्त्वाभियोगो द्विविधः, प्रतिषेधात्मको विध्यात्मकश्च । यथामत्तो हिरण्यादिकञ्च गृहीत्वा न प्रयच्छति क्षेत्र-मपहरतीति वा ।

यथा कात्यायनः—

न्याय्यं स्वं नेच्छते कर्त्तुमन्याय्यं वा करोति इति[2] ॥ १६ ॥

पुनरष्टादशधापि[3] यथाह मनुः—

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानपकर्म्म च ॥ १७ ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥ १८ ॥ ।

---

1 O.R. reads ०प्रयोजनात्मकाव्यवहारस्तप्रदं .

2 K reads न्यायस्थं नेच्छते कर्त्तुमन्यायं वा करोत्ययम् .

3 O.R. reads पुनः ष्टदशधामिन्न .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]सीमाविवादधर्म्मश्च पारुष्ये दण्डवाचिके।
स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च॥ १९॥
स्त्रीपुंधर्म्मौ विभागश्च [2]द्यूतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह॥ २०॥

एतानि बहूनि साध्यभेदेन स्मृत्यन्तरे।

कात्यायनः—

कालेे कार्य्यार्थिनं पृच्छेत् प्रणतं पुरतः स्थितं।
किं कार्य्यं का च ते पीडा मा भैषीर्ब्रूहि मानव॥२१॥
केन कस्मिन् कदा कस्मात् पृच्छेदेवं सभागतः।
एवं पृष्टः स यद्ब्रूयात् तत्सभ्यैर्ब्राह्मणैः सह॥ २२॥
विमृश्य कार्य्यं न्याय्यञ्चेदाह्वनार्थमतःपरं।
मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत्॥ २३॥
अकल्यबालस्थविर-विषमस्थक्रियाकुलान्।
कार्य्यातिपाति-व्यसनिन्टपकार्य्योत्सवाकुलान्।
[3]मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाह्वानयेन्नृपः॥ २४॥
न हीनपक्षां युवतीं कुले जातां प्रसूतिकाम्।
सर्व्ववर्णोत्तमां कन्यां ताः ज्ञातिप्रभुकाः[4] स्मृताः॥ २५॥
तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकास्तथा।
निष्कुला याश्च पतिताः तासामाह्वानमिष्यते॥ २६॥

---

[1] O.R. reads सीमाविवोंधर्म्मस्च.

[2] O.R. reads द्युतमाह्वय एव च.

[3] Supplied from K. O.R. reads मत्तममत्तार्त्त०.

[4] Supplied from K. O.R. reads ज्ञातिप्रमुकाः.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कालदेशौ च विज्ञाय कार्य्याणाञ्च बलाबलं ।
अकल्पादीनपि शनैर्यः पौरान् हनयेन्नृपः ॥ २७ ॥
ज्ञात्वाभियोगं येऽपि स्युर्वने प्रव्रजितादयः ।
तानप्यावाहयेद्राजा गुरुकार्य्यैश्च गोपयन् ॥ २८ ॥

न्यायपादाश्चतुर्व्विधाः भाषा उत्तरं प्रमाणं फलञ्चेति ।

वृहस्पतिः—

चतुर्व्विधः पूर्व्वपक्षः प्रतिपक्षस्तथैव च ।
चतुर्धा निर्णयः प्रोक्तः कैश्चिदष्टविधः पुनः ॥ २९ ॥
शङ्काभियोगस्तथ्यं च लब्धेऽर्थेऽभ्यर्थनं तथा ।
वृत्ते वादे पुनर्न्यायः पक्षो ज्ञेयश्चतुर्व्विधः ॥ ३० ॥
भ्रान्तिः शङ्कासमुद्दिष्टा तथ्यं दृष्टार्थदर्शनम् ।
लब्धेऽर्थेऽभ्यर्थनं मोहः तथावृत्ते पुनः क्रिया ॥३१॥

याज्ञवल्क्यः—

प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ।
समामासतदर्द्धाहर्नामजात्यादिचिह्नितम् ॥ ३२ ॥

वादिना भाषितं प्रतिवादिनोऽग्रे समपादि विशेषाङ्कितं लेख्यं लेखनीयमित्यर्थः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ प्रतिज्ञास्वरूपम् ॥ ५५ ॥

कात्यायनः—

निवेश्य कालं वर्षञ्च मासं पक्षं तिथिन्तथा ।
वेलां प्रदेशं विषयं स्थानं जात्याकृती वयः ॥ १ ॥
साध्यं प्रमाणं द्रव्यं च संख्यां नाम तथात्मनः ।
[1]राज्ञां च क्रमशो नाम निवासं साध्यनाम च ॥
क्षमालिङ्गानि चान्यानि [2]पक्षं संकीर्त्त्य कल्पयेत् ॥ २ ॥
[3]देशश्चैव तथा स्थानं सन्निवेशस्तथैव च ।
[4]जातिः संज्ञा निवासश्च प्रमाणं क्षेत्रनाम च ॥ ३ ॥
पितृपैतामहं चैव पूर्व्वराजानुकीर्त्तनम् ।
स्थावरेषु विवादेषु दशैतानि निवेशयेत् ॥ ४ ॥

देशो मध्यदेशादि, स्थानं नगरादि, सन्निवेशः पूर्व्वापरभागपरिच्छिन्नत्वं, जातिः विप्रत्वादिः, संज्ञा देवदत्तादिः, जातिसहितसंज्ञे त्वेकत्वविवक्षया दशत्वनिरासः, [6][अधिवासः] निवासः समीपवासी जनः, प्रमाणं निवर्त्तनादिपरिमाणं, क्षेत्रं क्रमुकक्षेत्रं, पूर्व्वराजानुकीर्त्तनं पूर्व्वराजानुकथनं, पितुःपितामहस्य नाम । अर्थिप्रत्यर्थिनो-

[1] Supplied from K. O.R. reads राजानुक्रमशो॰ .

[2] Supplied from K. O.R. reads पक्षसंकल्प्य कीर्त्तयेत .

[3] Supplied from K. O.R. reads देशकालस्तथा॰ .

[4] Supplied from K. O.R. reads जातिसंज्ञानिवशस्च॰ .

[5] O.R. contains the bracketted portion.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

र्नाम पूर्व्वेषां त्रयाणां नामकीर्त्तनं एतयोश्चोक्तक्रमेणान्वये सति लिखनमूहनीयं। दशत्वं स्थावरत्वञ्चोपलक्षणम्।

कात्यायनः—

प्रतिज्ञादोषनिर्म्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥ ५॥
अल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकरणैर्युक्तो विरोधिप्रतिषेधकः॥ ६॥
यदा त्वेवम्विधः पक्षः कल्पितः पूर्व्ववादिना।
दद्यात् तत्पक्षसम्बन्धं प्रतिवादी तथोत्तरम्॥ ७॥

नारदः—

अल्पार्थमर्थहीनञ्च प्रमाणागमवर्ज्जितम्।
लेख्यं हीनाधिकं दुष्टं भाषादोषादुदाहृतम्॥ ८॥

बृहस्पतिः—

मृषायुक्ति क्रियाहीनमसारं व्यर्थमाकुलम्।
पूर्व्वपक्षं[1] लेखयतो वादहानिः प्रजायते॥ ९॥
न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत्प्रत्यर्थी सभ्यसन्निधौ॥ १०॥
अभियुक्ता प्रगल्भत्वाद्युक्त-सोत्सहते यदि।
तस्य कालः प्रदातव्यः कार्य्यशक्त्यानुरूपतः॥ ११॥
यदि नोत्सहते पत्र विवादं कर्त्तुमिच्छतोः।
दातव्यस्तत्र कालस्य अर्थिप्रत्यर्थिनोरपि।
श्वोलेखनं वालभते त्र्यहं सप्ताहमेव वा॥ १२॥

---

१ क्वचित् पूर्व्वं पक्षं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कात्यायनः—

पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रे विशोधनम् ॥ १३ ॥
तस्मादन्योऽध्यामन्यार्थवादिनः प्रतिवादिनम् ।
वादिभ्यामभ्यनुज्ञातं अशेषफलके स्थितम् ॥ १४ ॥
सत्पाक्षिकं लिखेत् पुस्ते प्रतिपन्त्यानुवादिनोः ।
शोधयेत् पूर्व्वां वादी तु पावचोक्तादर्शनम् ॥ १५ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ भाषानिर्णयः ॥ ५६ ॥

भाषा उत्तरप्रमाणसाध्यसिद्धिपादा ।

अथोत्तरप्रकरणे बृहस्पतिः,—उत्तरं चतुर्व्विधं, संप्रतिपत्त्युरं मिथ्योत्तरं प्राङ्न्यायोत्तरं कारणोत्तरञ्चेति ।

तत्र याज्ञवल्क्यः—

श्रुतार्थस्योत्तरं लेख्यं सर्व्वावेदकसन्निधौ[1] ॥ १ ॥
पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः ॥ २ ॥

तत्र संप्रतिपत्त्युत्तरं

साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृता ।

यथा—

मदीयमुद्राशतकं धारयसि ? सत्यं धारयामीति । मिथ्योत्तरं नाहं मुद्राशतकं धारयामि ।

अभियुक्तोऽभियोगस्य [2]यदि कुर्य्यात्तु निह्नवम् ।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ॥४॥ इति

तत्र मिथ्योत्तरं चतुर्व्विधम् ।

मिथ्यैतन्नाभिजानामि तदा तत्र न सन्निधिः ।
[3]अजातश्चास्मि तत्काल इति मिथ्या चतुर्व्विधम् ॥५॥

इति

---

१ मूले पूर्व्वावेदकसन्निधौ ।

[2] Supplied from K. V.M. reads यदि कुर्य्यादपह्नवम्. O.R. has the faulty reading यादि कुर्य्यादपह्नव .

[3] O.R. reads आजात० .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्राङ्न्यायोत्तरं यथा यत्राभियुक्तः एवं ब्रूयादस्मिन्नर्थे अभियोक्ता तत्राचार्य्यव्यवहारेण मार्गेण पराजितः ।

यथा कात्यायनः—

आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितःपूर्व्वं प्राङ्न्यायस्तु स उच्यते ॥६॥

कारणोत्तरं यथा बृहस्पतिः—

अर्थिना लिखितो योऽर्थो प्रत्यर्थी[1] यदि तं[2] तथा ।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत्[3] ॥ ७ ॥

अत्र भवद्देवमतं अर्थिना पूर्व्ववादिना स्वसाध्यसिद्धौ यो हेतुरुक्तः प्रत्यर्थी [4]उत्तरवादी यदि तं हेतुं तथा प्रपद्य तथा प्रतीत्य हेतोः सिद्धत्वमसिद्धत्वञ्चानादृत्य तदेव साध्य-[5]विपरीतहेतुरूपकारणमुत्तरं ब्रूयात्, तदा तत्कारणोत्तरं पूर्व्ववादिनः [6]प्रत्यवस्कन्दनं ।

[7]प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थीनिर्द्दिशेत् क्रियाम् ।
मिथ्योक्तौ पूर्व्ववादी तु प्रतिपत्तौ न सा भवेदिति ॥

---

[1] Supplied from V.M. Left out in O.R.

[2] Supplied from V.M. Left out in O.R.

[3] V.M. reads स्मृतम् .

[4] Conjectural. O.R. reads उत्तरवादिपतितं .

[5] Conjectural. O.R. विपिरीत॰ .

[6] O.R. reads प्रस्कान्दनं .

[7] Corrected from V.M. O.R. reads प्राङ न्यायकारपिरीक्तौ तु प्रत्यर्थी निर्द्दिशेन क्रियामिथ्योक्तौ पूर्व्ववादि तु प्रत्यति यत्तौ न सा भवेत् .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततः किमित्याह। ततः सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा साध्यस्यासिद्धौ पराजयलक्षणं प्राप्नोति एवं व्यवहाररूपं सम्बन्धमभिधाय उपसंहरति च। तस्य साधनस्य प्रमाणस्य लिखितसाक्ष्यादिलक्षणस्यासिद्धौ अतोऽस्मात् प्रकारात्तदन्यथाप्रकारारोपणसाधनसिद्धौ विपरीततथ्यादपव्यवहारो दर्शितः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ व्यवहारमातृका ॥ ५७ ॥

[1]ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनमित्युक्ते किं तत् साधनमित्यपेक्षायामाह ।

याज्ञवल्क्यः—

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥ १ ॥

प्रमीयते परिच्छिद्यतेऽनेनेति प्रमाणम् । तद्द्विविधं—मानुषं दैविकञ्चेति ।

मानुषं त्रिविधं—लिखितं भुक्तिः साक्षिणश्चेति । तत्र लिखितं द्विविधं । शासनं चीरकञ्चेति । शासनमुक्तलक्षणम् । चीरकं वक्ष्यमाणलक्षणम् । भुक्तिरुपभोगः । साक्षिणो वक्ष्यमाणस्वरूपप्रकाराः । तत्र युगधर्म्माधिकारणप्राप्तयोः मानुषदैविकक्रिययोर्व्विकल्पेन ग्रहणे मानुष्येव क्रिया ग्राह्या ।

तत्र कात्यायनः—

यद्येको मानुषीं ब्रूयात् क्रियामन्यस्तु दैविकीम् ।
मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः ॥ २ ॥
यद्येकदेशव्याप्तापि क्रियाविद्येत मानुषी ।
सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणां ॥३॥ इति।

---

[1] Corrected from *Yājñavalkya Smṛti.* O.R. reads ततोऽर्थीलिखपेलयः प्रतिज्ञापतार्थसाधनं .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नारदोक्तम्—

[1]अरण्ये विजने रात्रावन्तर्वेश्मनि साहसे ।
न्यासापह्नवने चैव दिव्या सम्भवति क्रिया ॥ ४ ॥ इति
मानुषाभावे दिव्येन निर्णयः कर्त्तव्यः अस्यापवादः ।
प्रक्रान्ते साहसे वादे पारुष्ये दण्डवाचिके ।
बलोद्भवेषु कार्य्येषु साक्षिणो दिव्यमेव च ॥ ५ ॥
तथा लेखनानां क्वचिन्नियमः ।
पूगश्रेणीगणादीनां या स्थितिः परिकीर्त्तिता ।
तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः[2] ॥ ६ ॥
किञ्च,—
द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया ।
भुक्तिरेव तु गुर्व्वी स्यात् न दिव्यं न च साक्षिणः ॥७॥
विक्रियादानसंबन्धे क्रीत्वा धनमयच्छति ।
दत्तादत्तेथ भृत्यानां स्वामिनां निर्णये सति ॥ ८ ॥
द्यूते समाह्वये चैव विवादे समुपस्थिते ।
साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेखनम् ॥ ९ ॥
पूर्व्वापरकार्य्ययोः कस्य बलीयस्त्वमित्युच्यते ।

---

[1] Corrected from V.M. which quotes it as a text of *Vyāsa*. O.R. reads—

अरण्येतिर्जने रात्रं चन्तयेश्मति साहसे ।
न्यासाय ह्नवे चैव दिव्या सम्भवति क्रियेति ॥

[2] Corrected from the quotation in V.M. O.R. reads—

यूगश्रेणीगणोदीनां यास्थिर्ति परिकीर्त्तिता ।
तस्यास्त साधनं लेख्यं न दिव्यं न च साक्षिणं ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सर्व्वेष्वर्थविवादेषु बलवत्युत्तराक्रिया।
आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा॥ १०॥

तत्र प्रतिदानग्रहणयोः प्रमाणसिद्धयोः प्रतिदानं बलवत्तरम्। प्रतिदानवादी जयति। तथा पूर्व्वं द्विकं शतं गृहीत्वा कालान्तरे त्रिकं शतमङ्गीकृतवान्।

ततोभयप्रमाणासद्भावे त्रिकं शतं बलवत्। उक्तं वा च पूर्व्वबाधेन नोत्पत्तिः।

उत्तरस्य......एतस्यापवादः।

भुक्तैः कैश्चित्तद्विशेषणैर्युक्ताया प्रामाण्यं दर्शनयत् कस्यचिद्भुक्तेः कार्य्यान्तरमाह।

पश्यतो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी।
परेण भुज्यमानायाः धनस्य दशवार्षिकी॥ ११॥

धनस्य हस्त्यश्वादेर्दशवार्षिकी भूमेर्विंशतिवार्षिकी अप्रतिरथा विंशतिवर्षोपभोगनिमित्ता हानिर्भवति। न त्वेतदनुपपन्नम्।

नन्वप्रतिषेधा......च्छति अप्रतिषेधस्य दानविक्रया स्वक्र...दिवत्स्वत्वस्य लोकशास्त्रयोरप्रसिद्धत्वात् उपभोगस्य स्वत्त्वप्रमाणत्वात् नापि विंशतिवर्षोपभोगात् स्वत्वं रिक्थ-क्रयास्वीकारकहेतूपागच्छ। तथाच स्वामीरिक्थक्रय-संविभागाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्व्विष्टं वैश्यशूद्रयोः स्पष्टावैवस्वत्वं कारकहेतून् गौतमः ...... भोगं गौतमवचनं नियमार्थः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किञ्च—

अनागमं तु यो भुङ्क्ते बहून्यब्दशतानि वा ।
चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः ॥ १२ ॥

अदेयस्य दाने प्रतिग्रहे च दण्डः स्मर्य्यते ।

अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति ।
उभौ तौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसम् ॥१३॥

पतिकृतं भार्य्या न दद्यादित्यस्यापवादमाह ।

प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम् ।
स्वयं कृतं वा यदृणं नान्यत् स्त्री दातुमर्हति ॥१४॥

निर्धनत्वेन प्रतिपन्नादिषु अत्र दानशङ्कायामिद-मुच्यते। प्रतिपन्नं स्त्रिया देयमिति अनेन स्त्रीणां स्वातन्त्र्यं नास्ति ।

उक्तञ्च—

भार्य्या दासश्च पुत्रश्च त्रय एवाधनाः स्मृताः ।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥ १५ ॥

अनेन वचनेन निर्धनत्वं स्त्र्यादीनां[1] प्रतीयते । पार-तन्त्र्यमात्रप्रतिपादनपरत्वात् ऋणादाने प्रकारानाह ।

पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा ।
पुत्रपौत्रै-र्ऋणं देयं निह्नवे साक्षिभावितम् ॥ १६ ॥

पुत्रपौत्रेण निह्नवे ऋतेऽर्थिना साध्यादिभिर्भावितमृणं देयं पुत्रपौत्रैरित्यन्वयः ।

---

[1] Conjectural reading. O.R. reads निर्धने संस्त्रादीनां .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुत्रेण ऋणं देयं षोडशवर्षोत्तरं न चैतत्पितृव्यज्येष्ठ-भ्राचा देयं परतो व्यवहारज्ञषोडशवर्षोत्तरं ज्ञेयः।

अप्राप्त व्यवहारश्चेत् स्वतन्त्रोऽपि हि नर्णभाक्।
स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम्॥ १७॥

तथा आसेधाह्वाननिषेधश्च दृश्यते।

अप्राप्तव्यवहारश्च दूतो दानोऽस्तु-व्रती।
विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः ॥१८॥

इति तस्मात्।

अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः॥
ऋणात् प्रीता ...... यथा न नरकं व्रजेत्॥ १९॥

न पुत्रेण व्यवहारज्ञेन जातेन तिष्ठन्ते वेति। बलिन ऋणानदेयं आज्ञविधेयं बहुभिः पुत्रैः ऋणं स्वांशरूपेण च देयम्।

नारदः—

अत ऊर्द्धं पितुः पुत्राः ऋणं दद्युर्यथांशतः।
अविभक्ता विभक्ता वा यस्तां चोद्वहते धुरम्॥२०॥ इति

तत्र पुत्रैर्ऋणं देयं सावधिकं पौत्रेण मूल-मात्रं देयं प्रपौत्रेण ऋणं न देयं अग्नीत धनस्य।

तथा वृहस्पतिः—

ऋणमात्मीयवत् पित्र्यं पुत्रैर्देयं विभावितं।
पैतामहं समं देयमदेयं तत्सुतस्य तु॥ २१॥

इति ऋणिनः पुत्रपौत्र इति पुत्रस्य द्रव्यभागिनः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तेषां समवाये क्रम उक्तः याज्ञवल्क्येन—

रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च ।

पुत्त्रोऽनन्याश्रितद्रव्यः पुत्त्रहीनस्य ऋक्थिनः ॥ २२ ॥

अयमर्थः—अपुत्त्रस्य अर्थं योषिद्ग्राहः ग्रहीष्यति स ऋणो दाता द्रव्यग्रहणात् योषितं गृहीतयोग्यता ...... योषिद्धारी यद्यपि शास्त्रविरोधेन योषिद्ग्राहो न सम्भवति तथापि अतिक्रान्तनिषेधः पूर्व्वपतिकृतर्णापाकरणेऽधिकारी भवत्येव ।

यथाह नारदः—

परपूर्व्वास्त्रियस्त्वन्या सप्त प्रोक्ता यथाक्रमम् ।

पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा ॥ २३ ॥

कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ॥ २४ ॥

आसां यो भोक्ता तेन ऋणं दातव्यमित्यर्थः । मिताक्षराकारेण सविशेषमिदमुक्तं व्याख्यानम् ।

वस्तुतस्तु भर्त्तृभिरङ्गीकृतानां पुनरन्येन स्वीकारो युगभेदेन ज्ञातव्यः । येन पुत्त्रः अन्योन्याश्रितं धनं मातापितृसम्बन्धी धनं पुत्त्रेण गृहीतं अनन्तरं अचास्य ऋणत्वेन दातव्यम् ।

पुत्त्रत्वात् तव योषिद्गृहादीनां समवाय एव न सम्भवति ।

न भ्रातरो न पितरः पुत्त्रा रिक्थहराः पितुः ॥२५॥

इति स्मृतेः । कथं तस्य रिक्थग्रहणयोग्यतेति वाच्यं ?

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्लीवान्धवधिरादीनां पुत्त्रत्वेऽपि पितुः रिक्थग्रहणे योग्यता नास्ति। किन्तु रिक्थग्राहिभिर्भर्त्तव्यास्तु निरंशका इति याज्ञवल्क्योक्तेः पुत्त्रावन्वयहीनरिक्थातिर्ब्राह्मणस्य प्रतिपत्तिरुक्ता, नान्यपरदेन ब्राह्मणस्य तु देयं सान्वयस्य न चास्ति वेति।

निरन्वये सकुल्येषु तदभावेऽस्य बन्धुषु।
दातुं सकुल्या...न च सम्बन्धिबान्धवाः॥ २६॥

तदा दद्याद्विजेभ्यस्तु तेष्वसमुनिक्षिपेदिति पुरुषविशेषे ऋणग्रहणप्रतिषेधप्रसङ्गिनान्यदपि प्रतिषेधनि।

याज्ञवल्क्यः—

भ्रातृनामथ दम्पत्योः पितुः पुत्त्रस्य चैव हि।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्॥२७॥ इति प्रातिभाव्यस्वरूपं तेनैव दर्शितम्।

दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि॥ २८॥

वितथेः यथा करणे दाने सता अपि दद्युः। एतदेव स्पष्टीकृतं तेनैव।

दर्शनप्रतिभूर्यच्च मृतः प्रात्ययिकोऽपि वा।
न तत्पुत्त्रा ऋणं दद्युर्दद्युर्दानाय ये स्थिताः॥ २९॥

दर्शनप्रतिभूः प्रात्ययिको वा यदि मृतः तर्हि तयोः पुत्त्रा प्रातिभाव्यापातं पैतृकं ऋणं न दद्युः। यस्तु दानाय स्थितः प्रतिभूर्दिष्टं गतस्तस्य पुत्त्रा दद्युः। न पौत्त्राः। ते तु मूलमेव दद्युः। न वृद्धिः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऋणं पैतामहं पौत्रः प्रातिभाव्यं गतं सुतः ।
स्वयं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः ॥ ३० ॥

इति व्यासवचनात् ।

एतदेव मिताक्षराकारैर्विशदीकृतम् । प्रातिभाव्यायनं व्यतिरिक्तं पैतामहमृणं पौत्रः समं यावद्गृहीतं तावदेव दद्यात् ।

न वृद्धिं तथा सुतोऽपि पुत्रपौत्रयोः ।
सुतौ प्रपौत्त्रावप्रतिभाव्यया यथाक्रममग्रहीत् ॥३१॥

धनौ न दाप्याविति ।

विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च ।
आधिः प्रणश्येत् द्विगुणे धने यदि न मोक्ष्यते ।
काले कालकृतो नश्येत् फलभोग्यो न नश्यति ॥३२॥

इति याज्ञवल्क्यवचनात् धनप्रयोगे द्वौ विश्वासहेतू प्रतिभूराधिश्च । आधिर्नाम अधमर्णेन उत्तमर्णे विश्वासार्थं न्यासीकृतद्रव्यः । योऽधिक्रियते स आधिः । स द्विविधः । कृतकालोऽकृतकालश्च । कृतकालस्तु अवधौ जाते नश्यति । अकृतकालश्च न नश्यति । यः भोग्यः ।

यथाह नारदः—

कृतकालोपनेयश्च यावद्देयोद्यतस्तथा ।
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च ॥ ३३ ॥

इति द्विविधापि प्रत्येकं गोप्यभेदेन द्विप्रकारकः इत्यर्थः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ साक्षि-स्वरूप-निरूपणम् ॥ ५८ ॥

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ॥१॥

इति यदुक्तं तत्र भुक्तिः सप्रकारा निरूपिता। [1]साम्प्रतं साक्षिस्वरूपं निरूप्यते।

यथाह मनुः—

समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्ध्यतीति ॥ २ ॥

स कृताकृतभेदेन द्विविधः।

तयोर्भेदास्त्वेकादशविधा नारदेनोक्ताः।

एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः।

कृतः पञ्चविधो ज्ञेयः षड्विधोऽकृत उच्यते ॥ ३ ॥

तद्भेदास्तेनैव चोक्ताः।

लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च।

गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः कृत ॥ ४ ॥ इति।

लिखितादीनाञ्च स्वरूपं कात्यायनेनोक्तम्।

अर्थिना स्वयमानीतो यो लेख्ये सन्निवेश्यते।

स साक्षी लिखितो नाम स्मारितः पत्रकादृते ॥५॥ इति.

अकृतभेदा अपि तेनैव दर्शिताः।

ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम्।

कार्य्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः।

कुल्याःकुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः ॥६॥ इति।

साक्षिणां स्वरूपं संख्या च याज्ञवल्क्येन दर्शिता।

---

[1] O.R. reads सोप्रतं.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः ।
धर्म्मप्रधाना ऋजवः पुत्त्रवन्तो धनान्विताः ॥ ७ ॥
त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्त-क्रियापराः ।
यथाजाति यथावर्णं सर्व्वे सर्व्वेषु वा स्मृताः ॥ ८ ॥

असाक्षिणोपि तेनैव दर्शिताः ।

स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः ।
रङ्गावतारि-पाषण्डि-कूटकृद्विकलेन्द्रियाः ॥ ९ ॥
पतिताप्तार्थ सम्बन्धि-सहाय-रिपु-तस्कराः ।
साहसी दृष्टदोषश्च निर्द्धूतश्चेत्यसाक्षिणः ॥ १० ॥ इति ।

निर्द्धूताबन्धुभिस्त्यक्ताः, त्रयः अवरा येषां ते त्र्यवराः यथाकामं अधिका अपि न न्यूना इत्यर्थः ।

एतस्याप्यपवादस्तेनैवोक्तः ।

उभयानुमतः साक्षी भवत्येकोऽपि धर्म्मवित् ॥ ११ ॥
स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युः ॥ १२ ॥ इति मनुः ।

अर्थे विदितेऽपि यः साक्ष्यं न ददाति, तं प्रति याज्ञवल्क्येन दोषोऽभिहितः ।

न ददाति हि यः साक्ष्यं जानन्नपि नराधमः ।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ॥१३॥ इति ।

कूटसाक्षित्वेन कार्य्यहानि[1]र्भवति ।

तथाच मनुः—

यस्मिन् यस्मिन् विवादे तु कौटसाक्ष्यं कृतं भवेत् ।
तत्तत्कार्य्यं निवर्त्तेत कृतं वाप्यकृतं भवेत् ॥ १४ ॥ इति

साक्षिणां त्रासजनकं वाक्यं वक्तव्यम् ।

---

[1] Supplied by conjecture. O.R. omits this.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यदाह नारदः—

....................सत्यमाहात्म्यकीर्त्तनैः ।
अन्टतस्यापवादैश्च भृशमुत्त्रासयेदिमान् ।
अब्रुवन् विब्रुवन् वापि नरो भवति किल्विषी ॥ १५ ॥

इत्यादि श्रावयेत् इत्यर्थः ।

अर्थिप्रत्यर्थिसमीपं समवेतान् तान् साक्षिणः तत्सन्निधौ श्रावयेत् ।

तथाच कात्यायनः—

सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ ।
प्राड्विवाको नियुञ्जीत विधिनानेन सान्त्वयन् ॥१६॥ इति

श्रावणे विशेषो मनुना दर्शितः ।

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः ॥ १७ ॥

इति साक्षिभिरुक्तेन च पराजयव्यवस्था ।

तामाह याज्ञवल्क्यः—

यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥ १८ ॥ इति

कौटसाक्ष्ये दण्डमाह मनुः—

कौटसाक्ष्यन्तु कुर्व्वाणान् त्रीन् वर्णान् धार्म्मिको नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत् ॥ १९ ॥ इति

दण्डस्तु यथायोग्यः, ब्राह्मणस्य तु विवासनमेव ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

तथाच मनुः—

न जातु ब्राह्मणं हन्यात् सर्व्वपापेष्वयं विधिः।

राज्यादेनं वहिः कुर्य्यात् समग्रधनमक्षतम् ॥ २० ॥ इति प्रायश्चित्ताभावेऽपि किं सम्मतमिति वाच्यम्।

तत्पावनाय निर्व्वाप्यश्चरुः सारस्वतो द्विजैः ॥ २१ ॥

इति याज्ञवल्क्येन प्रायश्चित्तोपदेशात्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ लेख्य-स्वरूप-निरूपणम् ॥ ५६ ॥

साक्षिनिरूपणानन्तरं लेख्यं निरूप्यते। तत्स्वरूपमाह नारदः—

लेख्यं तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं तथा।
असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः ॥ १ ॥

तत्रादौ तु कृतं लेख्यस्वरूपमुक्तं याज्ञवल्क्येन।

विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत्।
तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते ॥ २ ॥ इति

अधमर्णेन स्वहस्तेन लिखितं साक्षिविरहितमपि प्रमाणं मन्वादिभिरुक्तं। परन्तु बलोपधिकृतान् ऋते बलेन बलात्कारेण उपधिना लोभक्रोधभयादिलक्षणेन यत्कृतं तस्मादृते। लोभादिभिः कृतस्य प्रमाणत्वाभाव इत्यर्थः। तथाच नारदः,—

मत्ताभियुक्तस्त्रीबाल-बलात्कार-कृतञ्च यत्।
तदप्रमाणं लिखितं भयोपधिकृतन्तथा ॥ ३ ॥ इति।

अन्यकृतं स्वरूपमप्युक्तं याज्ञवल्क्येन—

यः कश्चिदर्थनिष्णातः स्वरुच्या तु परस्परम्।
लेख्यन्तु साक्षिमत् कार्य्यं तस्मिन् धनिकपूर्व्वकम् ॥४॥ इति

लेखनप्रकारोऽपि तेनैव दर्शितः।

समासासतदर्द्धाहर्नामजाति-स्वगोत्रकैः।
सब्रह्मचारिकात्मीयपितृणामादिचिह्नितम् ॥ ५ ॥
समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्।
मतं मेऽमुकपुत्त्रस्य यदत्रोपरि लेखितम् ॥ ६ ॥ इति

साक्षिणोऽपि पूर्व्वोक्तप्रकारेण लिखेयुः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ दिव्यमातृका ॥ ६० ॥

लिखितसाक्षिभुक्तिलक्षणं त्रिविधं मानुषप्रकारमुक्तम्। सम्प्रत्यमानुषतुलादि दिव्यमुच्यते। तत्र बृहस्पतिनोक्ता दिव्यमातृका उच्यते।

धटोऽग्निरुदकञ्चैव विषं कोशस्तु पञ्चमः।
षष्ठञ्च तण्डुलं प्रोक्तं सप्तमं तप्तमाषकम् ॥ १ ॥
अष्टमं फालमित्युक्तं नवमं धर्म्मजन्तथा[१]।
दिव्यान्येतानि सर्व्वाणि निर्द्दिष्टानि स्वयम्भुवा ॥ २ ॥
इति।

ननु याज्ञवल्क्येन पञ्च दिव्यान्युक्तानि। तानि च—

तुलाग्न्यापो विषं कोशो दिव्यान्याहुर्विशुद्धये ॥३॥ इति

पितामहेन तु—

धटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमः।
षष्ठञ्च तण्डुलं प्रोक्तं सप्तमं तप्तमाषकं ॥ ४ ॥

इत्युक्तं। तथाच तत्तद्वाक्येषु एतावन्त्येवेति नियमः कथं सङ्गच्छत इति चेत् उच्यते पातकविशेषशङ्कयाऽन्योन्य-प्रयोगा ज्ञातव्याः।

अत एवोक्तं याज्ञवल्क्येन—

महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥ ५ ॥ इति।

शीर्षकं पराजयनिमित्तको दण्डः। तत्र तिष्ठतीति शीर्षकस्थः। पराजयप्रयुक्तदण्डभागित्यर्थः। प्रकारान्तर-माह स एव।

---

१ क्वचित्पाठः भवेत्।

रुच्या वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ॥६॥ इति
रुच्या इच्छया अन्यतर अभियोक्ता अभियोक्तादितरः सम्प्रतिपत्या दिव्यं कुर्य्यात्। न शिरः शारीरमर्थदण्डं वावर्त्त यदङ्गीकुर्य्यादिति। यद्वा दण्डं विनापि दिव्यविधाने स एवाह।

विनापि शीर्षकं कुर्य्यान्नृपद्रोहेऽथ पातके।
राजाभिशङ्कितानाञ्च निर्द्दिष्टानाञ्च दस्युभिः ॥७॥

इति।

राजद्रोहाभिशङ्कायां ब्रह्महत्यादिपातकाभिशङ्कायां चौर्य्याभिशङ्कायाञ्च अशिरःस्थापितान्यपि तुलादीनि कुर्य्यादिति मिताक्षराकारैर्व्याख्यातम्। स्वल्पाभिशङ्कायां अन्येऽपि दिव्यविशेषाः।

आत्मशुद्धिपराणाञ्च दिव्यं देयं शिरो विना ॥८॥

यथा दिव्यविशेषाश्रयणादिरूपप्रमाणानि सन्ति।
[1]तथाच—

सत्यं वाहनशस्त्राणि गोबीजकनकानि च।
देवतापितृपादांश्च दत्तानि सुकृतानि च ॥ ९ ॥
स्पृशेच्छिरांसि पुत्त्राणां दाराणां सहृदां तथा।
अभियोगेषु सर्व्वेषु कोशपानमथापि वा।
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणात् ॥१०॥

---

[1] O.R. reads मनुः between तथाच and सत्यं वाहन०, even though it reads इति नारदादिस्मरणात् after verse 10. The highly corrupt readings of verses 9 and 10 have been corrected from Jolly's edition of *Nārada-smṛti*.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति नारदादिस्मरणात्। यद्यपि मानुषप्रमाणानि निर्णयस्य निर्णयकं यदित्यमिति लोकप्रसिद्धाश्रयथानामपि दिव्यत्वं तथापि कालान्तरनिर्णयनिमित्तत्वेन समनन्तर-निर्णयनिमित्तेभ्यो धटादिभ्यो दिव्येभ्यो भेदेन व्यपदेशो ब्राह्मणपरिब्राजकवदिति मिताक्षराव्याख्यातानि च दिव्यानि यथासम्भवमृणादिषु विवादेषु प्रयोक्तव्यानि।

तेषां विषय उक्तः कालिकापुराणे—

परदाराभिशापे च चौर्य्यागम्यागमेषु च।
महापातकशस्ते च स्याद्दिव्यं नृप साहसे ॥ ११ ॥
विप्रतिपत्तौ विवादेऽवर्णस्य स्थापने कृते।
तत्रैव स्थापयेद्दिव्यं शिरः पूर्व्वं महीपतिः[1] ॥ १२ ॥

विप्रतिपत्तौ परदाराभिगमनादिरूपायां विवादे ऋणादानादिविषये अवर्णोऽपवादः।

तण्डुलानां विषयमाह पितामहः—

चौर्य्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः ॥१३॥

असतीस्त्रीसंग्रहादौ एतदल्पचौर्य्यशङ्कायाञ्च वेदि-तव्यम्, महाचौर्य्यशङ्कायां कात्यायनेन कोशविधानात्।

कोशस्य विषयमाह कात्यायनः—

शङ्काविश्वाससन्धाने विभागे रिक्थिनां सदा।
क्रियासमूहकर्त्तृत्वे कोशमेव प्रदापयेत् ॥ १४ ॥

---

[1] The entire quotation from the *Kalikāpurāṇa* which is hopelessly corrupt in O.R. has been corrected from *Vyavahāra-mayūkha* (Poona, 1926).

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यत्तु पितामहेनोक्तम्—

स्थावरेषु विवादेषु दिव्यानि परिवर्ज्जयेत् ॥१५॥ इति तदपि लिखितसामन्तादिसद्भावे वेदितव्यम् ।

द्रव्यप्रमाणतारतम्येन दिव्यविशेषाणाह बृहस्पतिः—

विषं सहस्रेऽपहृते पादोने च हुताशनः ॥ १६ ॥
त्रिभागे तप्तसलिलमर्द्धे देयो धटः सदा ।
चतुःशताभियोगे तु दातव्यस्तप्तमाषकः ॥ १७ ॥
त्रिशते तण्डुला देया कोशश्चैव तदर्द्धिके ।
शते हृतेऽपहृते च दातव्यं धर्म्मसाधनम् ॥ १८ ॥

दिव्ये दण्डे च मनूक्तपरिमाणं ग्राह्यमित्याह बृहस्पतिः—

संख्यारश्मिरजोमूला मनूना समुदाहृता ।
कार्षापणान्ता सा दिव्ये नियोज्या विनये तथा ॥१९॥

विनये दण्डे ।

त्रसरेखादिकं परिमाणं प्रतिज्ञापूर्व्वकं दर्शयति मनुः—

लोकसंव्यवहारार्थं संज्ञाः स्यूः प्रथिता भुवि ।
ताम्र-रूप्य-सुवर्णानां ताः प्रवक्ष्याम्यशेषतः ॥ २० ॥
जालान्तरगते[1] भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥ २१ ॥
त्रसरेखोऽष्टौ विज्ञेया लिख्यैका परिमाणतः ।
ता राजसर्षपास्तिस्रस्तोत्रपौ वै गौरसर्षपः ॥ २२ ॥

---

[1] Supplied from *Manu-saṃhitā.* O.R. reads जाला-तरातेला .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सर्षपाः षट्यवो मध्यस्त्रियवेन तु कृष्णलः ।
पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश ॥ २३ ॥
पलं सुवर्णाश्चत्वारः पलानि धरणं दश ।
द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः ॥ २४ ॥
ते षोडश स्याद्धरणं पुराणश्चैव राजतः ।

पुराण इति संज्ञा ।

धरणानि दश ज्ञेयः शतमानस्तु राजतः ॥ २५ ॥
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ।
कार्षापणस्तु विज्ञेयः कार्षिकः ताम्रिकः पणः ॥ २६ ॥

इति पलानि धरणदशे तत सुवर्णपरिमाणाभिधानं । चतुःसौवर्णिको निष्क इत्युक्तं रूप्यपरिमाणाभिधानम् ।

अवशिष्टेन ताम्रपरिमाणाभिधानं ताम्ररूप्यसुवर्णाना-मित्यत्र [1]मनुना विवक्षितत्वात् । अथवा पञ्चसुवर्णपरि-मितं पलम् ।

पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्त्तितम् ॥ २७ ॥

इति याज्ञवल्क्यवचनात् विकल्पः ।

पलपरिमाणञ्च कात्यायनेनोक्तम् ।

मासो विंशतिमो भागो ज्ञेयः कार्षापणस्य तु ।
काकिनी तु चतुर्भागा माषकस्य पणस्य वा ॥२८॥ इति ।

ब्राह्मणादिदिव्यव्यवस्थामाह नारदः—

ब्राह्मणस्य धटो देयः क्षत्त्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु[२] ॥ २९ ॥

---

[1] Conjectural reading. O.R. reads मस्या.

[२] मूले पाठः विषं शूद्रस्य पातयेत् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पितामहः—

साधारणः समस्तानां कोशः प्रोक्तो मनीषिभिः ।
विषं विना ब्राह्मणस्य सर्व्वेषां वा तुला स्मृता ॥ ३० ॥

याज्ञवल्क्यः—

तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा[1] ॥३१॥ इति ।

हारीतः—

कुष्ठिनां वर्ज्जयेदग्निं सलिलं श्वासकासिनाम् ।
पित्तश्लेष्मवतां नित्यं विषञ्च परिवर्ज्जयेत् ॥ ३२ ॥

पितामहः—

मद्यपस्त्रीव्यसनिनां कितवानां तथैव च ।
कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः ॥ ३३ ॥

पूर्व्वोक्तानां शुद्धिः साधुप्रतिनिधिद्वारा राज्ञा कारणीया । स्मृतिचन्द्रिकायां तु इदमुक्तम् ।

साधूनामप्यसामर्थ्ये प्रतिनिधिमभ्युपैतुम् जानाति ।

पितामहः—

कालदेशाविरोधे तु यथायुक्तं प्रकल्पयेत् ।
अन्येन हारयेद्दिव्यं विधिरेष विपर्य्यये ॥ ३४ ॥

हारयेत्कारयेदित्यर्थः ।

कालविशेषे दिव्यविशेषमाह पितामहः—

चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च ।
एते साधारणा मासा दिव्यानामविरोधिनः ॥ ३५ ॥

---

[1] O.R. omits the second line of the quotation from *Yājñavalkya-saṃhitā*, which is supplied here for the completeness of the statement in question.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धटः सर्व्वर्त्तुकः प्रोक्तो वाति वाते विवर्ज्जयेत् ।
अग्निः शिशिर-हेमन्त-वर्षासु परिकीर्त्तितः ॥ ३६ ॥
शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम् ॥ ३७ ॥

नारदः—

कोशं तु सर्व्वदा देयं तुला स्यात् सर्व्वकालिकी ।
न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम् ॥ ३८ ॥
न प्रावृषि विषं दद्यान्न प्रवाते वै तुला यथा ।
नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन ॥ ३९ ॥

मध्याह्ने दिव्यनिषेधो जलव्यतिरिक्तविषयः ।

पूर्व्वाह्णेऽग्निपरीक्षा स्यात् पूर्व्वाह्णे च धटो भवेत् ।
मध्याह्ने तु जलं देयं धर्म्मतत्त्वमभीप्सता[1] ॥ ४० ॥
दिवसस्य तु पूर्व्वाह्णे कोशशुद्धिर्विधीयते ।
रात्रौ तु पश्चिमे यामे विषं देयं सुशीतलम् ॥ ४१ ॥

यद्यपि दिव्ये वारविशेषविधायकवाक्यं न श्रूयते तथापि शिष्टाचारादादित्यवारे दिव्यानि दातव्यानीत्युक्तं विज्ञानेश्वराचार्य्यैः ।

दिव्ये देशविशेषमाह पितामहः—

प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे धटः सदा ।
[2]इन्द्रस्थाने सभायां वा राजद्वारे चतुष्पथे ॥ ४२ ॥

धटग्रहणं दिव्यान्तरस्याप्युपलक्षणम् । इन्द्रस्थानग्रहणं देवतायतनान्तरस्याप्युपलक्षणम् ।

---

[1] Corrected from the quotation in V.M. O.R. reads धर्म्मन ॥ त्वमभिप्सता .

[2] O.R. reads दण्डस्थाने, an obvious error, as the author's subsequent remark itself proves.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अतएवाह नारदः—

सभाराजकुलद्वारदेवायतनचत्वरे ॥ ४३ ॥ इति ।

दिव्यविधिमाह स एव ।

[1]सचैलं स्नातमाहूय सूर्य्योदय उपोषितम् ।

कारयेत् सर्व्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ ४४ ॥

दिव्यग्राहिणं पूर्व्वेद्युरुपोषितं आहूय प्राड्विवाकः शास्त्रार्थनिरूपकः स्वयमपि उपोषितः सन् दिव्यं नृप-ब्राह्मणसन्निधौ कारयेत् । इत्यर्थः ।

[2]चिरात्रोपोषिताय स्युरेकरात्रोषिताय वा ।

नित्यं देयानि दिव्यानि शुचये चार्द्रवाससे ॥ ४५ ॥

इति उपवासविकल्पः शक्ताशक्तकार्य्यमहत्त्वाल्पत्वेन व्यवस्थाप्यः ।

दिव्येषु सर्व्वकार्य्याणि प्राड्विवाकः समाचरेत् ।

अध्वरेषु यथाध्वर्य्युः सोपवासो नृपाज्ञया ॥ ४६ ॥

इति पितामहवचनात् ।

---

[1] O.R. reads सचैलस्नान॰ .

[2] Supplied from the quotation of Pitāmaha in the *Mitākṣara*. O.R. reads त्रिरात्रौ पौषितोपस्करे करात्रोषिता । ये वा ॥ नित्यदिव्या देया वा इवास .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ तुलादिव्यप्रयोगः ॥ ६१ ॥

तथाच नारदादयः—

छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्व्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः ॥ १ ॥

छेदने वानस्पत्यो मन्त्रो जप्यः ।

चतुरस्रा तुला कार्य्या दृढा ऋज्वी तथैव च ।
कटकानि च देयानि त्रिषु स्थानेषु चार्य्यवत् ॥ २ ॥
चतुर्हस्ता तुला कार्य्या पादौ चोपरि तत्समौ ।
अन्तरं तु तयोर्हस्तौ भवेदध्यर्द्धमेव वा ॥ ३ ॥
[1]हस्तद्वयं निखेयं स्तु पादयोरुभयोरपि ।
तोरणे च तथा कार्य्ये पार्श्वयोरुभयोरपि ॥ ४ ॥
धटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः ।
अवलम्बौ च कर्त्तव्यौ तोरणाभ्यामधोमुखौ ॥ ५ ॥
मृन्मयौ सूत्रसम्बद्धौ धटमस्तकचुम्बिनौ ।
प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे धटस्तथा ॥ ६ ॥
[2]शिखाद्वयं समासज्य पार्श्वयोरुभयोरपि ।
प्राङ्मुखान् कल्पयेद्दर्भान् शिखयोरुभयोरपि ॥ ७ ॥
पश्चिमे तोलयेत्कर्त्तृनन्यस्मिन् मृत्तिकां शुभाम् ।
[3]पिष्टकं पूरयेत्तस्मिन्निष्टकाग्रावपांशुभिः ॥ ८ ॥

पूरणे इष्टिकाग्रा च शून्ये विकल्पः—

परीक्षका नियोक्तव्यास्तुलामानविशारदाः ।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च ॥ ९ ॥

---

१ व्यासः । २ मूले शिक्यद्वयं । ३ मूले पिठिकां ।

कार्यं परीक्षकैर्नित्यमवलम्ब समो घटः ।
उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः ॥ १० ॥
यस्मिन्न स्रवते तोयं स विज्ञेयः समो घटः ।
तोलयित्वा नरः पूर्व्वं पश्चात्तमवतारयेत् ॥ ११ ॥
घटं तु कारयेद्दत्तं पताकाध्वजशोभितम् ।
ततश्चावाहयेद्देवान् विधिनानेन मन्त्रवित् ॥ १२ ॥
वेदीन्न तूर्य्यघोषैश्च गन्धमाल्यानुलेपनैः ।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥ १३ ॥
एह्येहि भगवन् धर्म्म अस्मिन्दिव्ये समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥ १४ ॥
आवाह्य तु घटे धर्म्मं पश्चादङ्गानि विन्यसेत् ।
इन्द्रपीता तु संस्थाप्य प्रेतं वा दक्षिणे तथा ॥ १५ ॥
वरुणं पश्चिमे भागे कुवेरं चोत्तरे तथा ।
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥ १६ ॥
इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः[1] ।
कुवेरस्तु सुवर्णाभः अग्निश्चापि सुवर्णभः ॥ १७ ॥
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते ।
ईशानस्तु भवेद्रक्त एवं ध्यायेत् क्रमादिमान् ॥ १८ ॥
इन्द्रस्य दक्षिणे पार्श्वे वसूनाराधयेद्बुधः ।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ॥ १९ ॥

---

[1] Corrected from the quotation in *Vyavahāra-mayūkha* (Poona, 1926). O.R. reads वरुणस्फटिक॰ .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रत्यूषश्च प्रभासश्च वसवोष्टौ[1] प्रकीर्त्तिताः ।
द्वेवेशेशानयोर्म्मध्य आदित्यानां तथायनम्[2] ॥ २० ॥
धातार्य्यमा च मित्रश्च वरुणेशभगस्तथा ।
इन्द्रो विवस्वान् पूषा च जयन्तो दशमः स्मृतः ॥ २१ ॥
ततस्त्वषा ततो विघ्नराजश्चान्यो जघन्यजः ।
इत्येते द्वादशादित्यनामभिः परिकीर्त्तिताः ॥ २२ ॥
अग्नेः पश्चिमभागे तु रुद्राणामपि तं विदुः ।
बीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ॥ २३ ॥
अजैकपादहिर्बुध्नः पिनाकी च पराजिताः ।
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः ॥ २४ ॥
स्थाणुर्भवश्च भगवान् रुद्रा एकादशाः स्मृताः ।
प्रतेसरक्षो मध्ये च मातृस्थानं प्रकल्पयेत् ॥ २५ ॥
ब्राह्मी-माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डागणसंयुताः ॥ २६ ॥
निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥ २७ ॥
गगनस्पर्शनो वायुरनिलो मारुतस्तथा ।
प्राणः प्राणे सजीवौ च मरुतोष्टौ प्रकीर्त्तिताः ॥२८॥
घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः ।
एतासां दैवतानान्तु स्वनाम्ना पूजनं विदुः ॥ २९ ॥

---

[1] Supplied from V.M. O.R. reads ०प्रभासवरोटौ० .

[2] Corrected from V.M. O.R. reads नयपनं, a meaningless word.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भूषावसानं धर्म्माय दत्त्वा चार्घ्यादिकं क्रमात् ।
अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् ।
गन्धादिकां निवेद्यान्तां परिचर्य्यां प्रकल्पयेत् ॥३०॥

तत एह्येहीति मन्त्रेण धर्म्मादीनावाह्य प्रणवपूर्व्वतन्नामभिश्चतुर्थ्यन्तैः पूर्व्वोक्तदेवतापूजां विधाय रक्तपुष्पैर्धटपूर्व्वं सम्पूज्य ततः शिष्टाय पूजयेत् ।

[1]रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः ।
अर्च्चयेत्तु धटं पूर्व्वं ततः शिष्टान् प्रपूजयेत् ॥३१॥

इति नारदोक्तेरिन्द्रादीनां यथासम्भवं पुष्पादिभिः पूजा कार्य्या । रक्तत्वाविशेषानाभिधानात् । एतत्सर्व्वं प्राड्विवाकः कुर्य्यात्[2] ।

ततः स एवाह ।

चतुर्दिक्षु तथा[3] होमः कर्त्तव्यो वेदपारगैः ॥ ३२ ॥

---

[1] Corrected from the quotation in V.M. O.R. reads रक्तागवेश्च .

[2] Supplied from V.M. O.R. reads कुपति .

[3] Corrected from V.M. O.R. reads चतुर्विद्धत० .



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथाग्निविधिः[1] ॥ ६२ ॥

पितामहः—

अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितम् ।
कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा ॥ १ ॥
आग्नेयं मण्डलञ्चाद्यं द्वितीयं वारुणं तथा ।
तृतीयं [2]वायुदैवत्यं चतुर्थं यमदैवतम् ॥ २ ॥
पञ्चममिन्द्रदैवत्यं षष्ठं कौवेरमुच्यते ।
सप्तमं सोमदैवत्यमष्टमं सर्व्वदैवतम् ॥ ३ ॥
पुरस्तान्नवमं यत्तु तन्महत्परमं[3] विदुः ॥ ४ ॥

सावित्र्यमष्टमं तथा नवमं सर्व्वदैवतमिति दिव्यविदो विदुरिति विज्ञानेश्वराचार्य्यैः पठितम् ।

गोमयेन कृतानि स्युरद्भिः पर्य्युक्षितानि च ॥ ५ ॥

प्राड्विवाकः पूर्व्वोक्तनियमयुक्तो मण्डलानि नव कुर्य्यात् । पुरस्तान्नवममनेन पूर्व्वभागे नवममण्डलस्य कर्त्तव्यताभिधानात् पश्चिमे मण्डले स्थित्वेतिवक्ष्यमाणवचनं वि-गाच्च प्राक्संस्थानि कर्त्तव्यानि ।

---

[1] Title of this chapter inferred from the context of the present work and comparison with V.M. O.R. reads आज्ये before पितामहः and omits the title.

[2] Conjectural reading. O.R. reads चा — दैवत्यं .

[3] V.M. reads ०पार्थिवं० .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

परिमाणमाह स एव याज्ञवल्क्यः—

षोडशाङ्गुलवैदूर्य्यमण्डलं तावदन्तरम् ॥ ६ ॥

मण्डलयोरन्तरालं षोडशाङ्गुलमेवेत्यर्थः ।

कर्त्तव्यतामाह याज्ञवल्क्यः—

करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यस्येत् ।

सप्ताश्वत्थस्य पत्राणि[1] तावत्सूत्रेण वेष्टयेत् ॥ ७ ॥

अस्यार्थः, विमृदिता विसर्पिता व्रीहयः कराभ्यां येन सः[2] विमृदितव्रीहिः । तस्य करौ लक्षयित्वा सप्तभिस्तन्तुभिर्व्वेष्टिताश्वत्थस्य पत्राणि न्यसेत् क्षिपेत् ।

व्रीहिभिर्विमर्द्दनं ... यथावस्थितरूपकलनहेतुः ।

अयमेव शोभनप्रकारो विष्णुना दर्शितः ।

करौ विमृदितव्रीहेस्त[3]स्यादावेव लक्षयेत् ॥ ८ ॥

नारदोऽपि—

लक्षयेत्तस्य चिह्नानि हस्तयोरुभयोरपि ।

प्राक्कृतानि चारूढानि सन्नरान् प्रव्रणानि च ॥ ९ ॥

इति ।

एवं शोध्यमानयोस्तयोर्ब्रीहिभिः कृतव्रणादिति हेतुः सत्सु अग्निधारणात् ।

प्राक्स्थितान्येतानि इति ज्ञानार्थमेव लक्ष्यकादिरसेन तान्यङ्कनापानि ।

---

[1] Corrected from the *Yājñavalkyasmṛti*. O.R. reads पाणि.

[2] O.R. reads पिनसः, a meaningless word.

[3] Conjectural reading. O.R. reads करौ वैमृदितव्रीहि त० .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथाच नारदः—

[1]हस्तक्षतेषु सर्व्वेषु कुर्य्याद्धंसपदानि तु ।
तान्येव पुनरालक्षेद्धस्तौ बिन्दुविचिचितौ ॥ १० ॥

पुनरालक्षेत् अग्निधारणानन्तरमित्यर्थः ।

ततः प्राड्विवाकः मण्डलभूभागाद्दक्षिणप्रदेशे लौकिकमग्निमुपसमाधाय अग्नये पावकाय स्वाहेति आज्येनाष्टोत्तरशतवारं जुहुयात् शान्त्यर्थं जुहुयादग्नौ घृतमष्टोत्तरशतमिति वचनात्। होमश्चाचाग्नये पावकाय स्वाहेति मन्त्रेण कार्य्य इति विज्ञानेश्वराचार्य्यैरुक्तः । होमानन्तरं तस्मिन्नेवाग्नावयःपिण्डप्रतापनं कार्य्यम् ।

तथाच नारदः—

जात्यैव लोहकारो यः कुशलश्चाग्निकर्म्मणि ।
दृष्टप्रयोगश्चान्यश्च तेनायोऽग्नौ प्रतापयेत् ॥ ११ ॥
अग्निवर्णमयःपिण्डं सस्फुलिङ्गं सुरक्षितम्[2] ॥ १२ ॥

चाण्डालादिस्पर्शो यथा न भवति तथा रक्षितमित्यर्थः ।

अयःपिण्डपरिमाणमाह पितामहः—

अस्नहीनं समं[3] कृत्वा अष्टाङ्गुलमयोमयम् ।
पिण्डं तु तापयेदग्नौ पञ्चाशत्पलिकं समम् ॥१३॥

---

[1] The highly erroneous reading of O.R. corrected from Raghunandana's *Divya-tattva*. The printed *Nāradasmṛti* reads ०काकपदानि०.

[2] The printed *Nāradasmṛti* reads सुरक्षितम्; *Aparārka* reads सुयन्त्रितम्.

[3] Supplied from the quotation in Raghunandana's *Divya-tattva*. O.R. reads अस्त्रीहीनसमं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पिण्डस्य द्वादशाङ्गुलायामत्वमुक्तं कालिकापुराणे—

शतार्द्धपलिकं वृत्तं द्वादशाङ्गुलमायतम् ।
लोहमग्निमयं ध्मातं देयं[1] राज्ञाभिशापिने ॥१४॥ इति

अनयोर्व्विकल्पः । ..... शङ्खलिखिताभ्यामयःपिण्डस्य षोडशपलत्वमुक्तं । एतच्चापपिण्डप्रत्यायसं चिः कर्त्तव्यम् ।

तापे तृतीये सन्ताप्य ब्रूयात् सत्यपुरस्कृतमिति नारद-वचनात् जले निक्षिप्य पुनः प्रतापयेत् । सत्यपुरस्कृत-मिति मन्त्रं ब्रूयात् ।

तथा याज्ञवल्क्यः—

त्वमग्ने सर्व्वभूतानामन्तश्चरसि पावक ।
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ॥१५॥

ततः प्राड्विवाकः अभिशापिनः । हस्तसप्तसप्ताश्वत्थ-तव्यमिति पत्रादीनि क्षिपेत् ।

तथाच—

सप्त पिप्पलपत्राणि शमीपत्राण्यथाक्षतान् ।
दूर्व्वायाः सप्तपत्राणि दध्यक्तांश्चाक्षतांस्ततः ॥ १६ ॥
अयस्तप्तन्तु पाणिभ्यामर्कपत्रैस्तु सप्तभिः ।
अन्तर्हितं हरन् शुद्धं त्वं दग्धः सप्तमे पदे ॥ १७ ॥

इत्युक्तं पितामहेन । एतत्तु अश्वत्थपर्णाभावे वेदि-तव्यमिति मिताक्षराकारैर्व्याख्यातम् ।

ततः प्राड्विवाकः अग्निवर्णनिभमुभयोरश्वत्थपत्रदधि-कुसुमान्तरितयो रूपं विन्यसेत् । तथाच पितामहः ।

---

[1] Supplied from the quotation in V.M. O.R. reads ध्मावः लृपां० .

ततः किं कर्त्तव्यमित्याह नारदः—

हस्ताभ्यां तत् समादाय प्राड्विवाकसमीरितः ।
स्थित्वैकस्मिंस्ततोऽन्यानि व्रजेत्सप्त त्वजिह्मगः ॥१८॥

एकस्मिन् प्रथमे पदे स्थित्वा सप्तपदानि लङ्घयित्वा नवममण्डले नूतनशुष्कतृणसमन्वितेऽग्निविसर्गः कार्य्यः ।

गमनप्रकारमाह पितामहः—

त्वरमाणो न गच्छेत्तु स्वस्थो गच्छेच्छनैः शनैः ।
न मण्डलमतिक्रामेन्नान्तरा स्थापयेत् पदम् ।
अष्टमं मण्डलं गत्वा नवमे निक्षिपेद्बुधः ॥ १९ ॥

पिण्डविसर्गानन्तरं परीक्षणं परीक्षकैः[1] कार्य्यम् ।

तथाच विष्णुः—

यो हस्तयोः क्वचिद्दग्धस्तमशुद्धं विदुर्बुधाः ।
न दग्धः सर्व्वथा यस्तु स विशुद्धो भवेन्नरः[2] ॥२०॥

तत्रानुष्ठानक्रमः मिताक्षराकारैः कृतः । पूर्व्वेद्युर्भूशुद्धिं विधाय परेद्युर्म्मण्डलानि यथाशास्त्रं निर्म्माय मण्डलाधिदेवताश्च तत्र सम्पूज्यावाहनान्तां निर्व्वर्त्त्य

---

[1] Conjectural reading. O.R. reads ०परिक्षणे परीक्षणे परीक्षकौ० .

[2] Conjectural reading. O.R. reads—

योहस्तयो क्वचिद्दग्धं स्तमशुद्धं विदुर्बुधाः ।
न दग्धः सर्व्वथा यस्तु स विशुद्ध भवे नरः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उपोषितस्य तस्यार्द्रवाससः पश्चिमे मण्डलविष्टतो व्रीहिमर्द्दनादि करसंस्कारं विधाय प्रतिज्ञापत्रं समन्त्रकं कर्त्तुः शिरसि बध्वा प्राड्विवाकस्तृतीये तापे तापेऽग्निमभिमन्त्रितस्याञ्जलौ निदध्यात् ।

सोऽपि मण्डलानि अष्टौ गत्वा नवमे मण्डले प्रक्षिप्यादग्धः शुद्धो भवतीति ।

इत्यग्निविधिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ जलविधिः ॥ ६२ ॥

तत्र पितामहः—

तोयस्यातः प्रवक्ष्यामि विधिं धर्म्मं सनातनम् ।
मण्डलं धूपदीपाभ्यां कारयेत्तु विचक्षणः ॥१॥
शरान् संपूजयेद्वल्या वैणवञ्च धनुस्तथा ।
मङ्गलैः पुष्पधूपैश्च ततः कर्म्म समारभेत् ॥२॥ इति

धूपदीपाभ्यां मण्डलं सम्पूज्य जपेदित्यन्वयः । जल-समीपे संस्कृतायां भुवि मण्डलं कृत्वा तत्र शरादिकं सम्पूज्य प्रयोगप्रारम्भः कर्त्तव्य इत्यर्थः ।

धनुःप्रमाणं लक्ष्यस्थानञ्च नारदेन दर्शितम् ।

क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतम् ।
मन्दं पञ्चशतं ज्ञेयं एष ज्ञेयो धनुर्विधिः ॥ ३ ॥
मध्यमेन तु चापेन प्रक्षिपेच्च शरत्रयम् ।
हस्तानां तु शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः ।
न्यूनाधिके तु दोषः स्यात् क्षिपतः सायकास्तथा ॥४॥

सप्तशतं सप्ताधिकं शतं गुणम् । एवं षट्शतं पञ्चशतञ्च । शरानायसान् वैणवांश्च कार्य्याः ।

तथाच कात्यायनः—

शराश्चानायसाग्रांस्तु प्रकुर्व्वीत विशुद्धये[1] ।
वेणुकाण्डमयांश्चैव [2]क्षेप्ता च सुदृढं क्षिपेत् ॥ ५ ॥

मण्डलसमीपे तोरणं शोध्यकर्णप्रमाणोच्छ्रितं कार्य्यम् ।

---

[1] Corrected from K. O.R. has विरुद्धये—an obvious misreading.

[2] Corrected from K. O.R. reads चेप्तानुस० .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथाच नारदः—

गत्वा तु तज्जलस्थानं तटे तोरणमुच्छ्रितम् ।
कुर्व्वीत कर्णमाचन्तु भूमिभागे समे शुचौ ॥ ६ ॥

जले विशेषं दर्शयति पितामहः—

स्थिरं तोयं निमज्जेत्तु न ग्राहिणी न चाल्पके ।
तृणशैवालरहित जलौकामस्य वर्ज्जिते ॥ ७ ॥
देवखातेषु यज्ञोऽयं तस्मिन् कुर्य्याद्विशोधनम् ।
आहार्य्यं वर्ज्जयेन्नित्यं शीघ्रवेगनदीषु च ॥ ८ ॥

जले प्राड्विवाकः स्वयमेव[1] वरुणं पूजयेत् ।

तथाच नारदः—

गन्धमाल्यैः सुरभिभिर्मधुःक्षीरघृतादिभिः ।
वरुणाय प्रकुर्व्वीत पूजामादौ समाहितः ॥ ९ ॥

ततो नाभिजले कश्चित्बली पुरुषः स्थापनीयः ।

तथाच नारदः—

ब्राह्मणक्षत्रियो वैश्यो रागद्वेषविवर्ज्जितः ।
नाभिमात्रे जले स्थाप्यः पुरुषः [2]स्थाणुवद्बली ॥१०॥

अनन्तपुरुषेण यज्ञीयवृक्षोद्भवां स्थूणामवष्टभ्य प्राङ्मुखेन स्थातव्यमुदक-प्राङ्मुखस्तिष्ठेत् स्थूणां प्रगृह्य वेति वचनात् ।

ततः प्राड्विवाकः प्रागुक्तक्रमेण धर्मावाहनपूजादि होमान्तं कृत्वा शोध्यशिरसि प्रतिज्ञापत्रारोपणञ्च विधाय जलाभिमन्त्रणं कुर्य्यात् ।

---

[1] Conjectural reading. O.R. reads प्राड्विवाकोमेव .

[2] The *Nāradasmṛti* reads स्तम्भवत् .

मन्त्रमाह पितामहः—

तोय त्वं प्राणिनां प्राणाः सृष्टेराद्यन्तु निर्म्मितम् ।
शुद्धेस्त्वं कारणं प्रोक्तं द्रव्याणां देहिनान्तथा ॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे ॥११॥ इति

वरुणाभिमन्त्रणमन्त्रश्च नारदेन दर्शितः ।

सत्यानृतविभागस्य तोयाग्नी स्पष्टकृत्तमौ ।
अद्भ्यश्चाग्निरभूद्यस्मात्तस्मात्तोये विशेषतः ॥ १२ ॥
क्रियते धर्म्मतत्त्वज्ञैर्दूषितानां विशोधनम् ।
तस्मात्सत्येन भगवन् जलेश त्रातुमर्हसि ॥ १३ ॥

शोध्यः कृताभिमन्त्रेण जलं प्रविशेदित्याह याज्ञवल्क्यः ।

सत्येन माभिरक्षत्वं वरुणेत्यभिशाप्य कम् ।
नाभिदघ्नोदकस्थस्य गृहीत्वोरूजलं विशेत् ॥ १४ ॥

ततो लक्ष्यस्थाने शरत्रयं प्रक्षिपेत् ।

तथाच बृहस्पतिः—

अप्सु प्रवेश्य पुरुषं प्रक्षिपेत् सायकत्रयम् ॥१५॥ इति

शरक्षेप्तुर्विशेष उक्तः पितामहेन—

क्षेप्ता तु क्षत्त्रियः कार्य्यस्तद्वृत्तिर्ब्राह्मणोऽपि वा ।
अक्रूरहृदयः शान्तः सोपवास्तथा शुचिः ॥ १६ ॥

कालविशेषे देशविशेषे च शरप्रक्षेपो निषेध इति ।

पितामहः—

इषुं न प्रक्षिपेद्विद्वान् मारुते वाति वै भृशम् ।
विषमे भूप्रदेशे च वृक्षस्थानसमाकुले ॥ १७ ॥

त्रिष्वपि शरेषु मुक्तेषु द्वयोर्धावकयोः कथं मध्य एकस्मिन् पुरुषे मध्यमशरपातस्थानं गत्वा स्थिते परस्मिन् धावके

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुरुषे तोरणसमीपस्थिते प्राड्विवाकः कालबोधनार्थं कर-तालिकात्रयं दद्यात्। तत्र तृतीयस्यां करतालिकायां शोध्यः पुरुषः नाभिदघ्नोदकस्थस्य पुरुषस्योरू गृहीत्वा विसर्ज्जेत्। तत्समकाल एव तोरणसमीपस्थितो धावकः पुरुषो धावनमध्यमशरपातस्थानं प्राप्तो तदैव ततः स्थानान्मध्यमशरमादाय तोरणस्थानं धावन्नागच्छेत्। आगतो यदि शोध्यं न पश्यति जले तस्य सम्यग्-निमग्नत्वात्तर्हि स शुद्धः।

यद्युन्मग्नत्यशोध्यस्य स्थानाज्जलतर्पणस्थानात्।

अतएव पितामहः—

शरस्य पतनं ग्राह्यं सर्पणं परिवर्ज्जयेत्॥ १८॥

सर्पतसर्पन् शरोपातिदूराद्दूरतरं पतः शरानयनार्थम्।

नियुक्तयोर्धावकयोर्लक्षणमाह नारदः—

पञ्चाशतो धावकानां यौ स्यातामधिके जवे।

तौ च तत्र नियोक्तव्यौ शरानयनकारणात्॥ १९॥

अयमत्र प्रयोगक्रमः मिताक्षरायां कृतः। उक्तलक्षण-जलाशयं सन्निधायोक्तप्रमाणदेशे लक्ष्यं निधाय तोरण-सन्निधौ सशरं धनुः सम्पूज्य जलाशये वरुणमावाह्य सम्पूज्य जप्ता तत्तीरे धर्म्मादींश्च देवानावाहनान्तं इष्टा-शोध्यस्य शिरसि प्रतिज्ञापत्रमाबध्य प्राड्विवाको जलमभि-मन्त्रयति।

तोय त्वं प्राणिनां प्राणा इत्यादिना मन्त्रेणाथ शोध्यः।

सत्येनेत्यादिना मन्त्रेण शरीरादिकं दृश्यादिकं दृश्यते तदा त्वशुद्धः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथाच नारदः—

शरप्रक्षेपणस्थानाद्युवा जवसमन्वितः ।
गच्छेत् परमया शक्त्या यत्रासौ मध्यमः शरः ॥२०॥
मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः ।
प्रत्यागच्छेत्तु वेगेन यतः स पुरुषो गतः ॥२१॥
आगतस्तु शरग्राही न पश्यति यदा जले ।
अन्तर्ज्जलगतं सम्यक् तदा शुद्धं विनिर्द्दिशेत् ॥२२॥
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात् ।
स्थानाद्वान्यत्र गमनाद्यस्मिन् पूर्व्वं निवेशितः ॥२३॥

एकाङ्गस्येतत् कर्णाभिप्रायेण ।

अतएव कात्यायनः—

[1]शिरोमात्रं तु दृश्येत न कर्णौ नापि नासिका ।
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्द्दिशेत् ॥२४॥

मध्यमं शरस्य ग्रहणं तेन स्थानादेव तस्य जलमभिमन्त्र्य गृहीत स्थूयास्य नाभिमात्रोदकावस्थितस्य बलीयः पुरुषस्य समीपमुपसंयति ।

अथ शरेषु मध्यमशरपातस्थाने मध्यमं शरं गृहीत्वा जविन्ये कस्मिन् पुरुषे प्राड्विवाकेन तालत्रयेद्दत्ते युगपद्गमनमज्र्जनं । अथ शरानयनमिति ।

इति जलविधिः[2] ।

---

[1] K. reads शिरोमात्रं.    [2] O.R. reads इति कोशविधिः.

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

# अथ विषविधिः ॥ ६४ ॥

तत्र नारदः—

अतःपरं प्रवक्ष्यामि विषस्य विधिमुत्तमम् ।
यस्मिन् काले यथा देयं यादृशं परिकीर्त्तितम् ॥ १ ॥
यावन्मात्रं समुद्दिष्टं धर्म्मतत्त्वानुवेदिभिः ।
तोलयित्वेप्सिते काले देयमेतद्विभागशे ॥ २ ॥
नापराह्णे न मध्याह्ने सन्ध्यायाञ्च विसर्ज्जयेत् ।
शार्ङ्गं हैमवतं शस्तं वर्णगन्धरसान्वितम् ।
अक्षत्रिमसमसंमूढमयन्त्रोपहृतञ्च यत् ॥ ३ ॥
वर्षासु षड्यवा मात्रा ग्रीष्मे पञ्च यवाः स्मृताः ।
हेमन्ते सप्त वाष्टौ वा शरद्यल्पा ततोऽपि हि ॥ ४ ॥

अल्पाय प्रवेर्थः वत्सनाभस्यापि ग्राह्यतामाह पितामहः ।

यवाः सदा प्रदातव्याः शुचिहेतोरसंशयाः ।
शृङ्गिणो वत्सनाभस्य हिमजस्य विषस्य वा ॥ ५ ॥

यवाः सप्तेति शीतकालविषयं पूर्व्वोदाहृतवचनात् । अजाशृङ्गनिभं श्यामामित्यर्थः । वत्सनाभ नीलपीतवर्णमित्यर्थः ।

वर्ज्यं विषं दर्शयति नारदः—

[1]भ्रष्टञ्च वारितञ्चैव धूपितं मिश्रितन्तथा ।
कालकूटमलावुं च विषं यत्नेन वर्ज्जयेत् ॥ ६ ॥

---

[1] Jolly's edition reads भग्नं च चारितं चैव .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विषदानप्रकारमुक्तं नारदेन—

दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ ।
धूपोपहारमन्त्रैश्च पूजयित्वा महेश्वरम् ॥ ७ ॥ इति

तच्च विषं घृतेन मिश्रितं देयं । तथाच नारदः—

पूर्व्वाह्ले शीतले देशे विषं देयन्तु देहिनि ।
घृतेन योजितं श्लक्ष्णं पिष्टं त्रिंशद्गुणेन तु ॥ ८ ॥

घृतञ्च विधान त्रिंशद्गुणैर्ग्राह्यं, एतच्च विषपूर्व्वोक्तदिव्य-प्रदेशे देव-द्विजसन्निधौ प्राड्विवाकेन शिवपूजां विधाय तस्य पुरागतो विषं स्थापयित्वा धर्म्मवाहनादि प्रतिज्ञा यत्र बन्धनां धर्म्मादिपूजाकलापं विधाय विधानप्राड्विवाको-ऽभिशस्ते दद्यात् ।

तथाच नारदः—

द्विजानां सन्निधावेव दक्षिणाभिमुखे स्थिते ।
उदङ्मुखः प्राङ्मुखो वा दद्याद्विप्रः समाहितः ॥ ९ ॥

अभिमन्त्रणमन्त्रश्च नारदेन दर्शितः ।

विष त्वं ब्रह्मणः पुत्रः सत्यधर्म्मे व्यवस्थितः ।
शोधयैनं नरं पापात् सत्येनास्यामृतीभव ॥ १० ॥

एवमभिमन्त्र्य भक्षणीयमित्याह पितामहः—

एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ॥ ११ ॥

भक्षितं विषं यदि जीर्णं भवति तदा शुद्धः ।

तथाच वृहस्पतिः—

विधिदत्तं विषं येन जीर्णं मन्त्रौषधैर्विना ।
स शुद्धः स्यादन्यथा तु दण्ड्यो दाप्यश्च तद्धनम् ॥१२॥

दिनान्तपर्य्यन्तविषवेगराहित्ये शोध्यस्य शुद्धतेत्याह

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नारदः—

छायानिवेशितो रक्ष्यो दिनशेषमभोजनः ।
विषवेगक्लमातीतः शुद्धोऽसौ मनुरब्रवीत् ॥१३॥

वगो नामधातोर्धात्वन्तरप्राप्तिविषवेश इतिवचनात् ।

मिताक्षरायां प्रकारान्तरमप्युक्तं—

पञ्चतालशतं कालं निर्विकारो यदा भवेत् ।
तदा भवति संशुद्धस्तदा कुर्याच्चिकित्सितम् ॥ १४ ॥

इति

पक्षद्वयमपि आत्मानल्पभक्षणेन योजनीयम् ।

अत्र प्राड्विवाकः सोपवासो महादेवं सम्पूज्य तत्पुरतो विषं स्थापयित्वा धर्मादीनिष्ट्वा शोध्यस्य शिरसि प्रतिज्ञापत्रं निधाय विषमभिमन्त्र्य दक्षिणाभिमुखावस्थिताय विषं प्रयच्छति । स च शोध्यो विषमभिमन्त्र्य भक्षयतीति क्रमः ।

इति विषविधिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ कोशविधिः[1] ॥ ६५ ॥

तत्र नारदः—

अतःपरं प्रवक्ष्यामि कोशस्य विधिमुत्तमम् ।
शास्त्रविद्भिर्यथा प्रोक्तं सर्व्वकालाविरोधिनम् ॥ १ ॥
पूर्व्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च ।
सशूकस्याव्यसनिनः कोशपानं विधीयते ॥ २ ॥

सशूकस्य आस्तिकस्य। महापराधे निर्द्धने कृतघ्ने क्लीवकुत्सिते नास्तिकव्रात्यदासेष्टकोशपानं विवर्ज्जयेत् । महापराधो महापातकम् ।

तद्विधिमाह याज्ञवल्क्यः—

देवानुग्रान् समभ्यर्च्च्य तत्स्नानोदकमाहरेत् ।
संश्राव्य पाययेत् तस्माज्जलात्तु प्रसृतित्रयं ॥ ३ ॥

प्राड्विवाक उग्रान् गन्धपुष्पादिभिः समभर्च्च्य संश्राव्य संस्नाप्य ततः स्नानोदकमाहरेत् । आहृत्य प्राणिनां प्राणा अनेन अभिमन्त्रणं कृत्वा तत्तोयाचान्तरे कृत्वा सत्येन मामभिरक्षत्वं वरुणेति मन्त्रेणाभिमन्त्रितं प्रसृतित्रयं पाययेत्। एतच्च साधारणं धर्म्मेषु धर्म्मावाहनादिसकलदेव-पूजा-होमसमन्त्रक-प्रतिज्ञापत्रशिरोनिवेशनान्तेषु सत्सु अत्र च स्नाप्यदेवतानियमोऽधिकारिनियमश्च पितामहा-दिभिरुक्तः ।

---

[1] O.R. has no heading here.

भक्तो यो यस्य देवस्य पाययेत् तस्य तज्जलम् ।
समभावे तु देवानामादित्यस्य च पाययेत् ॥ ४ ॥
दुर्गायाः पाययेच्चोरान् ये च शस्त्रोपजीविनः ।
भास्करस्य तु यत्तोयं ब्राह्मणं तन्न पाययेत् ॥ ५ ॥
दुर्गायाः स्नापयेच्छू[1]लमादित्यस्य च मण्डलम् ।
अन्येषामपि देवानां स्नापयेदायुधानि च ॥ ६ ॥

इति ।

विश्रम्भे सर्व्वशङ्कासु सन्धिकार्य्ये तथैव च ।
एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धये ॥ ७ ॥

प्राशनप्रकारमाह याज्ञवल्क्यः—

तमाहूयाभिशस्तन्तु मण्डलाभ्यन्तरे स्थितम् ।
आदित्याभिमुखं कृत्वा पाययेत् प्रसृतित्रयम् ॥८॥

तुलादिषु समनन्तरमेवशुद्धिविभावना कोशे तु विशेषमाह याज्ञवल्क्यः—

अर्व्वाक् चतुर्द्दशादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स शुद्धः स्यान्नसंशयः ॥ ९ ॥
रोगोऽग्निर्ज्ञातिमरणं राजदण्डमथापि वा ।
तमशुद्धं विजानीयात्तथा शुद्धं विपर्य्यये ॥ १० ॥

अवधिनियमविकल्पस्तु कार्य्याल्पत्वमहत्त्वेन[2] योज्यः । अत ऊर्द्ध्वं पुनरवधेर्न दोषः[3] ।

---

[1] The letter च्छू is supplied from the quotation of Pītāmaha in the *Mitākṣarā*. O.R. has got a lacuna here.

[2] Conjectural. O.R. reads कार्य्याल्पातनतत्वेन.

[3] Corrected from the *Mitākṣarā*. O.R. reads अतदूर्द्ध्वसर्वधनदोषः.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथा नारदः—

ऊर्द्धं यस्य द्विसप्ताहाद्वैकृतं तु महद्भवेत् ।
नाभियोज्यः स विदुषा कृतकालव्यतिक्रमात् ॥११॥

इत्यर्थसिद्धं । [1]मिताक्षरायामिदमुक्तं चतुर्द्दशादह्न इत्येतन्महाभियोगविषयं । महाभियोगेष्वेतानीति प्रस्तुत्याभिधानादल्पविषयाण्यवध्यन्तराणि पितामहेनोक्तानि । कोशमल्पेऽपि दापयेदिति वचनात् । तानि च

त्रिरात्रात् सप्तरात्राद्वा दशाहाद्वा द्विसप्तकात् ।
वैकृतं यस्य दृश्येत पापकृत्स उदाहृतः ॥ १२ ॥

इति । महाभियोगोक्तद्रव्यादर्व्वाचीनं द्रव्यं त्रिधा विभज्य त्रिरात्राद्यपि पक्षत्रयं व्यवस्थापनीयमिति ।

इति कोशविधिः ।

---

[1] The entire matter in this page after verse 11 is bristling with errors in O.R. and has been corrected from the *Mitākṣarā*.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ तण्डुलविधिः ॥ ६६ ॥

तत्र पितामहः—

तण्डुलानां प्रवक्ष्यामि विधिं लक्षण वोदितम् ।
चौर्य्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः ॥१॥
तण्डुलान् कारयेच्छुक्लान् शालेर्नान्यस्य कस्यचित् ।
मृन्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ॥ २ ॥
स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् ।
आवाहनादि पूर्व्वं तु कृत्वा रात्रौ विधानतः ॥ ३ ॥

प्रातः प्राड्विवाकेन यत्कर्त्तव्यं तदाह स एव ।

प्रभाते कारिणे देयाः आदित्याभिमुखाय तु ॥ ४ ॥

कारिणे शोध्याय, देया तण्डुला इति शेषः । एतत् सर्व्वं धर्म्मावाहनादि-प्रतिज्ञापत्रान्तं कृत्वा तत् पत्रं शिरसि निधाय कर्त्तव्यम् । अनन्तरं स एवाह ।

प्राङ्मुखोपोषितं स्नातं[1] शिरोरोपितपत्रकम् ।
तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः ॥ ५ ॥
भूर्जस्यैव तु नान्यस्याऽभावे पिप्पलस्य तु ॥ ६ ॥

शुद्ध्यशुद्धिनिर्णयोपायमाह बृहस्पतिः—

सोपवासः सूर्य्यगृहे तण्डुलान् भक्षयेच्छुचिः ।
[2]शोणितं दृश्यते यस्य हनुस्तालु च शीर्य्यति ।
गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्द्दिशेत् ॥ ७ ॥

इति तण्डुलविधिः ।

---

[1] Supplied from the quotation in Raghunandana's *Divyatattva*. O.R. reads ———त.

[2] The following verse, though quoted here as a text of *Bṛhaspati*, occurs in *Nāradasmṛti* (4. 342).

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ तप्तमाषविधिः ॥ ६७ ॥

पितामहः—

तप्तमाषस्य वक्ष्यामि विधिमुद्धारणे शुभम् ।
कारयेदायसं पात्रं ताम्रं वा षोडशाङ्गुलम् ॥ १ ॥
चतुरङ्गुलखातन्तु मृन्मयं वापि मण्डलम् ।
पूरयेत् घृततैलाभ्यां विंशत्या च पलैस्तु तत् ॥ २ ॥
सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत्ततः ।
अङ्गुष्ठाङ्गुलियोगेन तप्तमाषकमुद्धरेत् ॥ ३ ॥

मण्डलं वर्त्तुलाकारं सुवर्णमाषकषोडशांशमप्रमाणं । सुवर्णग्रहणं रूप्यमाननिवृत्यर्थं सुवर्णमात्रप्रायपरिमितं हिरण्यं ताम्रं वा तत्र पिण्डीकृतं निक्षिपेदित्यर्थः । अङ्गुष्ठाङ्गुलियोगेन अङ्गुष्ठ-तर्ज्जनी-मध्यमाभि[1]रित्यर्थः । एतच्च तप्तमासोद्धरणपूर्ववत् धर्म्माद्यावाहनपत्रालम्बनान्तं निक्षिपेत् । कृत्वा अग्ने वेदाश्चत्वार इत्यादिना प्रागुक्तेन मन्त्रेणाभिमन्त्र्य कारयितव्यं । शोध्यस्तु त्वमग्ने सर्व्वभूतानामित्यादिना याज्ञवल्क्योक्तेन मन्त्रेणाभिमन्त्र्य तप्तमाषमुद्धरेत् ।

अतएव बृहस्पतिः,—

समुद्धरेत्तैलघृता ... सुतप्तात्तैलमासकम् ॥ ४ ॥

शुद्ध्यशुद्धिनिर्णयोथ उक्तो बृहस्पतिपितामहाभ्याम् ।

---

[1] Conjectural. O.R. reads ०मध्यमासि०.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कराग्रं न धुनेद्युस्तु विस्फोटोऽस्य न जायते ।
शुद्धो भवति धर्म्मेण पितामहवचो यथा ॥ ५ ॥

तप्तमाषप्रकारः[1] पितामहेनोक्तः—

सौवर्णे राजते ताम्रे आयसे, मृन्मयेऽपि वा ।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥ ६ ॥
सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोभिताम् ।
सलिलेन सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकाम् ॥ ७ ॥
भ्रमद्वीचितरङ्गाढ्ये अनखस्पर्शगोचरे ।
परीक्षेतार्द्रपर्णेन चरूकारं सुघोषकम् ॥ ८ ॥
ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् ।
परं पवित्रममृतं घृत त्वं यज्ञकर्म्मसु ।
दह पावक पाप त्वं हिमशीतं शुचौ भव ॥ ९ ॥
उपोषितं ततः स्नातमार्द्रवाससमागतम्[2] ।
ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा ॥ १० ॥
प्रदेशिनीञ्च तस्याथ परीक्षेयुः परीक्षकाः ।
यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिः॥११॥

इति पूर्व्वोक्तं धर्म्मौघावहनादि कर्त्तव्यं । घृतानुमन्त्रेण प्राड्विवाकस्य ।

त्वमग्ने सर्व्वभूतानामिति शोध्यस्याग्न्यभिमन्त्रः प्रदेशी परीक्षकैरिति वचनात् प्रदेशिन्यैव मुद्रिकोद्धरणम् ।

इति तप्तमाषविधिः ।

---

[1] Conjectural. O.R. reads आपरोपितप्रमाषप्रकार.

[2] Corrected from the quotation in V.M. O.R. reads ०स्नानमार्द्रवासमाननी.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ [1]फालविधिः ॥ ६८ ॥

बृहस्पतिः—

आयसं[2] द्वादशपलं घटितं [1]फालमुच्यते ।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तृतम् ॥ १ ॥
अग्निवर्णन्तु तच्चौरो जिह्वया लेलिहन्सकृत् ।
[3]न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते ॥ २ ॥

अत्रापि प्राड्विवाकः फालस्य तापे प्रवृत्ते धर्म्मावाहनादि-प्रतिज्ञापत्रारोपणां तु कुर्य्यात् । प्राड्विवाकस्य त्वमग्ने वेदा इत्यादि प्रागुक्ताभिमन्त्रणमन्त्रः[4] । शोध्यस्य त्वमग्ने सर्व्वभूतानामित्यादि प्रागुक्ताभिमन्त्रणमन्त्रः ।

इति [1]फालविधिः ।

---

[1] O.R. reads काल० in these three places.

[2] Corrected from the quotation in V.M. O.R. reads अय सं.

[3] Corrected from the quotation in V.M.

[4] Conjectural text. O.R. reads प्रयुक्तोभिमन्त्रयामन्त्रः.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ धर्म्मविधिः ॥ ६९ ॥

तत्र पितामहः—

अधुना सम्प्रवक्ष्यामि धर्म्माधर्म्मपरीक्षणम् ।
[1]हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणाम् ॥ १ ॥
राजतं कारयेद्धर्म्ममधर्म्मं सीसकायसम् ।
लिखेद्भुर्ज्जे पटे वापि धर्म्माधर्म्मौ सितासितौ ॥ २ ॥
[2]अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्च्चयेत् ।
सितपुष्पैस्तु धर्म्मः स्यादधर्म्मोऽसितपुष्पकैः ॥ ३ ॥
एवं विधायोपलिप्य पिण्डयोस्तौ निधापयेत् ॥ ४ ॥
उपलिप्ते[3] शुचौ देशे देवब्राह्मणसन्निधौ ।
आवाहयेत्ततो देवान् लोकपालांश्च पूर्ववत् ॥ ५ ॥
धर्म्मावाहनपूर्व्वन्तु प्रतिज्ञापत्रकं लिखेत् ।
यदि पापविमुक्तोऽहं धर्म्मस्त्वायातु मे करे ॥ ६ ॥
[4]अभियुक्तस्ततश्चैकं प्रगृह्णीताविलम्बितम् ।
धर्म्मे गृहीते शुद्धः स्यादधर्म्मे तु स हीयते[5] ॥ ७ ॥
एवं समासतः प्रोक्तं धर्म्माधर्म्मपरीक्षणम् ॥ ८ ॥

इति धर्म्मविधिः ।

---

[1] O.R. writes the three following lines twice, a palpable mistake of the copyist.

[2] O.R. reads अच्च्य, an obvious error.

[3] Corrected from the quotation in V.M. O.R. reads उपलिप्तौ.

[4] Corrected from the quotation in V.M. O.R. reads मित्यक्तास्तपोश्चैकं प्रगृह्णीताविलम्बितः.

[5] Corrected from V.M. O.R. reads मह्रीयते.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अन्ये च शपथाः द्रव्याल्पत्वमहत्त्वविषया जातिविशेषविषयाश्च मन्वादिभिरुक्ताः। तथाहि—

निष्के तु सत्यवचनं द्विनिष्के पादलम्भनम्।
त्रिकादर्व्वाक्तु पुण्यं स्यात् कोशपानमतःपरम्॥ ९॥
सत्येन शापयेद्विप्रं क्षितिपं वाहनायुधैः।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः॥ १०॥

इति वचनात्।

अथ शुद्धिविभावना मनुनोक्ता—

न चार्त्तिमृच्छति क्षिप्रं[1] स ज्ञेयः शपथे शुचिः॥११॥
इति।

अत्र कालनियमश्च एकरात्रमारभ्य त्रिरात्रपर्य्यन्तं त्रिरात्रमारभ्य पञ्चरात्रप्रभृति वा कार्य्यलाघवगौरवपर्य्यालोचनया द्रष्टव्य इति मिताक्षराकाराः।

एवं दिव्यैर्जयपराजयावधारणे दण्डविशेषो दर्शितः कात्यायनेन—

शतार्धं दापयेच्छुद्धमशुद्धो दण्डभाग्भवेत्।
विषे तोये हुताशे च तुलाकोशे च तण्डुले[2]॥ १२॥
तप्तमाषकदिव्ये च क्रमाद्दण्डं प्रकल्पयेत्।
सहस्रं षट्शतञ्चैव तथा पञ्च शतानि तु॥ १३॥
चतुस्त्रिद्व्येकमेवं च हीनं हीनेषु कल्पयेत्॥१४॥ इति।

---

[1] Corrected from the *Manusaṃhitā*. O.R. reads चार्त्तिमक्षति मं.

[2] O.R. reads दण्डले.

निह्नवे भावितो दद्यादित्याद्युक्तं दण्डेनाय दिव्य-निबन्धनो दण्डः समुच्चीयते ।

निर्णयानन्तरं कर्त्तव्यमाह व्यासः—

अजितं तु दण्डयेद्राजा[1] जेतुः पूजां प्रकल्पयेत्॥१५॥

कात्यायनसिद्धेनार्थेन संयोज्योऽब्दादीन् सत्कारपूर्व्वकं लेख्यं स स्वहस्तसंयुक्तं तस्मै दद्यात् पार्थिव इति ।

इति दिव्यदण्डनिरूपणम् ।

---

[1] Conjectural reading. O.R. reads राज्यां.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ दायविभागव्यवहारपदम् ॥ ७० ॥

तत्स्वरूपं नारदेन दर्शितम्—

विभागोऽर्थस्य पैत्र्यस्य तनयैर्यत्र कल्प्यते ।
दायभाग इति प्रोक्तं व्यवहारपदं बुधैः ॥ १ ॥

इति पैत्र्यस्येति स्वत्वनिमित्तसम्बन्धोपलक्षणं तनयैरित्यपि प्रत्यासन्नोपलक्षणम् ।

तत्रेदं विचार्य्यते । विभागात् स्वत्वं उत स्वस्य स्वतो[1] विभाग इति । तदपि स्वत्वं शास्त्रैकसमधिगम्यमुत प्रमाणान्तरगम्यम् । तत्र शास्त्रैकसमधिगम्यत्वं गौतमवचनेन प्रतीयते । तथाहि—स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्य अधिकं लब्धं क्षत्रियस्य विजितं निर्व्विष्टं वैश्यशूद्रयोरिति । ब्राह्मणस्य अधिकं लब्धमिति प्रतिग्रहादिना यल्लब्धं तद्ब्राह्मणस्य असाधारणं क्षत्त्रियस्य विजितमिति अधिकमित्यनुवर्त्तते । क्षत्त्रियस्य विजयदण्डादित असाधारणं । वैश्यस्य कृष्यादिना शूद्रस्य विप्रशुश्रूषादिना भृतिरूपेण लब्धमसाधारणं । प्रमाणान्तरगम्यस्वत्वेनेदं वचनं अर्थवचनं स्यात् ।

तथा—

योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम् ।
याजनाध्यापनेनापि यथास्तेनस्तथैव सः ॥ २ ॥

इति वचनादपि तथैव प्रतिभाति ।

---

[1] Supplied from the *Mitākṣarā*. O.R. reads स्वसतो.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

युक्त्यन्तरमप्यस्ति । लौकिकं चेत् स्वत्वं तस्मात् मम स्वमनेनापहृतमिति न ब्रूयादपहर्त्तुरेव स्यात् । न च लौकिकक्रियासाधनत्वेऽलौकिकमेव स्वत्वं क्रयादिदर्शनेन लौकिकस्तस्करैरपहृतधने स्वत्वं लौकिकार्थक्रियासाधनत्वाद्व्रीह्यादिवदिति । विभागात् स्वत्वमुत स्वस्य स्वतो विभाग इति पक्षद्वययोर्मध्ये तत्र विभागात् स्वत्वमिति मिताक्षराकारैरुपपादितं पूर्व्वपक्षे तत्र हेतुत्वात् जातपुत्त्रस्याधानविधानात् । यदि जन्मनैव स्वत्वं स्यात् तदोत्पन्नपुत्त्रस्यापि तत्स्वत्वं साधारणमिति द्रव्यसाध्येष्वाधानादिषु कर्त्तुरनधिकारः स्यात् । तथा विभागात् प्राक् पितृप्रसादलब्धस्य विभागप्रतिषेधो नोपपद्यते । सर्व्वानुमत्या दत्तत्वाद्विभागप्राप्त्यभावात्[1] ।

यथाह नारदः—

शौर्य्यभार्य्याधने चोभे यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥ ३ ॥

तथा—

भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत् ।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते ॥४॥ इति

प्रीतिदानवचनान्नोपपद्यते जन्मनैव स्वत्वं तत्रोत्तरितमाचार्य्यैः । लोकप्रसिद्धमेव स्वत्वं लोके च पुत्त्रादीनां जन्मनैव स्वत्वं प्रसिद्धतरं नापह्नवमर्हति ।

---

[1] Corrected from the *Mitākṣarā*. O.R. reads ०दत्ताद्विपगावात् .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ननु—

मणिमुक्ताप्रवालानां सर्व्वस्यैव पिता प्रभुः ।

स्थावरस्य तु सर्व्वस्य न पिता न पितामहः ॥५॥ इति

एतस्मादेव वचनाज्जन्मनैव स्वत्वं प्रतीयते। न पितामह इति वचनशेषात् ।

तथा,—

पितृप्रसादाद्भुज्यन्ते वस्त्राण्याभरणानि च ।

स्थावरन्तु न भुज्येत प्रसादे सति पैतृके ॥ ६ ॥

इति वचनस्य अयमभिप्रायः अस्थावरस्य प्रसाद-दानप्रतिषेधः तत्पितामहोपात्तस्थावरविषयः। अतीते पितामहे तद्धनं पितापुत्त्रयोः साधारणं स्वार्ज्जिते स्थावरेऽपि पुत्त्राद्यभ्यनुज्ञयैव दानादावधिकारः ।

तथाचोक्तं मनुना—

विभक्ता वाविभक्ता वा सपिण्डाः स्थावरे समाः ।

एको ह्यनीशः सर्व्वस्य दानाधमनविक्रये ॥ ७ ॥

मिताक्षरायामप्येतदेव व्याख्यातम्। पूर्व्वोक्तैः मणि-मुक्तादिवचनैः स्थावरव्यतिरिक्तस्यैव प्रीतिदानयोग्यत्व-निश्चयात् यद्यप्यर्थसाध्येषु वैदिकेषु कर्म्मस्वनधिकारः तत्र तद्विधानबलादेव अधिकारो गम्यते। तस्मात् पैतृके पैतामहे च द्रव्ये जन्मनैव स्वत्वं। तथापि पितुरावश्यकेषु धर्म्मकृत्येषु वाचनिकेषु प्रसाददानकुटुम्बभरणापद्विमोक्षा-दिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्र्यमिति। पित्रादिप्राप्ते स्वार्ज्जिते वा स्थावरे पारतन्त्र्यमेव ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम् ।
असम्भूय सुतान् सर्व्वान् न दानं च विक्रयः ॥ ८ ॥

इति स्मरणात् ।

तथा—

ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः ।
वृत्तिञ्च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः ॥९॥

अस्यायमपवादः—

एकोऽपि स्थावरे कुर्य्याद्दानाधिमनविक्रयम् ।
आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः[1] ॥ १० ॥

इति । तच्च महादानविषयं ।

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्म्माणौ नियतौ स्वर्गगामिनौ ॥११॥

इति प्रशंसापरमेव । अथवा हिरण्येन क्रत्वा दातव्येति तात्पर्य्यं । न हि ग्रहीतुर्द्दोषः, किन्तु विक्रेतुः ।

इदानीं यस्मिन् काले येन यथा विभागस्तदाह याज्ञवल्क्यः—

विभागञ्चेत् पिता कुर्य्यादिच्छया विभजेत् सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः ॥१२॥
इति ।

यदा ज्येष्ठविभागः तदा मध्यमस्य मध्यमः कनिष्ठस्य कनिष्ठः ।

---

[1] The second line of this verse corrected from the quotation in the *Mitākṣarā*. O.R. reads आपत्कालकूटं चार्थेः.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथाच मनुः—

ज्येष्ठस्य विंश उद्धारः सर्व्वद्रव्याच्च यद्वरम्।
तदर्द्धं मध्यमस्य स्यात्तुरीयञ्च यवीयसः॥१३॥

विषमो विभागः स्वार्ज्जितधनविषयः। पितृक्रमायाते सममेव स्वाम्यस्य वक्ष्यमाणत्वात्।

निवृत्तरजस्कायां मातरि द्रव्यनिस्पृहे पितरि पुत्रेच्छयैव विभागः।

तथाच नारदः—

अत ऊर्द्धं पितुः पुत्रा विभजेयुर्धनं समम्॥१४॥ इति

शङ्खोऽपि—

अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि पुत्रेच्छयैव विभागः।

समविभागविशेषमाह याज्ञवल्क्यः—

यदि कुर्य्यात्समानंशान् पत्न्यः कार्य्याः समांशिकाः।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा॥१५॥

दत्ते त्वर्द्धं प्रकल्पयेदिति तेनैवाभिहितं। समविषयविभागस्याप्यपवादस्तेनैवोक्तः।

शक्तस्यानीहमानस्य किञ्चिद्दत्त्वा पृथक् क्रिया॥१६॥

क्रिया विभागः कर्त्तव्यः। तत्पुत्रादीनां दायजिघृक्षा माभूदिति।

न्यूनाधिकविभक्तानां धर्म्म्यः पितृकृतः स्मृतः।
विभजेरन् सुताः पित्रोरूर्द्धं रिक्थमृणं समम्॥१७॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

न्यूनाधिकविभागेन विभक्तानां भ्रातॄणां पितृकृतः धर्म्म्यः पित्रोरूर्द्धं मातापित्रोरूर्द्धं रिक्थमृणं सममेव विभजताम्। उद्धारविभागो मनुना दर्शितः।

उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना ।
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुजः ।
अंशमंशं यवीयांस इति धर्म्मो व्यवस्थितः ॥ १८ ॥
इति

अयमर्थः ज्येष्ठस्य द्वौ भागौ मध्यमस्य सार्द्ध एकः अनुजानामेकैकः। न च विभागयोः विषमत्वबोधना-द्व्यवस्थैवेति वाच्यम्। युगभेदेनैव व्यवस्था। कलौ सम एव विभागः विषमविभागस्य निषिद्धत्वात्।

तथोक्तमादित्यपुराणे—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधन्तथा ।
कलौ पञ्च न कुर्व्वीत भ्रातृजायां कमण्डलुम्॥१९॥
इत्यादि ।

अन्यच्चापि ।

यथानियोगधर्म्मो नो नानुबन्ध्यावधोऽपि वा ।
तथोद्धारविभागोऽपि नैव संप्रतिवर्त्तते ॥२०॥ इति ।

नियोगधर्मे पितामहोक्तं महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदिति। अनुबन्धः कृतो यथा मैत्रा-वरुणीं गां वशामनुबन्ध्योपालभत इति मिताक्षरायामपि तथैव च व्याख्यातम्। जीवद्विभागे च स्वयमेव विभागो दर्शितः शास्त्रदृष्ट्या उपपादितः।

आपस्तम्बेन सम एव विभाग उक्तः।

विद्वान् पुत्रेभ्यो दायं विभजेत् समम् ॥ इति

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ननु विभजेरन् सुताः पित्रोरित्यादिना रिक्थर्णयोः[1] समत्वं प्रतिपादितं तर्हि

ज्येष्ठ एव प्रतिगृह्णीत पित्र्यं धनमशेषतः ।
शेषास्तमुपजीव्येयुर्यथैव पितरं तथा ॥ २१ ॥

इत्येतस्य का गतिरिति चेत् तदाज्ञाकरणे तात्पर्य्यं अन्यथा समो वा विभागो न स्यादेवेति ।

मातृधनेऽपवादमाह याज्ञवल्क्यः—

मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः[2] ॥ २२ ॥

मात्रा कृतं यदृणं तद्दत्त्वा शेषं दुहितरो गृह्णीयुः । तत्र विशेष उक्तो गौतमेन—

स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्चेति ।

अस्यार्थः प्रत्ताऽप्रत्तासमवाये अप्रत्तानामेव स्त्रीधनं प्रत्तासु चाप्रतिष्ठिताप्रतिष्ठितासमवाये अप्रतिष्ठिताना-मेवेति[3] ।

अप्रतिष्ठिताः निर्द्धनाः ताभ्य ऋते दुहित्रभावेऽन्वयः । पुत्रादिर्गृह्णीयात् इत्यर्थः ।

अविभाज्यमाह याज्ञवल्क्यः—

पितृद्रव्याविरोधेन यदन्यत् स्वयमर्ज्जितम् ।
मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत् ॥ २३ ॥

---

[1] Conjectural. O.R. reads रिकुन्नाणयो.

[2] Supplied from the *Yājñavalkyasmṛti*. O.R. reads शेषमृणान्मातुर्द्धनं हरेत्.

[3] Corrected from the *Mitākṣarā*. O.R. reads स्त्रीधनं प्रताः समवाये अप्रतानामंवप्रतासु च प्रतिष्ठितासमवाये अप्रतिष्ठितानामेवेति.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत[1] यः ।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥ २४ ॥

पितृद्रव्याविरोधेन इति सर्व्वं गृह्णीयादन्यथा नेत्यर्थः। क्षेत्रे तु उद्धर्त्ता चतुर्थांशं लभते शेषं तु सर्व्वेषां सममेव ।

तथाच शङ्खः—

पूर्व्वनष्टां तु यो भूमिमेकश्चेदुद्धरेत् क्रमात् ।
यथाभागं भजन्त्यन्ये दत्त्वांशं तु तुरीयकम्॥२५॥इति

पुत्रादिभिरनुद्धृतं यत् तत्तदितरानुज्ञयोरुद्धरणे कृते सर्व्वग्राह्यत्वम् ।

अन्यदप्यविभाज्यमाह मनुः—

वस्त्रं पत्रमलङ्कारः कृतान्नमुदकं स्त्रियः ।
योगक्षेमं प्रचारञ्च न विभाज्यं प्रचक्षते ॥ २६ ॥

धृतानामेव वस्त्रानामविभाज्यत्वं । येन यद्धृतं तत्तस्यैव । पित्रा धृतानि[2] पितुरूर्द्ध्वं विभजता पितृश्राद्धे श्राद्धभोक्त्रे[3] दातव्यानि ।

तथाच बृहस्पतिः—

वस्त्रालङ्कारशय्यादि यदन्यद्वाहनादिकम् ।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत् ॥ २७ ॥

अन्यदप्यविभाज्यमाह लौगाक्षिः—

क्षेमं पूर्त्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः ।
अविभाज्ये च ते प्रोक्ते शयनासनमेव च ॥२८॥ इति

---

[1] The printed edition of *Yājñavalkya Smṛti* reads हृतमभ्युद्धरेत्तु यः .

[2] Conjectural. O.R. reads धृतमिनि .

[3] Conjectural. O.R. reads श्राद्भाक्त .



P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

योगशब्देन श्रौतस्मार्त्ताग्निसाध्यकर्म्म क्षेमशब्देन तडागा-रामादिरित्युशनसोक्तम् ।

अविभाज्यं सगोत्राणामासहस्रकुलादपि ।
याज्यं क्षेत्रं च पत्रं च क्रतान्नमुदकं स्त्रियः॥२९॥ इति

तद्ब्राह्मणेत्यत्र क्षत्रियादिपुत्त्रविषयम् ।

न प्रतिग्रहभूर्देया क्षत्त्रियादिसुताय वै ।
यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत् ॥ ३० ॥

इति स्मरणात् । मनुना अन्योऽपि विशेष उक्तः ।

अजाविकं सैकशफं न जातु विषमं भजेत् ।
अजाविकं सैकशफं ज्येष्ठस्यैव विधीयते ॥३१॥ इति

तथा—

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत् ।
न तद्भजेरन् दायादाः भजमानाः पतन्ति ते ॥३२॥
इति ।

पितृद्रव्ये पुत्त्राणां विभाग उक्तः । इदानीं पैतामहे पौत्त्राणां विभागे विशेष उक्तो याज्ञवल्क्येन—

अनेकपितृकाणां तु पितृतो भागकल्पना ।
भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव च ।
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्त्रस्य चैव हि ॥३३॥

अयमाशयः । पितृतो भागकल्पना चैतन्न स्यात् तर्हि अविभक्ताः भ्रातरः पुत्त्रानुत्पाद्य मृतास्तदा प्रथमस्य[1] एकः पुत्त्रः द्वितीयस्य द्वौ पुत्त्रौ तृतीयस्य बहवः समं विभागं प्राप्नुयुः ।

---

[1] Supplied from conjecture. O.R. omits it.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अविभक्तत्वात्तच्छङ्कानिरासाय पितृतो भागकल्पनेत्युक्तं भूःशालिक्षेत्रादिका निबन्धो[1] वाणिज्यवृत्त्या यद् आनयति द्रव्यं तत्र परिमाणविशेषेण द्रव्यनियमः ।

द्रव्यं सुवर्णरजतादि तत्र पितुः पुत्त्रस्य सम एव विभागः न तु पितुरिच्छया विभागः भागद्वयं वा ।

द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता ।

तथा—

जीवतोरस्वतन्त्रं स्याज्जरयापि परिप्लुतः ॥ ३४ ॥

अनीशास्ते हि जीवतोरित्याद्युक्तं यत्तत्सर्व्वं स्वार्ज्जितधनविषयम् । विभागोत्तरमुत्पन्नस्य पुत्त्रस्य विभागे विशेषमाह याज्ञवल्क्यः—

विभक्तेषु सुतो जातः सवर्णायां विभागभाक् ।

दृश्याद्वा तद्विभागः स्यादाय-व्ययविशोधितात् ॥३५॥

विभक्तेषु पुत्त्रेषु सवर्णायां जातः पुत्त्रः पित्र्यं भागं भजत इति । पित्रोरनन्तरमित्यर्थः ।

मातृभागमसत्यां दुहितरः । दुहितृशब्देन दुहितृदुहितापि सूच्यते । जात्या मातुर्दुहितरः शेषमित्युक्तत्वात् । एतदेव पूर्व्वोक्तं मनुरप्याह—

ऊर्द्धं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम् ।

अनीशः पूर्व्वजः पित्र्ये भ्रातुर्भागे विभक्तजः ॥३६॥ इति

पितुरूर्द्धं स्पष्टगर्भायां मातरि पुत्त्रेषु विभक्तेषु पश्चादुत्पन्नस्य पुत्त्रस्य भ्रातृविभागसमये आयव्ययशोधितात्

[1] Conjectural text. O.R. reads निवंक्तो, an obvious misreading.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धनात् किञ्चित् किञ्चिदुद्धृत्य विभक्तस्य विभागः स्वसमः कर्त्तव्य इत्यर्थः। स्पष्टगर्भायान्तु प्रसवं वीक्ष्य विभागः कर्त्तव्यः।

एतदेवोक्तं वशिष्ठेन—

अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्त्रलाभात् गृहीतगर्भाणामाप्रसवात् प्रतीक्षणमिति। विभक्तः पितामाता वाविभक्ताय पुत्त्राय पितृभ्यां स्नेहेन यद्दत्तं अलङ्कारादि तत्तस्यैव। तथा सति विभक्तजे उभयोः पित्रोः अंशम्। तदूर्द्ध्वं विभजतां यस्य यद्दत्तं तत्तस्यैव नान्यस्य।

तथाच याज्ञवल्क्यः—

पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्।
पितुरूर्द्ध्वं विभजतां माताप्यंशं समं हरेत्॥ ३७॥

यदि स्त्रीधनं न दत्तं दत्ते त्वर्द्धांशहारिणी। ये च विभक्ताः पित्रा सह संसृष्टास्तैः सार्द्धं पितुरूर्द्ध्वं विभक्तजो विभजेत्।

तथाच मनुः—

संसृष्टास्तेन वा येस्युर्विभजेत सतैः सह ॥३८॥ इति
असंस्कृतास्तु संस्कार्य्याभ्रातृभिः पूर्व्वसंस्कृतैः।
भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम् ॥ ३९ ॥

अस्यार्थः पितुरूर्द्ध्वं विभजद्भिर्भ्रातृभिरसंस्कृताः अकृतसंस्कारा भगिन्यश्चापि निजादंशात् तुरीयकांशं दत्त्वा संस्कर्त्तव्याः। अयन्तु विशेषः। अनेन दुहितरोऽपि पितुरूर्द्ध्वं अंशभागिन्य इति गम्यत इति मिताक्षरायां

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व्याख्यातम् । एवं वर्णक्रमेण एकैकः अंशो न्यूनः । ब्राह्मणस्य चतस्रो भार्य्या तत्रोत्पन्नानामयं विभागक्रमः । तथाच याज्ञवल्क्यः—

चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः ।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥ ४० ॥

सर्व्वविभागशेषं पुनर्विभजनीयम् ।
तथा याज्ञवल्क्यः—

अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते ।
तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥ ४१ ॥ इति ।

अयमाशयः विभागकाले परस्परं गोपितं द्रव्यं पुनर्विभजनीयं । द्व्यामुष्यायणस्य विभागे विशेषः ।

अपुत्त्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसावृक्थी पिण्डदाता च धर्म्मतः ॥४२॥ इति ।

समानासमानजातीयानां पुत्त्राणां विभाग उक्तः । सम्प्रति [1]गौणपुत्त्रविभागं तत्स्वरूपं चोच्यते ।
मनुरप्याह—

क्रियाभ्युपगमाच्चैव[2] बीजार्थं यत्प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥४३॥ इति ।

तथाच याज्ञवल्क्यः—

औरसो धर्म्मपत्नीजस्तत्समः पुत्त्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ ४४ ॥
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥ ४५ ॥

---

[1] O.R. reads गौणपुत्त्रगौणपुत्त्रविभागं.
[2] O.R. reads क्रियाभ्यपगमाच्चेचं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः ।
दद्यान्मातापिता वा यं स पुत्त्रो दत्तको भवेत् ॥४६॥
क्रीतश्च ताभ्यां विक्रीतः कृत्त्रिमः स्यात् स्वयंकृतः ।
दत्त्वात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः ॥ ४७ ॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत् सुतः ।

एतेषां दायग्रहणक्रम उक्तः याज्ञवल्क्येन—

पिण्डदोऽंशहरश्चैषां पूर्व्वाभावे परःपरः ॥ ४८ ॥
सवर्णायां धर्म्मपत्न्यां जातस्तु औरसः मुख्यः औरस-समः पुत्त्रिकासुतः ।

वशिष्ठः—

अस्यां यो जायते पुत्त्रः स मे पुत्त्रो भविष्यति ॥ ४९ ॥

यद्वा पुत्त्रिकैव सुतः ।

उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः ।
सवर्णा असवर्णास्तु ग्रासाच्छादनभागिनः ॥५०॥ इति ।

क्षेत्रजस्य विशेषो दर्शितो मनुना—

षष्ठन्तु क्षेत्रजस्यांशं प्रदद्यात् पैतृकाद्धनात् ।
औरसो [1]विभजेद्दायं पित्र्यं पञ्चममेव च ॥५१॥ इति ।

तथा—

गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥ ५२ ॥
दत्त्रिमग्रहणेन पुत्त्रप्रतिनिधित्वं बोधितं पितृधनहारित्वं तु पूर्व्वस्याभावे सर्व्वेषामवशिष्टं ।

एक एवौरसः पुत्त्रः पित्र्यस्य वसुनः प्रभुः ॥ ५३ ॥

इति स्मरणात् ।

---

[1] The *Manusaṃhitā* reads विभजन्० .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यत्तु—

भ्रातॄणामेकजातानामेकश्चेत् पुत्त्रवान् भवेत्।
सर्व्वांस्तान् तेन पुत्त्रेण पुत्त्रिणो मनुरब्रवीत् ॥५४॥

इति भ्रातृपुत्त्रस्य पुत्त्रीकरणसम्भवे पुनरन्येषां पुत्त्रीकरणनिषेधार्थमिदं मिताक्षरायामुक्तम्[1]।

वस्तुतस्तु—

दत्तौरसेतरेषां तु पुत्त्रत्वे न परिग्रहः ॥५५॥ इति।

एतद्व्यतिरिक्तानान्तु पुत्त्रत्वेन असङ्ग्राह्यत्वं विभागकल्पनापि कृतयुगादावेव कलौ निषेधात्। तथाच औरसाभावे भ्रातुष्पुत्त्राणां पुत्त्रत्वमावश्यकमिति प्रभाति।

अतएवोक्तं वृहस्पतिना—

अपुत्त्रस्य पितृव्यस्य तत्पुत्त्रो भ्रातृजो[2] भवेत्।
स एव तस्य कुर्व्वीत श्राद्धपिण्डोदकक्रियाम्[3] ॥५६॥

अपुत्त्रस्य पितृव्यस्य भ्रातृजस्य पुत्त्रत्वं विधीयते। उत्पत्तिमात्त्रेणेत्याशयः। दानप्रतिग्रहाभ्यामन्येषाञ्चेति—

कुल्येषु विद्यमानेषु पितृभ्रातृसुतादिषु।
असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी ॥५७॥

एतद्विरुद्धान्यपि व्याख्यानि सन्ति।

---

[1] Conjectural text. O.R. reads °निषेधार्थं मिचिमिच्च रायामुक्त.

[2] O.R. reads भ्रातृगो.

[3] The highly erroneous reading of O.R. corrected from the quotation in the *Dattaka-candrika* of Kuvera.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यथा—

भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत् प्रव्रजेत वा ।
विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना ।
भरणं चास्य कुर्व्वीरन् स्त्रीणामाजीवितक्षयात् ॥५८॥
इति नारदेनोक्तं

मनुना तु—

पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च ॥ ५९ ॥ इति

अपुत्ररिक्थग्रहणे क्रम उक्तः कात्यायनेन—

विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत् ।
भ्राता वा जननी वाथ माता वा तत् पितुः क्रमात् ॥६०॥
इति ।

याज्ञवल्क्येनान्यथैवोक्तं—

पत्नीदुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥ ६१ ॥
एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः ॥ ६२ ॥ इति

इति परस्परविरोधे भ्रातॄणामप्रजाः प्रेयादित्यादिवाक्ये भरणमात्रमेवेत्यवसीयते । अन्यथा तन्नारदवाक्यं विधि-विषयं ... ... ... भ्रातॄणामेवाप्रसजस्य ग्रहणं युक्तं तत्र स्त्रीधनं विनेत्युक्तं। स्त्रीधनं तु तस्या एव न विभजनीयं ।

स्त्रीधनं त्वाह याज्ञवल्क्यः—

पितृपतिसुतभ्रातृदत्तमध्यग्न्युपागतम् ।
आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्त्तितम् ॥६३॥ इति।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ननु अपुत्रस्य ब्राह्मणस्य धनं पूर्व्वोक्तानां सर्व्वेषा-मभावे केन ग्राह्यमिति प्राप्ते नारदेनाभिहितम्—

ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन ।
ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा ॥६४॥ इति।
वानप्रस्थ-यति-ब्रह्मचारिणां रिक्थभागिनः ।
क्रमेणाचार्य्यसच्छिष्यधर्म्मभ्रात्रेकतीर्थिनः ॥ ६५ ॥

अपुत्रस्य स्वर्यातस्य रिक्थभागिन इति याज्ञवल्क्ये-नोक्तं। न चेत्तेषां द्रव्याभाव इति वाच्यं। नैष्ठिकस्य वानप्रस्थस्यापि शरीरयात्रार्थं वस्त्रादिसम्बन्धोऽस्ति ।

अह्नो मासस्य षण्णां वा तथा सम्वत्सरस्य वा ।
अर्थस्य निचयं कुर्य्यात् कृतमाश्वयुजे त्यजेत् ॥ ६६ ॥

इति वचनात् धनसम्बन्धोऽस्त्येव ।

यतेरपि—

कौपीनाच्छादनार्थं वा वासोऽपि बिभृयात्तथा ।
योगसम्भारभेदांश्च गृह्णीयात् पादुके तथा ॥ ६७ ॥

इति वचनात् ।

तथा संसृष्टस्वरूपं बृहस्पतिनोक्तम्—

विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः ।
पितृव्येणाथ वा प्रीत्या स तत्संसृष्ट उच्यते ॥६८॥ इति

संसृष्टिनः स्वर्यातस्य अंशं अविज्ञातगर्भायां भार्य्यायां पश्चादुत्पन्नस्य संसृष्टी दद्यात् पुत्राभावे संसृष्ट्येवापहरेत्। तथा हि संसृष्टिनां विभाग उक्तः याज्ञवल्क्येन—

संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत् ॥ ६९ ॥

P. P. Ac. Gunratnasuri M.S.　　　　Jin Gun Aaradhak Trust

अयमर्थः। सोदरस्य संसृष्टिनो मृतस्य अंशं सोदरः संसृष्टी जातस्य पुत्त्रस्य दद्यात्।

तदभावेऽपहरेदिति सम्बन्धः पूर्व्ववत् एवं च सोदरासोदरसंसर्गे सोदरसंसृष्टिनो धनं सोदरः संसृष्टी गृह्णाति न भिन्नसोदरः।

अन्योदर्य्यः सापत्नो भ्राता संसृष्टी धनं हरेत्। न पुनरन्योदर्य्यो धनं हरेत् असंसृष्टी। अनेनान्वयव्यतिरेकाभ्यामन्योदर्य्यस्य संसृष्टित्वं धनग्रहणे कारणमुक्तं भवति। असंसृष्टीत्येतदुत्तरेणापि सम्बध्यते। अतश्चासंसृष्टितो धनमाददीत संसृष्ट इति संसृष्टसोदरसंसृष्टः एकोदर इति यावत्।

अनेनासंसृष्टस्यासोदरस्य धनग्रहणं सोदरत्वं कारणमुक्तं। असंसृष्टसोदरसंसृष्टः भिन्नोदरस्य च विभज्य ग्रहणं कर्त्तव्यमित्युक्तं भवति।

द्वयोरपि धनग्रहणकारणस्यैकस्य सद्भावात्तदिति वदन्ति। पुत्त्रादिनां यो विभाग उक्तः तस्य क्वचित् अपवादोऽप्यस्ति।

तत्तथाच मनुः—

अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥७०॥
सर्व्वेषामपि तु न्याय्यं दातुं शक्त्यं मनीषिभिः।
ग्रासाच्छादनमत्यन्तं पतिताः स्युरदित्सवः॥७१॥ इति।

एतेषामचिकित्सितरोगाणां अंशभागित्वं नास्ति भरणमेव कर्त्तव्यं अन्यथा पातित्यमित्यर्थः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एतेषां पुत्त्रादीनां तु अंशभागित्वमाह याज्ञवल्क्यः—

औरसाः क्षेत्रजास्त्वेषां निर्द्दोषा भागहारिणः।
सुताश्चैषां प्रभर्तव्या यावद्वै भर्त्तृसात्कृताः ॥७२॥ इति

ननु क्लीवस्य कथं पुत्त्रत्वमिति चेत् तत्क्षेत्रजः पुत्त्रो दत्तो वा सम्भवति।

स्त्रीधनग्रहणे मनुना विशेष उक्तः—

जनन्यां संस्थितायान्तु समं सर्व्वे सहोदराः।
भजेरन् मातृकं रिक्थं भगिन्यश्च सनाभयः ॥७३॥

इति सोदरग्रहणं भिन्नोदरनिवृत्त्यर्थं।

स्त्रीधनप्रसङ्गेन वाग्दत्ताविषयमपि किञ्चिदुक्तम् याज्ञवल्क्येन—

दत्त्वा कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदरम्।
दत्तामपि हरेत् कन्यां श्रेयांश्चेत् वर आव्रजेद् ॥७४॥
इति।

क्वचिज्जीवत्याः सप्रजाया अपि स्त्रियाः धनग्रहणे भर्त्तुरभ्यनुज्ञोक्ता।

तथाच याज्ञवल्क्यः—

दुर्भिक्षे धर्म्मकार्य्ये च व्याधौ सम्प्रतिरोधके।
गृहीतं स्त्रीधनं भर्त्ता न स्त्रियै दातुमर्हति ॥७५॥

विभागसन्देहे निर्णयमाह याज्ञवल्क्यः—

विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः।
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः[1] ॥ ७६ ॥

यौतकैः पृथक्कृतैरित्यर्थः।

[1] The corrupt reading in O.R. of the second line of this quotation corrected from the printed *Yājñavalkya-Smṛti.*

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अन्यान्यपि लिङ्गानि नारदेनोक्तानि—

विभागेऽधर्म्मसन्देहे दायादानां विनिर्णयः ।
ज्ञातिभिर्भागलेख्येन पृथक्कार्य्यप्रवर्त्तनात् ॥ ७७ ॥
भ्रातॄणामविभक्तानामेको धर्म्मः प्रवर्त्तते ।
विभागे सति धर्म्मोऽपि भवेत्तेषां पृथक् पृथक् ॥७८॥
साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः कथञ्चन ॥ ७९ ॥

इति ।

इति दायविभागप्रकरणम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ सीमाविवादनिर्णयः ॥ ७१ ॥

तथाच याज्ञवल्क्यः—

सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः ।
गोपाः सीमाकृषाणाश्च सर्व्वे च वनगोचराः ॥ १ ॥
नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः ।

सीमा चतुर्व्विधा । देशसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति । सा च यथासम्भवं पञ्चविधा ।

तथाच नारदः—

ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्ज्जिता ।
राजशासननीता च सीमा पञ्चविधा स्मृता ॥ २ ॥
इति ।

ध्वजिनी वृक्षादिलक्षिता ध्वजसाम्यात् । मत्स्यिनी जलवती मत्स्यानां जलाधारत्वात् । नैधानी भूमध्य-निहिततुषाङ्गारादिमती । तेषां निखनत्वेन निधान-तुल्यत्वात् । भयवर्ज्जिता अर्थिप्रत्यर्थिपरस्परसम्पत्ति-निमित्ता । राजशासननीताज्ञातृचिह्नाभावे राजेच्छया निर्म्मिता । तथाच एतानि चिह्नानि न सन्ति तत्र राजेच्छयैव निर्णयः ।

सामन्ता समन्ता वा तथैवोक्तं कात्यायनेन—

ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्त्तितम् ।
गृहं गृहस्य निर्दिष्टं समन्तात् परिरभ्य च ॥३॥ इति

ग्रामादिशब्देन तत्स्थाः पुरुषाः लक्ष्यन्ते । यथा ग्रामः पलायते । सामन्तग्रहणं च तत्संसक्तोपलक्षणार्थं ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

तथाच कात्यायनः—

संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः ।
संसक्तसक्तसंसक्ताः पद्माकाराः प्रकीर्त्तिताः ॥४॥ इति

तथाचायमर्थः सम्पन्नः । राज्ञा सामन्तादीन् सीमा ......वा सीमानिर्णयः कार्य्यः । परं तु साक्ष्यभावे तु तथा च मनुः—

साक्षिप्रत्यय एव स्यात् विवादे सीम निश्चयः[1] ॥ ५ ॥
इति

तथा—

साक्ष्यभावे तु चत्वारो ग्रामाः सीमान्तवासिनः ।
सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ ॥६॥ इति

ते च साक्षिणः सामन्तादयः स्वैः स्वैः शपथैः शापिताः सन्तः सीमाविनिर्णयं नयेयुः ।

शिरोभिस्ते गृहीत्वोर्व्वीं स्रग्विणो रक्तवाससः ।
सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम् ॥ ७ ॥
इति मनुस्मरणात् ।

ग्रामेयककुलानान्तु समक्षं सीम्नि साक्षिणां ।
प्रष्टव्याः सीमालिङ्गानि तयोश्चैव च वादिनोः ॥८॥
इति

तानि च सीमालिङ्गानि द्विप्रकाराणि प्रच्छन्नरूपाणि प्रकाशरूपाणि च ।

---

[1] Corrected from *Manu-Saṃhitā*. The last half of the quotation in O.R. is meaningless.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रकाशरूपाण्याह मनुः—

सीमावृक्षांस्तु कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान् ।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान् ॥ ९ ॥

इत्यादि देवतास्थानानि मणियुक्तानि (?) तेनैव ।

उपच्छन्नानि[1] चान्यानि सीमालिङ्गानि कारयेत् ।
सीमाज्ञाने नृणां वीक्ष्य[2] नित्यं लोके विपर्य्ययम् ॥१०॥
अश्मनोऽस्थीनि गोबालांस्तुषान् भस्मकपालिकाः ।
करीषमिष्टिकाङ्गार-शर्करावालुकास्तथा ॥ ११ ॥
यानि चैवम्प्रकाराणि कालाद्भूमिर्न भक्षयेत् ।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत् ।
एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः ॥१२॥ इति

राजा चादौ एतैर्लिङ्गैः सीमां कुर्य्यात् ।

अनन्तरं साक्षिणस्तदभावे सामन्तादयस्तत्र सामन्तादय इत्युक्तं बहुवचनमेकस्य निषेधार्थम् ।

तथा च मनुः—

नैकः समुन्नयेत् सीमां नरः प्रत्ययवानपि ।
गुरुत्वादस्य कार्य्यस्य क्रियैषा बहुषु स्थिता ॥१३॥ इति

यथा देशसीमानिर्णये चत्वार ... क्षेत्रगृहदाहादावपि चतुर्द्दिक्षु संस्थिताः ग्राह्याः तथा च ते प्रष्टव्या ते शापिताः सन्तः यथामुना प्रकारेण कर्त्तव्यम् ।

---

[1] Corrected from *Manu-Saṃhitā*. O.R. reads उपनि .

[2] O.R. omits वीक्ष्य .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथा च मनुः—

ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयम् ।
निवध्नीयात्तथा सीमां सर्व्वांस्तांश्चैव नामतः ॥१४॥
इति

अत इति विस्मरणार्थं पत्रे समावेशयेत् ।

अथ चेदनृतं ब्रूयुः सामन्ताः सीमनिर्णये ।
सर्व्वे पृथक् पृथक् दण्ड्याः राज्ञा मध्यमसाहसा ॥
१५ ॥ इति

मर्य्यादायाः प्रभेदे च सीमातिक्रमणे तथा ।
क्षेत्रस्य हरणे दण्डाः अधमोत्तममध्यमाः ॥ १६ ॥
न निषेध्योऽल्पवाधस्तु सेतुः कल्याणकारकः ।
परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः ॥१७॥ इति

याज्ञवल्क्यवचनात् परभूमावपि कृतं कूपादिकं अद्य दानेन प्रार्थनया वा अलब्धानुज्ञो निर्म्मातुमिच्छति । तत्र सद्रूपकारे न निषेध्यः । क्षेत्रस्य च अल्पनाशे अन्यथा अर्थात् निषिध्य ।

उक्तं नारदेन—

सेतुश्च द्विविधः प्रोक्तः क्षेपो बन्धस्तथैव च ।
तोयप्रवर्त्तनात् क्षेपो बन्धः स्यात्तन्निवर्त्तनात् ॥१८॥
इति

यदा त्वन्यनिर्म्मितं सेतु नष्टं बध्नाति स्वामिनं तद्वंश्यं राजानं च पृष्ट्वैव संस्कुर्य्यात् ।

तदाह नारदः—

पूर्व्वप्रवृत्तमुच्छिन्नमपृष्ट्वा स्वामिनं तु यः ।
सेतुं प्रवर्त्तयेत् कश्चिन्न स तत्फलभाग्भवेत् ॥ १९ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किन्तु स्वामिनं त (?) एव भोगः ।

मृतेऽपि स्वामिनि पुनस्तद्वंश्ये वापि मानवे ।
राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम् ॥ २० ॥

इति प्रवर्त्तयितारमप्याह याज्ञवल्क्यः—

स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत् ।
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः ॥ २१ ॥

अन्यदप्याह स एव ।

फालाहतमपि क्षेत्रं न कुर्य्याद्यो न कारयेत् ।
संप्रदाप्योऽकृष्टफलं क्षेत्रमन्येन कारयेत् ॥ २२ ॥

तेन यद्यपि कृतं तद्दत्त्वेत्यर्थः (?) ।

गृहविषयकर्म्मापि किञ्चिदाह कात्यायनः—

[1]विण्मूत्रोदकवप्रञ्च वह्निश्वभ्रनिवेशनम् ।
अरत्नि[2]चयमुत्सृज्य परकुड्यान्निवेशयेत् ॥ २३ ॥

इति सीमाविवादनिर्णयप्रकरणम् ।

---

[1] Corrected from K. V.R. reads चक्रञ्च for वप्रञ्च. O.R. reads the whole line thus:—

विपूमूत्रोदकमेकं च वह्निगर्त्तानिवेशनं.

[2] K. and V.R. read द्वय for चय.

30

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ स्वामिपालविवादप्रकरणम् ॥ ७२ ॥

विवादपदानां परस्परहेतुहेतु-मद्भावात् तेषामाद्य-मृणादानमित्यादिपाठक्रमो न विवक्षितः इति व्युत्क्रमेण स्वामिपालविवादोऽभिधीयते[1] ।

याज्ञवल्क्यः[2]—

माषश्चाच ताम्रिकपणस्य विंशतितमो भागः ।

तथाच नारदः—

माषो विंशतिभागस्तु पणस्य परिकीर्त्तितः ।

भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः ॥ १ ॥ इति

परक्षेत्रे शस्यं भक्षयित्वा अनिवारिताश्चेतरेते (?) तद्द्विगुणो दण्ड इत्यर्थः ।

सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम् ॥ २ ॥

इति याज्ञवल्क्यः ।

विवीतः प्रचुरतरतृणकाष्ठो रक्षमाणो भूदेश अत्र खरोष्ट्रैर्भक्षिते महिषीसमो दण्डः क्षेत्रस्वामिनेऽपि तावत्-फलं दापनीयम् ।

स एवाह—

यावत् शस्यं विनश्येत्तु तावत् स्यात् क्षेत्रिणः फलम् ।

गोपस्ताड्यस्तु गोमी तु पूर्व्वोक्तं दण्डमर्हति ॥३॥ इति

क्षेत्रविशेषे त्वपवादस्तेनैवोक्तः ।

---

[1] This prose extract has been almost entirely supplied from the Mit. O.R. simply reads विवादपदानां परस्पर-फलहेतुमद्भावात् क्रमाति .

[2] O.R. simply names *Yājñavalkya* but quotes no verse—an obvious lacuna.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पथिग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते ।
अकामतः कामचारे चौरवद्दण्डमर्हति ॥ ४ ॥

अदण्ड्यानाहोशनाः—

अदण्ड्या हस्तिनो ह्यश्वाः प्रजापाला हि ते स्मृताः ।
अदण्ड्यौ काणकुब्जौ[1] च पृथक् च कृतलक्षणाः ॥५॥
अदण्ड्या गन्तुकी गौश्च सूतिका चाभिसारिणी ।
अदण्ड्याश्चोत्सवे गावः श्राद्धकाले तथैव च ॥६॥ इति

अत्रोत्सृष्टं[2] पशूनामस्वामिकत्वेन दण्ड्यत्वासम्भवात् दृष्टान्तार्थमुपादानं यथोत्सृष्टपशवो न दण्ड्या एवं महोक्षादयः ।

गोप्रसङ्गात् गोप्रचारमाह याज्ञवल्क्यः—

ग्रामेच्छया गोप्रचारो भूमिराजवशेन वा ।
द्विजस्तृणैधःपुष्पाणि सर्व्वतः स्ववदाहरेत् ॥ ७ ॥

भूमिकोचे राजेच्छया वा अनिवारितः गोप्रचारः कर्त्तव्यः । [3]देवगोऽग्न्यर्थं तृणमेधांसि वीरुद्वनस्पतीनां पुष्पाणि स्ववदाददीत फलानि तु अपरिवृतानामिति गौतमोक्तेः ।

इति स्वामिपालविवादप्रकरणम् ।

---

[1] Supplied from the quotation in Mit. O.R. reads काणकुंडौ.

[2] The entire prose extract अत्रोत्सृष्ट...........महोक्षादयः has been supplied from the Mit., where the above two verses of *Uśanas* have been quoted and commented upon. O.R. reads अत्रोत्सृष्ट यत् नाम स्वामिकत्वेन यथा नदं प्रत्वं एवं हम्म्यानं दयोपिशश्च कृतलक्षणं एकादशाहे वृषोत्सर्गाद्भवपसूताकाद्यौ अनिर्दिशाह.

[3] Supplied from the quotation in Mit. O.R. reads पुष्पाण्यपिष्ट आहरेत् कलानि०.

# अथ अस्वामिविक्रयप्रकरणम् ॥ ७२ ॥

द्रव्यमस्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात् ।
प्रकाशे क्रयशुद्धिः स्यात् क्रेतुः स्तेयं रहःक्रयात् ॥१॥
इति
हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात् ।
अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान् ॥ २ ॥
शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम् ।
अर्व्वाक् संवत्सरात् स्वामी उद्धरेत् परतो नृपः ॥३॥
इति याज्ञवल्क्यस्मरणात् ।

प्रकारान्तरमप्याह मनुः—

प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत् ।
अर्व्वाक् त्र्यब्दाद्धरेत् स्वामी परतो नृपतिर्हरेत् ॥४॥
आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः ।
दशमं द्वादशं वापि सतां धर्म्ममनुस्मरन् ॥५॥ इति

तृतीयद्वितीयप्रथमसंवत्सरेषु यथाक्रमं षष्ठादयो भागा वेदितव्याः । अब्दसंरक्षणं भर्तृवृत्तसम्पन्नब्राह्मणविषयं रक्षणनिमित्तं षड्भागादिग्रहणमिति विज्ञानेश्वरव्याख्या ।

अत्रेदं विचारणीयमपुत्रस्य रिक्थं पौत्राद्यसद्भावे दानसन्नितद्रव्यं[1] ब्राह्मणेभ्यो देयं न तु राज्ञा ग्राह्यमिति-दायविभागकाले व्याख्यातम् । तथाच षड्भागादिग्रहणं क्षत्रियादिविषयमेव न ब्राह्मणविषयमिति प्रतिभाति ।

---

[1] Conjectural text. O.R. reads दानसन्नितदानसन्नित-दानद्रव्यं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्रव्यविशेषे अपवादोऽप्युक्तो याज्ञवल्क्येन—

पणानेकशफे दद्यात् चतुरः पञ्च मानुषे ।
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके ॥ ६ ॥ इति ।

इत्यस्वामिविक्रयप्रकरणम् ।

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ दत्ताप्रदानिकम् ॥ ७४ ॥

तच्च देयादेयविभागेन चतुर्व्विधम् ।

तथाच नारदः—

अथ देयमदेयञ्च दत्तञ्चादत्तमेव च ।
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्व्विधः ॥ १ ॥ इति

तत्र देयमिति अनिषिद्धदानक्रियायोग्यम् । अदेयमस्वन्त्वकृतया वा दानानर्हम् । प्रकृतिस्थेन अव्यावर्त्तनीयं तद्दत्तमदत्तं तु यत्प्रत्याहरणीयम् । दाने विशेषाभिधानमुक्तं याज्ञवल्क्येन—

स्वकुटुम्बाविरोधेन देयं दारसुतादृते ।
नान्वये सति सर्व्वस्वं यच्चान्यस्मै प्रतिष्ठितम्[1] ॥ २ ॥

तस्मान्न प्रतिष्ठितमपि दारसुतादि न देयमित्यर्थः ।

तथाच मनुः—

वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः ।
अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥ ३ ॥

इति तस्मात् पूर्व्वोक्तादृते स्वं दातव्यमित्यर्थः ।

ननु—

प्रतिग्रहः प्रकाशः स्यात् स्थावरेषु विशेषतः ।
देयं प्रतिश्रुतञ्चैव दत्त्वा नापहरेत् पुनः ॥ ४ ॥

---

[1] The *Yājñavalkyasmṛti* reads प्रतिश्रुतम् .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति याज्ञवल्क्यवचनात्। वाग्दानानन्तरं कथमपहरण-मिति चेत्। न दत्तस्यापि हरणं। गौतमेनोक्तम्—

प्रतिश्रुत्यापि अधर्म्मसंयुक्ताय न दद्यादिति। दत्ता-स्वरूपं नारदेनोक्तम्—

पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः।
स्त्रीशुल्कानुग्रहार्थाय दत्तं दानविदो विदुः ॥ ५ ॥
अदत्तं तु भयक्रोधशोकावेगरुगन्वितैः।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥ ६ ॥
बालमूढास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितैः।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च तत् ॥ ७ ॥
अपात्रे पात्रमित्युक्तं कार्य्ये चाधर्म्मसंहितम्।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतम् ॥ ८ ॥

प्रत्याहरणीयत्वात्।

इति दत्ताप्रदानिकम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ क्रीत्वानुशयः ॥ ७५ ॥

तत्स्वरूपं नारदेनोक्तम्—

क्रीत्वा मूल्येन यः पण्यं क्रेता न बहुमन्यते ।
क्रीत्वानुशय इत्येतद्विवादपदमुच्यते ॥ १ ॥ इति

गृहीत्वापि तस्मिन्नेवाहनि प्रत्यर्पणीयं यद्यविकृतं भवेदिति नारदेनैवोक्तः—

क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यवीक्षितम् ॥२॥ इति

द्वितीयदिने विरोधस्तेनैवोक्तः ।

द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमाहरेत् ।
द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥ ३ ॥

इति बीजादिविक्रये प्रत्यर्पणावधिरुक्तो याज्ञवल्क्येन—

दशैकपञ्चसप्ताह-मासत्र्यर्द्धाह्नि मासिकम् ।
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥ ४ ॥

बीजं व्रीह्यादि, अयः लौहः, वाह्यो बलीवर्दादि[1] रत्नं मुक्तादि[2], स्त्री दासी, दोह्यं महिष्यादि, पुमान् दासः । एतेषां परीक्षाक्रमेण दशादिभिर्भवति प्रत्यर्पणमपि यावद्-दशादि । मनुना सामान्यतो दशाहेन प्रत्यर्पणकाल उक्तः ।

क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत् ।
सोऽन्तर्दशाहं तद्द्रव्यं दद्याच्चैवाददीत च ॥५॥ इति

---

[1] Conjectural. O.R. reads वलावदादि .

[2] O.R. reads रत्नं मुक्तादि twice consecutively—an obvious error of the copyist.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एतत् सर्व्वमपरीक्ष्य कृतञ्चेत्तदा परीक्ष्य तु न प्रत्यर्पणम्। समयं क्रीत्वा क्रीतं तद्विक्रयेण प्रत्यर्पणीयं तदुक्तम् ।

क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः ।
परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत् पुनः ॥६॥ इति

प्रसङ्गे तु सुवर्णादिपरीक्षणमप्युच्यते ।

तथाच याज्ञवल्क्यः—

अग्नौ सुवर्णमक्षीणं रजते द्विपलं शते ।
अष्टौ त्रपुणी सीसे च ताम्रे पञ्च दशायसि ॥७॥

सुवर्णकारहस्ते दत्तं सुवर्णं अग्नौ प्रताप्यमानं न क्षीयते रजतादौ उक्तः प्रकार इतरथा क्षयं दाप्यः दण्डश्च ।

कम्बलादावपि वृद्धिः क्वचिदुक्ता—

शते दशपला वृद्धिरौर्णकार्पाससौत्रिके ।
मध्ये पञ्चपला सूत्रे सूक्ष्मे तु त्रिपला मता[1] ॥८॥

स्थूलेनोर्णसूत्रेण यत् कम्बलादिकं क्रियते तत्र शतपला वृद्धिर्भवति । एवं कार्पाससूत्रनिर्म्मितपट्टादौ तूक्ता वृद्धिर्ज्ञातव्या । कौशेयवल्कलेषु न वृद्धिर्यावद्दत्तं कुञ्चिदहस्ते तावदेव । द्रव्याणामानन्त्यात् प्रतिद्रव्यं निरूपणाशक्तेः ह्रासवृद्धिज्ञानोपाय उक्तो याज्ञवल्क्येन—

देशं कालञ्च भोगञ्च ज्ञात्वा नष्टे बलाबलम् ।
द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयम्[2] ॥९॥

इति क्रीत्वानुशयप्रकरणम् ।

---

[1] & [2] The faulty texts in O.R. corrected from the *Yājñavalkyasmṛti*.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ शुश्रूषाख्यव्यवहारपदम् ॥ ७६ ॥

तत्स्वरूपं नारदेन दर्शितम्—

अभ्युपेत्य च शुश्रूषां यस्तां न प्रतिपद्यते ।
शुश्रूषामभ्युपेत्यैतद् विवादपदमुच्यते ॥ १ ॥
शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः ।
चतुर्व्विधः कर्म्मकरः शेषा दासास्त्रिपञ्चकाः ॥ २ ॥

अस्यार्थः, [1]शुश्रूषकश्च पञ्चप्रकारः शिष्यान्तेवासिभृतकाधिकर्म्मकृद्दासा इति । तेषामाद्याश्चत्वारः कर्म्मकारिणः दासा पुनर्गृहजातादयः पञ्चदशप्रकाराः ।

ते च गृहद्वाराशुचिस्थानरथ्यावस्करं शोधनाद्यशुभकर्म्मकारिणः । तदिदं नारदेन स्पष्टीकृतं शुश्रूषकः पञ्चविध इत्यादिना ।

शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्म्मकृत् ।
राज्ञे कर्म्मकरा ज्ञेया दासास्तु गृहजातयः ॥ ३ ॥
सामान्यमस्वतन्त्रत्वं तेषामाहुर्मनीषिणः ।
जातिकर्म्मकृतस्तूक्तो विशेषो वृत्तितस्तथा ॥ ४ ॥
कर्म्मापि विविधं ज्ञेयमशुभं शुभमेव च ।
अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम् ॥ ५ ॥
गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ।
इच्छतः स्वामिनश्चाङ्गरूपस्थानमथाऽन्ततः ॥ ६ ॥

---

[1] The whole sentence has been corrected from conjecture. O.R. reads शुश्रूषकस्च पञ्चप्रकारा शिष्यान्तेवासीभृतकान्तेवासीभृतकोऽधिकमक्षतदास इति .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अशुभं कर्म्म करोति स भृतकः। अधिकर्म्मकृत कर्म्म-कुर्व्वतामधिष्ठाता। अवस्करः सम्मार्ज्जनादि। तत्र शिष्यान्तेवासिदासानां जात्यादिकृतो विशेषो भवति। तत्र शिष्याणां ब्राह्मणक्षत्त्रियवैश्यान्यतमत्वमेव वेदग्रहणेऽधि-कारादिति। जातिकृतो विशेषस्य कर्म्मकृतं विशेषमाह स एव।

आविद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतो गुरुम्।
तद्वृत्तिर्गुरुदारेषु गुरुपुत्रे तथैव च ॥७॥
शिक्षितोऽपि कृतं कालमन्तेवासी समापयेत्[1]।
तत्र कर्म्म च यत् कुर्य्यादाचार्य्यस्यैव तत् फलम् ॥८॥

याज्ञवल्क्योऽपि—

कृतशिल्पोऽपि[2] निवसेत् कृतकालं गुरोर्गृहे।
अन्तेवासी गुरोः प्राप्तभोजनस्तत्फलप्रदः ॥९॥

अन्तेवासिनोदोर्म्भ्द्धेदं दण्डमाह नारदः—

शिक्षयन्तमदुष्टञ्च यस्त्वाचार्य्यं परित्यजेत्।
बलाद्दासयितव्यः स्याद्वधबन्धौ च सोऽर्हति ॥१०॥

वधोऽत्र ताडनं आत्मापराधत्वात्। कर्म्मकारप्रसङ्गेन दासस्वरूपमप्युक्तं कात्यायनेन—

स्वतन्त्रस्यात्मनो दानाद्दासत्वं दारवद्भृगुः ॥११॥

---

[1] Corrected from the quotation in *Vivādaratnākara* (B.I. 1931). O.R. reads नारदोपि शिक्षितो कर्म्मकृते विकाले॰.

[2] Corrected from the *Yājñavalkyasmṛti*. O.R. reads शिल्पोपि.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दासत्वं प्रातिलोम्येन तत्तथा च नारदः—

वर्णानां प्रातिलोम्येन दासत्वं न विधीयते ।
स्वधर्म्मत्यागिनोऽन्यच दारवद्दासता मता ॥ १२ ॥

दासत्वञ्च ब्राह्मणव्यतिरिक्तविषयम् ।

तथाच कात्यायनः—

प्रव्रज्यावसिता यच चयो वर्णा द्विजातयः ।
निर्व्वासं कारयेद्विप्रं दासत्वं क्षचविड्भृगुः ॥ १३ ॥
इति

दासत्वस्यापि परिहार उक्तो नारदेन—

चौरापहृतविक्रीता ये च दासीकृता बलात् ।
राज्ञा मोचयितव्यास्ते दास्यन्तेषु[1] हि नेष्यते ॥१४॥
इति

केषाञ्चित् दासीपुत्रादीनां निर्म्मोक्षः स्वामिप्रसादेन । नत्वन्यथा । तत्र विधिरुक्तः ।

स्वं दासमिच्छेद्यः कर्त्तुमदासं प्रीतमानसः[2] ।
स्कन्धादादाय तस्यासौ भिन्द्यात् कुम्भं सहाम्भसा
॥ १५ ॥
साक्षताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत् ।
अदास इत्यथोक्त्वा चिः प्राङ्मुखं तं समासृजेत् ॥१६॥

इति शुश्रूषाख्यव्यवहारपदप्रकरणम् ।

---

[1] Corrected from the *Nāradasmṛti*. O.R. reads दास्यतेष्यत .

[2] Supplied from the *Nāradasmṛti* for the completeness of the statement. O.R. omits this line and reads the following three only.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ संविद्व्यतिक्रमप्रकरणम् ॥ ७७ ॥

तल्लक्षणं नारदेन व्यतिरेकमुखेन दर्शितम् ।

पाषण्डिनैगमादीनां स्थितिः समय उच्यते ।
समयस्यानपाकर्म्म तद्विवादपदं स्मृतम् ॥ १ ॥

इति पारिभाषिकधर्म्मेण व्यवस्थानं समयः । तस्यानपाकर्म्माव्यतिक्रमः परिपालनम् । तद्व्यतिक्रम्यमाणं विवादपदं भवतीत्यर्थः ।

उपक्रमार्थं किञ्चिदाह याज्ञवल्क्यः—

राजा कृत्वा पुरे स्थानं ब्राह्मणान् न्यस्य तत्र तु ।
त्रैविद्यान् वृत्तिमद्ब्रूयात् स्वधर्म्मः पाल्यतामिति ॥२॥

अन्यदप्याह स एव—

निजधर्म्माविरोधेन यस्तु सामयिको भवेत् ।
सोऽपि यत्नेन संरक्ष्यो धर्म्मो राजकृतश्च यः ॥ ३ ॥

एतदतिक्रमणे दण्डमाह स एव—

गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः ।
सर्व्वस्वहरणं[1] कृत्वा तं राष्ट्राद्विप्रवासयेत् ॥ ४ ॥

अयमर्थः । गणद्रव्यं देवद्विजपरिपालनादि त्वया कर्त्तव्यं तदर्थं प्रतिज्ञानं तस्य हरणं संविदं परिभाषितधर्म्मेण व्यवस्थानन्तस्य लङ्घनं तस्य दण्डः राष्ट्राद्विप्रवासनं। स्वल्पापराधे देशकालाद्यपेक्षया दण्डो योज्यः ।

---

[1] V.R. reads ०ग्रहणं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कर्त्तव्यं वचनं सर्व्वैः समूहहितवादिनां ।
समूहकार्य्यप्रहितो यल्लभेत तदर्पयेत् ॥ ५ ॥

अन्यदप्याह स एव ।

श्रेणिनैगमपाषण्डिगणानामप्ययं विधिः ।
भेदञ्चैषां नृपो रक्षेत् पूर्व्ववृत्तिं च पालयेत् ॥ ६ ॥

एकपण्यशिल्प्योपजीविनः श्रेणयः, नैगमाः ये वेदस्य प्रामाण्यमिच्छन्ति । अ-प्रतीतत्वेन एवम्भूता अग्रहवत-वैष्णवादयः । पाषण्डिनो ये वेदप्रामाण्यं नेच्छन्ति सौगतादयः[1] । गणो व्रातः आयुधीयादिनामेककर्म्मोप-जीविनामेतेषां श्रेण्यादीनां भेदधर्म्मव्यवस्थां नृपो रक्षेत पूर्व्वोपात्ताञ्च वृत्तिं पालयेत् ।

इति संविद्व्यतिक्रमप्रकरणम् ।

---

[1] Conjectural. O.R. reads मौगनादयः .

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ वेतनादानप्रकरणम् ॥ ७८ ॥

तत्स्वरूपं नारदेनोक्तम्—

भृत्यानां वेतनस्योक्तो दानादानविधिक्रमः ।
वेतनस्यानपाकर्म्म तद्विवादपदं नृणाम् ॥ १ ॥ इति

[1]तत्र निर्णयमाह याज्ञवल्क्यः—

गृहीतवेतनः कर्म्म त्यजन् द्विगुणमावहेत् ।
अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः ॥ २ ॥

उपस्करः कृष्यादिसाधनानि ।

श्रुतिरपि तेनैवोक्ता[2]—

भृत्याय वेतनं दद्यात् कर्म्मस्वामी यथाक्रमम् ।
आदौ मध्येऽवसाने वा कर्म्मणो यद्विनिश्चितम् ॥३॥

इति वेतनादानप्रकरणम् ।

---

[1] O.R. reads the matter from here to the end of this page between the topics स्त्रीसंग्रहण and द्युतसमाह्वय.

[2] V.R. quotes the following verse as a text of Narada.

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

# अथ विक्रीयासम्प्रदानम् ॥ ७६ ॥

[1]प्रासङ्गिकं समाप्य विक्रीयासम्प्रदानमुच्यते ।

तत्स्वरूपं नारदेनाभिहितम्—

विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥ १ ॥

[2]तस्यासम्प्रदाने दण्डमाह याज्ञवल्क्यः—

गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ।
सोदयं तस्य दाप्योसौ दिग्लाभम्वा दिगागते ॥२॥

यदा मूल्यह्रासः कृतः पण्य सोदयो नास्ति तदानीं सोदयो दाप्यः ।

अपिच—

राजदैवोपघातेन पण्ये दोषमुपागते ।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥ ३ ॥

इति विक्रीयासम्प्रदानम् ।

---

[1] O.R. reads the matter from here to the end of the first verse of this page within the रजकदण्ड topic, chap. 87.

[2] There are obvious lacunæ here in O.R.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ सम्भूयसमुत्थानम् ॥ ८० ॥

तथाच याज्ञवल्क्यः—

समवायेन वणिजां लाभार्थं कर्म्म कुर्व्वताम् ।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ ॥१॥

किञ्च—

प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम् ।
स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक् ॥ २ ॥

किञ्च—

जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत् ।
अनेन विधिनाख्यातं ऋत्विक् कर्षककर्म्मिणाम् ॥३॥

अपिच—

तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् दश ।
ब्राह्मणः प्रतिवेश्यानामेतदेवाभिमन्त्रणे ॥ ४ ॥

इति सम्भूयसमुत्थानप्रकरणम् ।

---



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ स्तेयम् ॥ ८१ ॥

तत्स्वरूपं नारदेनाभिहितम् ।

उपायैर्विविधैस्तेषां छलयित्वापकर्षणम् ।
सुप्तमत्तप्रमत्तेभ्यस्तेयमाहुर्मनीषिणः ॥ १ ॥ इति

छलयित्वा वाचा नेति वदति (?)।

तत्र ग्रहणोपायमाह याज्ञवल्क्यः—

ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन च[1] ।
पूर्व्वकर्म्मापराधी च तथा चाशुद्धवासकः ॥२॥ इति

लोप्त्रेणापहृतभाजनादिना चिह्नादिना वा चौरोऽयं ज्ञातव्यः । परीक्षणेऽपि चौर्य्यशङ्कया आत्मा शोधनीयः[2] ।

गृहीतः शङ्कया चौर्य्ये नात्मानं चेद्विशोधयेत् ।
दापयित्वा हृतं द्रव्यं चौरदण्डेन दण्डयेत् ॥ ३ ॥

आत्मशुद्धिस्तु दृष्टादृष्टप्रमाणेन करोति दानद्रव्यं स्वामिनो दापयित्वा यो यो दण्डः कर्त्तव्यः ।

दण्डोऽपि [3]मनुनोक्तः—

साहसेषु य एवोक्तस्त्रिषु दण्डो मनीषिभिः ।
स एवं दण्डः स्तेयेऽपि त्रिषु द्रव्येष्वनुक्रमात् ॥ ४ ॥

---

[1] The highly erroneous reading of O.R. corrected from the *Yājñavalkyasmṛti*.

[2] Conjectural. O.R. reads शोचनीयः.

[3] The following verse is not found in the printed *Manusaṃhitā*. V.R. quotes it as a text of Narada.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अत्र देशकालावयवस्थान[1]द्रव्यादि सर्व्वं द्रव्यं[2] विचिन्त्य मौल्यानुसारेण दण्डः कल्पनीयः। दोषो नानादण्डविशेष उक्तो याज्ञवल्क्येन—

विप्रदुष्टां स्त्रियञ्चैव पुरुषघ्नीमगर्भिणीम्।
सेतुभेदकरीञ्चाप्सु शिलां वध्वा प्रवेशयेत्॥५॥

अयं दण्डः ब्राह्मणव्यतिरिक्ते।

प्रकारान्तरमप्युक्तं तेनैव—

विषाग्निदां पतिगुरुनिजापत्यप्रमापणीं।
विवर्णकरनासौष्ठीं कृत्वा गोभिः प्रमापयेत्॥६॥

इति स्तेयप्रकरणम्।

---

[1] Conjectural. O.R. reads स्थानद्रव्यादि.

[2] Conjectural. O.R. reads द्रव्या.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ स्त्रीसंग्रहणाख्यविवादपदम् ॥८२॥

तत्र प्रथममध्यमोत्तमदण्डप्राप्त्यर्थं[1] स्त्रीपुंसयोर्ग्रहणोपायमाह याज्ञवल्क्यः—

पुमान् संग्रहणे ग्राह्यः केशाकेशि परस्त्रियाः ।
सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा ॥ १ ॥

किञ्च—

नीविस्तनप्रावरणसक्थिकेशावमर्शनम् ।
अदेशकालसम्भाषं सहैकस्थानमेव च ॥ २ ॥

तत्र प्रथमसाहसादिस्वरूपं व्यासेनाभिहितम्—

त्रिविधं तत्समाख्यातं प्रथमं मध्यमोत्तमम् ।
अदेशकालसम्भाषा निर्ज्जने च परस्त्रियाः ।
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम् ॥ ३ ॥
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् ।
प्रलोभनञ्चान्नपानैर्मध्यमं समुदाहृतम् ॥ ४ ॥
सहासनं विविक्तन्तु परस्परममाश्रयः ।
केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतम् ॥ ५ ॥

स्त्रीपुंसयोर्मिथुनीभावः संग्रहणम् ।

तत्र दण्डमाह याज्ञवल्क्यः—

स्वजातौ तूत्तमो दण्ड आनुलोम्येन मध्यमः ।
प्रातिलोम्ये वधः पुंसो नार्य्याः कर्णादिकर्त्तनम् ॥ ६ ॥

एवं गम्यागम्यविचारम् ।

---

[1] Conjectural. O.R. reads ०प्रात्समर्थं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

न दण्डोऽपि......द्विवादपदं स्मृतमिति ।
दोषतारतम्येन नन्विवारणीयः (?) ।

इति स्त्रीसंग्रहणप्रकरणम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# अथ द्यूतसमाह्वयाख्यं विवादपदम् ॥८३॥

तत्स्वरूपं नारदेनोक्तम्—

अक्षवध्रशलाकाद्यैर्देवनं जिह्मकारितम् ।
पणक्रीडा वयोभिश्च पदं द्यूतसमाह्वयम् ॥ १ ॥

मनुना त्वेतदुक्तम्—

अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः ॥२॥ इति

वध्रश्चर्म्मपट्टिका ।

एवम्भूते द्यूते कर्त्तव्यमाह याज्ञवल्क्यः—

प्राप्ते नृपतिभागे तु[1] प्रसिद्धे धूर्त्तमण्डले ।
जितं ससभिके स्थाने दापयेदन्यथा न तत् ॥ ३ ॥

धूर्त्तमण्डले कितवसमासे ससभिके दत्तराजांशे कितवजितं पणं दापयेत् । जयपराजयविप्रतिपत्तौ निर्णयोक्तं याज्ञवल्क्येन—

द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि ।
राज्ञा सचिह्नं निर्व्वास्याः कूटाक्षोपधिदेविनः[2] ॥४॥

क्वचिद्द्यूतं निषेद्धुं दण्ड[3]माह नारदः—

कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत् ।
कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः ॥ ५ ॥

विनयो दण्डः । मनुना द्यूतनिषेधः कृतः ।

---

[1] The *Yājñavalkyasmṛti* reads नृपतिना भागे.
